[illegible]

[illegible]

[illegible]

[illegible] सर्वक्रियाणि [illegible]

[illegible]

[illegible]

[illegible]

[illegible] क्रियाव [illegible]

श्रीनवासिद्धायनमः

अथ

प्रक्रियाकौमुदी

[illegible]

११ मं ३६ मे २७ बु ५३ भ ३ नि ३३ [illegible] के ५५ ना २५ के ने व र
१२ बु [illegible] ३३ सि [illegible] कौ ८ ना २७ [illegible]
१३ गु [illegible] ३४ [illegible] २२ अ र क
१४ शु ५९ [illegible] ना २७ [illegible]
३० शं ५६ [illegible] ५३ [illegible] २८ [illegible]

[illegible]

१ [illegible] ५३ [illegible]
[illegible] अमृत
[illegible]
[illegible] ना ८ [illegible]
[illegible] नि २७ अ [illegible]
[illegible] ना ८ [illegible]
[illegible] ना २ [illegible] सिद्धि
[illegible] वि २२ [illegible]
[illegible] वि २७ अ
[illegible]
[illegible] अ [illegible]
[illegible]
[illegible] ना २७ [illegible]
[illegible] ३३ [illegible]
[illegible]
३ बु [illegible] वि ३३ [illegible]
[illegible] ३३ [illegible]
[illegible]

वद्य [illegible]
१ [illegible] २५ [illegible]
२ [illegible]
३ [illegible]
[illegible] ५३ [illegible]
५ [illegible] २८ [illegible]
६ [illegible] ३३ [illegible] कौ ५ [illegible] ना ११
७ सो २८ [illegible] २३ सो ३४ [illegible] ना १२ अमृतयोग
८ मं २३ [illegible] ना ७ [illegible] योग
[illegible] योग [illegible]
१० [illegible] ना ११ [illegible] ना ११ अमृत
११ [illegible] ५३ [illegible] ना १८ [illegible] योग
१२ [illegible] २० [illegible]
१४ [illegible] ५३ [illegible] वि २२ [illegible]
[illegible]
[illegible]
२ [illegible] योग
३ [illegible]
[illegible] अमृत
[illegible]
[illegible] अमृत
[illegible]
[illegible] योग [illegible]

[illegible]

नरहरि

प्रक्रिया कौमुदी पूर्वार्धम्

०॥श्रीलक्ष्मीनृसिंहाय नमः॥ ॥श्रीवेदव्यासाय नमः॥ ॥श्रीगणाधिपतये नमः॥ ॥अविघ्नमस्तु॥ ॥श्रीमद्विठ्ठलमेकमद्वयमजं शुद्धात्मकं ब्रह्म
प्र०स० यः स्वे काले जगदुद्भवस्थितिलये हेतुः स्वमायागुणैः॥ यत्त्वामं श्रुतिसंततिर्व्यवदृशत्तं पुंडरीकाश्रमे ज्ञात्वा तत्परहृद्धृदि तु नः स्थितमहं वंदे मुदे सं
प०१॥ विदे॥१॥ श्रीशंभुपाणिनिमुनी वररुचिमपि वाक्यसंस्कृतौ दीक्षितं श्रीशेषं तद्भाष्यहार्दप्रकटनपटुगीः पंडितान्भर्तृमुख्यान्॥ वृत्तिन्यासादिकर्तॄन्
स्वमतपरमतख्यापकान्श्रीजदुर्गक्षीरस्वामिप्रमुख्यान्प्रगुणनतिकृतेऽत्र स्मृतज्ञप्तिहेतोः॥२॥ किं शेषः पाणिनिर्वा वररुचिरथवा सर्वविद्याप्रयो
क्ताशंभुर्भेमावक्त्रेऽद्भुतकृतितिलको यो देशग्रंथवेशः॥ ऋग्वेदी सर्वशास्त्रप्रकटनपटुधीः कृष्णजो रामचंद्रोऽनेनाचार्यप्रपोत्रो दिशतु कृति
मतिमेसकौंडिन्यगोत्रः॥३॥ वंदे तं यतिहंसवंदितपदं श्रीराघवेंद्रादियन्नामा भातिसरस्वतीपदपरं वादींद्रविद्रावकं॥ योविद्याः समदात्कुलुदे
शमुदा श्रीशेषकृष्णाभिधः काशिष्येभ्योमयि यत्कृपात्तिसततं तेस ... संविज्ञये॥४॥ लोके स्मिन्यदुपक्रमं चरितृनीत्योदार्यलोकज्ञता विद्वत्ता
प्रकृति स्वमास्तु जनता वेदोक्तधर्मादरं॥ आचार्येकृतकालनिर्णयमहाग्रंथार्थसद्दीपिकाटीकं तं नरसिंहमात्मजनकं वंदे विदां संमतं॥५॥ गंभी
रार्थामितोक्त्याकलितसकलसच्छब्दरत्नाकरो श्रीशेषो कृत्न्यायगर्भां स्वपरमतयुतां प्रक्रियाकौमुदींतां॥ व्याकुर्वन्बुद्धिहीनोयदपि तदपि तन्नु श्री॥
न्याद न्त्रोरामचंद्राचार्यांघ्रिः पादरसाकरणगुणतया सज्जनैर्नोपहास्यः॥६॥ तथा च पंडितंमन्यैः प्रक्षेपैर्मलिनीकृता॥ प्रक्रियाकौमुदी तस्याः ॥१॥
शोधः क्रियते मया॥७॥ सारस्वतानुमुपेक्षितानि कतिचिद्धात्र ख्यातकत्वत्वतो रामाचार्यवरेरमूनि विशदं व्याख्याभिरस्त्राल्पहं॥ ग्रंथेस्मिन
वरसाधनं कनिपयतो एणादिकाख्यकवेस्थाने तांश्चगणान्यथामति तथान्यायान्पदैः स्वचितान्॥८॥ टीकेयं विपुलेति येन विदुषा संक्षि
प्तेनतस्य ज्ञोल्लाकृःक्विंतु समीहिताः पुनरमी सर्वे विशेषा हृताः॥ येनास्माभिरनेकसूरिरचितग्रंथार्थमालोड्य तत्सारं मूलगतं विशेषविदुषां
प्रीत्यै प्रकाशीकृतं॥९॥ तत्र तावत् प्रक्रियाकौमुदीं चिकीर्षवः श्रीरामचंद्राचार्याः तत्समाप्तिप्रचयगमनाथ्यां शिष्टाचारपरिपालनाय चाविशि
ष्टदेवतागुरुप्रणामलक्षणं कृतं मंगलाचरणं शिष्यशिक्षार्थमुपनिबध्नंतो विषयप्रयोजनसंबंधाधिकारिणश्च सूचयंतः प्रतिजानते॥ ॥

॥श्रीमद्विट्ठलमिति॥श्रीयंसेतोसर्वइतिश्रीर्लक्ष्मीः॥ ॥किंच विश्वप्रख्यायतस्तु कटप्रकुम्भीणां दीर्घो प्रसारणं वेति कर्मणि क्विप् दीर्घश्च॥सा श्रीर्ल
क्ष्म्यस्मिन्नस्तीति श्रीमान्॥ मंगलादीनि मंगलमध्यानि मंगलांतानि च शास्त्राणि प्रथंते इति मांगलिके शब्दे प्रयोज्ये ग्रंथादौ श्रीशब्दप्रयोगः॥ एतदुक्तं
णां लक्ष्मीसोमान्यादि इत्यादिस्थितदर्थे। तथा च वार्त्तिककारेणादौ प्रयुक्तोयः सिद्धशब्दस्तद्व्याख्यासमये भाष्यकृतोक्तं॥ मांगलिक आचार्यो महतः
शास्त्रौघस्य मंगलार्थं सिद्धशब्दमादितः प्रयुक्ते मंगलादीनि हि शास्त्राणि प्रथंते वीरपुरुषकाणि भवंति आयुष्मत्पुरुषकाणि चाध्येतारश्च
वृद्धियुक्ता यथा स्युरिति। एतच्च कारेणाप्यादौ प्रयुक्तो यो वृद्धिशब्दस्तद्व्याख्यासमये मांगलिक इत्याद्युक्त्वा वृद्धियुक्ता इत्युक्तं।वेदनं वित्तज्ज्ञानं संपदा
विज्ञादेः क्विप्। वितगाः शून्याः वः शून्ये च बहुहेधना वित्यभिधानात्। तान् लाति आदत्ते आत्मीतया गृह्णातीति ला आदाने। आस्मादातोनुपस
र्गेकइति कप्रत्ययः अज्ञानुग्राहक इत्यर्थः। तथा च श्रीरामचंद्राचार्यैर्निरुक्तं।विदां ज्ञानेन गम्यत्वात् लाति गृह्णाति यः स्वयं। अज्ञानुग्राहक
हेतोर्विट्ठलः कथ्यते बुधैरिति। अनेन भगवतः पुरुषधर्मत्वेपि आज्ञानुग्राहकत्वं ... श्री। विट्ठलं नमतो भवतीति ... शानवकाशः स्वचितः तं श्रीमद्वि
ट्ठलं। पाणिन्यादिमुनीन् पण व्यवहारे स्तुतौ च। पणनं पणः पणोस्यास्तीति पणी पणिनोऽपत्यं पाणिनस्तस्यापत्यमिति पाणि॥ गाथिविदथिकेशि
गणि पणिनश्चेति प्रकृतिभावाट्टिलोपाभावः पाणिनस्यापत्यं पाणिनो युवेति विवेकिते ... इञ पाणिनिः आदिर्येषां ते पाणि
न्यादयः ते च ते मुनयश्च मननशीलाः मुनयः मनेरुच्चोपधाया इति इत्तल उपधाया उकारश्च। तान् पाणिनि वररुचि ... मुनीन् गुरुं
श्च गणेत्युपदिशतीति गुरुः॥ कृगृ... तिग्दशाहेत्यस्मात् उत् उकारश्चान्तादेशः ... गुरवो माधवपिता चार्यविद्यादातत्वेन ... त
र ... श्रीमद्वल्लभाचार्याः ... तान् श्री गुरून् ... नमस्कृत्य ... सर्वेकेन्तो
॥नत्वा श्रीमद्विट्ठलं पाणिन्यादिमुनीन् गुरून् नित्यं तेषां प्रत्येकमानमस्यत्वेकत्वादि ... यथा ... समुच्चयोस्ति ... तद्योतकेन पदेन ... ॥ उ
च्यते॥ गुरुदेवतयोरेकाधिकरण्यं ... प्रयुक्तं। तथा च नृसिंहाचार्य ... कालनिर्णयदीपिकाविवरणाय च तच्छो ... रामचंद्राचार्यकृतिभिः

प्र० कौ०
प्रसा०

अन्वसमुच्चयद्योतकाव्यथा चार्थे गुरुदेवते कामं त्वाचार्याणां मज्जीप्सितमिति द्वितीयेऽर्थे तथा च तेषां मज्जिप्रायो गुरुस्तु नैतादृश्यत इत्यतो ॥ तद्धि द्यानिरु
यः सदागमगुरुः सर्वं वदायायशालीः स हृर्मलिनि नुल्लमस्य पवेष्टक्तस्यः सतो संमतः सारासारविविक्तमस्त गुणायुक्तं सत्यसिंधोस्वामि
ः श्रीशेषपालगुरुः सदा श्रलु सन्नः श्रीविट्ठलोयः स्वयंमिति । तद्धि द्यानिरुढ यद्यस्य स्विन्यदेवो श्रीविट्ठलोयः स्वयमित्यपि हितत्वात् गुरुदेवते कं
लु आचार्यं मां विजानीयान्नावमन्येत कर्हिचित् इत्यादि श्रीभागवतेऽपि प्रसिद्धं । एकवचनद्विवचनयोः सामानाधिकरण्ये तु वेदाः प्रमा
णमित्यादौ न लिङ्गमिति । प्रक्रियाकौमुदीं ॥ प्रक्रियते प्रकृतिप्रत्ययादिविभागेन व्युत्पाद्यते शब्दोऽनयेति प्रक्रिया कृञः शश्चेति करणे
अप्रत्ययः । रिङ् शयग्लिङ्क्षु इति रिङ् तासु कौमुदी ॥ संज्ञायामिति समीलस्य सुरूपः कौमुदी च कौमुदी सुखं जनयन्ती सर्वेषां ह्लादप्रकाशिका ।
यथा प्रक्रियाकौमुदीव प्रक्रियाकौमुदी उपमितं व्याघ्रादिभिः इति समासः ॥ तां कुर्वे । डुकृञ् करणे अस्मात् अस्मदो द्वयोश्चेत्यस्य एकत्वेऽपि
लिटश्च बहुवचनविधानात् अस्मदर्थं कर्तृवाचिनः उत्तमपुरुषस्य बहुवचने । परोपकारार्थं ग्रन्थकरणे प्रवृत्तत्वात् आत्मनेपदं यत् श्री ॥
नोचितं यदा स्वरितञितः कर्त्रभिप्राये क्रियाफले इति आत्मनेपदस्य सिद्धौ नियतत्वात् गुरुसमर्पणमिति भगवद्गुरोः ईश्वरार्पितत्वात् परगामि क्रियाफलमित्य ॥३॥
पदे प्रकृतमाचार्यवर्यैः पाणिनीयानुसारिणीं । पाणिनिना प्रोक्तं पाणिनीयं । अथवा पाणिनिनो युवापत्ये विनोपदेशे ज्ञाने पाणिनीयं
करणं प्रोक्तार्थे उपज्ञाते इत्यतो वाह्ह्यालृइति शैषिकः छः । ननु च पाणिनस्यापत्यं पाणिनो युवापत्यं वा पाणिनिस्तेन प्रोक्तमुपज्ञातं वेत्यर्थे
ण्यक्षत्रियार्षञितो यूनि लुगिति इञो लुकि प्रत्ययलक्षणेन इञश्चेत्यण् स्यात् । मैवं । इञश्चेत्यत्र केवलाद् इञो गोत्र इत्यतो गोत्र इत्यनुवर्तते । अतो गो
त्रे यद् इञ् विहितं तदन्तादण् स्यादित्यर्थः । तत्र च पारिभाषिकं गोत्रं गृह्यते ॥ अयं च युवप्रत्ययान्तो नातस्तन्नाण् । पाणिनीयमनुसर्तुं शीलं यस्याः सा पा
णिनीयानुसारिणी । तां सुप्यजातौ णिनिस्ताच्छील्ये इति णिनिः । सुपि स्थ इत्यतः सुपीत्यनुवर्तमाने पुनः सुब्ग्रहणं उपसर्गनिवृत्त्यर्थमि
ति केचित् तच्चोपसर्गस्य निवृत्त्यर्थं द्रष्टव्यं । अन्यथा अजातावितिकिं ब्राह्मणानामन्त्रयितेति न भुज्यते । आङो यस्योपसर्गत्वात् । तथा च

ऋद्धिकाव्ये प्रयोगः। सकर्मेठः कर्मस्तुतानुबंधीति। तथा रघुवंशेपि त्वमरैः कुसुमानुसारिभिः परिकीर्णा परिवादिनी मुनेरिति। अथवा सुपि
स्थ इत्यतोनुवर्त्तमाने सुपग्रहणं सकृत् द्विषेति सूत्रस्थोपसर्गग्रहणेनानुपसर्गार्थमिति ज्ञापितं। सुप्यजाताविति पुनः सुपग्रहणं सुपमात्र
विषयमिति णिनिः। तथा च महाभाष्ये उक्तं सुपीति वर्त्तमाने पुनः सुपग्रहणं किमर्थं अनुपसर्गं इत्येवं तदभूत्। इदं सुपप्रमात्रे यथा स्यात्। उदा
सारिण्यः प्रस्थासारिण्य इति॥ ॥इति श्लोकार्थः॥ ननु ग्रंथादौ श्रोतृप्रवृत्तये प्रयोजनादि वक्तव्यं। तथा चोक्तं। सिद्धार्थं ज्ञातसंबंधं श्रोतुं श्रो
ता प्रवर्त्तते। शास्त्रादौ तेन वक्तव्यः संबंधः सप्रयोजन इति। सत्यं। ननु प्रक्रियाकौमुदीमित्यनेनैव सूचितं। तथा हि प्रकृतिप्रत्ययादिविभा
गेन शब्दव्युत्पादनं कुर्वता प्रक्रियाशब्देन महाभाष्यकारोक्तं साक्षात्प्रयोजनं शब्दानुशासनमेव सूचितं॥ शब्दानुशासनं च प्रकृत्यादिविभा
गेन शब्दव्युत्पादनं। तथा चोक्तं। विविक्ताः साधवः शब्दाः प्रकृत्यादिविभागतः। ज्ञाप्यंते येन तच्छास्त्रमत्र शब्दानुशासनमिति। अर्थाल्लौकि
कवैदिकाश्च शब्दा अभिधेयाः। प्रतिपाद्यप्रतिपादकभावः संबंधः॥ शब्दव्युत्पित्सुरधिकारी॥ शब्दानुशासनप्रयोजनानि तु महाभाष्ये
उक्तानि प्रक्रियेत्यनेनैव सूचितानि संक्षिप्योच्यंते। लोके दृष्टं वर्णलोपादिकं वेदे पश्यन् वैयाकरणो वेदं नाशयेदिति वेदरक्षार्थमध्येयं व्याकरणं।
वैदिककर्ममंत्राणां यज्ञेषु ऊहोस्ति प्रकृत्यादिविभागेन तज्ज्ञापनार्थं स्वर्थं चाध्येयं। ब्राह्मणेन निष्कारणो धर्मः षडंगो वेदोध्येयो ज्ञेयश्चेति श्रुत्याअं
गत्वेन व्याकरणाध्ययनं विहितं। व्याकरणं हि श्रुतेर्मुखं। ब्राह्मणेन चावश्यं शब्दा ज्ञेयाः। ते चानंतत्वात् प्रतिपदपाठेन नशक्या ज्ञातुं। तथा च श्रूय
ते। दिव्यं वर्षसहस्रं इंद्रो बृहस्पतेः सकाशात् प्रतिपदपाठेन शब्दान् पठन्नांतं जगामेति। अतो लक्षणेनैव शब्दानुशासनं कार्यं इति लाघवार्थमध्येयं
व्याकरणं। स्थूलपृषती मालभेतेत्यादौ अवैयाकरणस्य संदेहः स्यात्। स्थूला चासौ पृषती च स्थूलपृषती स्थूलानि पृषंति यस्या इति। व्या
करणज्ञेन तु पूर्वपदप्रकृतिस्वरत्वेन बहुव्रीहिरेव निश्चीयते इति असंदेहार्थं चाध्येयं व्याकरणं। अन्यानि चोक्तानि व्याकरणप्रयोजनानि रे
फाः संधिस्तु नाभावाह्ने उयोभाविसोसुराः। म्लेच्छनेन पराभूतास्तज्ज्ञेयं व्याकरणं तेन दुष्टः शब्दः स्वरतो वर्णतो वा मिथ्याप्रयुक्तो न तमर्थमाह॥

प्र॰ भा॰
॥२॥

स वाग्वज्रो यजमानं हिनस्ति यथेंद्रशत्रुः स्वरतोपराधात्। इंद्रस्याभिचारस्य त्वष्ट्रारब्धः। तत्र इंद्रशत्रुर्वर्द्धस्वेति मंत्र ऊहितस्तत्र [illegible]
[illegible] तत्पुरुषार्थः। ते इंद्रस्य शातयिता [illegible] वेत्यस्यार्थस्य ज्ञापनाय तत्पुरुषः [illegible] अंतोदात्ते प्रयोक्तव्ये आद्युदात्तो बहुव्रीहिर्यानक
[illegible] तत्र इंद्र एव शत्रुरस्य शातयिता स पन्न इति हि वृत्रमिंद्रशत्रुः इंद्रो हतवान्। स्वरापराधात्। यस्तु प्रयुंक्ते कुशलो विशेषे शब्दा
न् यथावद्व्यवहारकाले। सो नंतमाप्नोति जयं परत्र वाग्योगविद्दुष्यति चापशब्दैः। अविद्वांसः प्रत्यभिवादे नाम्नो ये न प्लुतिं विदुः। कामं तेषु
तु विप्रोष्य स्त्रीष्विवायमहं वदेत्। यो वा इमां पदशः स्वरशो ऽक्षरशो वाचं विदधाति स आर्त्विजीनो भवति [illegible] इत्यध्येयं व्याकरणं।
[illegible]पि। चत्वारि शृंगा त्रयो अस्य पादा द्वे शीर्षे सप्त हस्तासो अस्य। त्रिधा बद्धो वृषभो रोरवीति महो देवो मर्त्यां आविवेश। एतद्व्याख्यानपरे
[illegible] नामाख्यातनिपातोपसर्गाः शृंगाणि [illegible] कालत्रयात्। कार्यं नित्यश्च [illegible] सप्त विभक्तयः [illegible] उरःकंठशिरो
[illegible] वृषभः कामवर्षणात्। महान् देवो महत्त्वाद्यज्ञातः स्यादिति च श्रुतिः। अपरा चत्वारि वाक्परिमिता पदानि तानि विदुर्ब्राह्मणा ये मनी
षिणः। गुहा त्रीणि निहिता नेंगयंति तुरीयं वाचो मनुष्या वदंति। एतद्व्याख्यापदं [illegible] मेव। नामाख्यातनिपातोपसर्गा [illegible] ॥
एकैकस्य चतुर्णामामन्ये विद्वांस इत्यपि। अन्यापि। उत त्वः पश्यन्न ददर्श वाचमुत त्वः शृण्वन्न शृणोत्येनां। उतो त्वस्मै तन्वं विसस्रे जायेव
पत्य उशती सुवासाः। उत त्वोप्यर्थः [illegible] न्यार्थः। उत त्वः अप्येकः अज्ञातवाक्तत्वार्थः पश्यन्नपि [illegible] रूपमुपलभमानो
[illegible] न पश्यति दर्शनफलाभावात्। उत त्वः अप्येकः अज्ञातवाक्तत्वार्थः शृण्वन्नपि [illegible]
[illegible] णां वाचं न शृणोति। श्रवणफलाभावात्। उतो त्वस्मै अप्येकस्मै विज्ञातवाक्तत्वार्थाय तन्वं स्वशरीरं सुवासाः [illegible]
[illegible] एवं वाग्वाग्विदे स्वमात्मानं विवृणुते इत्यध्येयं व्याकरणं। अन्यच्च याज्ञिकाः पठंति। आहिताग्निरपशब्दं प्रयुज्य
प्रायश्चित्तीयां सारस्वतीमिष्टिं निर्वपेदिति प्रायश्चित्तीया मा भूमेत्यध्येयं व्याकरणं। दशम्युत्तरकालं पुत्रस्य जातस्य नाम विदध्याद्घोषवदा

भा॰
॥२॥

द्यं तरं तस्थं त्रिपुरुषानूकमनरिप्रतिष्ठितं तद्धि सुप्रतिष्ठिततमं भवति द्व्यक्षरं चतुरक्षरं वा न्कृतं कुर्यात् न तद्धितमिति श्रूयते। न चांतरेण व्या
करणं कृतस्तद्धिता वा शक्या विज्ञातुमिति ज्ञेयं व्याकरणं। एकः शब्दः सम्यक् ज्ञातः सुप्रयुक्तः स्वर्गे लोके कामधुक् भवतीति च श्रुतिरप्युदा
र्यं शब्दप्रयोगं वदंतीति तज्ज्ञानार्थं व्याकरणाध्येयतामाह॥ ॥मनुरप्याह॥ ॥यश्च व्याकुरुते वाचं यश्च मीमांसतेध्वरं॥ तावुभौ पुण्यकर्माणौ
पंक्तिपावनपावनौ। शब्दब्रह्मणि निष्णातः परं ब्रह्माधिगच्छतीति च। अन्यैरप्युक्तं। उपासनीयं यत्नेन शास्त्रं व्याकरणं महत्॥ प्रदीपभूतं
मिद्यानां सर्वासां यदवस्थितं॥ इदमाद्यं पदस्थानं सिद्धिसोपानपर्वणां। इयं सा मोक्ष्यमाणानां अजिह्मा राजपद्धतिः। रूपांतरेणादेवास्ते वि
चरंति महीतले। ये व्याकरणसंस्कारपवित्रितमुखा नरा इत्यादि। तत्स्थितं साधुशब्दप्रतिपादकं व्याकरणमध्येयं। साधुत्वं चोक्तं। अनप
त्त्वत्वानादिर्यद्वाभ्युदययोग्यता। व्यक्तिर्वा व्यंजनीया वा जातिः कापीह साधुता। अनिदंप्रथमाः शब्दाः साधवः परिकीर्तिताः। त एव शक्ति
वैकल्यप्रमादालसतादिभिः। अन्यथोच्चारिताः ईरिरपशब्दा इतीरिताः॥ स्मारयंतश्च ते साधूनर्थधीहेतवः स्मृताः॥ अन्यच्च। यान्त्वेताः
स्वेच्छया संज्ञाः क्रियंते टिघुभादयः। कथं नु तासां साधुत्वं नैव ताः साधवो मताः। अनपभ्रंशरूपत्वान्नाप्यासामपशब्दता। हस्तचेष्टा यथा लो
के तथा संकेतिता इमाः। तत्र च। तासां प्रयोगेभ्युदयः प्रत्यवायोपि नो भवेत्॥ लाघवेनार्थबोधार्थं प्रयुज्यंते तु केवलं॥ ॥इति प्रयोजनसंक्षेपः॥
अत्र हि केचित् ध्वनिव्यंग्यं वर्णात्मकं शब्दं नित्यं वदंति। अपरे स्फोटं। अपरे ध्वनिं। तत्र ध्वनिरनित्यः॥ तत्र वर्णानामभिव्यक्तौ उत्पत्तौ च सर्वप्रकारेण
सर्वेषामेकस्मिन् देशे काले वा चैकस्थानं न संभवति। एकैकस्य वर्णस्य वा वक्तृत्वे शेषाः स्मरोच्चारणमनर्थकं॥ अथैकस्मृतिगोचरा वर्णा अर्थवाचकाः
। तदा सरो रस इत्यत्र अर्थभेदो न स्यात्। तस्मात्पदानि वाक्यानि वा वाचकानि। तानि येन स्वमर्थं स्फुटयंति स स्फोटः। स च पदस्फोटो वाक्यस्फो
टश्चेति स्फोटवादिनो वैयाकरणाः। व्यक्तीनामानंत्यात् तत्र संबंधग्रहायोगात् जातिः शब्दार्थ इत्येके। जात्युपलक्षिता व्यक्तिरित्यन्ये। पाणि
निस्तूभयं मन्यते। विचारविशेषस्तु महाभाष्यात् वाक्यपदीयादेश्चावगंतव्यः। ननु व्याकरणप्रयोजनमेव चेदस्य ग्रंथस्य प्रयोजनं तत्किं सत्सुपं

प्र॰ स्व॰ यांतरे घनेनेत्यत आह। प्रक्रियाकौमुदीमिति। कौमुदीव कौमुदी। यथा कौमुदी सुखस्पर्शा सती सकलानर्थान् अभिव्यनक्ति एवमियमपि सुखेन
॥४॥ नयंती स्वल्पैरेव शब्दैः सकलान् शब्दानां जस्यान प्रकाशयति। अन्येऽपि हि ग्रंथाः महांतोऽतिगहना संतः सहसा शब्दान् प्रकाशयंते इत्येतदर्थं तत्र
प्रयोजनमस्याः। व्याकरणे तावद्बहवोऽभिधेयास्ते चानंतत्वात् प्रतिपदपाठेनाभिधातुं न शक्यंते। अतो लक्षणेनैवाभिधातुं शक्यं तदिति प्र-
क्रियाकौमुदीमित्यनेनास्याः सूचितं तत्र च लक्षणेनाभिधाने प्राप्ते सति पाणिनीयानुसारिणीमित्युक्तत्वात् पाणिनीयलक्षणान्युक्तत्वं वर्ण-
समुदायरूपशब्दानामनुशासनं करिष्यन् वर्णांश्च प्रत्याहारार्थं तत्रज्ञानार्थं चोपदेष्टुं पाणिनीयशास्त्रादित्वेन तानि वर्णसमाम्नायसूत्रा-
णि पठति॥ ॥अइउण् इत्यादि॥ ॥वर्णज्ञानेन हि महानभ्युदयः। तथोक्तं महाभाष्ये। सोऽयमक्षरसमाम्नायो वाक्समाम्नायः पुष्पितः
फलितश्चंद्रतारकवत्प्रतिमंडितो वेदितव्यो ब्रह्मराशिः सर्ववेदपुण्यफलावाप्तिश्चास्य ज्ञाने भवति माता पितरौ चास्य स्वर्गे लोके
महीयेते इति। अइउण्। एतानि चतुर्दशाक्षरसमाम्नायसूत्राणि महेश्वरेण शास्त्रस्य लक्ष्यप्रवृत्तये पाणिनये उपदिष्टानि। तथा चोक्तं
येनाक्षरसमाम्नायमधिगम्य महेश्वरात्। कृत्स्नं व्याकरणं प्रोक्तं तस्मै पाणिनये नम इति। तत्र संध्यक्षराणामसंदेहार्था। अर्थस्याविवक्षितत्वा- श्रीः
त्वादिह नोक्तो रस्तु स्वरितः। ओं दृश्यो वा सुपूलकं। छंदोवत्सूत्राणि भवंतीति सूत्राणां छंदस्त्वात्। वर्णात्कार इत्यत्र निर्देश इत्यनुवृत्तेर्यस्या- ॥४॥
श्रायमाणस्य प्रथमास्थो वर्णो निर्देश्यः प्रतिपाद्यस्तस्मात् वर्णात् कारप्रत्यय इत्यर्थः। अत्र चाद्यनुवर्तिसंपादन एव तात्पर्यं न तु कवित्प्रवृत्त्या
दोहस्थानाम कारादीनां प्रतिपादन इति कारप्रत्ययाभावः। अथवा वर्णात्कार इत्यत्र चकारोक्तेः कारप्रत्ययो न। चतुर्दशसूत्रेष्वंत्यमंत्य
मितं विधायेतराच्च वर्णाननुपदिशति॥ ॥ऋलृक्॥ ॥ननु अकाराद्युपदेशे प्रयोजनं प्रयोगज्ञाने। लृकारस्तु क्लृपावेव क्लृप्ध्वस्वे च
सिद्धमिति लृ-ऌस्योः सिद्धत्वात् ऋकार एव अत्र कार्यमिति स्फुटः। अतः लृकारोपदेशोऽनर्थक इति चेन्न। सर्वत्रापरमसिद्धं। ननु परिशिष्टम्
दी। एवं च क्लृपेरोल इत्यतः परत्वात् प्लुतस्त्वरितद्विर्वचनेनि नकारेभ्यो व्याप्तीत्युपदेशः। क्लृप्त शिखः गुणे रलंतइति प्लुतः। प्रक्लृप्तः॥

उदात्तादनुदात्तस्य स्वरितः। कृष्णवान्॥ अनचि चेति अचउत्तरस्य द्वित्वं। अन्यत्र। अशक्तिजानुकरणस्य साधुत्वमिष्यते। तत्र ऌकारो
रस्याच्कार्याय चोपदेशः। यथा कुमारी ऋतक इति प्रयोक्तव्ये ऌतक इत्याह। तदन्योनुकरोति कुमारी ऌतक इत्याहेति। अत्र ऌकारे इकारस्य
यणादेशः साधुः। ऐओङ्। ऐऔच्। प्रत्याहारेष्वनुबन्धानां कथमग्रहणमिति चेन्न॥ आचारादप्रधानत्वाल्लोपश्च बलवत्तरः। वर्णेषु ये वर्णैकदेशा
वर्णान्तरसमानाः कृतयः एकारैकारयोरकारेकारौ॥ ओदौतोरकारोकारौ॥ ऋकारे रेफः॥ ऌकारे लकारः॥ तथा आकारादिषु अका
रादयस्तेषु अकारादिकार्यं न॥ अग्नेएति अचएङः पदान्तादिति। अग्नेइदं गायेोउदकं। अग्नाकः सवर्णदीर्घ इत्यादिकार्यं न। कृतः
स्थायानुकारिणो हितेन तु नरवा। पृथक्प्रयत्ननिर्वर्त्यगो धेरः। डीरदानुः हि वर्णः। बुद्धिभिन्नादेशत्वेषु तु रेकारे कुचे शोभिरेफोव लेः
॥ अथवा तत्र प्रतिविधास्यते। आचू धनुः। ऌकृ तृणं॥ ॥ हयवरट्॥ ॥ अत्र रेफो यवाभ्यां परउपदिष्टोऽवोवेलिलोपार्थः। तो धेरः। डीरदानु
रल्यु हैव कारवर्जनार्थं वादिवित्वादिदेविषतिरध्वोः प्युपधादिति कित्त्वं न। ननु वेवं सति स्वर्नयतीत्य। नपरेऽनुनासिक इति सूत्रे हलो न स्या
द्रिफस्य णः स्यात् परं तन्नौवात्॥ मद्रङ्कदट स्यत्रा चोरहाभ्यामिति रेफस्य द्वित्वं स्यात्। कुंडं रथेनेत्यत्रानुस्वारस्य यथिपरसवर्णः स्यात् नारे
फस्य यत्वं तन्नौवात्॥ अत्रोच्यते॥ जातिपदार्थाभीकारात् जातौ प्रवर्त्तमाने अनुनासिकपरसवर्णो कुसलआन्तरीयकतया जातिमत्सु अ
क्तिषु प्रवर्त्तते। यत्र तु वचनान्तरेण न्यायेन वा बाध्यते तत्र न प्रवर्त्तते। तस्मात् स्थानेन्तरतमपरिभाषया तरतमस्यैव प्रवृत्तेः। अनुनासिकस्य
वर्णो अचनस्तः। यतो णकारस्य ऋटुरषाणां मूर्द्धेति रेफेण तुल्यस्थानत्वेपि भिन्नप्रयत्नत्वात् नान्तरतम्यं। तथा हि रेफः ईषत्स्पृष्टः। णः स्पृ
ष्टः। नाप्यनुस्वारस्य रेफोन्तरतमः भिन्नस्थानत्वात्। अनुस्वारस्य हि नासिका स्थानं। रेफस्य मूर्द्धा स्थानं। नापि द्वित्वं स्यात् अरोहाभ्यामिति
प्रत्यक्षविहितेन निमित्तत्वेन यरस्तन्नौवानुमितकार्यित्वबाधात् अन्यथा। ब्राह्मणान्ताडयन्नामाठर कौण्डिन्यो परिवेवेति आमित्रचेसाक्षाद्विहि
तेन परिवेषणे प्रतिसाधनत्वेन ब्राह्मणत्वानुमितताडनं प्रतिसाधनत्वं बाध्यते। एवं तर्हि इको यणचीत्यत्रेकः साक्षाद्विहितं कार्यित्वेन।

प्रा॰सू॰ ॥५॥

जेतन्नीवानुमितेनिमित्तत्वंबाध्येततत्तोदध्युदकमितिनस्यात्।नैषदोषः।व्यक्तिपदार्थयोगीकारात्।व्यक्तौहिपदार्थेप्रतिलक्ष्यंलक्षणप्र
वृत्तिः।तत्रयदिस्थानेदेशनिमित्तत्वंबाध्येततदादध्युकादिविषयलक्षणंव्यर्थंस्यात्।जातौतुपदार्थेसकृदेवलक्षणप्रवृत्तिर्नपुनःपुनः
तेनसकृत्प्रवृत्तस्यद्वित्वस्याकिंप्रत्यादौचरितार्थत्वात्मद्ध्वह्रदादावचरितार्थत्वेपिनानर्थक्यमिति।अटांमध्येविसर्गस्यष्पात्उपदेश्यः।
उरष्केणउरःकेण१उरष्पेणउरःपेण।अनाद्वाचायेणत्वंस्यात्इति।हलो।हकारेद्विरुपात्तोयमटिशल्यपिवांछता।अर्हेणाधुक्षदि
त्यत्रढत्वंसिद्धंभविष्यति।अर्हेणेत्यत्रअट्कुप्वाङ्नुम्इतिणत्वं।अधुक्षदित्यत्रशलइगुपधादनिटःक्सः।वर्णोपदेशप्रयोजनमाह॥
॥॥इतिप्रत्याहारसूत्राणीति॥॥प्रत्याह्रियन्तेसंक्षिप्यन्तेवर्णायस्मिन्नितिप्रत्याहारोऽणादिः।अथवाप्रतिकार्यमाह्रियन्तइति॥अथवा॥
प्रत्याह्रियन्तेसंक्षिप्यन्तेसंकोच्यन्तेइतिप्रत्याहाराअनादिसंज्ञाः।तदर्थानेतानिसूत्राणि।प्रत्याहारस्थलाघवेनशास्त्रप्रवृत्त्यर्थः।हकारादिष्वि
ति।उच्चारणार्थइत्यनेनोच्चारणेप्रयोजनेनिर्दिष्टेन्यायसिद्धत्वान्नोपादेयइतिसूचितमिति।तथाहिलोके।उदकाहरणार्थमुपात्तोघटस्त
स्मिन्निर्वृत्तेनोपादीयतेएवमिहापि।प्रत्याहाराच्चजिज्ञापयिषुरित्संज्ञासूत्रंपठति।उपदेशेइत्यादि।स्यादितिभवतीत्यर्थेतिङन्तप्रतिरूपक
मव्ययं।एवंस्युरित्यपिभवन्तीत्यर्थेव्ययंइत्यग्रेवर्तमानप्रयोगेषुज्ञेयं।ननुचात्रसर्वत्रशुद्धोच्चार्यतेनानुनासिकइत्याशंक्याहप्रतिज्ञेति।अ ज्ञो॥ ॥५॥
नुनासिकस्यभावस्त्वानुनासिक्यंप्रतिज्ञयाप्रतिज्ञामात्रेणसमधिगम्यंआनुनासिकोयंधातोप्रतिज्ञानुनासिक्याःपाणिनिनाप्रोक्तंशास्त्रंपा
णिनीयंतद्वृद्धाः।तद्विदन्तितदधीतेतद्वेदेत्यण्तस्यप्रोक्ताल्लुगितिलुकितेपाणिनीयाः।अयत्रानुनासिक्यंप्रतिज्ञानन्तेतत्रैवतदप्ययमानमपिभव
तिनान्यत्र।उपदेशशब्दार्थमाह॥धात्विति।धातुर्धातुपाठः।तत्रएधवृद्धावित्यादावकारादेरित्संज्ञादिउपदेशत्वात्॥सूत्रंसूत्रपाठः।तत्रढ्णि
त्यादौचतदेव।गणोगणपाठः।तत्रभवन्तुइत्यादावपितदेव।उणादिउणादिपाठः।तत्रापिवातेर्गत्याल्लीवहोडेभ्यःक्विप्तत्रातडःथोडु
षत्कारस्येत्संज्ञा।लिंगानुशासनमितिलिंगप्रतिपादकोग्रंथः।तत्रापिदुदन्तोमृच्छ्यादेस्तत्कारादेरित्संज्ञादिउपदेशकार्यंयथासंभवंज्ञेयं॥८

तेषांद्वंद्वःसमाहारेएकवद्वर्त्तते॥ उपदिश्यंतेयैस्तेइतिसाधनव्युत्पत्त्याएतेउपदेशाः। आगमः [illegible]मुडनुनो। घुरुइत्यादिनत्रोकारादेशस्त्वे। प्रत्ययः
सन्नादिः आदेशः चक्षिङःख्यानित्यादि। उपदिश्यंतइतिकर्मव्युत्पत्त्याएतेउपदेशाः। उपदेशेकिं। अभ्र आँ अपः। नायंस्वरूपेणोपदेशउ
च्चारितोऽनुनासिकः। किंतर्हि आङोऽनुनासिकश्छंदसीत्यनुनासिकशब्देनविहितः। इत्संज्ञेह्रस्वश्रवणंमाभूदितिलोपआरभ्यते। तस्येति।
तस्येत्यनेनसंज्ञकःपरामृश्यतेइत्याह। तस्येतइति। ननुउपदेशेऽजनुनासिकइदित्यतइदितिप्रथमांतमप्यनुवर्त्तमानमार्थेमेतुषष्ठ्या। निर्दिष्टं
स्याच्चेत्तस्येनप्रत्यनुवृत्त्यैवागतंकिंतस्येतिपदेन। उच्यते। आदिर्ञिटुडवइत्यत्रयावतइत्संज्ञानावतःसर्वस्यलोपार्थं। अन्यथालोपस्येति
ञ्रस्यस्यैवस्यात्। एतच्चनानर्थकेऽलोन्त्यविधिरित्यस्यानाश्रयेणोक्तं। णादयइति। अइउण्इत्यादिष्वंत्यदर्शनस्तेषुअंत्येनवर्त्तमा
ना हलः॥ हलंत्यं। उपदेशेऽजनुनासिकइदित्यतउपदेशइत्इत्येतेपदेअनुवर्त्तेतेस्वरितत्वादितिचेतसिद्धत्वाआहउपदेशेंत्यंहलित्यादि
ति। तथाचसूत्रं। स्वरितेनाधिकारः। स्वरितोनामस्वरविशेषोवर्णधर्मस्तेनलक्षणेनाधिकारोज्ञेयः। अधिकारोविनियोगः॥ स्वरितगुणयुक्तंशब्द
रूपमधिकृतत्वादुत्तरत्रोपतिष्ठते। प्रतिज्ञास्वरिताःपाणिनीयाः॥ हलुअव्ययलिंगत्वाद्धलंत्यमितिनपुंसकप्रयोगः। ननुचलकारस्यसंज्ञा
यांसत्यामादिरंत्येनसहेतेतिप्रत्याहारग्रहणंस्यात्सतिचतस्मिन्लकारस्यहलंत्यमितीसंज्ञा॥ नदितरेतराश्रयत्वंस्यात्। इतरेतराश्रय
णिचकार्याणिनप्रकल्प्यंतइतिचेत्। उच्यते। हलितिद्वितीयमात्रहल्ग्रहणंतंत्रेणोपात्तंद्रष्टव्यं। तथाचोक्तंन्यर्द्रहरिणा। आवृत्तिशास्त्रि[illegible]
र्थेवाक्येसकृदपिश्रुते। लिंगाद्वातंत्रधर्माद्वाविज्ञातोऽव्यवतिष्ठतइति। तेत्रैकेनहल्ग्रहणेनहस्यसमीपेयोलस्तस्यसंज्ञा। पश्चात्तद्वि
येनप्रत्याहारग्रहणेनसंज्ञेतिनेतरेतराश्रयदोषः लघूपायेनानुवृत्तिज्ञापनार्थमादस्त्रेवेद्धिति॥ व्याख्यायमानसूत्रेप्रदृष्टमस्माद्वित्रीच[illegible]
नंपदंस्वत्रांनरादन्यस्त्वादनुवर्त्तनीयमनुवर्त्तयेतदनुवृत्तंज्ञानीयादिति भावः। तथाचास्मिन्नेवसूत्रेस्पानिर्दर्शिते। आदिः। स्वंरूपंशब्दस्य
स्यनुवृत्तिसार्थक्यायाद्यंतशब्दौ। यांस्यामध्यात्मध्यपतितावर्णाएवसंज्ञित्वेनगृह्यंतेनाद्यंतशब्दौ। अन्यथान्यस्यसंज्ञिनोःनिर्देशादादित्वेन

सहितास्वस्यैवसंज्ञास्यान्नतु तच्चस्वस्वरूपमित्यस्यानुवृत्तिरपार्थिकास्यादित्यपि वस्यादुमध्यगानामिति।प्रत्येकंसंज्ञा न समुदायस्य।अन्यथा
तस्मादित्युत्तरस्येत्यादौ इकोयणचीत्यनेन यकारं यणादेशं न कुर्यात्।सदृशग्रहणमिष्टं।तेन तुल्यास्यप्रयत्नं सवर्णमित्यत्र तृतीयानिरासार्थं।अत्रैव न किं [illegible]
येवकस्वनेनटङ्स्यनेन माभूत्।स्वं रूपं शब्दस्याशब्दसंज्ञेत्यस्यायमर्थः।इह शास्त्रे स्वमेव शब्दस्वरूपं ग्राह्यं ज्ञेयं नार्थः।शब्दसंज्ञां वर्जयित्वा।
शब्दे व्याकरणे या संज्ञा तां वर्जयित्वेत्यर्थः।शब्देनार्थावगतेरर्थे कार्यस्यासंभवात्।तद्वा विनामर्थे प्रत्ययो माभूदिति सूत्रारंभः।अग्नेर्ढक्।
अत्र।[illegible] शब्देऽग्निशब्दस्य ग्रहणे कोन ज्वलनपावकादीनां पर्यायाणां।तेनाग्नेय इत्येव स्यात्।अशब्दसंज्ञा किं।घुघुकर्मादिसंज्ञा ग्रहणेनाधा
त्वरसमपृक्कर्तुरीप्सिततममादय एव गृह्यन्ते न दुधकर्मादयः।[illegible] चित्तु विशेषाणां पर्यायाणां च ग्रहणमिष्यते।विभाषा वृक्षमृगतृणधान्या
स्थाश्वदस्यति।[illegible] विहस्तादौ तद्विशेषाणां स्वपर्यायविशेषयोः।पर्यायस्येव राजादौ मनुष्यादौ तद्विशेषयोरिति तत्र तत्स्थाने षु वृत्तिपाठविष्यामः।
प्रत्याहारग्रहणं तु लाहरति।आदिरन्त्येन सहेता।अकारेण णकारेण सह इत्युच्चार्यमाणे णत्प्रत्याहारः स्यात्तन्मध्यगवर्णयोः वर्णयोग्रीहकोऽकारस्यापि।
एवं [illegible] अस्यान्प्रकारेणान्येन पि प्रत्याहाराः संज्ञातव्याः।तांश्च प्रत्याहारान्न नियमेन प्रसक्तान्नियमयति तेचेति।नङोति।तदिति न [illegible]
[illegible] णादिनि चतुर्दशसूत्राणां प्रत्याहारास्ते परामृश्यन्ते।तेन र प्रत्याहारस्तु वादिषु सत्स्वपि नियमः संगोन।तांश्च प्रत्याहारान् एकत्वा
[illegible] अण एक द्व्यौ षट्त्रिंशदेवकणामाः स्युर्झयोस्वयोश्चतुर्ज्यरः।पंचभ्यः शल्लौ षड्भ्य इति संग्रहश्लोकानुसारेण कथयति।एङिति।एङः
पूर्वान्तादिति यत्र।अनो दीर्घाय जि।अणःप्रदेत्तेति।अइउण् इत्यनेनाकेणः।कवुनः कुव्यप्रशान्।अइश्शछोटि।सप।जप।एकाचोबशो
[illegible] कषतस्य [illegible]।अकः।अकः सवर्णे दीर्घः।।इकुइकोगुणवृद्धी।उक्।उगितश्च।अण।अणुदित्सवर्णस्य चाप्रत्ययः।इण।इणकोः।[illegible]
[illegible]।एते अणादयो वणादय इत्यनेन णकारेण प्रत्याहाराः।अम।पुमः खय्यम्परे।यम।हलो यमां यमि लोपः।ङम।ङमो ह्रस्वादचि
ङमुण्नित्यं।अच।अचः परस्मिन्पूर्वविधौ।इच।इच एकाचोऽम्प्रत्ययवच्च।एच।एचोऽयवायावः।ऐच।वृद्धिरादैच्।यप।अनुस्वारस्य

ययि परसवर्णः । मय । मय उञो वो वा । झय । झयो होऽन्यतरस्याम् । खय । पुमः खय्यम्परे । पर । परेऽनुनासिकेऽनुनासिको वा । ङ्णः ... रो रि
सवर्णो खर । खरि च । चर । अभ्यासे चर्च । शर । शर्परे विसर्जनीयः । खयः । अश । नोन्दोभगोअघोअपूर्वस्य योऽशि । हश । हशि च । इण । ... इहत्वं । ... ङ्णः
झलो झलि । जश । झलां जश् झशि । वश । एकाचो वशो भष् झषन्तस्य स्ध्वोः । अल् । अलोऽन्त्यस्य । हल । हलन्त्यम् । वल । लोपो व्योर्वलि । रल । रलो व्युपधाद्धलादेः
संश्च । ञल । अलोऽन्त्य । लिश । ल । शल । इगुपधादनिटः क्सः । इति शब्दः प्रत्याहारसमाधिं द्योतयति । लकारस्थेति । लणिति सूत्रे लकारात्परोऽ
कारोऽनुनासिकः प्रतिज्ञायते तेनोपदेशे लिती हि रकारः स तेन सहोच्चार्यमाणो रेफ आदिरेत्येन सह इतेति र प्रत्याहारः स्यादित्यर्थः । रप्रत्याहारफ
लं उरणरपर इत्यत्र व्यवस्यते । ऊकालोऽच् । एकमात्रत्व द्विमात्रत्व त्रिमात्रत्वानां उ ऊ ऊ३ इत्येतावुकारे प्रसिद्धत्वादकारं परिसंख्याय उकारमादस्त्र उका
लः । ऊकालोऽज्झ्रस्वदीर्घप्लुतः इति द्वंद्वैकत्वं पुल्लिंगनिर्देशश्छांदसः । संज्ञात्रयविधानात्संज्ञिनोऽपि त्रय इत्याह उ ऊ ऊ३ इति तत्र प्रथमो मात्रिको
द्वितीयो द्विमात्रिकस्तृतीयस्त्रिमात्रः । ननु च उ३ इति प्रश्लिष्टनिर्देशो कथं ज्ञायते एषैवानुपूर्वीति ज्ञापकात् । स यथा हि । विभाषा पृष्टप्रतिवचने हेरि
ति प्रश्नस्य हेः प्लुतविधेर्ज्ञायते न मात्रिकोऽस्य इति । अन्यथा त्वेहि स तिलस्य प्लुतसंज्ञा स्यात् प्लुतस्य च प्लुतविधिरनर्थकः स्यात् । द्विमात्रोऽप्ययो न
अभ्याद्यान इति द्विमात्रस्य प्लुतविधेस्तस्मादस्य त्रिमात्रः । प्रश्ने त्रिमात्रिको न । अतो दीर्घो यञि इति दीर्घविधिः । यदि मध्ये स्यात् तस्य दीर्घसं
ज्ञा स्यात् । दीर्घस्य च दीर्घविधानमनर्थकं स्यात् । तस्मादाद्यो मात्रिकः । अन्त्यस्त्रिमात्रः । पारिशेष्यान्मध्यो द्विमात्रः । एकमात्रादिकालज्ञानेनु चा
षादिशब्दैः स्यात् । तथा चोक्तं । चाषस्तु वदते मात्रां द्विमात्रां वायसो ब्रुवीत । तृतीयां तु शिखी ब्रूयात् नकुलस्त्वर्धमात्रकमिति । ऊकाल इत्यत्र कालो
यस्येति उपमानपूर्वपदो बहुव्रीहिरयमिति सूचयति । एवं कालत्व इति दधिश्रौत्रादिवदत्र एहि । कालग्रहणं परिमाणावधारणार्थं । ... ग्रहणसंयो
गस्याप्यनुदायनिवृत्त्यर्थं । प्रत्युदाहरणं ... त्वार्धमात्रिकस्य ह्रस्वत्वं ... योः कषयोः हलोः समुदायस्यामात्रिकत्वात् ह्रस्वस्येति ह्रस्वाश्रयस्तु
ङ्‍... नानिमित्तकत्वं अ आ इत्याकारोकारयोः समुदायस्य द्विमात्रत्वात् दीर्घत्वं स्यात् । ततश्च दीर्घात्पदान्तात् द्वितीयोऽवा स्यात् न समान्तात् । ह्रस्वदीर्घ

ग्र॰स॰ ॥७॥ प्लुतप्रदेशाः। ह्रस्वो नपुंसके प्रातिपदिकस्य। अकृत्सार्वधातुकयोर्दीर्घः। वाक्यस्य टेः प्लुत उदात्त इत्यादयः। स प्रत्येकमिति। यस्या ह्रस्वदी-
र्घप्लुतसंज्ञा विहिता सेत्येकमिति। एकमेकं प्रति प्रत्येकं। ह्रस्वोऽपि दीर्घोऽपि प्लुतोऽपि उदात्तानुदात्तस्वरितभेदेन त्रिधेत्यर्थः। उच्चैरिति। अच इत्य-
स्यानुवर्त्तते। तस्यायमर्थः ह्रस्वादयः स्वसंज्ञया विधीयमाना अच उच्चैःस्थाने स्युरिति। उदात्तादिशब्दाः स्वरवर्णधर्मे लोकवेदयोः प्रसिद्धाः
तद्दहनकुलेऽविपरीतान्यध्येते। उच्चैरिति श्रुतिप्रकर्षो न गृह्यते उच्चैः पठतीतिवत् किं तर्हि स्थानकृत उच्चत्वं संज्ञिनो विशेषणं। ताल्वादिषु
हि भागवत्सु स्थानेषु वर्णा जायंते तत्र ऊर्ध्वभागजातोऽच् उदात्तः स्यात्। यस्मिन्नुच्चार्यमाणे गात्राणां निग्रहः स्यात्। रूक्षता स्वरस्य। संहतता
कंठविवरस्य। ये ते यत्नदोऽसि सदाद्युत्तं। उ॰सः श॥ आद्युदात्तः। एकादेश उदात्तेनोदात्तः। उदात्तप्रदेशाः। आद्युदात्तश्चेत्येवमादयः। नीचैः।
नीचैर्भागजातोऽच् अनुदात्तः स्यात्। यस्मिन्नुच्चार्यमाणे गात्राणां मार्दवं स्यात्। स्वरस्य स्निग्धता। कंठविवरस्य महत्ता। नमस्ते रुद्रमन्यव इ-
त्यत्र अनुदात्तः अनुदात्तं सर्वमित्यधिकारान्नेशब्दो अनुदात्तः रुद्रोप्यामंत्रितस्येत्यनुदात्तः पदकाले चानुदात्तश्रुतिः संहितायां त्वेकश्रुतिः श्री॥ ॥७॥
स्यात् अनुदात्तप्रदेशाः अनुदात्तं सर्वमपादादावित्येवमादयः। समाहारः। उदात्तानुदात्तौ समाह्रियेते यस्मिन्नच् स स्वरितसंज्ञः स्यात्। अ-
चोदात्तानुदात्तौ वर्णधर्मौ विवक्षितौ तेनाचो। क्वकिनोत्। क्वाति। तित्स्वरितमिति स्वरितः। स्वरितप्रदेशाः तित्स्वरितमित्येवमादयः। नवविधो-
पीति नवप्रकारोऽपि अच् प्रत्येकं सानुनासिकनिरनुनासिकत्वेन। अनुगतो नासिकामनुनासिको वर्णधर्मः अथवा अनुपश्चान्मुखस्य ना-
सिका व्याप्रियते यस्मिन्न नासिकाया वा पश्चान्मुखं व्याप्रियते यस्मिन्सोऽनुनासिकः सहानुनासिकेन वर्त्तते सानुनासिकः निर्गतोऽनुनासिको
यस्मात् अनिरनुनासिकः। तयोर्भावः सानुनासिकनिरनुनासिकत्वं तेन द्विधा। अयं भावः। अव ह्रस्वो दीर्घः प्लुतश्च तत्र ह्रस्वोऽप्युदात्तोऽनुदा-
त्तस्वरितश्चेति त्रिधा। एवं दीर्घप्लुतावपि त्रिधा। अनेन प्रकारेण नवविधोऽपि सानुनासिको निरनुनासिकश्चेति प्रभेदकाराभ्यां द्विधा स्यात्॥
तथा च सति अष्टादश भेदाः स्युरिति। अनुनासिकसंज्ञामाह॥ मुख॥ मुखनासिकेति नक्केः किंतु मयूरव्यंसकादित्वात् उत्तरपदलोपी तेन

सुप्रूप एवाहं हेतु हं द्व अपाणिन्यसेनां गानामित्येकवद्भावः स्यात्ततन अनुस्वोन पुंसके प्रातिपदिकस्येति ह्रस्वत्वे स्यात्ततश्च मुखनासि
कवचन इति स्यादिति मत्वाह मुखयुतनासिकयेति। अत्र अपः मुखग्रहणं किं अनुस्वारस्येव हि स्यात्। नासिकाग्रहणं किं। कचटतप
नां मा भूत्। अनुनासिकप्रदेशाः आङोऽनुनासिकश्छन्दसीत्येवमादयः। अणुदित्। अत्र त्यमेवाणग्रहणं परेण णकारेणेति चेतसिद्धत्वाह
अत्राणीति। अन्तःस्थवर्णानां च सवर्णग्रहणाय लणिसूत्रस्थेन णकारेण प्रत्याहारोऽयं। अन्यान्यणग्रहणानि सर्वाणि पूर्वेणैव णकारेणेति भा
वः। संज्ञास्वरूपमिदं तेनाणुदित्सवर्णानां स्वस्य च संज्ञा स्यात्। ततश्चाणुदिद्ग्रहणे सर्वेषां अनणुदितोपि च ग्रहणं तत इति भावो। अणुदि
त इत्यादेः॥ ॥अप्रत्यय इति। अप्रत्ययादेशः टित्कित्मित इति वक्तव्यं। प्रत्ययः। सनाशंसभिक्ष उः। भिक्षुः। आदेशः। इदम इश्। इहदि
त। आर्द्धधातुकस्येड्वलादेः। छवि ता कित्। श्रुवो वुक्‌लुङ्लिटोः। बभूव। मित्। अमसंबुद्धौ। हे अनडुन्। त्यादिषु सवर्णानां ग्रहणं मा भूदि
त्येवमर्थं। अथवा अप्रत्यय इति प्रत्ययग्रहणेन न संज्ञाग्रहः किं त्वर्थग्रहः। प्रतीयते विधीयत इति प्रत्ययः। तेनाप्रत्यय इत्यस्यायमर्थः। भा
व्यमानोऽण् सवर्णान्न गृह्णातीति। इशादयो विधाच्यं तद्द्वितीयेपि सवर्णग्राहकाः। उदितः कथयति कुचुटुतु इति सूत्रवं फलं दर्शयति तत
श्चेति। आद्गुण इत्यादौ अवर्णो गृह्यमाणः सर्वान्ह्रस्वादीन्स्वाष्टादशभेदान्गृह्णाति। ततश्च उपेन्द्रः रमेश इत्यादि सिद्धं। तथेति। यस्य
ति च। ओं गुणः। उरण्परः। इत्यादिषु उ ऋवर्णस्तथा अष्टादशभेदान्गृह्णाति ऌवर्ण इति दीर्घस्य प्रयोगाभावात्। एङिति। ह्रस्वानां प्रयो
गाभावात्ततश्चैते द्वादशभेदान्स्वग्रहणे गृह्णन्तीति तपरः। तपर इति बहुव्रीहिः। तः परो यस्मादिति तात्पर इति पंचमीतत्पुरुषोपि स्यात्स्या
त्रेणच्यत इत्यभिप्रेत्याह॥ तपरस्तात्परश्चेति। तत्र बहुव्रीहेर्लिंगमतो भिस ऐसिति अकारार्थे तपरकरणं। पंचमीतत्पुरुषस्य लिंगं वृद्धिरा
दैजिति ऐजर्थं तपरकरणं॥ ॥तुल्यास्यप्रयत्नं। आस्ये भवमास्यं ताल्वादिस्थानं॥ ॥आस्यं च प्रयत्नश्च आस्यप्रयत्नौ तुल्यावास्यप्रयत्नौ
यस्येति द्वंद्वगर्भो बहुव्रीहिरित्यभिप्रेत्याह तुल्यौ स्थानप्रयत्नौ यस्येति। स्थानस्यापि तुल्यत्वार्थं द्वंद्वाश्रयणं कृतं। तुल्य आस्ये प्रयत्नो य

त्नौ यस्येति द्विविपदे बहुव्रीहावाश्रीयमाणे तुल्यत्वेन स्थानस्याविशेषित्वाद्भिन्नस्थानानां कचटतपानां स्यात्। ननु द्वंद्वगर्भोऽयमस्तु
यत्नश्चांतरत्वेन न विशेषितः स्यात्। नैव दोषः। अत्र हि स्थानस्याह्वचर्यो स्थाने यः प्रयत्नो वर्णोत्पत्तिकाउत्पादि स विवक्षिष्यति तेनां
तरोयः स्पृष्टत्वादिश्चतुर्विधः प्रयत्नः स एव गृह्यते न बाह्यो विवारादिः। अक्षरशब्दोऽत्र वर्णवाची। मिथः परस्परं। ऋलृवर्णयोरिति।।।
भिन्नस्थानत्वादप्राप्तं सावर्ण्यमुच्यते। तच्चाचः परस्परं सवर्णाः प्रदर्शिताः तत्रश्चावर्णेत्यादिना। हलः परस्परं सवर्णान्दर्शयति व
र्ग्यो वर्ग्येणेति। वर्गे भवो वर्ग्यः दिगादित्वाद्यत्। वर्ग्यो यो वर्णः सोऽन्येन स्ववर्गीतः पातिना सवर्णः स्यात् तुल्यस्थानप्रयत्नत्वात्।। सा
नुनासिकनिरनुनासिकत्वेन यवलानां द्विधा इति यवलानां सवर्णाश्च हलन्त्यसंधौ वक्ष्यति। रेफोष्मणामिति। रेफस्य शषसहानां चोक्ते
स्थानप्रयत्नत्वात्। अन्ये भिन्नजातीया वर्णाः सवर्णा न संतीति किं तु रेफस्य सजातीयो रेफ एव सवर्णः तुल्यस्थानप्रयत्नत्वात् तथा शस्य श
एव। षस्य ष एव। सस्य स एव। हस्य ह एवेति भावः। आस्यग्रहणं किं। कचटतपानां तुल्यप्रयत्नानां हि तुल्यस्थानानां भिन्नप्रयत्नानां माभू
भिन्नस्थानानां मा भूत्। न तस्मात् इत्यत्र पकारस्य झरो झरीति लोपो न। प्रयत्नग्रहणं किं। इचुयशानां तुल्यस्थानानां भिन्नप्रयत्नानां
मा भूत्। तलस्थ अरुष्ट्वोत ती इत्यत्र शकारस्य चकारो लोपेन। सवर्णप्रदेशाः अकः सवर्णे दीर्घ इत्येवमादयः। इदानीं वर्णानां स्थाना
न्याह अकुहेति। अत्र सर्वत्र अइउऋ एते अष्टादश भेदभिन्नाः। लृ ए ऐ ओ औ एते द्वादश भेदभिन्ना गृह्यन्ते। कुचुटुतुपु वर्गाः। इ‍त्ये
त्यादि। तपरकरणं सुखोच्चारणार्थं। इदानीं प्रयत्नानाह स्पृष्टमित्यादि। स्पृष्टं स्पृष्टता गुणः तदनुगतं प्रयत्नमुच्चारणं स्पर्शानां। एवं वि
वृतमूष्मणामित्यादौ व्याख्येयं। तत्र नाभिदेशात् प्रयत्नप्रेरितः प्राणः उर्ध्वमुत्क्रामन् कंठप्रभृतीनामन्यतरस्मिन् स्थाने प्रयत्नेन विधार्यमा
णः स्थानमभिहंति। तस्मात् स्थानाभिघातात् जायते ध्वनिः स आकाशे वर्णश्रुतिः सवर्णः स्यात्प्रयत्नतः। तत्राधुना तु स्थानसाम्ये यदा कंठादिस्था
ने जिह्वाग्रोपाग्रमध्यमूलानि करणानि प्रयत्नेन परस्परं स्पृशंति सा स्पृष्टता। ईषद्यदा स्पृशंति साईषत्स्पृष्टता। सामीप्येन यदा स्पृशं

तिसा संवृतता। दूरेण यदा स्पृशंति सा विवृतता। एते त्वाभ्यंतराः। आभ्यंतरत्वं चैतेषां स्थानकरणप्रयत्नव्यापारेणोत्पत्तिकाल एव सत्त्वात्
सो चेति। सदृस्यो ऽकारो व्याकरणशास्त्रे दीर्घप्लुताभ्यां सावर्ण्यार्थं विवृत इति प्रतिज्ञायते। तथा च शास्त्रांते ऽस्य अकारेण अ अ इति सू
त्रेण प्रत्यापत्तिः करिष्यते। इदानीं पूर्वोद्दिष्टानां स्पर्शादीनामर्थमाह। कादय इति। बाह्याः प्रयत्नाः सवर्णसंज्ञायामनुपयोगिन इति आचा
र्यैर्नोक्ताः। अस्माभिस्तु वर्णानामांतरतम्यज्ञानायोच्यंते। ते च एकादश विवारः। संवारः श्वासः। नादः घोषः। अघोषः अल्पप्राणश्च।
महाप्राणः। उदात्तः। अनुदात्तः। स्वरितश्च। तत्र वर्णोच्चारणे एव वायुर्यदा मूर्द्ध्नि प्रतिहतः सन्निवृत्तः कोष्ठमभिहंति कोष्ठे अभिहन्यमाने तत्र यदा
गलबिलस्य संवृतत्वं तदा संवारो नाम वर्णधर्मो जायते यदा विवृतत्वं तदा विवारः। संवृते गलबिले अव्यक्तः शब्दो नादः। विवृते श्वासः।
श्वास उपरिष्टाद्वर्त्ति वायुः। तौ श्वासनादौ अनुप्रदानमित्याहुः। अनुपश्चात्प्रदीयत इति। तत्र यदा स्थानाभिघातजे ध्वनौ नादोऽनुप्रदीयते त
दा नादध्वनिसंसर्गाद्घोषो जायते यदा श्वासोऽनुप्रदीयते तदा श्वासध्वनिसंसर्गादघोषः। महति वायौ महाप्राणः। अल्पे अल्पप्राणः॥
यदा सर्वांगानुसारी प्रयत्नस्तीव्रः स्यात्तदा गात्रस्य निग्रहः कंठविवरस्य चाणुत्वं स्वरस्य च वायोस्तीव्रगतित्वात् रौक्ष्यं स्यात्तमुदात्तमा
हुः। यदा तु मंदः प्रयत्नः स्यात्तदा गात्रस्य स्रंसनं कंठविलस्य महत्त्वं स्वरस्य च स्निग्धता स्यात् सोऽनुदात्तः। उदात्तानुदात्तसंबंधात्स्वरितः।
वर्णोत्पत्तिकालानंतरमुत्पत्तेर्बाह्यत्वमेषां। तत्र वर्गयमानां प्रथमद्वितीयौ शषसे विसर्जनीयश्च एषां विवृतकंठाः श्वासा
नुप्रदाना अघोषाः। वर्गयमानां तृतीयचतुर्थौ अंतस्था नासिक्या हानुस्वारौ च संवृतकंठाः नादानुप्रदाना घोषवंतश्च। वर्गाणां प्रथम
तृतीया अंतस्थौ स्तौ अल्पप्राणाः। इतरे सर्वे महाप्राणाः। यथा तृतीयास्तथा पंचमाः। आनुनासिक्यमेवामधिको गुणः। एते बाह्याः प्र
यत्नाः। तत्र यमा नाम वर्गेष्वाद्यानां चतुर्णां पंचमेषु परतो येऽज एव नासिक्या जायंते। यथा पलि क्नीः। चख्नतुः। सुप्रस्वतीसादौ। उं स्वंघ्नु

सि॰ स॰ अपमन्नापः। जेष्वतु॥ अपस्यतीत्यादौ। कुं खुं घे इति। वृद्धिरादैच्॥ वृद्धिः आदैच् इति द्विपदं सूत्रं। आदैजिति समाहारद्वंद्वे एकवचनं। समासां
॥७॥ तविधेरनित्यत्वान्न द्वंद्वाच्चुदषहान्तात्समाहारे इति टच् न भवति। अथ यस्मायादीनि छंदसीति भत्वात् भः इति कृते न छंदस्त्वेनुच्छेदो वक्ष्य
चाणि चवेंतीति वचनात्। लाघवार्थं अ इति वाच्ये दीर्घोच्चारणसामर्थ्याद्धि मात्र एव गृह्यते न मात्रिकत्रिमात्रौ। अतो नाकारार्थं तपरत्वं
किंतु ऐ अर्थं। कृतकृतानामिति। वृद्धिशब्दो ह्यारणे न कृतानां तेनानुकृतानां चादैचां सामान्येन वृद्धिसंज्ञा स्यादित्यर्थः। तेनोपगवीयः शा
लीय इत्यादि सिद्धं। ननु कृतानां संज्ञायामितरेतराश्रयत्वं स्यात् मृजेर्वृद्धिरित्यादौ संज्ञया हि क्रियंते कृतानां च संज्ञेति। नेष दोषः। भा
विनियं संज्ञा विज्ञास्यते। ततश्चायमर्थः स्यात्। यस्य कृतस्य वृद्धिसंज्ञा स्यात् स ऐदिति। लोकेऽपि मातापितृभ्यः संज्ञा दृश्यते। कश्चित्तु तावयमाह
अस्य सूत्रस्य शाटकं वयेति स पश्यति यदि वयो न शाटकः शाटकोऽयं भ्रेवयः अतो मन्ये संवेयः यस्मिन्कृते शाटक इति संज्ञा स्यादिति। इदं सूत्रम
नर्थकं। साधुशब्दानुशासनं प्रयोगनियमार्थं आदेशार्थं आगमार्थं विशेषणार्थं न तु णाद्यारोपार्थं वृत्तिसत्तानां विकल्पानां निराकरणे महाभाष्य ग्री॥
देरवगंतव्यं। वृद्धिप्रदेशा वृद्धिरेचीत्येवमादयः। अदेङ्। एवं णलुत्तमो वा इति व्याख्यानमस्यातनपरत्वं तत्र तस्य महाराष्ट्रमेतदर्थं। गुणः। प्रदेशा मिदेर्गुण ॥१९॥
इत्येवमादयः। इकः। इयं परिभाषा नाधिकारः। अस्वरितत्वात्। परिभाषा चैकदेशस्था सर्वं शास्त्रमभिज्वलयति। यथाहुः। परितो व्याप्ततामा
यां परिभाषां प्रचक्षत इति। न मान्यानियमप्रसंगे नियमो विधीयत इति यत्र साक्षात्स्थानी न निर्दिष्टः सार्वधातुकार्धधातुकयोः सिचि वृ
द्धिरित्यादौ तत्रैव स्थाननियमार्था प्रवर्त्तते नान्यत्र। छिन्नीत्यादौ। स्थानिनिर्देशात्। वृद्धिरादैजित्यतो वृद्धिः अदेङ्गुण इत्यनुवर्त्तमानेऽपि पु
नर्गुणवृद्धिग्रहणं गुणवृद्धिसंज्ञया शिष्यमाणैदित्यस्यार्थस्य प्रतिपत्त्यर्थमित्यभिप्रेत्याह स्वसंज्ञयेति। गुणवृद्धिसंज्ञयेत्यर्थः। इक
इति किं। आ अं ध्य सुरव्यंजनानां मा भूत्। अन्यथा यानमित्यत्र यातेर्ल्युटि परे आकारस्य गुणे अकारे कृते अतो गुण इति पररूपे च यनमित्य

निष्टं रूपं प्रसज्येत न्यायतीत्यत्रैकारस्य गुणे एकारे कृते अयतीति स्यात्। उभयितेत्यत्र उकारस्य ओकारे गुणे उभवितेत्यनिष्टं रूपं स्यात्। अलोन्त्यस्य
विधौ सार्वधातुकार्धधातुकयोरित्यादौ इक इति ज्ञाप्यं॥ वृद्धिविधावपि सिचि वृद्धिरित्यादौ ज्ञाप्यं। अन्यथा विरिजिर्या लुङि सिचि इटि अ
तरंगत्वाद्गुणायादेशयोः कृतयोः त्यंतक्षणेति यांतत्वाद्वृद्धिनिषेधः स्यात्। ततश्च अविरयीद् अजिरयीदित्यनिष्टं रूपं स्यात्। इकि तु सति सिचि
वृद्धौ तरंगस्य गुणस्य बाधः। अन्यथा न क्वापि सिज्वीगंतमंगं स्यात्। ततश्चाविरापीद् अजिरापीदित्यादि सिद्धं। स्वसंज्ञया विधीयमाने किं। द्यौः
पंथा इमम् इत्यत्र दिव औत् पथिमथ्यृभुक्षामात् त्यदादीनामः इत्येते इकः स्थाने भूमौ वन्निति। अस्मिन् सूत्रे अन्यदाक्षेपसमाधानादिकं
महाभाष्यादेरवगंतव्यं। फलितमेवास्माभिरुक्तं॥ ॥अदर्शनं॥ वर्णानामदर्शनमिति॥ षष्ठी स्थानेयोगेत्यतः प्रसंगवाचिनः स्थानश
ब्दस्यानुवृत्तेः प्रसक्तानां वर्णानामश्रवणमित्यर्थः। लोपप्रदेशा लोपो व्योर्वलीत्येवमादयः। भूवादयः। लघ्वर्थमेकाक्षरा यं संज्ञा यो कार्यो
यो महत्याः पूर्वाचार्यसंज्ञाया यदाश्रयणं तत्रैवार्थे दशा संज्ञा विहिता तादृशामेव यथा स्यात् इत्येवमर्थं तैस्तु क्रियावाचिनो विहिता इत्यभि
प्रेत्याह क्रियावाचिन इति। क्रिया नाम साध्यमानस्वरूपा पूर्वापरीभूतावयवा। तयोक्तं॥ यावत्सिद्धमसिद्धं वा साध्यत्वेनाभिधीयते।
आश्रितक्रमरूपत्वात्सा क्रियेत्यभिधीयत इति। तेन धातुसमानानाम क्रियावाचिनां याबादीनां न। ते च धातुपाठपठिता एव तेन आ
णवेदित्यादीनां न। ननु भ्वादय इत्यस्य भ्वादिर्येषामिति बहुव्रीहौ संहितया निर्देशे यणादेशे सति भ्वादय इति ज्ञाप्यं तत्कथं भूवादय इति। उच्यते॥ १७
भूवादीनां वकारोयं मंगलार्थः प्रयुज्यते। भुवो वार्थं वदंतीति भ्वर्था वा वादयः स्मृताः॥ मंगलादीनि मंगलमध्यानि मंगलांतानि च शास्त्रा
णि प्रथंते वीरपुरुषकाणि भवंति आयुष्मत्पुरुषकाणि चेति मध्ये मंगलार्थं वकारः प्रयुज्यते। द्वितीयं प्रकारमाह। भुवो वार्थं वदंतीति। भु
वो धातोरर्थं वदंतीति वा भूवादयः। अर्थकथनमेतत्। व्युत्पत्तिस्तु भवनं भूः क्रियासामान्यं भुवं वदंतीति वदेर्गुणादिक इण् यद्वैवं अ
स्ति भवति विद्यतीनामेव स्यात्पचतीत्यादीनां। क्रियाविशेषवाचित्वात्। न। विशेषेष्वपि सामान्यस्य सत्वात्। ज्ञायते इति पाकस्त्याग

उ. सू. ॥२०॥ इत्यादौ युगपद्विधिवद्भविष्यति। अस्मिन्पक्षे पाठसामर्थ्यात् पाठो व्यर्थं क्रियते। तृतीयं प्रकारमाह। चार्थे वा वादयः स्मृता इति। अथ नञ् स्योर्थो ७।
येषां ते चार्थाः॥ वादय इति वा गतिगंधनयोरिति आदिर्येषां ते वादयः वा गतीत्यारभ्य अनुशादिसमाप्तेः। अथ च वा इत्यस्यादयो वाद
यः द्वन्द्वतत्पुरुषः आ वा गतिगंधनयोरस्मात्। वादयश्च वादयश्च वादयः एकशेषः नुवो वादय इति वाच्यं वाव कसंबंधषष्ठ्या समासः। अ
स्मिन्पक्षे पाठार्थो सूत्रासंदेहे यो यो नो। विचारविशेषो महाभाष्याज्ज्ञेयः। तथा हि। वादय इति। अनन्तरा यां वा गतिगंधनयोरनयोः प्रसे
कमादिशब्दः संबध्यते। तत्र यदा सपरिस्पंदसाध्यसाधनक्रियाधात्वर्थ इति पक्षः तदा आदिर्व्यवस्थितिर्येषां वा आदिः प्रकारो येषां ते अ
वादयः। इत्यादयो वा प्रकारा वा सदृशाः क्रियार्था इत्यर्थः। यदा त्वपरिस्पंदसाधनसाध्यो भावो धात्वर्थस्तदा प्रकारान्तवचनाभावा
इत्यादयो धातवः स्मृता इत्यादि॥ ॥उपसर्गाः। मरुच्छब्दस्य तूपसर्गसंज्ञा वाच्या। मरुत्त इति। मरुद्भ्यां त्वरस[?]दात्तः ते प्रत्यये अव उ
पसर्गात्तु इति तत्त्वविध्यर्थं विधिसामर्थ्यादनडंतादपि नत्वं। क्रियायोगे किं। प्रगतो नायको यस्मात्स नायको देशः॥ अत्रोपसर्गत्वाभावाण्ण
त्वं। ननु चागमिक्रियायोगोऽस्त्येव प्रादीनां क्रियायोगाव्यभिचारात् सत्यं। तथापि क्रियाग्रहणसामर्थ्याद्वा क्रियायुक्ता एव प्रादय उपसर्गसं सी॥ ॥२०॥
ज्ञाः स्युः नान्यां तेनेह न यत्वं स्युपसर्गतानां एकसाकार्यैरामचंद्रस्वार्थत्वान्न स्तुतेः कृताः। सोदाहरत्युपसर्गार्थश्लोकामेनानुलिख्यामाह।
प्र आदिकर्मदीर्घेश क्लेशसंभवतृप्तिषु। वियोगशुद्धिहिंसासु शांतीच्छाग्रदर्शने। आदिकर्मणि प्रकृतः प्रयातः दीर्घे प्रबलः ऐश्वर्ये प्रभुः
देशस्य स्याधार्थो प्रवदंतिदायादाः। संभवे हिमवतो गंगा प्रभवति। तृप्तौ। प्रभुक्तमन्नं। वियोगे प्रोषितः। शुद्धौ। प्रसन्नमुदकं। शक्तौ प्रशक्तो
विप्राय दक्षिणां प्रार्थयते कन्यां। शांतौ। प्रशांतोऽग्निः। पूजायां। प्रांजलिः स्थितः। अग्रे प्रवालं। दर्शने प्रलोकयति। वधे गतौ दर्शने च विक्रमाभिमुख्य
कृशौ। अधीनमोक्षणप्रातिलोम्येषु परामतः। वधे पराहतः। गतौ परागतः दर्शने परामृष्टः। विक्रमे पराक्रांतः। आभिमुख्ये पराङ्मुखः। क्लेशे परा
जितः। अधीने पराधीनः। मोक्षणे परान्कृतः। प्रातिलोम्ये। पराङ्मुखः। अपादियोगनिवृत्तौ विपरीते निदर्शने। आनंदे वर्जने वीर्ये वारणे

सम्यगीरितः॥३॥ अपयाति। अपकृतवान्॥ अपशब्दः। अपदिशति। अपहसति। अपविद्धजातो हृष्टो देवः। अपहरति। अपसरति। सोऽपोढः॥ ऐ
कयप्रभवसत्त्वप्रत्यक्षसिद्धिषु॥ तद्यथा श्लेषस्वीकरणक्रोधाभिमुख्यवाविस्मये॥४॥ संगतः पुत्रेण। संवेदं निःसंगलः। संवत्सरनिःकोष्ठः। सं
संजानाति। संपश्यते। संसिद्धिः। संस्कृता कन्या। संधत्ते। संगृह्णाति। संकुहः। संयातिः। वेदाधिष्ठानसामीप्यानुपश्चाद्भावानुबंधने॥ सा
म्याभिमुख्यहीनेषु विसर्गलक्षणेष्वनु॥ अनुवाकमधीते। अनुस्थाने देशे। अनुरथं। अनुशयः। अनुकृतिः। अनुवत्सो मातरं धावति। अन्वर्द्धे
नयोद्धारः। अनुज्ञाताः। अनुयानमसत्तांगतिः। ज्ञानावलंबेषु हीवदर्थेष्वाप्तिपराभावे। अवोढे यो वियोगे वल्लोकयोगानुसारतः। अवगतो
र्थः। अवलंब्यपदिंगकेति। अवदातं। अवलंब्यते। अवकीर्णः। अवधूति। अवयातः। निर्वियोगात्यदेदेशातिक्रमेष्वनिश्चिते। निःसं
गो ब्रवीति। निर्मर्यादं। निर्दिष्टं। निःक्रांतः। निर्वंशः। निश्चितं। दुरीषदर्थकृच्छ्रेषु दुःसंपत्तिसंकटे। दुर्गताः। दुर्जीविनः। दुर्बलः। दुर्मतः। दु
र्दिनं। नानावियोगातिशयक्लेशमोहदेशवाद्भुते। विशून्यास्मरणे स्वपदार्थे नानाभिमुख्यके। अनवस्थामुख्यशौर्यदर्शने विरुदाहृतः। वि
च्छिन्नः। स्वस्थस्त्रिः। वियुक्तः। विकीर्णाविन्नटा नद्यः। विमनस्कः। विलुंडः। विवदंति। विगायति। विस्मृतः। विदूषितः। विलोपितः। विमुखाः।
विश्रांतः। विशिष्टः। विक्रांतः। विलोकयति। आङ्। क्वान्यवाक्यवदर्थाश्लेषादिकर्मणि॥ बंधनेच्छाविधौ शाचाद्ववसामीप्यसंश्रये। आ
भिमेव निहत्याशीर्दीनानुभवविस्मये॥१०॥ प्रतिष्ठादेशमर्यादास्पर्द्धामुख्योर्ध्वकर्मणि। आक्रोशते। आविग्नः। आजानाति। आत
प्तनखाः। आलिंगयति। आरज्यते। आकवचमावध्नंति। आकुमारं यशः। आचरति कपटेन। आहतः। आमन्त्रावयं। आवसथः॥ आमंत्रणं
। आधावति। आशास्ते। आदत्ते। आशीतं। आएवं किल तन्। आस्पदं। आदिष्टः। आमुक्तोदुःखी। आकृष्य तेरथिनो रथिनः। आगच्छति। आ
रोहति पर्वतं। राक्ष्यदस्त्वक्शावदेशे नित्यकौशलबंधने। अंतर्जीवे समीपे निर्देशेनापरमाश्रये। निकेतमागीनं। निपातितं। निगृहीतं॥ नि
र्दिष्टं। निविशते। निपुणः। निबद्धः। निपीतमुदकं सिकताभिः। निकृष्टः। निदर्शनं। निहतः पापात्। निलयः। अधिरध्ययनैश्वर्यवशित्वस्मरण

प्र॰स॰
॥२१॥

धिके॥ उपाध्यायादधीते। अधिपतिः। अधीनः। मातुरध्येति। अधिकृतं। अपिः संभावनाशंसीमृति मृति॰षासमुच्चये। अपि योजनम
स्ति। अपि पाषिवत्। जडमपि। मरणमपि। अपिनह्यति हारं। तदपि विन॰माति क्रमेव दुशो॰शार्थातिशयेत्वतिः॥२३॥ अतिरथः। अतिक्राम
ति। अतिगहनं। अतितनं। अतिमनुते ज्ञानं। प्रशंसानुमिते१ज्ञा॰शब्दे तु॰ षु सु॥ सुरूपः। सुकृतं। सुसाधुः। सुलभः। सुदुष्करं। सुगंधः
उत्सावल्यवियोगोर्ध्वकर्मलाभ प्रकाशने। आश्चर्यमोस्त्वेण भावेवत्तु प्राधान्यशक्तिषु। उद्बलं। उद्गच्छति। उत्कृष्टतिशयनात्। उत्पन्नं। उद्धर
ति। उत्सुकः। उद्गतोर्घः। उत्पथः। उत्कः। उद्दिष्टः। उत्साहः। अभिः१ज्ञा॰शार्थेक्षाव्याधिसाम्याभिमुख्ये। सारूप्यवचनाहारस्वाध्यायेषु नि
रूपितः। अभिवादयते गुरुं। अभियुक्तः। अभिलिप्सते। अभिस्यंदो व्याधिः॥ अभिज्ञातः। अभिमुखं। अभिरूपः। अभिधानं। अभ्यवहरति।
अभ्यस्यति। सादृश्यादानहिंसांगीकृतौ। प्रतिनिधौ क्वचित्। व्याप्त्याभिमुख्ययोर्व्याप्तौ वारणे। प्रतिनुच्यते। प्रतिदेवदत्तस्य। प्रतिगृह्णाति।
प्रतिहंति। प्रतिज्ञातं। अभिमन्युरर्जुनतः प्रति। प्रतिश्रयार्थः। प्रतिसूर्यं गच्छति। प्रतिकीर्णं पांसुभिः। प्रतिषिद्धः। परिः समंततो भावे व्याप्तिदोष
कथासु च॥ ॰षाश्लेषपूजनेष्ववर्जनेवसनेष्वपि। परिभ्रमति। परिगतोग्निग्रामं। परिवादः। परिष्करोति। कन्यां परिणयते। परिचरति गुरुं। प
रित्रिगर्तेभ्यो वृष्टो देवः। परिधत्ते वासः। परिदेवनं। उपः सामीप्यसामर्थ्यव्याप्त्याचार्यकृतौ मृतौ। दोषादानक्रियावीप्सारंभाध्ययनपूजने।
उपकंठे तिष्ठति। उपकरोति मित्रेभ्यः। उपकीर्णः पांसुभिः। उपदिशति शिष्येभ्यः। उपरतः। उपघातः। उपहरत्यर्घं देवदत्ताय। उपक्रा
रः। देवं देवमुपचरति। उप॰रमते चोक्तं। उपाध्यायादधीते। उपचितः पिता पुत्रेण। कृष्णाचार्यैः कृताः श्लोकाः। उपसर्गार्थसंग्रहे अष्टा॰
शोदाहृता हि सोदाहरणा रूपतः। समासासोदाहरणोपसर्गवृत्तिः। विरामः विरतिः विरामः स्यात्तत्र शास्त्रानुशासनप्रसंगाद्वर्णानामेवेत्या
हवर्णानामिति। परा अतिशयित इति। अनेन परशब्दो चातिशये वर्तत इत्युक्तं। ततश्चान्यार्थो न। संनिधिरित्यनेन संनिकर्षशब्देन सं
श्लेषवचनस्तस्य वर्णेषु संभवात्। किंतु प्रत्यासत्तिवचन इत्युक्तं। स्वातिशयितः संनिधिरीदृशः। यावता कालेन मात्रापा अर्द्धमुच्चार्य

प्र॰
॥२१॥

ति तावत्कालव्यवधानेन वर्णानामुच्चारणं न तस्य च कालस्यातिसूक्ष्मत्वादस्येत्यादौ वर्णसंसर्गः स्थाइव चेति॥ सुप् तिङ् ॥ ति डाप्याहचर्थो

सुपिति विप्रत्याहारस्य ग्रहणं न सप्तमीबहुवचनस्य प्रत्ययग्रहणे यस्मात्स विहितस्तदादेस्तदंतस्य ग्रहणमिति वचनाद्धिनाप्यंतग्रहणे

तदंतस्यैव संज्ञासिद्धावप्यंतग्रहणमन्यत्र संज्ञाविधौ प्रत्ययग्रहणे तदंतविधिनिषेधार्थं। तेन तरप्तमपौ घ इत्यत्र तरट्तमपोर्घसंज्ञा स्या

न्न तदंतस्येत्यंतग्रहणं ज्ञापकं। अत एके चिच्चोदयंति सुप्तिङिति प्रत्याहारग्रहणं। अन्यस्य तिङ्शब्दस्याभावात्। सुपि तिलुकर्थं प्रत्याहा

रग्रहणं। यतः सप्तमीबहुवचने सुप्॥ अतस्तस्य सुपो ग्रहणं कृते न स्यात्॥ उच्यते। न ङिसंबुद्ध्योरिति निषेधात्। तथा हि यद्येतत्सप्त

मीबहुवचनस्य ग्रहणमिति स्यात्तदा ङौ संबुद्धौ च परतः पदत्वाभावात् नलोपनिषेधो नैरर्थक्यं स्यात्। तस्मान्नलोपनिषेधान्यथा

नुपपत्त्या प्रत्याहारग्रहणमेवेति व्यवस्थितं॥ ॥हल्॥ हलः समुदायः संज्ञी तेन निर्याणादित्यत्र व्यान्यस्येत्येवं न। प्रत्येकं संज्ञापक्षो विज्ञाप्येत स

मर्थितः। अंतरस्य व्यवधानं न तत्र विजातीयैरवस्थादित्याह॥ द्विरित्यादि। हल इति जातौ बहुवचनं तेन द्वयोर्बहूनां च संज्ञा स्यात्। हल इति

किं। तितउङे उ सन्नस्त्री। तितउच्छत्री हलुउ इत्युक्तौ उकारस्य संयोगांतस्येति लोपः स्यात्। चादयः। प्राग्रीश्वरान्निपाता इति सूत्रेणाधिरी

श्वरे इत्येतस्मात् प्रागर्थे निपाताधिकारः क्रियते। ततो निपाता इत्यनुवर्तते इत्यपि ज्ञेयं इत्याह निपातसंज्ञाति। इदं तदिति सर्वनामप्रत्यवमर्शयोग्योर्थो

द्रव्यं। तथा चोक्तं हरिणा प्रकीर्णकांडे। वस्तूपलक्षणं यत्र सर्वनाम प्रयुज्यते। द्रव्यमित्युच्यते सोर्थो भेद्यत्वेन विवक्षितः। भेद्यत्वेन विशे

ष्यत्वेनेत्यर्थः॥ चादीनव्ययप्रकरणे वक्ष्यति। असत्त्वे किं। पशुर्वै पुरुषः ... पशुः ... इत्यत्र चादित्वेपि जातिव्यवच्छिन्नद्रव्यवाचित्वान्निपा

तत्वं न। प्रादयः। अद्रव्यार्था एव पृथक्योगकरणं तूपसर्गाः क्रियायोगे इत्यत्र चादीनां नवानुवृत्तिः स्याज्जायाचादिनामिति तत्समर्थौ॥ ॥अ

चतो। टकारककारौ इतौ ययोस्तौ टकितौ। इह द्वंद्वः प्रत्येकमभिसंबध्यते। टकारेऽकारः स्मर्यते उच्चारणार्थः सिद्धावस्थो कितस्त्यायेन तस्यमा

लोपः स्थानेयोगेत्यतः षष्ठीग्रहणमनुवर्तते अथवा आद्यंतौ टकितावयवौ तौ चावयविनमपेक्ष्य वर्तेते तत्र प्राप्तावयवावयविसंबंधे षष्ठी

प्र॰ स्त॰ ॥१२॥ षष्ठ्या निर्दिष्टस्य इति सामर्थ्यात् षष्ठीनिर्दिष्टस्येति स्यादिति सर्वमसिद्धवत्त्वात् हटिकित्ते यस्यो रोऽतस्येति षष्ठी स्थानेयोगेत्यस्याः परिभा
षाया अयमपवादस्तेनेयमविचारजाता मिदचः। अंत्यादित्यादि। संनिविष्टानामचां मध्ये अंत्यादचः परो मित्स्यादित्यर्थः प्रायः॥ ॥
अनेकाल्। सर्वस्येति षष्ठीनिर्दिष्टस्य सर्वस्येति भावः। शितः शकारेणानेकाल्त्वेपि पृथक् ग्रहणं नानुबंधकृतमनेकाल्त्वं स्यादि
ति ज्ञापनार्थं तेन दिव औत् दिव्यादौ सर्वादेशो न। स्थानिवत्। स्थान्यादेशयोः पृथक्त्वात् स्थान्याश्रयकार्यमादेशे न स्यादिति कार्यातिदेशो
यमारभ्यते। स्थानिना तुल्यं वर्त्तते स्थानिवत्। स्थान्याश्रयाणि कार्याणि आदेशेपि स्युरित्यर्थः॥ अतिदेशस्य प्रयोजनान्या
ह धात्वंगेत्यादिना। धात्वादेशो धातुवत्। अस्तेर्भूः भविता धातुत्वात् तव्य। किमः कः केन किमोंऽगस्यादेशः। कस्तस्यांगत्वादिनः। प्रकृत्य।
कृञः क्त्वो ल्यप्। तस्य कृत्त्वात्तुक्॥ अद्यतने। द्योसहितस्तस्य तद्धितत्वात् प्रातिपदिकत्वं। प्रस्तुत्य। अव्ययस्य क्त्वो ल्यप्। तस्याव्ययत्वा
त् सुपो लुक्। रामाय। सुपो ङेर्यः तस्य सुप्त्वात् दीर्घः। भवतां तस्तस्ति ङः ताम्। तस्य तिङ्त्वात् पदत्वं। ग्रामो वः स्वः। सुपोऽकमिति पद
स्य वः तस्य पदत्वात् ढुत्वं इत्यादीनि प्रयोजनानि। नत्वल्विधाविति। अल आश्रितो विधिरित्युत्तरपदलोपी समासः। तत्राल्यो विधिः यस्मो
लि। विधिर्यस्मादलः परस्य। विधिर्यस्मिन्नलि विधिः स सर्वोप्यलाश्रय इति सर्वत्र निषेधः। स्थानिनो योऽल् तदाश्रयाणि कार्याणि वर्जयित्वे
त्यर्थः। कानि पुनरलाश्रयाणि कार्याणि यानि वर्णमात्राश्रयाणि। यानि पुनः समुदायाश्रयाणि न तान्यलाश्रयाणि। वस्तुतः स्थानी आ
देशस्य संज्ञामाविज्ञायीत्येवमर्थं तत्र स्थान्याश्रयं कार्यं स्थानिन्यपि यथा स्यात्। आदेशाश्रितमादेशेपि स्यात्। अहतेत्यत्र वधिष्टेत्युभयो
रप्याङो यमहन इत्यात्मनेपदं भवति। अन्यथा स्थानिनो हनः संज्ञात्वात्तस्मादात्मनेपदं न स्यात्। किंतु तत्समर्पितादादेशात्। किं चिन्नो वधआदे
देव स्यात्। वस्तुतस्तु तत्तदतिदेशोयं भवति। तत्रत्यान्यस्य कार्यमन्यत्र संप्राप्यते। ननु स्थान्याश्रयं निवर्त्तते आदेशे ग्रहणमानुमानिकस्याप्यादेश सि॰ कौ॰ ॥१२॥
स्य स्थानिवद्भावार्थं। एरुः। यच्च लुक् अत्र तेस्तु रस्त्वानुमानिकः आदेशस्तस्य स्थानित्वात्सदसंज्ञा भवति। ननु च उकारमात्रादेशोस्तु किमनु

मानेन। एवं द्यो रुरितियथाश्रुतेव्याख्याते स्यात्। आदेशग्रहणं च नकार्यं। एकदेशविकृतस्यानन्यत्वात् पदसंज्ञा च स्यात्। एवं तर्हि तदेवादेशग्र
हणं लिंगमेकदेशविकारोऽन्यशास्त्रेनाश्रीयते स्यात् स्यार्थस्य। ततश्चैतदुपपन्नो सर्वस्वेव पदादेशा दाक्षीपुत्रस्य पाणिनेः॥ एकदेशविकारे हि नित्य
त्वं नोपपद्यते सेर्ह्यपिच्चेति ज्ञापकादनुबंधकार्याणां अल्विधित्वेप्यतिदेशः स्यादेव ततश्च प्रस्तुत्येत्यत्र क्त्वाश्रयो गुणनिषेधः स्यात्। अनल्वि
धाविति किं। द्यौः ह— वित्युक्तो पान। प्रपद्य। अत्र बल्कारिलक्षणइल्त॥ ॥इति श्रीरामाचार्यसूनुहरिहरकृतेनैकाग्रधीः श्रीनृसिंहा
चार्येयं माणिक्यवाप्य ज्ञनयदतुलं विरुद्धाचार्यपर्यं॥ तस्य श्रीपाणिनीयाद्यनुगुणसगुणे प्रक्रियाकौमुदीयव्याख्याने स्मिन्प्रसादे निरगमद
मलः संधिसंज्ञाप्रसंगः॥ ॥अथ संधिप्रकरणमुच्यते॥ ॥अथ संधिरिति॥ ॥अथेति। संज्ञ्युपयोगिनीनां संज्ञानां प्रकरणात्तदनंतरं अचां हलां
विसर्गस्य स्वादीनां च संधिरुच्यते। तत्र तावत् अच्संधिः कथ्यते इत्यर्थः। इकः। इकः स्थाने इति। एतच्च षष्ठी स्थानेयोगेत्यनया परिभाषया लभ्यते
।अस्यास्त्वयमर्थः अत्र शास्त्रे या षष्ठ्यनियतसंबंधाश्रूयते सा स्थानेयोगैव स्यात्। स्थाने योगो यस्याः सा स्थानेयोगा सप्तम्या अलुक्। स्थानशब्दः प्र
संगवाची योगशब्दः संबंधवाची। प्रसंगे संबंधस्य निमित्तत्वे सति ज्ञेया सच संबंधः स्थान्यादेशभावरूपः। ततश्चायमर्थः इकः प्रसंगे यणस्या
दित्यिपरतः अचीति सप्तमीत तस्मिन्निति निर्दिष्टे पूर्वस्येति परिभाषा प्रवर्त्तते तस्यास्त्वयमर्थः। सप्तमीनिर्देशे पूर्वस्यैव कार्यं स्यात् नोत्तरस्या
निर्दिष्टग्रहणमानंतर्यार्थं। निरंतरं दिष्टे अव्यवधानेनोच्चारितइत्यर्थः॥ अग्निविदत्रेतिव्यवहितस्य माभूत्। संहितायां विषयइति। संहितायामि
त्यधिकारे या सप्तमी सा विषयसप्तमीति भावः। इकः स्थाने पूर्वस्य सवर्णदीर्घबाधनाय यणादेशो वाच्यः। दधी ३ इइ दे हौ ३ यिकं। यथासंख्यमित्यादि
।समसंख्यप्रदेशिषु समसंख्याकानो विधेयानां विधानं यथाक्रमं क्रममनतिक्रम्य प्रथमस्य प्रथमो द्वितीयस्य द्वितीयः स्यादित्यर्थः। सुध्युपा
स्य इति स्थिते इति सुधीउपास्य इति स्थिते इको यणचीति यणादेशे यथासंख्ययोद्देस्त इति वाच्ये। स्थ्याल्डी। अथ वा रव य उञ्र स्य शरः। वक्र्म ध्य
वसाने चयरोद्देस्तइत्येके। वाक्त्वा क्ष एतच्चानचीत्यस्मात् लुप्यते। अवः। रत्र मिदमल्विधौ स्थानिवद्भावार्थं॥ अज्झादेशः परनिमित्तः पूर्वविधौ

प्र॰ सि॰ स्थानिवदेदय यथा स्यात् मा भूत्स्वयं निमित्तमिति नियमार्थमारंभः । तथाच परवतीत्यत्र टिलोपे कृते शासोपधा वृद्धिर्न । एवमवधून्निस्या
॥१२५ श्रयनिवृत्तेरुदाहरणानि । अत एव द्विर्वचनादिविधौ स्थानिवत्त्वनिषेधः । परस्मिन्निति निमित्तसप्तमी पूर्वविधाविति विषयसप्तमीत्यभिप्रेत्याह
ह । परनिमित्त इत्यादि । पूर्वस्य विधिः विधीयत इति विधिरिति कर्मसाधनो विधिशब्दः तदा पूर्वस्येति शेषषष्ठी भावसाधनो वा विधाने विधि
रिति । तदा पूर्वस्येति कर्मणि षष्ठी । उभयमपि पक्षद्वयं स्वमते स्वीक्रियते । तत्र यथा ॥ स्थाने व्याख्यास्यामः । पूर्वत्वं च लडपेक्षया आदेशापेक्षया नि
मित्तापेक्षयाच । तत्र त्रिष्वपि पक्षेषु दोषा उक्ता विस्तरभिया कृता अथ ते महाभाष्यादेव गंतव्याः पदसंज्ञाकारमते विधिशब्दः कर्मसाधन एव
अलोपे सर्वपूर्वत्वे तत्रतो वगंतव्यः । अचः किं । आगत्य वाल्पपीत्यत्र अनुनासिकलोपः परनिमित्तस्तु किं कार्ये न स्थानिवत् । परस्मिन्न इति किं
। वैयाघ्रपद्यः अपरनिमित्तः णादीन लोपः यञ्भावमप्रतिषेधति । पूर्वविधौ किं । हे गौः वृद्धिरनादेशः संबुद्धिलोपे कार्ये स्थानि[illegible] तस्मात् द्विति
विधिग्रहणं किं न स्थानिवदादेश इत्यतोऽनुवर्तते । उच्यते । समासद्वयपरिग्रहार्थं पूर्वस्य विधिः पूर्वस्माद्विधिरिति । प्रथमसमासस्योदाहृतोऽनंतर
वप्रश्रेत्यनोरल्त्वेन प्रसारणे सं प्रसारणमिति तस्य लिङ्व्यासस्येति प्राप्तं प्रथमसंप्रसारणनिषेधः स्थान्यत्वाश्रयः । द्वितीयस्योदाहरणं [illegible]
पचनित्यत्र अपीपचत् । अत्र अन इति स्थिते । अंत्यकारस्य चङ् परे गुणे तस्य परं च स्यादिवत्त्वात् । निग्रहणे न ग्रह[illegible]तस्य स्तर्तिसुस्[illegible]
णिलोपस्यैकादेशस्य च स्थानिवद्भावात् । इति हित्वा प्राप्तादिति सुधयउपास्य इत्यत्रैकारस्य यकारः स पूर्वो योऽस्तु कोरस्त निमित्तः पू श्री॥
र्वस्य धकारस्य द्वित्वे कार्ये स्थानिवत्स्यात् तत्स्माद्वा द्विर्वचनेति द्वित्वेनेति द्वित्वाप्राप्ता विरुद्धः । न पदांतेति । पूर्वत्रासिद्धमिति सकृत् स्थानिवद्भाव ॥१२५॥
षु विधिषु निषिध्यते । अस्य सूत्रे स्योदाहरणानि तत्र तत्र स्थानेव्याख्यास्यतिस्वयमेव ग्रंथकृत् तथाप्यत्र स्पष्टीकरणार्थं लिख्यंते । पदांते
कौस्तः । अग्नास्तेरल्लोपस्य स्थानिवत्त्वा भावादावः सुध्युपास्य इत्यत्रैवावेयायावरः आतेयं डत्तद्वर्णितिः
ता लोपयलोपेच कृते अतो लोपेन स्थानिवत् । आतो लोप इटिचेति आलोपे कार्ये । तत्र च य चरे इत्यत्र सस्म्य लुकान्वार्थे । न निपातनादः

लुक्॥ अथवा ईकारप्रश्लेषोयं। तेन आमलक्याः फले आमलकमित्यत्र मयट्वा लुकि कृते लुक्तद्धितलुकीति ङीपो लुकि कृते तस्य स्थानि
वद्भावाद्यस्येति चेत्यलोपः स्यात्तस्मादीकारे परतो यो विधिस्तं प्रति न स्थानिवत्। ईकारस्तु कृपणेनेति योगविभागात्सिद्धः। यलोपे कंडूयतेः
क्तिनि कंडूतिः। लोपो व्योर्वलीति यलोपे कार्ये अतो लोपो न स्थानिवत्। स्वरे यथा चिकीर्षकः चिकीर्षतेर्ण्वुलि ईकारस्य लितीति प्रत्ययात्पूर्वस्यो
दात्तत्वे कार्ये अतो लोपो न स्थानिवत्। सवर्णानुस्वारयोः शिंढि पिंषंति। अनुस्वारपरसवर्णौ प्रति श्नस्याल्लोपो न स्थानिवत्। दीर्घे प्रतिदी
व्नः। अकल्लोपो न स्थानिवत्। हलि चेति दीर्घविधौ। जशि। सग्धिः। समानाग्धिः सग्धिः। अदेः क्तिनि घसि कृते सो हलि चेति उपधालोपो जश्
त्वं जशः जश्शीति जश्त्वे प्रति न स्थानिवत्॥ चरि। तद्धसेः तुसि गमहनेति कृते तु उपधालोपः खरि चेति चर्त्वे प्रति न स्थानिवत्। स्वरदीर्घ
यलोपेषु लोपाजादेश एव न स्थानिवत्। इति धकारस्येति। द्विर्वचनं प्रति स्थानिवद्भावनिषेधात्। सुध्युपास्य इत्यत्र वर्तमानस्य धकारस्य अनचि
चीति द्वित्वमित्यर्थः। स्थानेंतरतमः। परिभाषेयमादेशनियमार्थान्नविधिः अत एव हस्थाने प्राप्यमाणानामिति। सदृशतमत्वं तु स्थानार्थ
गुणप्रमाणैः। स्थानेन दंडाग्रं कंठ्ययोरतोः कं आ एव आकारो दीर्घः। अर्थेन वातंड्ययुवतिः वतंडशब्दात् अपत्ये यञ् तस्य लुक् कुक्षिपामिति लु
क। शार्ङ्गरवाद्यञो ङीन् वतंडीत्यासौ युवतिश्चेति पोटेत्यादिना समासः। पुंवत्कर्मधारयेति पुंवत्त्वे कार्ये सर्वः पुंशब्दः प्राप्तः आत्रानेयवतंडा
पत्यार्थो वातंड्यशब्दो ऽवर्तते अर्थतः सादृश्यात्। गुणेन पाकः। त्यजोः कुत्विएत्योरिति चकारस्य अल्पप्राणस्याघोषस्य तादृशः ककारः
स्यात् गुणेनांतरतम्यात्। प्रमाणेन। अमुष्मै। अमूभ्यां। अदसोसेर्दादु दो मः इति ह्रस्वस्य उः दीर्घस्य दीर्घ ऊकारः प्रमाणेनांतरतम्यात्। षष्ठी स्थाने
न इत्यतः स्थानइत्यनुवर्तमानेपि पुनः स्थानग्रहणं यत्रानेकमांतर्यं तत्र स्थानत एवांतर्यं बलीयो यथा स्यादिति चेतासोता। प्रमाणेन अकी
गरगुणः प्राप्तः तत्र स्थानतः अंतरतम्यादेकारो कारोस्तु। तमग्रहणं किं वाग्घरिः झयो होन्यतरस्यामिति हकारस्य एवं सवर्णे कार्ये सोष्मणो
हकारस्य सोष्मत्वात् द्वितीयाश्चतुर्थो वा स्यातां तृतीयः तमग्रहणेन घोषवन्नादवतो महाप्राणस्य तादृशश्चतुर्थः। इति नियमे घकार

स्येति। ऊलौ ऊश ऊशि इति ऊस्त्वे कार्ये ऽनन्तरतम्यात् दंत्यो दकारो दंत्यस्य धकारस्य स्यादित्यर्थः पुनर्द्वित्वं इति। अनचि चेति दस्य द्वि
त्वे इत्यर्थः। एतच्च व्यक्तिपदार्थपक्षे। जातिपदार्थपक्षे तु सकृत् प्रवृत्तस्यैव चरितार्थत्वात् पुनः प्रवृत्तिः। परो। यथा हो न्यतरस्यामि
त्यतो न्यतरस्यामित्यनुवर्त्तते नवा लोप इति हलि कारमतो। शर इति किं शार्ङ्गं। मरीति किं। प्रियपञ्चौ। अलोपस्य पूर्वत्रासिद्धं। येन स्थानि
वदिति स्थानिवद्भावनिषेधात् चकारस्य अकारे लोपः स्यात्॥ सवर्ण इति किं। तप्ती सवर्णग्रहणमर्थ्यात् संख्यातानुदेशो न। सवर्णमात्रे
लोपो भवति। संयोगान्तस्येत्यादि संयोगान्तः सन्नेव यः पदान्तस्तस्येत्यर्थः॥ यण इति। यत्रादेशस्य संयोगान्तलोपस्य प्रतिषेधो वक्तव्यः
व्याख्येयः। तत्रोदाहरणं व्याख्याने यणादेशो वहिरंगः। तेनासिद्धं वहिरंगमंतरंग इति तस्यासिद्धत्वात् संयोगान्तलोपो न स्यादिति। सुध्युपास्य
इति सुधिया शोभनं च बुद्धिना पुंसा॥ अथवा शोभना या बुद्धिः उपास्यः कथिता यो प्रक्रिया यां कृतायां स्थितिद्योच्चारणे सत्येवं भवति सुध्यु
पास्य इति। मध्विमिति मधोरिरिः मधुरिः। मधु अरि इति स्थिते इको यणचीति यणादेशे यथासंख्यमित्युकारस्य वकारे कृते अनचि चेति
धकारस्य द्वित्वे प्राप्ते अचः परस्मिन्निति स्थानिवत्त्वात् द्वित्वाप्राप्तौ न पदान्तेति स्थानिवत्त्वनिषेधे द्वित्वे प्राप्ते झलां जश् झशीति सर्वधकारस्य ज
शः स्थाने ऽन्तरतम इति दकारे पुनर्द्वित्वं। झरो झरि सवर्ण इति मध्यमदकारलोपः। संयोगान्तलोपे प्राप्ते यणो निषेधः संयोगान्तलोपस्य तत्र स्थितिद्यो
च्चारणं। धात्रंश इति। धातुरंशो धात्रंशः धातृ अंश इति स्थिते यणरेफः। द्वित्वं तकारस्य। झशो भावात् झलामिति न प्रवर्त्तते। लाकृतिरिति
लृ इत्यस्य आकृतिरिव आकृतिर्यस्येति स लाकृतिः। अथवा लृ अस्याकृतिः लृकारस्य लकारो यण्। अचः परस्त्वाद भावात् द्वित्वादिर्न
अचो रहाभ्यां॥ अचः किं। ह्नुते। पुनर्द्वित्वे इति। हरि अनुभव इति स्थिते इको यणचीति यणादेशे अचो रहाभ्यामिति यकारस्य द्वित्वे हर्य्य
नुभव इति स्थिते अचो रहाभ्यामिति पुनर्द्वित्वे प्राप्ते इत्यर्थः। एवं स्थिते त्रयो यकारा भवंति। स्पष्टत्वात् कृतं च त्वर्थं व्याख्यायते प्रसं
गात्। नादिन्याक्रोशे पुत्रस्य। अचः परस्य पुत्रस्य परो चिन्न हो न स्तः आदिन्यां परतः आक्रोशे पुत्रादिनी भव हतत आद्य परयोः पुत्रहती पुत्र

हृतीपुत्रजग्धी। पुत्त्रजग्धी शरि परे पौष्करसादेर्मते न त्वयो द्वितीयाः स्युः। तस्य थः। वत्थः। कस्य खः। ख्क्षीरं। पस्य फः। अप्सरसः। विद्युन्नतिपुत्राकटा
यनस्य। आदिषु वर्णेषु न द्वे। इंद्रः। उष्ट्रः। सर्वत्र शाकल्यस्य। अस्य मते सर्वत्र न द्वे स्तः। अर्कः। दीर्घादाचार्याणां। दीर्घात्परस्य न द्वे। दात्रं। हृत्तः। अत्रा
पि अन्यतरस्यामित्यनुवर्त्तते इति वृत्तिकारमतं। हल्लः किं। अत्र। यमो किं। अर्घ्ययमिकिं। अर्याः। शार्ङ्गं। द्वित्वविधानादिति। व्याप्ति पदार्थो अ
यणात्। नद्यादि। व्यक्तौ पदार्थे प्रतिव्यक्ति उक्तलक्षणं प्रवर्त्तते तत्र यदि द्वितीयस्यापि लोपः स्यात् हर्य्यनुभव इत्यत्र प्रवर्त्तमानं हि लक्षणं व्यर्थं स्या
त् तेन द्वित्वविधानसामर्थ्यात् द्वितीयो यकारो ववशिष्यते। अथवान्यतरस्यामित्यनुवर्त्तते लोपाभावे द्वित्वविधानात् ...काले द्वाववशिष्येते इत्य
भिप्रायः। हर्य्यनुभव इति। हरेरनुभवो हर्य्यनुभवः। एचोयाक्रमादिति। यथासंख्यमनुदेशः समानामिति परिभाषयेति भावः। हरयोनिस्तुवेद
ति। हरि विष्णु शब्दाभ्यां चतुर्थ्येकवचने ङे। घेर्ङितीति गुणः। नायकः। पावक इति। नयतेः पुङ्ः ण्वुलि अचो ञ्णितीति वृद्धिः। वान्तो यि प्रत्यये। व
र्णग्रहणं। वर्णग्रहणे च यस्मिन्विधिस्तदादावल्ग्रहणे इति परिभाषया यादौ प्रत्यये परे कार्यमित्यभिप्रेत्याह यकारादाविति। यद्यप्य स्था
नी न निर्दिष्टः तथाप्यादेश ओकारस्य स्थाने स्यात्। आवादेश औकारस्य स्थाने इति ज्ञेयं। कथं पूर्वयोगे द्वित्वधर्मो वांतादेशो दृष्टः इहापि त
द्ध्य एवानुवर्त्तते। गव्यमिति। गोर्विकारः। गोपयसोर्यत्। नाव्यमिति। नावा तार्यं नौवयोधर्मेत्यादिना यत्। गव्यतिरिति। कोर्थः गामिच्छतीत्यर्थः
अध्वपरिमाणे इत्यन्यात्र गोर्यूतिरित्येव। वांत इति किं। रायमिच्छति रैयति यादाविति किं। गोभ्यां नौभ्यां। प्रत्यये किं। गोयानं। नौयानं। धातो
एवेणसिद्धे नियमार्थं वचनं। तन्निमित्तयोरिति। तद्ग्रहणेन यकारादिः प्रत्ययः श्रूयते स निमित्तं यस्य तथोक्तौ। लव्यमिति। लूञ् छेदने अ
सादनीयत्वमेव यत्नमाश्रित्य सार्वधातुकार्धधातुकयोरित्योकारो विधीयमानः तन्निमित्तः स्यात्। अवश्यलाव्यमिति। ओरावश्यक इ
ति ण्यत्। मयूरव्यंसकादित्वात् समासः। लुंपेदवश्यमः कृत्ये इति मलोपः। अत्रापि तमेव ण्यतमाश्रित्य अचो ञ्णितीति जात औकारस्तन्नि
मित्तः। धातोरिति किं। प्रातिपदिकस्य नियमो माभूदिति। तेन ओद्देषः स्यात्। ... नाव्यमिति। अत्र

प्र॰ रू॰ ॥२५॥ न इति। वेञ् तंतुसंताने। आदेच उपदेशेऽशितीत्यात्वं। आङ्पूर्वात् ल्युट्। भावकर्मणोरिति तङ्। धातोर्वेञ्धातुकेयकि यजादित्वात्संप्रसारणं। अकृत्सार्वधातुकयोरिति
दीर्घः। आद्गुण इति गुणो जातः सयादिप्रत्ययनिमित्तो न भवति। ओयते इति। तस्यैव धातोर्लङि रूपं॥ आडजादीनामित्याट्॥ आटश्चेति वृद्धिः। प
वकारकरणं धात्ववधारणार्थं यथा स्यात्। तन्निमित्तत्वावधारणं मा भूत्। तन्निमित्तस्य हि धातोर्वा धातोर्मा भूत्स्यात्। वाञ् व्येञ्ः। छव्यः। छव्या। अ
चेति। अत्रैरेत दादेः स्यायो उच्यते ततश्चा च ऐस्य य उस्य श ह्वेयोः अत्र शक्यार्थे यादौ प्रत्यये परतो यांतादेशो निपात्यत इत्यर्थः। तत्र क्षय्य इत्यत्र क्षि
क्षये क्षि निवासगत्योः। क्षियै अ हिंसायां वा ततो यति प्रत्यये परतो गुणे कृते अयादेशो निपात्यते ऊय्य इत्यत्र जि जये इत्यस्य तथैव यति गुणे कृते या
देशो निपात्यते। क्षेयं जेयं मन इति क्षेतुमर्हं जेतुमर्हं न तु शक्यमित्यर्थः। अत्राह कृत्यस्य जातत्वात् शक्यार्थो भावः। क्रय्यः। डुक्रीञ् द्रव्यविनिमये अस्मा
द् यति प्रत्यये क्रयार्थे यांतादेशो निपात्यते। क्रयार्थ इत्यनेन तदर्थ इति शब्दे व्याख्याते क्रयाय इदं क्रयार्थं चतुर्थीसमासः। तस्मिन् क्रयार्थे प्रसारिते क्रय्या
र्थमुपन्यस्तं द्रव्यमित्यर्थः। क्रेयमन्यदिति। क्रेतव्यं गृहीतव्यं स्यात्। क्रेतव्यमित्यर्थः। लोपः। अवर्णासवर्णयोरिति। नन्वेवं तु चकारो नगो अघो अपर्वस्यैव तु च क्रीते
। ततो न्यो जगो अघो अवर्णसवर्णयोरिति वक्तव्यं। मैवं। ओतो गार्ग्यस्येति नेत्यः। परयोर्नित्यं लोपं विधास्यति अतः साध्यत्वं अवर्णासवर्णयोरिति। शाकल्य
ग्रहणं विकल्पार्थं न पूजार्थं इत्यन्ये प्रत्याहुर्वा लोप इति। सर्वत्र समानामध्यायानां समाहारः सप्ताध्यायी पादेन सह वर्तमाना सपादसप्ताध्यायीसौ स श्री॥ ॥२५॥
साध्यायी सपादसप्ताध्यायी॥ हृद्गिरादे जित्यारभ्य सर्वत्रासिद्धमित्यारभ्य अष्टमाध्यायपरिसमाप्त्यवधिका। ये त्वत्र त्रिपाद्यां षष्ठीनिर्देशाः स
प्तमीनिर्देशाश्च पंचमीनिर्देशाश्च ते षष्ठीस्थानेयोगा। तस्मिन्निति निर्दिष्टे पूर्वस्य तस्मादित्युत्तरस्य त्यादौ कर्तव्ये नासिद्धा भवंति। यतः सर्वत्र
मासौ परिभाषाश्चात्र न प्रवर्त्तन्ते। एषां नास्ति कार्यकाले हि संज्ञापरिभाषं यत्र कार्यं तत्र द्रष्टव्यमिति न्यायात्। विप्रतिषेधे परं कार्यमिति परिभा
षा अत्र न प्रवर्त्तते यतः परे लक्षणं येन सर्वेण लक्षणेन सह स्पर्द्धते तस्यासिद्धं। ततश्चात्र गोर्यमित्यत्र गुरेः पुंगतिर गुणः परेण हलि चेति दीर्घे
णन बाध्यते॥ अपवादस्य तु परस्यापि उत्सर्गे पूर्वकार्ये वचनप्रामाण्यात् असिद्धत्वं न। तेन ढो ढे लोप इत्यत्र लत्वस्यासिद्धत्वात् ढोढे इति ढत्वं स्यात्तन्न।

अत्र तु पुनर्न संधिरिति। हरेऽव हीत्यत्र एचोऽयवायाव इत्ययादेशे संधौ कृते यस्य लोपे कृते हरिएव इति दृष्टिं कुर्वाणः पुनः संधिः प्राप्तः तस्मिन्नुच्छाध्या
यस्ले कार्ये प्राप्ते त्रिपादीस्थो लोपः शाकल्यस्येति कार्यमसिद्धमिति कृत्वा यकारेण व्यवहितत्वात् न प्रवर्तते इत्यर्थः। विष्णव इहीत्यादि। आद्गुण इति
गुणः प्राप्तः सन् भवति आह ह्रसिं स्यात् लोपस्याकानिसंतीत्यादि। अस्ति लट्प्रथमपुरुषबहुवचन द्विवचनयोः परयोः अस्तेरल्लोप इत्यकारलो
पः परनिमित्तजादेश इति कृत्वा कानिसंतीत्यत्र ईकारस्य यणादेशे कार्ये कोक्तइत्यत्रौकारस्यावादेशे कार्ये तस्य अचः परस्मिन्निति स्थानिवत्त्वं प्रा
प्तं तस्य च पदान्तविधिं प्रति न पदान्तेत्यादिना निषेधात् यणादेशोऽवादेशश्च न भवतीति भावः॥ ननु व्याकरणे पदानामेव संस्कारात् द्वितीयप
स्यानिमित्तत्वे नासंनिधानादनादिष्टादचः पूर्वत्वासंभवात् स्थानिवत्त्वाप्रसंगात् यणादिप्राप्तिरेव नास्ति किं पदान्तेत्यस्थानिवद्भावनिषेधेन। उच्यते
व्याकरणेन वाक्यमपि संस्क्रियते परमं जयति यद्यपि पदमेव संस्क्रियते न वाक्यं तथापि वाक्यगतेऽस्ति इत्यादौ पदे व्युत्पाद्ये कानिसादेरनन्तरस्य विधि
मित्तत्वे संनिधानमविरुद्धं। आद्गुणः। अवर्णादित्यादि। अचीति अनुवर्तते तस्मिन्निति निर्दिष्टे पूर्वस्य गुणादेशः प्राप्तः। आदिति निर्दे
शात् तस्मादित्युत्तरस्येति उत्तरस्य तथा ह्यस्यार्थः पंचम्यर्थनिर्देशेऽनंतरस्य परस्य तु कार्यं स्यादिति एवं स्थिते एकः पूर्वपरयोरित्यधिकाराद् उभयोः
स्थाने एको गुणादेशः स्यादिति चेत् सिद्धत्वात् ह्रस्वपूर्वपरयोरेको गुण इति। स गुणादेशः स्थानेऽन्तरतम परिभाषया सदृशतमः स्यादित्याह स्थानेऽन्तरतम
इति। उपेंद्र इति। इंद्रमुपगतः उपेंद्रः उप इंद्र इति स्थिते पूर्वपरयोरकारेकारयोः स्थाने गुणसंज्ञा अदेङ् प्राप्तास्तत्र अकारस्य अकुहविसर्जनीया
नां कंठ इति कंठस्थाने इचुयशानां तालु इति इकारस्य तालुस्थाने तत्र स्थानतोऽन्तरतमादेदैतोः कंठतालु इति कंठतालुस्थान एकारो भवति। रमे
श इति रमायाः ईशो रमेशः पूर्ववदाकारस्य ईकारस्य च स्थाने एकारः। गंगोदकमिति। गंगाया उदकं गंगोदकं। अत्राप्यकारस्य कंठ्यस्य उकारस्य च
उपध्मानीयानामोष्ठौ इति ओष्ठ्यस्य स्थाने स्थानतोऽन्तरतम्यादोदौतोः कंठोष्ठमिति कंठोष्ठस्थ ओकारः स्यात्। कृष्णर्द्धिः न वल्कार इत्यत्र चेति।
:कृष्णस्य ऋद्धिः तव ल्कार इति स्थिते अकारस्य ऋकारस्य अकारस्य ल्कारस्य च स्थाने आद्गुण इति गुणादेशे क्रियमाणे सति उच्यते इत्यर्थः॥

प्र॰ स॰ उरण्॥ ऋलृस्थानेऽस्यणो लेरेण विधीयमानोऽण् विधानकाल एव तेन सह स्वर प्रत्याहार परो र परत्वविशिष्टोऽनेन सूत्रेण आख्यते। एवं सति रश्रुति
॥२६॥ मत्सः। ऋकारस्य रश्रुतिमत्त्वे न गुणोऽभवति अ र् आर इत्यादौ। तथा ऋवर्णग्रहणेन लृवर्णस्यापि सावर्ण्येन ग्रहणात् लृकारस्य लश्रुतिमत्त्वाल्लश्रु
तिमत्त्वे न गुणो भवति अल्। तथा च भाष्यकारः वृद्धिर्भवति गुणो भवति रेफशिरा गुणवृद्धिसंज्ञो भवति इति॥ ननु वन्धुरत्र वृद्धिः तवल्कार इत्यत्राको
ऽकारस्य ऋलृयोः स्थाने भवन्नण् कथं ऋलृस्थानीयत्वेन रपरः स्यात्। उच्यते। यो ह्युऋयोः स्थाने विधीयते ऽभवति सावन्यतरव्यपदेशो। य
था देवदत्तस्य देवदत्तायाः पुत्रो देवदत्तपुत्र इति। द्वित्वमिति। अचो रहाभ्यामित्यनेन धकारस्य द्वित्वे ऽद्धं च॥ ॥यण इति॥ इणः परस्य
मयो द्वे स्त इति ककारस्य द्वित्वे। वृद्धिः। आदित्यादि॥ अवर्णात् परो य एचौ ऽपरश्च सवर्णीयो वर्णस्तयोः पूर्वपरयोः स्थाने आद्गुणापवादो वृद्धिरेक
देशः स्यादित्यर्थः एत्येधतीत्यादि। आदिति वर्तते वृद्धिरेचीति च॥ तत्र एजिति एतेरेव विशेषणं न एधतेर्व्यभिचारान्नास्यात् उवोपिन
असंभवात्। इणगतावित्यस्मिन्नजादौ धातौ एधवृद्धावित्यस्मिन्नूठि च पूर्वयोऽवर्णात् तत्र परो य एच् उवृत्तयोः पूर्वपरयोः स्थाने वृ श्री
द्धिरेकादेशः स्यादित्यर्थः॥ पररूपेत्यादि। एत्येधत्यूठि इति पररूपापवादः ओमाङोश्चेति पररूपस्य न बाधः पुरस्तादपवादा अनन्तरान्विधी ॥२६॥
न्बाधन्ते नोत्तरानिति परिभाषया तेन हस्त उप आ इतः उपेतः उप्या गुणापवादः प्रष्ठौह इति। प्रष्ठं वहतीति वहश्चेति ण्विः। ततः षष्ठो ऊठ्
वने। वाह ऊठ् इति संप्रसारणं द्वेति पूर्वरूपत्वे ततो वृद्धिः एवीत्येव। उपेतः अपेतः अक्षादिति। अक्षशब्दस्य ऊहिन्यपरतो वृद्धिर्वक्तव्येत्यर्थः
अक्षौहिणीति। अक्षाणामूहः समूहः सोऽस्यास्तीति मत्वर्थीय इनिः ऋन्नेभ्यो ङीप् इति ङीप्॥ स्वादिति। स्वशब्दस्य ईर ईरिन्शब्दे च प
रतो वृद्धिः स्यात् इति वाच्यमित्यर्थः। स्वैरमिति। ईरणमीरः भावे घञ्। स्वस्य ईरः स्वैरः। ईरशब्दे परतो वृद्धिः ततः स्वैरी विग्रहस्तरस्यास्तीति स्वै
री कृत इति। इनिन्तायितिइति। प्रातिपदिकग्रहणे लिङ्गविशिष्टस्यापि ग्रहणमिति परिभाषया ईरिन्ग्रहणेन ईरिणीशब्दस्यापि ग्रहणमित्य
भिप्रेत्याह स्त्रीलिङ्गोदाहरणमाह स्वैरिणीति। स्वेनेरितुं शीलमस्याः सुप्यजातौ णिनिस्ताच्छील्ये। अथवा मत्वर्थीय इनिः। ऋन्नेभ्यो ङीप् इति

डीप्रणत्वे। ननु चार्दं तस्य ईरशब्दो ऽस्योदाहरणं तु स्वादीरेरिणः। इत्यस्मिन्वक्तव्ये ईरिणी शिति इत्येतच्छब्दस्य पृथग्ग्रहणं कर्तव्यमिति स्वन
र्थं। तथा च महाभाष्ये ऊठ्युक्ते। ईरि न ग्रहणं शक्यमकर्तुं। कथं स्वैरी तिनैतन्मत्वर्थीयेन सिद्धं स्वैरोस्यास्तीति स्वैरीति। प्रादिति। अन्यस्तो प
संग्रहार्थं वक्तव्यमध्येतुरूहशब्दप्रक्षेपः प्रौह इत्युदाहरणं च। प्रात् किं। उपोढः। ननु कथं प्रौढ वानित्यत्वनवृद्धिः। अर्थवद्ग्रहणे नानर्थकस्येति
परिभाषया। कथं तर्हि ऊढशब्दाणि विकृतेन प्रौढयतीति। ऊढि शब्देनैव्यं तस्यापि ग्रहणात्। प्रैषः प्रैष्यः इति। इषु गतौ हिंसादानेषु इषुइ
च्छायामिति वा। आ ज्यां प्रस्वी ज्यां यदा इत्यन्न तदा प्रेषः। यदा एव ततदा प्रेष्यः। गुणाय चेति। प्रेष्वेति प्रेषप्रेष्य इत्यनयोरुदाहरणयोः
तथा च देगं सिंहादिष्टचावक्तुं। प्रेषप्ययोरेत्वं विज्ञापयेति। ऋते। सुखेन ऋतः ऋत इति सुखार्त इत्यस्य तृतीया समा। सत्वप्रदर्शनार्थो विग्रहवा
क्यं। स च समासः कर्तृकरणे कृता बहुलमित्यनेन ऋकारस्य रश्रुतिमतो रश्रुतिमानेवाकारो वृद्धिः॥ आन्तरतम्यात्। परमर्त इति। परम
ऋत इति सन्महदित्यादिना समासो न तृतीया समासः॥ अतो ऽचात्गुणा इति गुण एव। ऋते किं सुखेनेतः सुखेतः प्रवत्सतरेति। कामाव
त्सशब्दस्य स्थाने वत्सरशब्दे पठितवेतस्तन्मतोपसंग्रहार्थं वत्सरोत्युक्तं। एषा ऋणशब्दे परतो वृद्धिरेकादेशः वत्सतरार्णमित्यादि। दिशब्दे
न वत्सरार्णं वलार्णं। वसनार्णं। ऋणार्णं। दशार्णमिति। उपसर्गातृ। उपसर्गात् उसर्गादादिति। येन विधिस्तदंतस्येति ऋवर्णान्तादुपसर्गादि
त्यर्थः। अस्य सूत्रस्यायमर्थः। येन विशेषणेन विधीयते कार्यं तदंतस्यांत्यांत्यस्य समुदायस्य स्वस्य च तत्संज्ञा स्यात्। एरच्। चयः। अयः स
मासप्रत्ययविध्योर्नक? परमाश्रितः द्वितीयाश्रितेति समासो न। परमनडस्याप त्यं नडादिभ्यः फक् न उगिद्वर्णग्रहणवर्जं उगितश्च।
अतिस्वचाती। अतु इत्यदादिः यस्मिन्विधिस्तदादावल्ग्रहण इति वाच्यं। भुवः श्रियः इति। उपातीति। ऋच्छगतीन्द्रिय प्रलय मूर्ति भाव
षु। उपसर्गात् किं। स्व ऋच्छति। ऋतीति किं। उपइतः। उपेतः। उपसर्गग्रहणादेव धातुग्रहणे सिद्धेऽपि धातुग्रहणं ऋत्यक इति शाकल्यमतेन प्रकृ
तिभावः स्यात्तन्निवृत्त्यर्थं। तन्निवृत्तिश्च धातुग्रहणे सति योगविभागाद्भवति। उपसर्गाद्दुतीत्येको योगः। उपसर्गादृति वृद्धिः स्यात्तेनोधा

अ. की.
॥१७॥

तावितिद्वितीयः तत्रापिउपसर्गादृतीत्यनुवर्त्तते। तत्रद्वितीयो योगो बाधक बाधनार्थः। तेनपक्षेशाकल्येन भवति। वासुपि। आदित्यादि
। ऋकारीता ऋपसर्गात् सुवंतावयवे धातौ ऋकारादौ पूर्वपरयोर्वृद्धिरेकादेशो वास्यादित्यर्थः॥ आपिशलिग्रहणं पूजार्थं येति त्युच्यम
एवप्रार्णच्छ्यतेतेति। ऋषभमात्मन इच्छतीत्युपत्रात्मनः क्यच् क्यचि चेतीत्वं॥ सावर्ण्यादिति। ऋलृवर्णयोर्मिथः सावर्ण्यं वाच्यमिति
त्रलृ अनयोः सावर्ण्यादत्र ऋग्रहणेन लृकारस्यापि ग्रहणं स्यात्। अतस्तु प्रालृकारीयतीति सिध्यतीति भावः। एङि पररूपं पररूपमेका
देशो वृद्धेरपवादस्त्वग्रे ज्ञलइति। एजादौ च परे उपोखतीति। ओखृ शोषालमर्थयोः। उपेङ्कीयतीति। एङ्कमात्मन इच्छति। प्रोञ्चीयतीति। ओ
यमात्मन इच्छति। ओंकंधुरिति। शकानां जनपदानां अंधुः कूपः शकंधुः। कुलटेति। कुलान्यटतीति पचाद्यच्। स्वैरिणी। सीमंत इति। सीम्नो ऽन्तः
सीमन्तः। केशवेशे वाच्य अन्यत्र सीमांतः। मनीषा पतंजलिरित्यत्र शकन्ध्वादित्वादेत्य लोपे पश्चात् पररूपं। अथवा ओमाङोश्चेति उत्तरसूत्रे चकारो
धिक विधानार्थः। तेनैतेषां पररूपं स्यात्। एतन्मनएतदुत्थयोः भवति। तस्य च चकारस्याधिकविनार्थत्वेन्यासकरोच्चीकृतत्वात्। उत्तरसू
त्रे चकारोधिकविधानार्थः तेन शकन्ध्वादिष्वपि पररूपं भविष्यतीति। मनीषेति मनस ईषा हलीषेति हलस्येषा। लांगलीषेति। एवंवत्। पतंज
लिरिति पतन्त्यंजलयः पतन्ति यस्मां अंजलेरित्यर्थः। सारंग इति। सारलंगानियमस्यस्तः ए वइति। नियोज्ञनेनियोगोव्यापारः ननियोगोऽनियोगः त
स्मिन्नेवशब्दे अनियमे वर्त्तते यदा व्यारेण विशिष्टं नियममाह तदा पररूपं भवति यदा तु व्यापारविशिष्टं तदा न क्व तु वृद्धिरेवस्यादिति
। अद्येवेति स्वरूपाख्यानेन तु नियोगः। अद्यैवगच्छेति नियोगः। अन्ये तु नियोगो नियमोऽवधारणमिति यावदिति नियोगं व्याख्याय अनि
योगमनवधारणं कथयंति तन्मते यथेदेवमधुनासन्नेशशरीरमित्यादयः प्रयोगाउपपन्ना भवंतिइत्याहुः। स्थूलोतुरिति। स्थूलश्चासावोतुश्च
बिम्बमिव ओष्ठो यस्य स तथा। पक्षे वृद्धिरेवेति वृद्धिः। बिम्बौष्ठ इति। वाक्यमेव न समासः। ओमाङोः। एकः पूर्वपरयोरित्येव। ननु किमर्थमि
हागौडोग्रहणं यावता शिवआ इहि इत्यत्र कृते सवर्णदीर्घत्वे आद्गुणे च कृते शिवेहीति रूपं सिद्धमेवेति न सिद्ध्यति यतो धात्वपस

श्री॥
॥१७॥

णीयोः कार्यमंतरंगमितिसर्वेमाद्गुणेनभाव्यंतथाच वृद्धिः स्यात्ततआ ऊेग्रहणं कार्यं च वृद्धिवाधनार्थं सवर्णदीर्घबाधनार्थं च। ननु च सर्वगुणेह्य
ते एकारेवाज्ञाते ऽज्ञो नि चर्त्तितत्वात् इ इत्यस्य तेनप्रवर्त्तते। नैष दोषः द्वयोः षष्ठीनिर्दिष्टयोः स्थाने यो भवति स लभतेन्यतरव्यपदेशमिति परि
भाषया। आद्ग्रहणेवगृह्यते। ब्रह्मौतमिति। आउ तं ओ नं ब्रह्मालि। ओतं। ब्रह्मौतं। राजर्षिरिति। आ ई इत्त ऋषिः। ऋषिः राजा वा स च ऋषिश्च राजर्षि
ः। अन्नांतरंगत्वात् एवमाद्। ऋकारस्य च गुणे कृते सवर्णदीर्घबाधनार्थं पररूपं। अव्यक्ता। अव्यक्तेत्यादि। अव्यक्तः अपरिस्फुटवर्णो वेयः श
ब्दः तस्य योनुकरणशब्दो ध्वनिसादृश्येनव्यक्तवर्णा एव तस्य योऽत् शब्दः तस्य सर्वस्य इति शब्दे परतः पूर्वपरयोः स्थाने पररूपं एकादेशः स्या
त् इति तात्पर्यार्थः। ननु च कि मित्य च अलोंत्य परिभाषा न प्रवर्त्तते। उच्यते। नानर्थकेलोंत्यविधिरिति॥ अथ वा उत्तरस्त्रे तेऽस्य स्येति वचना
अतः किमिति। तकारान्तग्रहणं किमर्थमित्यर्थः। घटदिति दकारान्तमेवैतन्न तदनुकरणं। अव्यक्तानुकरणस्य किं जगदिति। अतः किं
ऽचलोमा भूत् मरुदिति। इतावितिकिं पटद् शब्दामेडितस्य। अव्यक्तानुकरणस्यात इताविन्यनुवर्त्तते। पटत्पटेति। नित्यवीप्सयोरिति द्वित्वे
तकारस्य पररूपे अकारेण सह इकारस्य गुणः। पटत्पटदिति तकारपररूपाभावे ऽप्याह। ...जशोंत इति जश्त्वं। अनुकरणशब्दः पटदित्या
दिर्यस्तद्द्विरुच्यते तदा तस्याऽर्द्धस्य पररूपं न स्या। यदा तु समुदायोनुकरणं तदा स्यादेव पूर्वेण पररूपं पटत्पटदिति॥ अकः इकोय
णचीत्यतोऽचीत्यनुवर्त्तते इत्याशयेनाह सवर्णेऽचीति। देशारिरित्यादिः षष्ठीतत्पुरुषः तुल्यास्यप्रयत्नं सवर्णमिति सर्वत्र सवर्णसंज्ञा अ
कः किं अग्नये परस्मात् हेर्दितीति गुणे कृते उ ए योरेकारयोः सवर्णत्वेपि अगभावात्। अच सवर्णदीर्घो न। सवर्णे किं दध्यत्र भिन्नस्थानत्वा
त् सावर्ण्याभावः। होतृकार इति। होतृ ऋकार इति स्थिते अकः सवर्णदीर्घत्वे प्राप्ते ह्रस्व एव ऋकार एकादेशो ज्ञातः पक्षे दीर्घ एव भवति हो
लृ तॄकार इति ज्ञेयं। होतॄॡकार इति होतृ ऌकार इति स्थिते ऌकार एकादेशः पक्षे इति। यदा ऌकारो न भवति तदा ऋवर्ण ऌवर्णयोर्मिथः
सावर्ण्यात् दीर्घस्य च ऌकारस्याभावात् सवर्णदीर्घकार्ये ॠकार एव भवति। अचि किमिति। इको यणचीत्यतोऽचीति किमर्थमनुवर्त्ये

अ॰स॰ ॥१९८॥

त्ते इति प्रश्नाभिप्रायः। उत्तरमाह कुमारी शेत इति। इचुयशानां तालु। इति ईकारशकारयोः तुल्यं स्थानं। विवृतमूष्मणां स्वराणां चेति तुल्यः
प्रयत्नः। एवं च सति यदि अचीति नोच्येत तदा तत्रापि सवर्णदीर्घः स्यादित्यभिप्रायः। ननु वाच्यसवर्णसंज्ञैव नास्ति अपवादादिति अत आह
णानुवृत्तिनिराकरणवादी अपवादे प्रवसति॥ ज्झलौ। तुल्यास्येति तुल्यस्थानप्रयत्नावपीत्यर्थः। अनेनापवादेन अ— त्रोः सावर्ण्यनिषेध
त अचीत्यनुवृत्तिं विनापि कुमारी शेते इत्यत्र सवर्णदीर्घो न स्यादिति भावः। सिद्धान्ती परिहरति। इति सावर्ण्ये तिनाज्झलाविति सावर्ण्यनि
षेधो दीर्घशकारयोर्न भवति अयं भावः। नाज्झलाविति अत्र अजिति प्रत्याहारः सन्निविष्ट एवाकारादयो गृह्यंते न तु तत्सवर्णा अपि अणुदित्स
वर्णस्य चाप्रत्यय इत्यस्य शास्त्रस्य सवर्णसंज्ञाविधायकशास्त्रं प्रत्यत्यसिद्धेः। यतस्तस्य सवर्णसंज्ञा अर्गं तस्या अंगीकृतायां असिद्धौ अंगिनो
पि ग्रहणकशास्त्रस्यासिद्धिः। तस्या नाज्झलाविति ग्रहणकशास्त्रानिवृत्तेः तत्र प्रत्याहारस्थत्वसंनिविष्टा एव अकारादयो गृह्यंते तेन न दी
र्घशाकारयोः अयं सावर्ण्यनिषेधो न। दीर्घस्य प्रत्याहारस्थत्वसंनिवेशाज्झलावातइति। एङः। अयवायादेशयोरपवादोयं। हरेइति। ह्रस्वस्य गुण इति गु
णः। अवेति। अव रक्षणे लोट् मध्यमपुरुषस्यैकवचनं। एङ इति किं दध्यत्र। पदांतादिति किं। चयनं। लवनं। अतिकिं। वायो इति वाय्वेति।
तपरः किं। वाय वायाहि। सर्वत्र विभाषेति प्रतिषेधविकल्पयोः संज्ञा। तथा च सूत्रं। न वेति विभाषा। नेति निषेधो वेति विकल्पः तयोः प्रतिषे
धविकल्पयोः विभाषेति संज्ञा स्यात् विभाषेति शब्दोपि संज्ञा तस्यार्थौ विकल्पोपि संज्ञा तथ्य विकल्पार्थेषु वान्यतरस्यां। आचार्यग्रहणं इत्ये
तेष्वपि प्रतिषेधविकल्पौ उपतिष्ठेते इति सिद्धांतः विभाषाप्रदेशेषु निषेधविकल्पावुपतिष्ठेते। तत्र निषेधेन समीक्षिते विषये विकल्पः प्रवर्त्तते। उ
भयत्र विभाषा प्रयोजनमस्याः संज्ञायाः यथा विभाषा श्वेः शुशाव। शिश्वाय शुशुवतुः। शिश्वियतुः। शिश्वयुः शुशुवुः। एण्डि आश्वासे अतुसि
प्राप्ते संप्रसारणे इति [illegible] विभाषा कर्तव्येति भावः। अवङ्। अचीत्येतदनुमंडूकप्लुतिन्यायेनानुवर्त्तनं एवं स्फ्रिप्रेत्याह अचीति। अयुद्रा
नायमादेशो नियमः अयं विभाषा प्रकृतिः स्यते। सन्निपातनस्वरोखेडुचौहोइकृतिस्वरविधौ भवति। गावोग्रमस्य गवाग्रमिति। अन्यस्मिंस्तु समा

मो॥ ॥१९८॥

मिसमासांते। दान्तत्वेन बाध्यते स्फोटायनग्रहणं पूजार्थं। विभाषेत्यनुवर्त्तत एव। इं ङि चाउं ङशब्दस्ते चिपरतो गोर्नित्यमवङ् स्यात्। गवेंद्र इति। गवाग्निं
द्रोयज्ञवरुः। सर्वेण विकल्पे सिद्धे अवंङ् सामर्थ्यादेवास्मिन्विधौ नित्ये सति पुनर्नित्यग्रहणं प्लुतप्रगृह्या अचीत्युत्तरार्थं।। त्वकारादिति। अनुक्त
समुच्चयार्थादित्यभिप्रायः। अचोंत्यादिटि। संधिविरहानामचांमध्ये योंत्योभूतदादिकोयः शब्दः सटिसंज्ञस्त्यभिप्रायः। दूरात्। दूरत्वं यद्यप्यनव
स्थितं तथापि हूतग्रहणसामर्थ्याद्धूतापेक्षमिहाश्रीयते। यच्च प्राकृतात्प्रयत्नात्प्रयत्नविशेषे आश्रीयमाणे शब्दः श्रूयते तेन दूरं। हूतग्रहणं च
संबोधनमात्रोपलक्षणं द्रष्टव्यं। तेन यत्राह्वानं नास्ति तत्रापि प्लुतः स्यात्। अस्याश्च प्लुतेरेकश्रुति दूरात्संबुद्धावित्यनयैकश्रुत्या समावेश इष्यते।
दूरात्किं।। आगच्छ भो ब्राह्मण देवदत्त एतत्सूत्रव्याख्यानेनैव व्याख्यातप्रायत्वात्तस्य स्पष्टत्वात्स्यक्तानि प्लुतविधायकानि षड्विंशतिसूत्राणि व्याख्या
यंते।। वाक्यस्य टेः प्लुत उदात्तः। इतः परमापादसमाप्तेः वाक्यस्य टेः प्लुत उदात्त इति सर्वमधिकृतं वेदितव्यं। वाक्यसंज्ञा पारिभाषिकी महाभाष्येऽउ
क्ता। तथाहि। आख्यातं साव्ययकारकविशेषणं वाक्यं। आख्यातं साव्ययं सकारकं सविशेषणं वाक्यसंज्ञं भवतीति वक्तव्यं। साव्ययं उच्चैः पठ
ति। नीचैः पठति। सकारकं ओदनं पचति। सकारकविशेषणं मृदु विशदमोदनं पचति। सक्रियाविशेषणं चेति च वक्तव्यं सुष्ठु पचति दुष्ठु पठति।
अपर आह। आख्यातं सविशेषणमित्येव सर्वाणि ह्येतानि क्रियाविशेषणानि। एकतिङ्। एकतिङ् वाक्यं भवतीति वक्तव्यं। ब्रूहि ब्रूहि इति स संबोध
नस्य सतिङंतस्यापि सविशेषणत्वं स्यादिति वाक्यपदीये तूक्तं। संबोधनपदं यच्च तत्क्रियाया विशेषणमिति। तथा यथाऽनेकमपि स्कांते।
तिङंतस्य विशेषकं तथा तिङंतमथ्या कुर्वन्ति ङंतस्य विशेषकं एवा तिङंतमथ्या — मिति। तच्चोदाहरिष्यामः। वाक्यग्रहणमनंत्यस्य पदस्य निवृ
त्त्यर्थं। टिग्रहणं व्यंजनांतस्यापि टेः प्लुत उदात्तो यथा स्यादिति। अग्निचित इति। प्रत्यभिवादेऽशूद्रे। अभिवादयिते आशीर्वादः प्रत्यभिवादः यत्रस्मृ
द्रविशेषयोर्यद्वाक्यं प्रवर्त्तते तस्य टेः प्लुत उदात्तः स्यात्। अभिवादये देवदत्तोऽहं भोः। आयुष्मानेधि देवदत्त३। अभिवादनवाक्ये संकीर्त्तितं ना
म गोत्रं वा यत्र प्रत्यभिवादे प्रयुज्यते तत्रायं प्लुत इष्यते तेन इह न। देवदत्त कुशल्यसि। आयुष्मानेधि। अशूद्रे किं। शूद्रोऽभिवादयेऽहं भोः।।

प्र·सू·
॥१९॥

आयुष्मानेधि रे३ इ स्त्रियामपि निषेधः। अभिवादये गार्ग्यहं भोः। आयुष्मती भव गार्गि३ भोः। राजन्यविशो वा। राजन्योऽहं इन्द्रवर्माहं भो। आयुष्मानेधि
इन्द्रवर्मा३न्। विशि। इन्द्रपालितोऽहं भोः। आयुष्मानेधि इन्द्रपालि३त् न पक्षे न। हैहेप्रयोगे हैहयोः। दूराद्धूते हैहयोरेव प्लुतः। पुनर्हैहप्रयोगे अन्त्यस्य
योरपि यथा स्यात्। है३ देवदत्त। देवदत्त है३। हे३ देवदत्त। देवदत्त हे३। गुरोरनृतोऽनन्त्यस्याप्येकैकस्य प्राचां। अनन्त्यस्यान्त्यस्य च ऋकारवर्जि
तस्य गुरोरेकैकस्य प्लुतः स्यात् प्राचां मतेन। दे३वदत्त। देवद३त्त। देवदत्ता३। गुरोः किं। वकारात्परस्य मा भूत्। अनृतः किं। कृष्ण३मित्र। कृष्णमि
त्र। एकैकग्रहणं पर्यायार्थं। प्राचामिति विकल्पार्थं। आयुष्मानेधि यज्ञदत्तेन यन्तु स्यात् सर्व एव प्लुतः साहसमनिच्छता विभाषा पादकृत्य
इति न उपपद्यते। ओमभ्यादाने। आरम्भे ओंकारः प्लुतः स्यात्। ओ३म् अग्निमीळे पुरोहितं। अभ्यादाने किं। ओमित्येकाक्षरमुद्गीथमुपासीत। ये य
ज्ञकर्मणि। येयज्ञस्य प्लुतः स्यात् यज्ञेऽध्ययने। ये३ यजामहे। यज्ञकर्मणि किं। स्वाध्याये मा भूत्। ये यजामह इत्यत्र तु वायां प्लुत इष्यते इह न भ
वतीत्येके वा सो दिव्येकादशस्थेति। प्रणवष्टेः। यज्ञकर्मणि वाक्यस्य टेः स्थाने प्लुतः प्रणव आदेशः स्यात् प्रणवो नाम पादस्य वार्धस्य वा अ
३१ न्त्यमक्षरमुपसंहृत्य तदाद्यक्षरशेषस्य स्थाने त्रिमात्रमोंकारं वा विदधति इत्याचक्षते प्रातिशाख्यविदः। अपां रेतांसि जिन्वतो३म्। टेरित्यनु प्रौ॥
वर्तमाने पुनष्टिग्रहणमोकारादेशपक्षे सर्वादेशार्थं ओकारादेशपक्षेऽत्वेन कालत्वादेव सर्वादेशः स्यात्। याज्यान्तः। यज्ञकांडे ये मन्त्राः पठ्यन्ते ॥१९॥
ते याज्याः तेषामन्तो यष्टिः संप्लुवते यज्ञकर्मणि। स्तोमैर्विधेमाग्नया३इ। अन्तग्रहणं वाक्यसमुदायरूपाणां याज्यानामृचां यावन्ति वाक्या
नि तेषां सर्वेषां टेः प्लुतो मा भूत् किंतु सर्वान्त्यस्यैवेत्येवमर्थं। ब्रूहिप्रेष्यश्रौषड्वौषडावहानामादेः। एषामादेः प्लुतो यज्ञकर्मणि। अग्नयेऽ
नुब्रू३हि। अग्नये गोमयानि प्रे३ष्य। अस्तु श्रौ३षट्। सोमस्याग्ने वीही३ वौ३षट्। अग्निमा३वह। अग्नीत्प्रेषणे परस्य च। अग्नीध ऋत्विजः प्रेषणे
अग्नीत्प्रेषणे हर बर्हिस्तृणीहि इह तु उद्धर३ उद्धर। अभिहर३ अभिहर। छन्दसः तः प्लुतव्यत्ययः। यज्ञकर्मणीति निवृत्तं। विभाषा। पृष्ट
प्रतिवचने हेः। पृष्टप्रतिवचने हीत्यस्य प्लुतो वा। अकार्षीः कटं देवदत्त। अकार्षं हि३। अकार्षं हि। पृष्टप्रतिवचने किं। कटं करिष्यसि हि है। शिवि किं

करोमि ननु निगृह्यानुयोगे च। स्वमतात्प्रच्यावनं निग्रहः। नियोगो निग्रहाविष्करणं। तत्र निगृह्य निग्रहं कृत्वानुयोगे यद्वाक्यं वर्त्तते तस्य टेः प्लुतो
वा स्यात्। अद्य श्राद्धमित्यात्थ३। त्वं शब्दः इत्यात्थ३। अपरो आत्थ३॥ आम्रेडितं भर्त्सने। आम्रेडितं नं भर्त्सने प्लुतं स्यात्। चौर चौर३
घातयिष्यामि त्वां॥ भर्त्सने पर्यायेणेति वाच्यं। चौरा३ चौरात। तदर्थमाम्रेडितग्रहणं द्विरुक्तोपलक्षणार्थं वर्णयंति तदर्थमिति पर्यायेण प्रवो
त्तरयोर्योगयोः प्लुतो यथा स्यात् इत्येवमर्थं। अंगयुक्तं तिङाकांक्षं। अंगशब्देन युक्तं साकांक्षं तिङंतं भर्त्सने प्लवते। अंगकूज३ ज्ञास्यसि ज
ल्म भर्त्सने किं। अंगाधीष्व मोदकं ते दास्यामि आकांक्षं किं। अंग पच नैतदपरमाकांक्षति। विचार्यमाणानां। विचार्यमाणवाक्यानां टेः प्लुतः स्या
त्। होतव्यं दीक्षितस्य गृहे३ न होतव्यं दीक्षितस्य गृहे३। पूर्वं तु भाषायां। लोके तु विचार्यस्य पूर्वमेव प्लवते। अहिर्नु३ रज्जुर्नु। प्रतिश्रवणे
च। अभ्युपगमप्रतिज्ञाश्रवणाभिमुख्यं प्रतिश्रवणं तत्र यद्वाक्यं वर्त्तते तस्य टेः प्लुतः स्यात्। गां मे देहि भोः अहं ते ददामि३। नित्यः शब्दो भवितुमर्हे
ती३ देवदत्त भोः किमात्थ३। अनुदात्तं प्रश्नांताभिपूजितयोः। दूराद्धूतादिविहितः प्लुतः प्रश्नांताभिपूजितयोरनुदात्तः स्यात्। आगमा३ पूर्वा३न्
ग्रामा३न्। अग्निभूता३इ पटा३उ। प्रश्नांते वर्त्तमानस्यानुदात्तः प्लुतोदात्तः आगमा३ इत्यादीनामनंत्यस्यापि प्रश्नाख्यानयोरि
ति प्लुतः। अभिपूजिते शोभनः खल्वसि माणवका३। चिदिति चोपमार्थे प्रयुज्यमाने। चिदित्यस्मिन्नुपमार्थे प्रयुक्ते वाक्यस्य टेरनुदात्तः प्लुतः
स्यात्। अग्निचिद्भाया३त्। अग्निरिव भायादित्यर्थः। उपमार्थे किं। कथंचिदाहुः प्रयुज्यमाने किं। अग्निर्माणवको भायात्। उपरिस्विदासी
दिति च। अस्यापि टेरनुदात्तः प्लुतः स्यात्। अधः स्विदासी३त् उपरिस्विदासी३त्। अधः स्विदासीदित्यस्य विचार्यमाणानामित्युदात्तः प्लु
तः। उपरिस्विदासीदित्यस्य अनेनानुदात्तः प्लुतः॥ स्वरितमाम्रेडितेऽसूयासंमतिकोपकुत्सनेषु॥ एष्वर्थेष्वाम्रेडिते परे स्वरितः प्लुतः स्यात्
। असूयायां। अभिरूपका३ अभिरूपक रिक्तं ते आभिरूप्यं। संमतौ। अभिरूपक३ अभिरूपक शोभनोसि। कोपे। अविनीतक३ अविनीतक
इदानीं ज्ञास्यसि। कुत्सने शाक्तीक३ शाक्तीक रिक्ता ते शक्तिः। असूयादिषु वेति वाच्यं। माणवक३ माणवक। क्षियाशीःप्रैषेषु तिङाकांक्षं।

प्र॰स॰ चारभ्रेषादिष्वर्थेषु साकांक्षं स्वरितं तिङन्तं प्लवते क्षियायां स्वयं रथेन याती३ उपाध्यायं पदातिं गमयति॥ आशिषि सुतांश्च लप्स्यास्व३ धनं
॥२०॥ च। प्रैषे यवान् लुनीहि३ सक्तूंश्च पिब। आकांक्षं किं। अग्नीदग्नीन् विहर। अनन्त्यस्यापि प्रश्नाख्यानयोः॥ एतयोरनन्त्यस्यानन्त्यस्यापि टेः स्वरि-
तः प्लुतः स्यात्॥ आगमा३ः पूर्वा३न् ग्रामा३न् अग्निभूते अत्र पक्षे अनुदात्तो प्लुतोदात्तः प्रश्नान्ताभिपूजितयोश्च। प्लुतावैच इदुतौ। दूराद्धू-
तादौ प्लुतो विहितः तत्रैव प्लुतप्रसंगे ऐचोऽवयवौ इदुतौ प्लुतौ स्तो वह्नेत इत्यर्थः। ऐतिकायनः। औपगवः। पदासमः प्रविभागः अवर्णस्य मा-
त्रा इवर्णोवर्णयोर्मात्रा चेति तदेदुतौ द्विमात्रतायां कृतायामवर्णमात्रया सह त्रिमात्रावेचौ स्तः। भाष्यकारमते इदुतौ त्रिमात्रतायामवर्णमा-
त्रया सह चतुर्मात्रौ स्तः। यदा तु अर्धमात्रा अवर्णस्य अध्यर्धमात्रा इवर्णोवर्णयोस्तदा अध्यर्धतृतीयमात्रावेचौ क्रियेते। एचोऽप्रगृह्यस्या-
दूराद्धूते पूर्वस्यार्धस्यादुत्तरस्येदुतौ। एचोऽप्रगृह्यस्य दूराद्धूते पूर्वांशस्याकारादेशः स्यात् स च प्लुतः उत्तरस्य इदुतौ तावुदात्तौ प्रश्नान्ताभि-
पूजितविचार्यमाणप्रत्यभिवादयाज्यान्तेष्विति परिगणनेन कार्यं आगमा३ः पूर्वा३इ ग्रामा३इ अग्निभूता३इ पटा३उ उपएदमभिपूजितविचा-
र्यमाणप्रत्यभिवादयाज्यान्तेष्विति परिगणनेन कार्यं॥ आगमा३ः पूर्वा३इ ग्रामा३इ अग्निभूता३इ पटा३उ उपएवमभिपूजितविचार्यमाणप्र-
त्यभिवादयाज्यान्तेष्विति परिगणनं कार्यं। आगमा३ः पूर्वा३इ ग्रामा३इ अग्निभूता३इ पटा३उ उपएवमभिपूजितादौ पदान्तस्य इति वाच्यं। ते- ॥२०॥
नेह न भद्रं करोषि गौ३रिति। अप्रगृह्यस्येति किं। शोभने खट्वे इति। तयोर्य्वावचि संहितायां। तयोरिदुतोर्यवौ वा स्यातां अचि परे संहितायां
विषये। अग्ना३याशा पटा३वाशा इदुतोरसिद्धत्वात् यणा न स्यात्। संहितायामिति अष्टमाध्यायपर्यन्तमधिकारः। प्लुतप्रगृह्या अचि॥ त्रिपाद्यां
विहितोऽपि प्लुत एतत्प्रकृतिभावं प्रत्यसिद्धो न॥ तथोदाश्रेयत्वात्॥ अचीत्यनुवर्तमाने पुनरज्ग्रहणं संधेर्निमित्तं योऽच् तत्परिग्रहार्थं तेने-
ह न। जानु उ अस्य रुजति जान्वस्य रुजति। अत्र जानुशब्दात्परो य उकारः स प्रगृह्यः। तत्र उकारयोः सवर्णदीर्घे क्रियमाणे अस्येत्यकारस्या-
निमित्तत्वात् तस्मिन् परतः उकारस्य प्रकृतिभावो न तेन सवर्णदीर्घः स्यादेव। नित्यग्रहणमनुवर्तते प्लुतप्रगृह्याणां नित्यमेव प्रकृतिभा-

वायथास्यात्।इकोसवर्णेइत्येवतत्त्वाकल्लेमाभूत्।तेनहरीएतौइत्यत्रपक्षेह्रस्वोन॥ कुमार्य्यगारेहीतिदेह्निरेवितिप्राप्तावृह्निनेभवति।ईदूदेत॥
अत्रपक्षत्रयंसंभाव्यते।ईदादयोयद्द्विवचनमित्येकः।येनविधिस्तदन्तस्येतितदन्तग्रहेईदाद्यन्तंयत्द्विवचनमितिद्वितीयः।एवंतदन्तग्रहेप्र
त्ययग्रहणेयस्मात्तदादेस्तदन्तस्यग्रहणमितिवद्द्विवचनान्तग्रहेचईदाद्यन्तंयत्द्विवचनमितितृतीयः।तत्रप्रथमेपचेतेइत्यत्रप्रगृह्यत्वंनस्यात्
इतिदोषः।नह्यत्रद्विवचनमेकारः।किंतुतदन्तं।द्वितीयेतुपक्षेहरीएतौइत्यादौनस्यात्।नह्यत्रईदाद्यन्तंद्विवचनमपितुतदेव।तृतीयेतुपक्षे
कुमार्योरगारंकुमार्यगारमित्यत्रप्रगृह्यत्वंस्यात्।कुवनिद्यन्तत्ईकारान्तेप्रत्ययलक्षणेनद्विवचनान्तेवचनचद्वितीयपक्षेदोषः।आद्ये
तवदेकस्मिन्नितिअन्तकद्रावात्परिहर्तुंशक्यः।तृतीयपक्षेदोषोपिईदूतौचसप्तम्यर्थइत्यर्थग्रहणात्प्रगृह्यकरणेप्रत्ययलक्षणंनेतिवि
ज्ञापितमितिप्रत्ययलक्षणेनद्विवचनान्तत्वाभावात्परिहर्तुंशक्यः।तत्रातिविशदत्वात्तृतीयपक्षमाश्रित्याह॥ईदूदेदन्तंद्विवचनान्तमिति।
तपरकरणंनतावत्ह्रस्वप्लुतनिवृत्त्यर्थं।दीर्घोच्चारणसामर्थ्यादेवतन्निवृत्तेः।अपदूरादूतेचेत्यादिप्लुतनिवृत्त्यर्थमितिचेत्।इष्टत्वात्तस्य
प्लुतस्य।परस्ताच्छेदः।सःतथामहाभाष्येप्रतिपादितं।तस्मादसंदेहार्थंतपरत्वं।हरीइत्यादी।नि प्रथमाद्विवचनान्तानि।आद्ययोर्यणादेशप्र
सिप्रगृह्यत्वात्प्रकृतिभावः।अन्त्यस्यएङःपदान्तादतीतिपूर्वरूपेप्राप्ते।ईदूदेदिति।रमावचन्नौ।द्विवचनेकिं।कुमार्य्यत्रेति।वयसिप्रथमइतिङी
षःशार्ङ्गरवादिङीन्।यण।मणीवेति।मणीशब्दस्यप्रथमाद्विवचनान्तस्यइवशब्देपरतःसवर्णदीर्घः।रोदसीवेतिद्यावापृथिव्याविवेत्यर्थः।दंपती
वेतिजायापतीच।दंपतीजायापती।जायायाजंभावदेवाविवादौनिपात्यौ।अदसः।अदसःसंबंधीयोमकारस्तस्मात्परौईदूतौप्रगृह्यसंज्ञौस्तः।
अमीईशाइति।अदःशब्दात्परस्याजसःशीभावःत्यदाद्यत्वं।पररूपत्वं।आद्गुणःएतईदितिईकारःदस्यचमः।प्रगृह्यत्वात्सवर्णदी
र्घाभावः।ऊकारस्योदाहरणं।अमूआसाते।एकारस्योदाहरणंनसंभवति।ननुचअमीईशाइत्यादौसवर्णदीर्घादिकेसंधिप्रतिपूर्ववत्रा
सिद्धन्यायेनईत्वोत्वयोरसिद्धत्वात्सवर्णदीर्घादिर्नस्यात्।नकिंप्रयोजनंप्रगृह्यसंज्ञयाप्रकृतिभावार्थयाकिंचईत्वोत्वयोरसिद्धत्वा
त्अयआवृक्रमेणपूर्वरूपाणिप्राप्नुवंति।तेनतेदोषाःस्युः।अदसईत्वौत्वेस्वरेपरेहिल्यदलस्यलेसिद्धेवक्तव्येप्रगृह्यसंज्ञार्थंवेतिवचनं।

प्र॰सू॰ ॥२१॥ दीर्घोत्वयोः सिद्धत्वात्। अस्य वचनस्यायमर्थः। बहिःपदलक्षणोऽद्वितीयपदव्यवस्थिते [illegible] परतोऽदस ईत्वोत्वे सिद्धे वा [illegible] ति। एवं प
स्थितेन्त्वचि असिद्ध एव तथा च यदश्वेवस्यति ग्रंथकारो मुख्यावस्यासिद्धत्वान्न संधिरिति [illegible] भवति एकपदत्वात् निपात [illegible] काउनाङ्॥
एकाङिति यदि यदि एकोऽच् यस्येति बहुव्रीहिः स्यात् प्रशब्दस्यापि प्रगृह्यत्वं स्यात् ततश्च प्रोया अं इति निर्देशो नोपपद्यते तस्मादेकश्चा
सावच्चेति कर्मधारयोऽयमिति मत्वाह। एकोऽच् निपात इति। अ अ इति। चादिषु अ इ उ ऋ ऌ ए ऐ ओ औ इति पठ्यते तस्मान्निपातत्वं॥
निपातः किं। चकारात्रं अनाङ् किमिति ङित् ङितो राकारयोर्विभागप्रदर्शनार्थप्रश्नः। ईषदर्थे इत्यादि। ईशब्दस्यार्थ ईषदर्थः तस्मिन् क्रि
यायोगः क्रियायोगः तस्मिन् मर्यादा सीमा अभिविधिरभिव्याप्तिः मर्यादा च अभिविधिश्च मर्यादाभिविधी। तस्मिन्मर्यादाभिविधौ। सर्वो
पिद्वंद्वो विभाषयैकवद्भवतीति एकवद्भावेन पुंस्कत्वे सनपुंसकमिति सप्तम्येकवचने डौ परतः इकोऽचीति नुमागमो न भवति। अनित्यमागमशा
सनमिति नित्यत्वात् तस्य तस्मादङ्घेरित्यौकारो तादेशश्चाकारः एतेषु चतुर्षु विषयेषु वर्तमान आकारो यस्तं ङितं ङकारेतं विद्यात्
जानीयात्। वाक्यस्मरणयोः वाक्यशब्देन वाक्यार्थ उच्यते अथवा वाक्यावयवः स्मरणं स्मृतिः तत्र वाक्ये स्मरणे च वर्तमानोय आकारः
सोऽङित् अङित्। ङिदङितोराकारयोरुदाहरणानि ष्ठीकेनाह आ ओ न्नमेरिति। हे हरे त्वं अखिलैः आँनमैः आ ईषत् उन्नमास्मुन्नमाः नै ॐ जीम ॥२१॥
र्ईस्यसे न दृश्यसे किं मर्यादी कृत्य आ आमृतात् अमृतं मोक्षं मर्यादी कृत्य यावन्मोक्षो भवति तावन्नेस्यस इत्यर्थः। कमभिव्याप्य आ इंद्रत म
इंद्रमभिव्याप्य इंद्रेण पिच ईषदुन्नमेनत्वं नेस्यस इत्यभिप्रायः ङिङितिश्च स्यानाङिति प्रगृह्यत्वप्रतिषेधात् ऐमेस्त्यादिषु आकारस्य
साधिर्भवत्येव ईषदाद्यर्थत्वेन ङित्वात्॥ आ एवं सर्ववेदार्थः। अयं सर्ववाक्यार्थ एव सर्ववेदार्थ इत्यर्थः। सर्वं प्रक्रोन वाक्यार्थप्रदर्शनपरोय
माकारोऽङित्वात् ततः संधिर्न भवति अथवा निरर्थकोयं वाक्यालंकारमात्रे प्रयुक्तः। आ एवं सद्वचः मन्तोवाच्यो वा वाक्यं एवमेव एतादृश
गार्थमेव सद्वचः स्यार्थ इत्यर्थः। अत्र आकारः स्मरणे वर्तते। नो न संधि। ओत्। अनदो ओदः समभवत् अदोभवत् इति ओ तस्य निपातत्वेपि ल
क्षणप्रतिपदोक्तयोः प्रतिपदोक्तस्यैव ग्रहणमिति प्रगृह्यत्वं। छासि लि कृत्वा दोकारस्य [illegible] अगो गौः समपद्यत गोऽभवदित्यर्थे [illegible] तु गोणमुख्य

योऽर्मुख्ये कार्ये संप्रत्ययइतिनभवति प्रगृह्यसंज्ञा। एतच्च स्तविषदं पदमंजर्यादौ द्रष्टव्यं। संबुद्धावित्यादि। संबुद्धावितिनिमित्तसप्तमी इतावितिप
रसप्तमी संबुद्धिनिमित्तो यओकारः तदंतः शब्दोप्युपचारात् संबुद्धी ओं हंतः सत्रवैदिके इतिशब्दे परतो वा प्रगृह्यसंज्ञः स्यात् इत्यर्थः।
विष्णो इतीति ह्रस्वस्य गुण इति संबुद्धौ ओकारः उकारस्य गुणः पक्षेऽवादेशः लोपः शाकल्यस्येति वा वलोपः संबुद्धावितिकिं। गवित्यय
माह।। अत्रानुकार्यानुकरणयोर्भेदस्याविवक्षितत्वात् अर्थवत्त्वाभावात् विभक्तिर्नोत्पद्यते। अतइदं प्रत्युदाहरणं।। अनुकरणस्यहि
असाधुत्वमिष्यते। उञः ऊँ।। वितीति।। प्रगृह्याभावे इकोयणचीतियणादेशः। ऊँ। अयमिति। दीर्घोऽनुनासिकः प्रगृह्यसंज्ञकश्च ऊँ इत्य
यमुञ आदेशो विवास्यादित्यर्थः। ऊँ इति। पक्षे स्वरादित्वेन रूपद्वयं। एवं त्रीणि रूपाणि भवंति इति योगविभागस्य फलं। उञः विइत्येक
योगे हि सति ऊँ इति उइ-ति रूपद्वयमेव स्यात्। मयः। ननु मयगतो विइति धातुः स्त्रीमयितियकारेण प्रत्याहारो प्यस्ति तत्कस्येह ग्रह
णमित्याशंक्याह मयः पराद् इति। समानाधिकरणे पंचम्यौ। अयमर्थः परं करोतीति परयति णिच्। परयतीति परः पचाद्यच् णिलोपश्चे
निधेः उञः स्वस्मात् परं करोति यो मय् तस्मात्परस्य उञो वो वा स्यात् इति अत्र मय् उञं स्वस्मात्परं करोतीति यः प्रत्याहारस्तस्माद्धि व्यव
धानेन परत्वं न तु पयद्यनेन मयधातोः। तस्माद् व्यवधानेन परस्य उञः प्रयोगासंभवात्। अथवा मयः प्रत्याहारात्मकाशात् परोऽतनि
गछतीति अतत्अतत्सातत्स्य गमने क्विप् परश्चासौ अश्च परात् पराश्चासौ उञ्च स्य परात् उञः मयः परस्य उञ इत्यर्थः। अथवा मयः पराद्
ति पदाधिकारात् पदस्य परो वयवो यो मय तस्मात्परस्य उञः मयं तात् पदात् उत्तरस्य उञः इत्युक्तं भवति। एतच्चायेन नविधिस्तदंतस्येति पुरि
भाषया लभ्यते किमुक्तमिति। प्रगृह्यत्वात् उञः प्रकृतिभावे प्राप्ते वकारोऽनेन विधीयते तस्य च वकारस्यासिद्धत्वात् हलीत्यनुवर्त्ये मो
नुस्वार इति विधीयमानो नुस्वारः किमुक्तमित्यादौ न भवति। किमु उक्तमिति पक्षे प्रगृह्यत्वात् प्रकृतिभावः। इकः। हर्यर्थमिति। हरयइदं
अर्थंनित्यसमासः सर्वलिंगता वेति समासः। नित्यसमासोदाहरणप्रदर्शनेन समास इति नित्यसमास एव प्रतिषेध इति हेयं। इकः किं।

उपेंद्रः॥ अ सवर्णे किं। श्रीशः। ऋति। ऋकारे परतः शाकल्याचार्यस्य मतेनाकः प्रकृतिभावः स्यात्। ह्रस्वश्च वा। होतृ ऋकार इति पक्षे अस्याकः
सवर्णे इति सूत्रेण ऋ उदाहरणद्वयं भवति। स्पष्टश्चास्य लक्षणस्य च यं व्याख्या यते। अप्लुतवदुपस्थिते। उपस्थितो नामार्ष इतिकरणस्तस्मिन्परे
प्लुतो ऽप्लुतवत्स्यात्। प्लुतकार्यं न करोति सुश्लोका ३ इति सुश्लोकेति। ई३ चाक्रवर्मणस्य। ई३ चाप्लुतः स्यात् अचि। चाक्रवर्मणस्य मतेन॥
अस्मुही३ इति सुश्लोकेति त्यब्रवीत्। अस्मुहीत्यब्रवीत्। आचार्यग्रहणमुपस्थितनिवृत्त्यर्थमनुपस्थितपक्षार्थे इत्युक्ते यत्र क्रियावाचि
इकारादन्यत्रापीष्यते। व्यशायैं ३ इयैवशेयं॥ अणोऽप्रगृह्यस्यानुनासिकः। अणं तस्याप्रगृह्यस्यावसाने वर्तमानस्यानुनासिको वा स्यात्। दधिं
मधुं, दधि मधु। अप्रगृह्यस्य किं अग्नी॥ ॥श्रीरामाचार्यसूनुहरिहरभट्टेनेकाग्रधीः श्रीनृसिंहाचार्यौ यं माणिक्यं वाप्य जनयदनुत्तं विद्व
लाचार्यमार्यतस्याः श्रीपाणिनीयाद्यनुगुणसगुणे प्रक्रियाकौमुदीयव्याख्याने ऽस्मिन्प्रसादे निरगमदनुलोऽच्संधिराद्यो नवद्यः॥ ॥अथ
हल्संधिरुच्यते॥ ॥स्तोः सकारतवर्गयोरित्यादि॥ अत्रैतौ सकारतवर्गौ द्वौ कार्यिणौ। निमित्ते अपि द्वे एव शकारचवर्गौ। एवं च सत्यात् सं
ख्यातानुदेशः प्राप्नोति। नैष दोषः। यदयं शात् इत्यस्य तवर्गस्य श्चुत्वाभावं शास्ति तत् ज्ञापयति निमित्तनिमित्तिनोः स्तोः श्चुना अनयोः संख्या
तानुदेशो न भवतीति। आदेशादिशित्वाभावं शास्ति तत् ज्ञापयति नोक्तस्तोः शकारचकारयोः संख्यातानुदेश इष्यत एव। ततश्चायमर्थः सका
रस्य शकारेण चवर्गेण वा योगे शकारो भवति तवर्गस्यापि शकारेण चवर्गेण च योगे चवर्गो भवतीति। इममेवार्थं चेतसि कृत्वोदाहरति
रामः शेते। रामश्चिनोतीति। तवर्गस्यापि च चगोभवत्यथासंख्येनैव भवतीति प्रदर्शनायोदाहरति सच्चित्। शार्ङ्गिञ्जयेति। एतद्वचनस्य चः उ
त्तरस्य नस्य ञः। तावदर्थश्चाविति सप्तमीनिर्देशे कार्ये श्चुनेति तृतीयानिर्देशः सर्वेणापि योगे यथा स्यात्। यज्नः यज्ञः। याच्नायाच्ञा। ष्टुना ष्टुः
अत्रापि निमित्तनिमित्तिनोः संख्यातानुदेशाभावस्य तोः षीति प्रतिषेधो ज्ञापकः। अत्रापि अयमर्थः सकारस्य षकारेण टवर्गेण च योगे ष
कारो भवति। तवर्गस्य षकारेण टवर्गेण च योगे टवर्गो भवति। रामष्षष्ठः। रामष्टीकते। टीकृ गत्यौ उभयत्र सस्य षः। तट्टीकते इत्यस्य तस्य टः।

चकिंदोकृत्तइतिदोकृत्यां।चकिन्इतिनस्यणः।नपदांतात।षट्संतइतिअत्रचडुः।सिध्युडितियदाधुट्नास्तितदेदमुदाहरणं।पदांतात्किं।
ईट्टेईट्टे।टोःकिं।सर्पिष्टमं।ह्रस्वांताट्टौतद्धितइतिषोऽशेषःसर्पिष्टमं।अनाम्निस्यादि।अत्रवक्तव्येऽनाम्निस्यत्यमुच्यतेकिंतर्हिनाम्नवतिनगरी
णां।निषेधोनेतिवाच्यंइत्यभिप्रायः।नामितिआगतनुट्कस्यषष्ठीबहुवचनस्यनिर्देशः।षण्णामितिषट्चतुर्भ्यश्चेतिनुट्।अलोपेनशां
न्इतिषस्यडः।यरोऽनुनासिकेऽनुनासिकोवेतिडस्यणः।षण्णवतिरितिषडधिकानवतिः।शाकपार्थिवादित्वात्उत्तरपदलोपीसमासः
।तोःषीतिसप्तमीनिर्देशात्पूर्वस्यतुसन्निपातेस्यादेवरोष्टापोष्टेति।सन्नितिअत्रसन्तुवीत्यस्यशर्त्तेनस्यरूपंश्रुसोरह्लोपेतुमिसंयोगांत
लोपेचकृते।शादिति।शात्परस्यतवर्गस्यचुत्वंनस्यादित्यर्थः।विश्नःप्रश्नःइतिविच्छगतौ।प्रच्छज्ञीप्सायांयजयाचेतिनङ्।च्छोःशूडि
तिशः।स्तुः॥ ॥नन्वच्चोःसंयोगाद्योरंतेचेत्यतःअंतइत्यनुवर्तनतएवकिमर्थंपुनरंतइत्युक्तंनतद्धितग्रहणंइ।झलोझलीत्यतोनुव
र्त्तमानेनझलीत्यनेनसंबद्धं।अतोझलीत्यस्यनिवृत्त्यर्थंपुनरंतग्रहणंकृतं।तेनवस्तावस्तुइत्यादौधत्रयुडरूत्वंन।वागीशइति।वाग्नामी
शोवागीशः।अत्रांतर्वर्तिनींविभक्तिमाश्रित्यपदांतत्वात्स्थानेंतरतमइतिस्थानप्रयत्नतआंतरतम्यात्गकारोडसः।चिद्रूपइति।चित्स्ना
नंरूपमस्यअत्रापितथा।परः।अनुनासिकाङञणनमाः।पदांतस्यकिं।यतः।मयटीति।एतच्चव्यवस्थितविभाषाविज्ञानात्सिद्धं।चिन्म
यइति।मयट्।तद्रूपेइतिकेचित्।पाणिनीयमतेतुमयड्वैतयोरितिमयट्।तोर्लि।तल्लयइति।तत्लयइतिस्थितेविद्यानस्थितवतीतिस्थितेन
कारस्यपरसवर्णेलकारेप्राप्तेविशेषमाह।सानुनासिकेति।यतोद्विप्रकारायवलास्तेनकारणेननकारस्यसानुनासिकःस्थलेसवर्णो
र्थेस्थानेंतरतमपरिभाषयासानुनासिकएवलकारःस्यादित्यभिप्रायः।उदःस्थास्तंभोरिति।स्थागतिनिवृत्तौ।स्तंभुरोधने।आदेः।अलो
ऽन्त्यस्येत्यस्यापवादोयं।इहशास्त्रेनकश्चित्परस्यस्पष्टार्थकार्यंविधीयतइतिएतन्निर्विषयमित्याशंक्याहपंचमीनिर्देशेनेति।तस्मादित्युत्तर
स्येतिपरिभाषयेत्यभिप्रायः।उत्थानमिति।उदःपरस्यसकारस्यपूर्वसवर्णस्थकारः।केचिदद्योषस्यमहाप्राणस्यतादृशएवपूर्व

प्र॰स॰ ॥२३॥ सवर्णस्तकारः तस्य खरि चेति चर्त्वे तकारे क्रियमाणे ऽसिद्धत्वात् तन्मते षकारद्वयमश्रवणं। सर्वस्य चर्त्वं तकारस्तस्या। न च चेति द्वित्वे सरोफ
रिसवर्णे इति लोपः। उत्तेजनमिति स्तेजुर्लुट्। एवं च साधनं। स्तोः श्चुनाश्चुः। स्कोः किं। उदवातः। उदः परस्य स्केदेशेऽवयवस्य पूर्वसवर्णो वाच्यः। उत्कंद
नेनामरोगः। झयः। वाग्घरिः इति। ननु चात्र पूर्वस्य सवर्णत्वेन कवर्गेषु पंचसु प्राप्तेषु कुतो घकार एव ज्ञातं इत्याशंकायामाह। घोषवत्वादीति।
नि। हस्य यः पूर्वस्य सवर्णो भवति स वर्गस्य चतुर्थ एव भवति। कुतः घोषवत्वादिगुणतः घोषवत्वं महाप्राणत्वं नादवत्वं सोष्मत्वं चेति चतुर्गु
णत्वेनांतरतम्यात् इत्यर्थः। तत्र घोषवत्वादयश्चत्वारो गुणाः तल्यास्य प्रयत्नं सवर्णमित्यस्मिन्सूत्रे च कथिताः ज्ञातव्याः सोष्मत्वं तु शषसहा
नां वर्गद्वितीयचतुर्थानां च। तच्छिवइत्यादि। तदो वावसानइति चर्त्वे कृते पश्चात् शिवइत्यनेन संबंधे जश्त्वं न च जशोंत इति। ततश्च त
द्शिवइतिस्थिते खरि चेति अनेन चर्त्वे आंतरतम्यात् तकारे कृते स्तोः श्चुनेति चकारे तच्शिवइस्थिते शः छोटीति अनेन पक्षे शस्य छत्वे कृते
तच्छिवइति स्यात् छत्वाभावे च तच्शिवइति॥ छत्वममीति। शश्छोटीत्यत्र शः छोमीति वक्तव्यमित्यर्थः। अमीत्युक्ते यत्सिध्यति तद्दर्शयति
तच्श्लोकेनेति। अत्र छस्याभावाद्प्राप्तं छत्वं। प्रक्रिया पूर्ववत्। वा कुश्चोतलीति। अत्र शकारात्परो यश्चकारः सोमन्नभवति इति न छत्वं। मोनु श्री॥
स्वारः अपदांतेतु गम्यत इति। अयं भावः पदस्येत्यनुवर्त्तते तेन पदांतस्यैव मस्यानुस्वारः स्यात् अपदांतस्य तु न स्यात् तेन गम्यत इति सि ॥२३॥
ध्यतीति। हलिकिं किमत्रानश्चायशांसीति। डः शशिष्टः। नपुंसकस्य झलच इति नुम् सांतमहत इति दीर्घे नः स्यानुस्वारः। आक्रंस्यत इति
क्रमेर्लृट्। आङ् उद्भूनेनैं इत्यात्मनेपदे अपदांतस्य मस्यानुस्वारः। अपदांतस्य किं। राजन्नुंस्व। झलि किंमन्यते गम्यते। अनु। अनुस्वार
स्य ययि परतः परसवर्णः स्यात्। शांत इति। शमु उपशमे निष्ठा। अनुनासिकस्य क्विझलोः क्ङितिदीर्घः पदांतेति इडभावो वा निपात्यते मका
रस्य नश्चापदांते त्यनुस्वारः। तस्य परसवर्णो नकार एव स्यात् आंतरतम्यात्। एवं सर्वत्रानुस्वारपरसवर्णो ययि परतः सानुनासिक एव स्या
त् आंतरतम्यादिति ज्ञेयं। अंकितइति। अकि पदे लक्षणे च। निष्ठा। अत्रानुस्वारस्य नकारस्थाने जातस्य परसवर्णो ङकारः। कुंठितेत्यत्र

त्वस्यासिद्धत्वात्पूर्वमस्यानुस्वारस्तस्य परसवर्णेन तस्याप्यसिद्धत्वात्पुनर्णत्वं न। यथा तिङिं [illegible] वा पदान्तस्य॥ वा पदान्तस्य तन्यो वा ग्रहणो ऽनुव
र्तमाने पि पुनर्वाग्रहणं द्वयोर्विभाषयोर्मध्ये ये विधयस्ते नित्या भवन्ति। तिमध्ये वर्त्तमानस्यानुस्वारस्य यपि परसवर्णो इत्यस्य विधिर्नित्यत्वार्थः। त्व
ङ् करोषीति। मकारस्यानुस्वारे सति तस्य पक्षे परसवर्णो ङकारः स्यात्। अंतरतम्यात्। सय्यंतेत्यादि। पदेकमेण ऽनुस्वारस्य सानुनासिक
यकारवकारलकाराः॥ मो राजि समः क्वौ॥ इति। संहर्वस्य रा [illegible] सम्राट् द्विषेति क्विप्। मस्य मत्वचनमनुस्वारनिवृत्त्यर्थं राजि किं। संयत् समः किं॥
किं राट्। क्वौ किं संराजिता हेमा मः परो यस्मादिति मपरः। यवलपर इति। यवलाः परे यस्य स यवलपरः। यवलपरे [illegible] अंतरतम्यात् मकारस्य सा
नुनासिका एव भवन्ति। नपरे। ङ्णोः कुक्टुक्शरि॥ पूर्वांतत्वकरणं कुत्वार्थं षत्वार्थं कुत्वनिषेधार्थं च तथाहि। प्राङ् कुछेते सुगण्ट्छेते। परादि
त्वे हि सति शः छोटीति छत्वं न स्यात्। तच्च हि पदान्तादित्यनुवर्त्तते। अन्यथा पुराकृतस्य विसर्गो विशिष्टे [illegible] प्राङ् कुसायइ
त्यत्र सात्पदाद्योरिति षत्वनिषेधो न स्यात्। प्राङ् कुसाय इत्यत्र सात्पदाद्योरिति षत्वनिषेधो न स्यात्॥ परादित्वे हि सुगण्ट्सायेइत्यत्र प
दान्ताट्टोरनामिति ष्टुत्वनिषेधो न स्यात्। परादित्वे हि सुगण्ट्सायइत्यत्र पदान्ताट्टोरनामिति ष्टुत्वनिषेधो न स्यात्। तस्मात्पूर्वांतो कुक्टुको
क्रियेते। ङः सि। न तु च्छत्वं [illegible] ससीति सप्तम्यस्ति तन्त्र तस्मिन्निति निर्दिष्टे पूर्वस्येति तस्य प्राप्नोति मेवं। ङः इति पंचमी॥ ततः तस्मादित्युत्तर
स्येति उत्तरस्यैव स्यात् परत्वादिति चेन्न सिद्धत्वात्। डः सि धुट्॥ परस्य स्येति। धुटः परादित्वकरणेन पदान्ताट्टोरनामिति ष्टुत्वनिषेधार्थं
त्वं धुडिति सिद्धं वाक्यं। अत्र तीसट् [illegible] तिरयं शादिः। नश्च। शि तुक्। अस्यापि पूर्वांतत्वकरणं कुत्वार्थं यद्यपि वे कृतं ने
च कृते अत्र नकारस्य णत्वं प्राप्नोति लुगंतत्वेन पदान्तत्वाभावेन पदान्तस्येति निषेधाभावात्। उच्यते स्तोः श्चुना श्चुः॥ इत्यत्र स्तोः श्चुनेति यो
गविभागः क्रियते तत्र णत्वनिषेधोऽनुवर्तते तन्न च यथार्थः स्तोः श्चुना योगे णत्वं न भवति तेन श्चुरिति [illegible] तत्र स्तोः श्चुनेति अनुवर्तते
सञ्च् छंभुरिति स्थितं इति सन् शंभुरिति स्थिते तुकि कृते शस्य छत्वे चुत्वे च न तयोः [illegible] समीपेति सवर्णे इति [illegible] कारस्य

प्र॰ स्व॰ ॥२४॥ लोप इत्यर्थः। सन्नच्युतशेऽरिति तु किंचु लेढ्ला आवेरूपं। सन्नच्युतशेऽरिति तु ग आवेरूपं। ङमो ह्रस्वात्। ह्रस्वोत्तरादिति। ह्रस्वात्परो यो ङम्प
दं तस्तस्मात्परस्याचो नित्यं ङमुडागमो यथासंख्यं स्यादित्यर्थः। अत्रस्तेत्र ह्रस्वात् ङम इति पंचम्यस्ति अचीति चे सप्तमी। तत्र परत्वा
त्तस्मादित्युत्तरस्येति। यमेव परिभाषा प्रवर्त्तते। अतयोरेवोक्तं परस्याच इति। प्रत्यङ्ङात्मेति अत्र ङ इङ्जातः सुगणीशः इत्यत्र लट् सन्नच्यु
त इति न ट् यथासंख्येन ङमुट् परादित्वकरणे ऽकृवेन आस्ते अत्र णत्वं च मा भूदिति पूर्वान्तत्वे हि पूर्वस्य नस्य पदान्तत्वो भावात्पदान्त
स्येति णत्वनिषेधो न स्यात्। ननु स्वपरम दंडिनाइत्यत्र प्रत्ययलक्षणेन समासान्तवर्त्ति विभक्त्याश्रयेण स्यनस्य पदान्तत्वात्तस्मात्परस्या
चो ङमुट् प्राप्नोतीमेवं उत्तरपदे इत्यतः पद इत्यनुवर्त्तते। न तस्याचि पदे अज्ञादेः पदस्येत्यर्थः स्यात् अचो ऽत्र ङमुडेन अवतिङमः
किंत्वमास्ते। ह्रस्वात्किं। प्राङास्ते। अचि किं। प्रत्यङ् करोति। पुमः। पुम इति पुंसः सकारान्तस्य आयं निर्देशः सकारस्य संयोगान्तलोपेन कृ
ते तस्यैव कार्यित्वात्॥ अम्परइति। अम्परो यस्मात्सो ऽम्परः। अमिति प्रत्याहारो गृह्यते न द्वितीयैकवचनं खय्प्रत्याहारेण साहचर्या
त्। अलः। षष्ठीनिर्दिष्टस्यान्त्यस्येति। षष्ठ्यानिर्दिष्टस्य योऽन्त्यस्तस्यादेशः स्यादित्यर्थः। अयं भावः स्थाने षष्ठ्यानिर्दिष्टस्य य आदेश उच्यते श्री॥ ॥२४॥
स तस्य स्थानषष्ठीनिर्दिष्टस्यान्त्यस्यालः स्थाने स्यादिति। तथा च पुमः खय्यम्परइति पुम इति स्थानषष्ठ्यानिर्दिष्टस्य पुमो मकारस्य रुरे
वेति। अत्रानुनासिके इति। इत्युकार इति। अनेन सूत्रेण पुम् इत्यत्र वर्त्तमान उकारः सानुनासिको जात इत्यर्थः। अनुनासिकं संपुंकानामिति॥
कृष्ण निवृत्त्यर्थमित्युपलक्षणमेतत्। षत्वविसर्गयोरपि निवृत्त्यर्थं। समः सुटि पुमः खय्यम्परे कानाम्रेडिते इत्येतेषु सूत्रेषु रुर्विधीयते सका
रो वेति पक्षद्वयमस्ति तत्र रुविधिपक्षे संपुंकानां विसर्गस्य सो वक्तव्यः। अन्यथा संस्कर्त्ता इत्यत्र वा शरीति स्यात्। पुंस्कोकिल इत्यत्र इदुप
धस्य चाप्रत्ययस्येति षत्वं। कांस्कान् इत्यत्र कुप्वोः क पौ चेति ष्कः॥ अयं च पक्षो मतुवसो रिस्यत्र रु रित्यस्याप्युक्तत्वाल्लभ्यते। सकारविधिपक्षे य
मर्थः। संपुंकानां सो वक्तव्यः व्याख्येयः एभिः सूत्रैः सो विधीयते इति व्याख्येय मित्यर्थः। तत्रेदं व्याख्यानं समः सुटि इति द्विसकारकोनि

देशः तेन सो विधीयते। एषु सूत्रेषु रुरुत्व अनुवर्त्तमानोऽपि न संबध्यते। संबंधानुवृत्तेः मतुवसो रुः संबुद्धौ छंदसीति। ननु च कानाम्रेडित इत्यत्र स
कारानुवृत्तौ नः छव्यप्रशानित्यत्रापि स्यात् सकारः मैवं। संबंधानुवृत्तेः समः सुटीति तेन तत्र रुरेव संबध्यते न सः। कानाम्रेडित इत्यत्र तु स
कारमात्रं संबध्यते समः सुटीति तु निवर्त्तते ननु सकारविधिपक्षे संस्कर्त्तेत्यादौ अनुनासिकानुस्वारौ न स्तः यतस्तौ हि रुविधावुक्तौ नान्यत्रे
ति मैवं। तस्योपलक्षणार्थत्वात् तत्र सकारविधिपक्ष एवाचार्याणामभिप्रेतः। कुतः यतो रेफविसर्गविधायकं सूत्रमपठित्वैव वदंति संपु
कानामिति रुविधौ हि विसर्गं कृत्वा एतदेव स्यात् अयं च पक्षो भाष्यकाराभिप्रेतः साधीयान्। पुंस्कोकिल इति। पुमांश्चासौ कोकिल
श्चेति। अत्रानुनासिकपक्षे ह्रौ बिंदुः अनुस्वारपक्षे समग्रः। खयीति किं। पुंदासः। परा इति किं। ख्यनोमीति। समस्यैव परत्वं स्यात् मैवं।
अमि खय्परे इति विपरीतमिति ज्ञायते। समः। मोनुस्वारे ज्ञापकत्वनेन। संस्कर्त्तेति। संपर्युपेभ्य इति सुट्। समः किं। उपस्कर्त्ता। सुटि किं। सं
करः। नः छवि। छवि किं। संचकरोति। खरख। खरवसानयोः। किं। अग्निर्नयति। इह नृपते रपत्यं नार्यस्य इति वृद्धेर्बहिरंगत्वात् तदाश्रय
स्य रस्यासिद्धत्वं बहिरंगमंतरंग इत्यसिद्धत्वाद्विसर्गो न। विसर्जनीयस्य खरवसानयोरित्यतः खरि इत्यनुवर्तते मंडूकप्लुति न्यायेन अनुवर्त्त
त इत्यभिप्रेत्याह खरीति। श्चुत्वमिति। स्तोः श्चुनेति। शार्ङ्गिंश्छिधीति। शार्ङ्गिन् छिधीति स्थिते नः छवीति रुः। अनुनासिको ऽनुस्वा
रो वा विसर्गः तस्य सः श्चुत्वेन शः। चक्रिंस्त्राहीति। त्रायते इति त्राः क्विपूर्वेति क्विप्। त्रावदाचरति सर्वप्रातिपदिकेभ्यः क्विब्वा वाच्य इति
टूम क्विप्। सनाद्यंता इति धातुत्वं। लोटि मध्यमपुरुषैकवचनस्य सेर्हिः शप्। सवर्णदीर्घः त्रस्या नूतनो नीति। प्रसृष्टवात शमेः क्विप् अनुनासि
कस्येति दीर्घः। मो नो धातोरिति नः। तस्यासिद्धत्वान्न लोपाभावः। नॄन्पे। परे नॄन् च नकारस्य रुर्वेति। वेत्येन तु अनुयर्त्तुं इत्यत उभय
थान्यस्यानुवृत्ते ऽलभ्यते। तयोर्नकारस्यैकायां ऽप्ययमित्येतदपि केचिदनुवर्त्तयंति तेन नॄन्पाहीत्यपि यथा स्यादिति। कैपर्किंन्नृ च न्नो
उयति। उभयोः खरीत्यनुवृत्तिसामर्थ्यात् उभयोरिति षष्ठ्यंतं संबध्यत इत्याह उभयोः संबंधिनीति। कुप्वावित्यत्र वर्त्तमानो कपावुक्वा

प्र॰स्व॰ ।।२५।। रणार्थौ जिह्वामूलीयोपध्मानीयावेव त्वादेशौ इत्यभिप्रेत्याह जिह्वामूलीयोपध्मानीयाविति। विसर्जनीयस्य स इति प्राक्सेद् दमारभ्यत इति
तस्यैवापवादः। अतो वासः क्षौमं।। अद्भिः प्सातमित्यत्र एव चासिद्धीयपरविप्रतिषेधाभावात् शर्परे विसर्जनीय इत्येतदेव भवति।। के
चित्तु एतदर्थं योगविभागं कुर्वंति। कुप्वोः ᳵकᳶपौ चेत्येको योगः। कुप्वोः शर्परयोः विसर्गस्य विसर्गः एतच्च ᳵकᳶपयोश्चेति प्राप्तयोः ᳵकᳶपयोर्बाधनार्थं
ततः ᳵकᳶपौ चेति स्वतंत्रे कुप्वोरिति वर्त्तते। चाद्विकल्प इति। अयं भावः। चकारो हि विसर्जनीय इत्यस्यानुकर्षणार्थस्तेन पक्षे विसर्गस्य
विसर्ग एव स्यादिति चाद्विकल्पः तेन ᳵकᳶपयोरभावपक्षे विसर्जनीयस्य स इति न प्रवर्त्तते। विसर्गेण बाधितत्वात्। कान्। कान्कानिति
वक्तव्ये आम्रेडितग्रहणं यत्र द्वित्वं स्यात् तत्रैव यथा स्यात्। तेनेह न कान् पश्यतीति। स्को त्र किं प्रश्ने। द्वितीयः क्षेपे। कान् कुत्सितान् पश्य
तीत्यर्थः।। ।।कस्कादिषु चेति। नहु चानेनेति नानुवर्त्तते नापि ᳵकᳶपौ तयोरस्वरितत्वात्। तर्हि किमित्येवमाह एषु विसर्जनीयस्य ᳵकᳶपौ
नेति। उच्यते। अत्र सोपदादावित्यतः सोऽनुवर्त्तते। उ — गः षउत्यतः षः। तौ स षौ अनेन विधीयेते ᳵकᳶपयोर्नो प्राप्तयोरतो येन नाप्राप्ते यो वि
धिरारभ्यते स तस्य बाधको भवतीति न्यायेन स षाभ्यां ᳵकᳶपौ बाध्येते इति तौ कस्कादिषु विसर्गस्येत्युच्यते अत एवाह। तत्र कौतस्कुत
इत्यादेः सः। सर्पिष्कुंडिकेत्यादौ विणः परस्य ष इति ज्ञेयमिति। अविहितलक्षण इति। नविहितं लक्षणं यस्य षस्य सस्य वा सो विहितल श्री।। ।।२५।।
क्षणः। अनेन कस्कादेराकृतिगणत्वं चकारस्सूचितो दर्शयति। कौतस्कुत इति। कुतः कुतः आगतः वीप्सायां द्वित्वं। तत आगत इत्यण्।
रिलोपः सर्पिष्कुंडिकेति षष्ठीसमासः। कस्कः कौतस्कुतः भ्रातुष्पुत्रः शुनस्कर्णः सद्यस्कालः साद्यस्क्रः क्रीणातेः क्विपि तत्र भवो
ण सार्पिष्कुंडिको। धनुष्कपालं। बर्हिष्पूलः। सजुष्पावं। अयस्कांतः तमस्कांडं। अयस्पिंडः कांस्कानिति। कानाम्रेडित इति सूत्रेण
यदा रुत्वं विधीयते तदा कस्कादित्वात् सः यदा तु सत्वं तदा तेनैव सिद्धं। रुत्वं वेति केचिदिति। तथा च वोपदेवपंडितैरुक्तं कान्कान्
न्हृत्यिवेति। ठेव। अत्र रुत्वस्य सत्वस्य तु येन विधिस्तदंतस्येति यदि रुत्वं तस्य तु कुत्स्यान्तद्वात्विति द्विरित्यत्र तु गत्याद्यग्रहणेन

ह्यनईतिहलादिशेषेणनिवर्त्तेत॥ तदेतद्विध्यन्तावेतुनावयवावयवःसमुदायावयवोऽवर्त्तीतितन्ननिवर्त्तेतइतिचेन्नसिद्धत्वाद्ह्रस्वस्येति। अर्थस्य
कारातज्ञायते। तथाहिञ्चस्वरितत्वादेवह्रस्वस्येत्यनुवर्त्तमानेपियत्तुक्चेतिचकारस्तदनुकर्षणार्थः क्रियते। तथाहिञ्चस्वरितत्वादेवह्रस्वस्येत्य
नुवर्त्तमानेपियत्तुक्चेतिचकारस्तदनुकर्षणार्थः क्रियतेतन्नह्रस्वएवागामीयथास्यादन्यतदंतइत्येवमर्थमिति। छेचह्रस्वस्येति। स्तोश्चुनाश्चुरित्यने
नविहितस्यचुत्वस्यपूर्वत्रासिद्धमित्यनेनासिद्धत्वादित्यर्थः। तुग्विकारस्तुग्विधौछेसिद्धोवाच्यः॥ अग्नाउइछेत्र। पदाउछेत्र। आउ॥ माङो। ङि
द्विशिष्टस्यकिं। आच्छाया। आच्छाया। अयंस्मरणेआकारः। ततोविकल्पः। प्रमाच्छेदः। प्रमाच्छेदः। नायमाङ् अव्ययं। किंतुमाङ्मानइतिधातुः।
ननु दीर्घादित्येवसिद्धेकिमर्थमित्याशंक्याहपदांताद्वेति। दीर्घात्परोयःछकारः तस्मिन्परेपूर्वस्यतस्यैवदीर्घस्यतुगागमःस्यादि
त्यर्थः। छाछेदने। पटुदीर्घोकितः विरूपसर्गः। विच्छायतइत्यादेर्युदाहरणं। ननुचात्राङ्गनिर्देशेपंचमीनिर्देशोबलीयानितिनायाछस्यतु
क्स्यात्ततदीर्घस्यानेषदोषः। तस्मादित्युत्तरस्येत्यत्रतस्मादितियोगविभागः क्रियतेतेनदीर्घस्यैवस्यादिति॥ ॥इतिश्रीरामाचार्यसूनुहरि
हरन्दजन्मनैकाग्रधीः॥ प्रसादेनिरगमदमलःसंधौरीहग्घलोच॥ ॥इतिहल्संधिः॥ ॥३॥ ॥अथविसर्गसंधिरुच्यते॥ ॥विसर्जनीयस्येति॥
कृष्णश्रित्वः। हरिश्शेते। विष्णुस्त्राता इत्यत्रानेनसूत्रेणसकारोऽन्वतीत्यर्थः। एवंयोर्यथाक्रमंश्चुत्वंष्टुत्वे॥ ॥शर्परे। विसर्जनीयस्यविसर्जनी
यवचनंतद्विकारनिवृत्त्यर्थमित्याहनत्वन्यदिति॥ ॥वाशरि॥ ॥सर्वेवेतिविसर्जनीयस्यविसर्जनीयोवास्यादित्यर्थः॥ तद्बृहतोरिति। एत
अपारस्वरगणास्खंस्तुते। अस्यचायमर्थः। तद्बृहदित्येतयोर्यथाक्रमंकरपतिशब्दयोःपरतः तथाक्रमंचोरेदेवतायांचाभिधेयायांसुटस्यात्तल्लोप
स्मात्तचकरपतिशब्दयोःसुटस्यात्तयोरेवपरयोः तद्बृहतोस्तलोपोस्तीत्यस्येति। अस्यस्यस्यादितिनिपातनतस्यैवायंप्रपंचःएतच्चाग्रेवक्ष्यते। तस्क
रोतीतितस्करश्चौरः किंयत्तदेतद्भ्यश्चेतिडतोच्। अन्यस्तकरः। इहस्पतिर्देवता। इहस्पतिरन्यः। कस्कोः कस्कादिषुचेतिविसर्गस्यसत्वेविसर्जनी
यस्यकस्कादित्वादिति। तास्करशब्देसकारोनुस्मणोत्तरेणविहितइतिकृत्वाकस्कादित्वानज्ञेयइत्यर्थः। अथवातास्करेतिनिपातनादितिकृ

प्र॰स॰
।२६।

दंते दस्यति। कुचोरिति। अर्वाचीनमतेनेनतत्। वाशब्दो व्यवस्थायां तेन संज्ञायां सः। अन्यत्रनेतितेषां मन्दिप्रायः। नमस्। नमस्करोति। सास्सी। अन्तनीनि
देति रुकृञ्योर्योगे नमःशब्दस्य विकल्पाघागतिसंज्ञा। पुरस्करोतीति। पुरो व्ययमिति पुरःशब्दस्याव्ययस्य नित्यं गतिसंज्ञा। गत्योः किं। नमः पीत्वाग
तः। पुरःपुरः कृत्वा गतः॥ ॥इति विसर्गसंधिः॥ ॥४॥ ॥अथ स्वादिसंधिः॥ ॥स्वौजसमौट्छि ति। शिवस् अर्च्य इत्यत्र अर्च्यव द धातुरप्रत्य
यइति ज्ञाति पदिकत्वात् स्वौजसमौडित्यादिनाक्तवेन प्रथमैकवचने सु प्रत्यये कृते सति शिवस् अर्च्य इति स्थिते उच्यत इत्यर्थः। ससजुषोः॥
जुषीषीति सबनयोरस्मात्क्विपि सह एवं स्य रूपमेतन् सजुष् इति। अतोरोरिति विशेषणार्थ उकारोनुबंधः॥ अतोरोः॥ ञो नगोरइतीति ना प्लु
तस्मिन्नेतस्य विधीयमानत्वात्। ननु च उत्वे कार्ये पूर्वत्रासिद्धन्यायेन तु त्वमसिद्धं तत्कथमसतः शक्यमुत्वं विधातुमित्याशंक्याह। रुत्वे कार्ये असि
ति। यदि रुत्वमसिद्धं स्यात्तर्हि उत्वस्य उत्वं प्रति स्थानित्वेनाश्रयणमनर्थकं स्यात् ततश्च स्थानित्वेनाश्रयणात् उत्वं नासिद्धमित्यभिप्रायः। दिवो
र्च्य इति। उत्वे च आद्गुणः एङः पदान्तादतीति पूर्वरूपत्वं ननु अत इति तपरत्वादेव सिद्धौ यो ऽप्लुत निवृत्तौ किमर्थमप्लुतादित्युच्यत इत्याशंक्य प्लुत अ
प्लुतादिति किमिति। परिहरति कृते पीति। अयमर्थः। यदि अत उ इत्येवोच्येत तदा सुस्रोता३ अत्र स्नातन्द्रहूते चेति प्लुते कृते पि तस्य प्लुतस्य अ
तोरोरि त्युत्वं प्रति पूर्वत्रासिद्धन्यायेनासिद्धत्वात् रोरुत्वं स्यादेव तन्मा भूदित्येवमर्थं अप्लुतादित्युक्तं। अप्लुतादित्युच्यमाने यत्र प्लुतसंज्ञाव
नाप्यस्ति तत्र नभवति। सुस्रोता३ अत्रेति सुस्रोतस् अत्रेति स्थिते रुत्वे प्लुतः ऽत्वा भोभगो अघो इति यत्वं। लोपः शाकल्यस्येति यलोपः। अप्लु
तेति किमित्यादि पूर्ववदाक्षेपपरिहारौ। हशि च। तथेति। अप्लुतादतः परस्य रोरुः स्यादित्यर्थः। रोरुरित्येवेति। उकारानुबंधस्यैव रेफस्योत्वं ना
न्यस्येत्यभिप्रायः। भ्रातरत्र। धातर्गच्छति। भ्रातृधातृशब्दयोः संबुद्धौ ऋकारस्य गुणो रपरः। देवास्इहेति देवशब्दाज्जसि पूर्वसवर्णदीर्घे कृते देवा
स् इह इति स्थिते इत्यर्थः। रुत्वमिति। ससजुषो रिति। भो भगो अघो। अशीति किं स्वरिमा स्तु। ननु तत्र खरवसानयोरिति विसर्गः स्यात्। नैष
दोषः। तत्र कृते पि स्थानिवत्त्वात् यः स्यात्। नल्लोपकात्। यदयं अत्रानुनासिकः पूर्वस्य तु वेति विसर्गस्य यकारमकृत्वा निर्दिशति तत्रज्ञापयति

श्री
।२६।

विसर्गस्य रत्वे रि यकारो न भवतीति। अवसाने तर्हि स्यादिति चेत्। न। संहितायामित्यधिकारात्। एवं तर्हि उत्तरार्थमशिग्रहणं। व्योर्लघुप्रयत्नत
रः शाकटायनस्य॥ लोपः शाकल्यस्येति एतदशि यथा स्यात्। हलि सर्वेषामिति च हशि यथा स्यात्। तत्र वृक्षं वृश्चतीति वृक्षवृट् तमाचष्टे
णिच् टिलोपः वृक्षवयति ततो क्विप् वृक्षव् करोति। अत्र एतानि कार्याणि न भवन्ति। अत्र णिलोपस्य स्थानिवत्त्वात् लोपो व्योर्वलीति लोपो न पूर्व
त्रासिद्धीयेन स्थानिवदिति हलि सर्वेषामिति स्यादेव। अथ हलि सर्वेषामित्यत्र हल्ग्रहणं किमर्थं। हशीत्येव किं नोक्तं। मोऽनुस्वारः इत्येवमादि ह
ल्मात्रे यथा स्यादिति। विभाषा। एषां रुरिति अलोन्त्यपरिभाषया एषामंत्यस्य स्यान्न यत्वमिति भोभगो इत्यनेन नटि विकारमते विभाषा भवदि
त्यादिके वक्तव्ये न कर्तव्ये भोऽउत्ये वमादयो भोभगो अघो अपूर्वस्येति सौत्राः सांतानिपाता द्रष्टव्याः॥ अथवा विभक्तिस्वरप्रतिरूपकाश्चे
ति। चकारेण असंबुद्धावपि हिडिं दृश्यंते। भो देवदत्त यज्ञदत्त विष्णुशर्माणः तथा स्त्रियामपि दृश्यंते। भो ब्राह्मणि॥ व्योर्लघुप्रयत्नतरत्वं नाम उच्चा
रणस्थाने करणे च शैथिल्यं। आंतरतम्यात् यस्य एव वस्य वरः एव भवति। ओतः ओकारात्परस्येति। ओकारांतादंगात्परस्येत्यर्थः। ओकारात्
परस्य वकारस्यासंभवात् परस्येत्येकवचनेन निर्देशः। यद्वा विशेषणं अलघुप्रयत्नस्य लघुप्रयत्नस्य च लोपः स्यात् व्योर्लघुप्रयत्नतरः शा
कटायनस्येति विधिरनर्थकः स्यात् तस्मात् लघुप्रयत्नस्यैव लोप इत्याह अलघुप्रयत्नस्येति। केषांचित्सर्वस्यैव लोपः स्यात्। लोपः शा
कल्यस्यत्यनेनैव लोपे सिद्धे नित्यत्वार्थं वचनं इत्याह नित्यमिति। ननु यदि नित्यार्थं वचनं तर्हि गार्ग्यग्रहणं किमर्थमित्याशंक्याह गार्ग्यग्रहणमि
ति॥ भो अच्युतेति अत्र नच्युत इति स्थिते रुत्वं। नानर्थके लोऽन्त्यविधिरिति सर्वस्य अवस्य ओत्वयलोपः। अलघुप्रयत्नेति किं। यदा लघुप्रयत्नस्य
दा लोपो न। भवन्नवेति। उगिदचामिति नुम्। संयोगांतलोपः। ङमो ह्रस्वादिति ङमुट्। अस्य पदत्वात्यन्ते व्याख्यायते। अचि च पदे। अपूर्वयोः
पदांतयोर्व्योर्लोपः स्यात् अचि पदे परे। कउ रुहं समाश्रयेत। पदे किं। तं वेउतं तं च गुते। हलि। ओतः परस्येति भो अगो अघो अपूर्वस्येत्यर्थः।
एषामनुवृत्तेः। ननु व्योरित्यनुवर्तते तत्कथं यकारस्यैवोच्यते वकारस्य चेत्यपि किं नोच्यते इति चेत्। उच्यते। अत्र हि भो भगो अघो अपूर्वस्तु

प्र॰ म॰ ॥२७॥ वकारेण भवत्येव। अवर्णो हर्यवस्तु यद्यपि संभवति वृक्षं वृक्षौ तौ तिलं तथापि तस्येह ग्रहणं न संभवतीति। भोभगो अघो अपूर्वस्येति सूत्रे प्रति
पादितं। न तु वृक्षवद्ध सतीत्यादौ संभवति न संभवति अनभिधानात्। भोऽहरे इत्यादौ विभाषा भवदित्यादिना रुः। अवस्य ओ यत्वे सोऽह
त्वमिति। हरिविष्णुशब्दाभ्यां प्रथमैकवचने सौ जाते हरिस् अयं विष्णुस् यातीति स्थिते ससजुषो रिति रुत्वे इत्यर्थः। रोः सुपि। रोरपवाद
इति। अह्न इत्यनेन प्राप्तस्य तेनाहरहरित्यन्नातो रोः प्लुतादप्लुत इत्युत्वेन भवति। अहर् ईदाति गीर्यादौ सुपो लुकि जातं इति सुप्परत्वं
नास्तीति रो भवति अङ्कार विधौ लुमता लुप्ते प्रत्ययलक्षणं न भवतीति वक्तव्येन प्रत्ययलक्षणनिषेधात्। यत्र तु लोप इति लुप्यते तत्र
प्रत्ययलक्षणं स्यादेवेति तेन हरी चाहो निदाघे च इत्यादौ रोऽत्र। हल्ङ्याब्भ्य इति सुलोपात् रूपरात्रीति। रेफापवादो रुत्वमुक्तार्थे विधीयते। अ
हरादीनामिति। अत्र विसर्गबाधनार्थं तरेफस्यैव च पदस्य रेफो विधीयते। रोरि। यद्यपि पदस्येत्यनुवर्तते तथापि तस्याविशेषणं षष्ठी त्वास
दां तस्यापदांतस्य वा विशेषेण लोपो भवतीत्यभिप्रेत्याह रेफस्य रेफे लोप इति। ढ्लोपे द्वयो पइत्यय नत्सुरुषः किंतु बहुव्रीहिः द्वयोर्लो
पो यस्मिन्निति यस्मिन् द्वयोर्लोपः स्यादित्यर्थः स च ढ्लोपो विचार्यमाणो ढकारे रेफे चेति सर्वेष्वेव सिद्धत्वात्॥ ढ्रेफयोर्लोपनिमित्त ॥२७॥ प्र॥
योः परत इति। ढ्लोप इति सप्तमीनिर्देशादेव सर्वस्य दीर्घे सिद्धे सर्वग्रहणमुत्तरपदाधिकारेऽपि अनुत्तरपदेऽपि सर्वमात्रस्य दीर्घार्थं। दृढ इति।
नात्र ढ्लोपः स्थूलदृढबलयोरिति निपातो गृह्यते तस्य निपातनादेव दीर्घाभावसिद्धेः प्रत्युदाहरणत्वानुपपत्तेः किंतु दृह दृहि वृद्धौ इत्यस्य निष्ठा
या मागम श्रोमनस्तानि त्यस्येनेड्भावे वा दुहमुहेति वेति योगविभागात्सेट्त्वाभावे ढत्वे ढलोपे रूपं। तथा च न्यासेऽप्युक्तं। केचित्तु अ
नित्यत्वादागमशासनस्याभावमिटो वर्णयंति। वा द्रुहेत्यत्र चेति योगविभागास्सेट्त्वस्येति। अथवा तृढ इति प्रत्युदाहरणं। तृह हिंसा
र्थः। निष्ठा। मनस् इत्यादित्ये ससजुषो रुरिति तस्मिन्नुक्ते उत्वलोपयोः प्राप्तयोः विषयभावस्थार्थमुच्यते विप्रतिषेध इति होप्रसंगाय
न्यत्र साकाशौ। यत्रैकाशौ। यच्च युगपत् प्राप्नुतः स तुल्यबलविरोधः। उत्वं अपवादं नित्यानित्यं न रेफं च हिंगे पुत्तुल्यवलतानास्ती

लितायमस्य सूत्रस्य विषयः। जातिपदार्थपक्षे अप्रवृत्तौ विध्यर्थं वचनं। व्यक्तिपदार्थपक्षे पर्यायेण प्राप्तौ नियमार्थं। इति लोपप्राप्तमिति। हशि
चेत्युत्वं शिवो वंद्य इत्यादौ सावकाशं। रोरी इति लोपो हरी रम्य इत्यादौ सावकाशः। तयोरत्र प्रसंगे लोपप्राप्ते रोरीत्यस्य परत्वादित्यर्थः। पूर्वत्रा
सिद्धमित्युत्वमेवेति। अत्र रोरीत्यस्य त्रिपादीस्थत्वात् पूर्वत्रासिद्धन्यायेन षाष्ठिकमुत्वं प्रति नित्यसिद्धत्वात् तुल्यबलत्वाभावात् विप्रतिषेधपरि
भाषा न प्रवर्त्तते अत उत्वमेव स्यादिति भावः।। अपवादादीनां तु परस्परसंप्रधारणायां नित्यादंतरंगो बलीयान् तस्मादप्यपवादः। तथोक्तं
परं दितु: पूर्वपरयोः प्रसक्तौ परस्य नित्यस्य च नित्यमेव। नित्यांतरंगयोरंतरंगा तस्माद्विधिः प्रातिपदो बलीयान्। एतत्तदोः एष इति। तदोः
सः सौ विति सः षत्वं। एषको रुद्र इति। अव्ययसर्वनाम्नामकच् प्राक्टेरिति अकच्।। ननु त्वाकच् सहिते शब्दे तदस्मैवे नैनेतनमेवं। तन्मध्य
पतितस्तद्ग्रहणेन गृह्यते इति रूपेदेप्येतदेव। असः शिव इति। ननु त्वात्र समस्तस्य मुशब्दो न तदः। मैवं। उत्तरपदार्थप्रधानत्वात् नञ्स
मासस्य तद एवायं हलः। सोः किं एतौ गावौ। सोचि। स इति प्रथमैकवचनं। तस्य तदो रूपं तस्य ग्रहणमेतत्। पादग्रहणमेतत्। पादग्रहणमेतत्।
पादग्रहणेनेह ऋक्पादः श्लोकपादो पि गृह्यते। अत एवोदाहरणद्वयमाह सेमामविड्ढि। सेष दाशरथी रामः। सैष राजा युधिष्ठिर इति। तथा
चोक्तं काशिकायां ह वै पादग्रहणेन। च श्लोकपादस्य ग्रहणं केचिदिच्छंति तेनैतदपि सिद्धं भवति। सेषदौ दाशरथी रामः सैष राजा युधि
ष्ठिर इति।। ।।श्रीरामचार्यस्नुः व्याख्याने शास्त्रसादे युगलमिति विसर्गाख्यस्वादिसंध्योः।। ।।५।। ।।अथस्वादिप्रक्रिया।। ।।
।।तत्र तावददंतात् पुल्लिंगात् अकारांतादि क्रमेण सुत्सादयितुकामः प्रातिपदिकसंज्ञामाह।। ।।अर्थवदधातुः।। ।।धातुर्वं प्रत्ययवर्ज्जमि
ति धातुवर्ज्जे चेत्यर्थः। ननु त्वात्र संज्ञाविधौ प्रत्ययग्रहणे तदंतग्रहणं नेति ज्ञापितं सुप्तिङंतं पदमित्यंतग्रहणेन तल्लिंगं। एवं व्याख्यायते। नैष
दोषः। संज्ञाविधौ हि निषेधः। न चायं संज्ञाविधिः किं तर्हि निषेधविधिः। अर्थवदिति। अत्रार्थशब्दो भिधेयवाची अर्थो भिधेयरेव वस्तुप्रयोज
ननिवृत्तिषु त्वभिधानात्। सेनाभाववचनानां प्रजाशत्रिघातादिशब्दानामपि प्रातिपदिकसंज्ञा स्यात्। अभावोपि हि अभिधेयो भवति। अ

प्र·सू आश्रित्येयं चतुर्विधा। जातिगुणक्रियाद्रव्यभेदेन अत एव चतुष्टयी शब्दानां प्रवृत्तिः। अर्थवदिति किं। यदिह्यर्थवदित्यान्नलोपः प्रसज्येत। नकु
॥२७॥ धातुरप्रत्यय इति पर्युदासाश्रवेतो तत्रभ्वं नञिवयुक्तमन्यसदृशाधिकरणे तथा ह्यर्थगतिरिति न्यायेनाधेवलक्षणसदृशस्यैव संज्ञा स्यात्। अलोनार्थ
र्थवद्ग्रहणेन। न्यायस्यायमर्थः। नञ्युक्तमिवयुक्तं चान्यस्मिन्सदृशेऽर्थे प्रतीतिं जनयति। तथा ह्ययमर्थो लोके दृश्यते अब्राह्मणमानयेत्युक्ते
ब्राह्मणसदृशं क्षत्रियमानयति। नवि सदृशं लोष्टमानीय कृती भवतीति नैव दोषः॥ अनर्थकोऽपि धातुरस्ति तद्यथा। इङ्। अध्ययने इ
ति धातुः। अधि सर्वस्यैवार्थवत्त्वात्। यस्तु धातुपाठेऽर्थनिर्देशः स समुदायार्थमपवयवे आरोप्य कृतः। आरोपितार्थस्यापि गणपाठबलादेव
धातुसंज्ञा। प्रत्ययोऽप्यनर्थकोऽस्ति। यावादिभ्यः कन्। याव एव यावकः। न ह्यत्र कनोऽन्वयव्यतिरेकाभ्यामर्थो ज्ञायते। विनापि कना यावशब्दे
वार्थप्रतीतेः। तस्मादर्थवदिति वक्तव्यं। अधातुरिति किं। हन्तेर्लङ्। अहन्। लुङि हल्ङ्याबिति लोपे अदिव च अहन्। अत्र हन्तेः प्रहणेन च
गृह्यत इति कृते प्यादि हेतिधातुरेवेति धातुनिषेधं विना संज्ञा स्यात्। ततश्च नलोपः प्रसज्येतेन नन्वप्रत्ययलक्षणेनाप्रत्ययनिषेधः स्यात्॥ श्री
नैवं। प्रातिपदिकसंज्ञायां हि नलोपः कार्यं न तु लोपे प्रत्ययलक्षणेनाप्रत्यय इति निषेधो न प्रवर्तेत। इत्यत्र न ङिसंबुद्ध्योरिति निषेधो ज्ञापकः। यदि ॥२७॥
हि प्रत्ययलक्षणेन अप्रत्यय इति संज्ञानिषेधः स्यात्तर्हि राजन्नित्येवमादावपि तत् संज्ञानिषेधेन ङिसंबुद्ध्योरित्यर्थं स्यात्। अप्रत्यय इति किं। ॥२८॥
काण्डे इत्यत्र प्रथमाद्विवचनान्तेशब्दे प्रत्यये। तन्निषेधं विना ह्रस्वो नपुंसके प्रातिपदिकस्येति ह्रस्वः प्रसज्येत। ननु च काण्डशब्दस्य प्रातिपदि
कत्वात् विभक्त्या चैकादेशे कृते अन्तादिवद्भावेऽस्यं तत्वत्वात्। अत्रस्यैव प्रातिपदिकत्वमिति कृतेऽप्यप्रत्ययग्रहणे ह्रस्वस्यादेवानस्यात्। अप्र
त्ययग्रहणसामर्थ्यात् अन्यथा ह्यप्रत्ययग्रहणमनर्थकं स्यात्॥ प्रत्ययः। परश्च। ङ्याप्प्रातिपदिकादित्यधिकृत्य पञ्चैतानि त्रीणि सूत्राणि
अधिकृत्योच्यन्त इत्यर्थः॥ तानि क्रमेण व्याख्यास्यामः॥ ॥प्रत्ययः॥ प्रतीयते ज्ञायतेऽनेनेति प्रत्ययः प्रत्ययेऽन्वर्थसंज्ञा। इतऊर्ध्वं यापंचमाध्यायपरि
समाप्तेर्यान्नु क्रमिष्यामः प्रत्ययसंज्ञास्ते ज्ञेयाः। प्रकृत्युपपदोपाधिविकाराश्चतुर्विधास्ते॥ ॥परश्च॥ प्रत्ययः प्रकृतेः परस्यादित्यधि

कारेयोगे योग उपतिष्ठते। परिभाषा वा चकारो बहुच्यधिकारविहितानामप्युणादीनां परत्वविकल्पो मा भूदिति। ङ्याप्प्रातिपदिकात्। द
न्द्वे आ पंचमाध्यायपरिसमाप्तेः स्वादिषु कः प्रत्ययावधिषु प्रकृतित्वेनाधिक्रियेते। ङ्याप्प्रातिपदिकादिति ङी ष् ङीप् ङीनां सामान्ये
न ग्रहणं ङीति। आविति टाप् डाप् चापां ग्रहणं प्रातिपदिकमुक्तं। तेषां समाहारद्वंद्वो। ङ्याप्प्रातिपदिकादित्ययपि प्रत्ययपरत्वेन पारिशेष्या
न्ङ्याप्प्रातिपदिकमेव प्रकृतिर्लभ्यते न तथापि दृष्टाद्दृष्टा वर्णस्वरहानेल ङ्स्तत्प्रत्ययविधौ तत्संप्रत्ययार्थं ङ्याप्प्रातिपदिकग्रहणं कार्य्यं अन्यथा
समर्थविशेषणमेव स्यात् समर्थानां प्रथमाद्वेति समर्थात्प्रत्ययविनैधानात्। तत्रञ्ज्ञानामपत्यमित्यत्र उदीचां वृद्धादिति प्रातिपदिकाव ख्या
यामवृद्धस्यापि दृशद्ध्रस्यसमर्थो वर्णायां षष्ठीबहुवचने वृद्धत्वमस्तीति फिञ् स्यात्। तथा प्राचामवृद्धात्फिन्बहुलमित्यत्र वृद्धविशेषणं प्रातिपदिक
त्वे क्तिसमर्थत्वेनास्तीति न स्यात्॥ इत्यादि प्रयोजनं महाभाष्यादवगंतव्यं विस्तरभयान्न लिख्यते। अथ ङ्याप्ग्रहणं किमर्थं। प्रातिपदिकग्रहणे लिं
गविशिष्टस्यापि ग्रहणं भवतीत्येव सिद्धं न सिद्धाति। प्रातिपदिकस्य स्वरूपग्रहणे सा परिभाषा॥ किंच ङ्याबन्तात्तद्धितविधानार्थं च तद्ग्रहणं कार्य्यं अ
न्यथा विप्रतिषेधात्तद्धितं स्वस्यान्न ङ्याप्। कालितरा। खट्वतरा॥ ॥स्वौजसमौट्॥ सुट् ङ्योरिति॥ संज्ञार्थो इति सुट् इत्यादि संज्ञा प्रयोजनं चे
षां नेतरथोक्ताः। अयं भावः सुरिति अत्र उकार उच्चारणार्थः सन् सु संज्ञार्थः। ङे सिरिकारः षष्ठ्येकवचनाद्विशेषणार्थः सन् सिसंज्ञार्थः। जसो
जकार ओकारेण सहासंदिग्धोच्चारणार्थः सन् संज्ञा भवति। इतरथाद्यो कारस्यावादेशे कृते संदेहः स्यात् कीदृक् प्रत्यय इति। शसः शकारः
औट् ष्टकारस्य च वर्णेन असंदिग्धोच्चारणार्थः सन् संज्ञार्थः इतरथा औङ् सिद्धत्युक्ते टस्ये दं ग्रहणं ङस्य चेति संदेहः स्यात्। औट् ष्टकारः सुडिति
प्रत्याहारग्रहणार्थः। टाङ्स्य च टकारः टा ङसि ङसामित्यात्स्याः इस्यत्र विशेषणार्थः स्यात्। चतुर्थ्येकवचनादिषु ङकारो ङे ङिति विशे
षणार्थः। सुपः पकारः सुपिति प्रत्याहारार्थः। इत्थं वेषां यथायोगं। उपदेशेऽजनुनासिक इत् हलन्त्यं चुटू लशक्वतद्धिते इतिसंज्ञैः संख्या कर्मादयश्च
स्वादिनामर्थाः सूत्रांतरैर्विहिताः बहुषु बहुवचनमित्यादिभिः कर्मणि द्वितीयेत्येवमादिभिश्च तेः सहास्यैकवाक्यता भवति। कर्मणोऽव

उ॰सू॰ २।२५७॥ हुत्वे बहुवचनं नेशसस्यात् कर्मणि एकत्वे एकवचनं कर्मणो द्वित्वे द्विवचने औ न्वती त्यादेः कर्त ज्ञेया। तत्रैवं वैयाकरणसिद्धांतरहस्ये। इदं तावद्बोध्यं
चिन्नातं स्वार्थद्रव्यलिंगसंख्याकर्माद्यात्मकः पंचकः प्रातिपदिकार्थ इति। अन्येषां तु स्वार्थद्रव्यलिंगात्मकस्त्रिक इति। तत्र स्वार्थो नाम विशेषणं। तत्र
कदाचित्स्वरूपं जातिर्गुणो द्रव्यं वा स्यात्। द्रव्यं नाम विशेष्यं तदपि कदाचिज्जातिर्गुणो द्रव्यं वा स्यात्। तत्र पटशब्दरूपेण विशिष्टा जातिरुच्यते गौ
रिति तदा गोशब्दस्य स्वरूपं विशेषणत्वात् स्वार्थो भवति जातिस्तु विशेष्यत्वाद्द्रव्यं। यदा तु जातिविशिष्टो गुण उच्यते। पटस्य शुक्लो गुण इति त
दा जातिर्विशेषणत्वात्स्वार्थः। शुक्लगुणो विशेष्यत्वाद्द्रव्यं। यदा तु गुणविशिष्टं पटादिद्रव्यमुच्यते शुक्लः पट इति तदा विशेषणत्वाद्गुणः स्वा
र्थः। विशेष्यत्वात्पटो द्रव्यं। यदा पुनर्द्रव्यं द्रव्यांतरविशेषणं स्यात् यष्टीः प्रवेशयेत्यादौ तदा यष्ट्यादिकं विशेषणत्वात्स्वार्थः। द्रव्यांतरं पुरु
षादि विशेष्यत्वाद्द्रव्यमेव। क्वचित्संबंधोपि स्वार्थः स्यात् यत्र संबंधनिमित्तः प्रत्ययः स्यात् यथा दंडीति। अत्र दंडपुरुषसंबंधो विशेषणं दं
डी तु द्रव्यं। क्वचित्क्रियापि स्वार्थः यत्र क्रियानिमित्तः प्रत्ययः। यथा पाचक इति क्रियाकारकसंबंध एव स्वार्थ इत्यन्ये। लिंगं स्त्रीत्वादि। संख्या एकत्वा श्री॥
दि। कर्मादयो वक्ष्यमाणाः कारकविशेषाः धातोस्तु क्रियैव वाच्येत्याचार्याणामविवाद एव। तत्र पंचकप्रातिपदिकार्थपक्षे संख्याकर्मादयः प्राति १२५॥
पदिकेनैवोच्यंते विभक्तयस्तु तद्द्योतकाः त्रिकपक्षे विभक्तयो वाचिकाः। तत्र त्रिकप्रातिपदिकार्थपक्षमेव युक्तत्वाद्दर्शयन्नाह बहुषु बहुवचनमि
त्यादीनां विध्यर्थं तान् श्रितान्वाचार्यवर्यः। ततस्तैः सहास्यैकवाक्यता स्यात्॥ विभक्तिश्च। वकारः पुरुषादिसंज्ञासमादेशार्थः॥ अन्यथा एकसंज्ञाधि
कारे वचनप्रामाण्यात् सख्यौ येतास्युः तिङोपि विभक्तित्वे प्रयोजनं न विभक्तौ तुस्मा इति। सुपस्तु एतत्त्रान्यद्भ्यादाद्यत्वादि। सर्वनाम्न्यैः स्यादीनां
त्रिकाणां कृताः प्रथमादिसंज्ञा कथयति। सुऔजसमौट् इत्यादिना॥ सुपः॥ प्रत्याहार इति। प्रथमैकवचनमारभ्य सुपः पकारात्। अथ कस्य पकारे
ण ग्रहणं कस्मान्न स्यात्। सप्तमीपकारस्य त्वनुदात्तत्वमस्ति प्रयोजनं॥ द्व्येकयोः॥ द्व्येकयोरिति भावप्रधानो निर्देशः। अन्यथा बहुत्वाद्बहुवचनं
स्यादित्यभिप्रेत्याह द्वित्वैकत्वयोरिति। कर्मादयोऽपरे विभक्तीनां वाच्याः॥ तदीये एकत्वादौ एकवचनमौ दिने र्यति। अत्रैषां मते त्रिकः प्राति

पादिकार्थ इति तत्पक्षे एतत्सूत्रं विध्यर्थं। तथा हि ङ्याप्प्रातिपदिकात् स्वादयः उस्यतिबादय इति एकवचनद्विवचने सामान्येन विहिते तयोरनेन द्वित्वैक-
त्वेवास्थत्वेन विधीयते। अन्यथा यदीदं सूत्रं नोच्येत ततो निर्दिष्टार्थाः प्रत्ययाः स्वार्थे भवन्तीति प्रातिपदिकात्स्वादयो विधीयमानाः त्रिकरूपार्थे स्युः।
धातोरपि तिबादयः क्रियायामेव स्युः नैकत्वादौ। येषां तु मते पंचकः प्रातिपदिकार्थस्तत्पक्षे पंचाप्यर्थाः प्रातिपदिकवाच्या इति विनाप्येतेन वचने
न प्रातिपदिकाद्विधीयमानाः स्वादयो निर्दिष्टार्थत्वेन एकत्वादौ स्युः ततस्तु नियमेन प्राप्तौ अनेन नियम्यते एकत्वे एकवचनमेव द्वित्वे द्विवचनमेवे-
ति। अव्ययादाप्सुपः इत्यव्ययादुत्पन्नानां सुपां लुग्वचनं ज्ञापकं निःसंख्येभ्योऽप्यव्ययेभ्यः स्वादय उत्पद्यन्त इति॥ ॥बहुषु॥ ॥अयमपि नावपरो नि-
र्देशः। एवं तर्हि जातस्यैकत्वात् बहुष्विति बहुवचनेन न घटते नैष दोषः। यस्मात्संख्याधारस्य उभयस्य भेदस्तं बहुत्वेन गुणेनारोप्य बहु-
ष्विति बहुवचननिर्देशः कृतः॥ संख्यावाची बहुशब्दो न वैपुल्यवाचीति ज्ञापनार्थं तत्र वैपुल्ये बहुवचनस्यावाच्यत्वेनेति बहुरोदन इति
वैपुल्यवाचिनो बहुशब्दादेकवचनमेव स्यात्। एतदपि सूत्रं त्रिकप्रातिपदिकार्थपक्षे विधायकं पंचकप्रातिपदिकार्थपक्षे नियामकं। प्रातिपदि-
कार्थविचारस्तु स्वौजसमौडिति सूत्रे कृतः। एतद्व्याख्यानेनैव व्याख्यातप्रायत्वेन तत्पृष्ठं सूत्रत्रयं व्याख्यायते॥ ॥जात्याख्यायामेकस्मिन्बहुवचनमन्य-
तरस्यां। जातेरेकत्वात् तदाख्यायामेकवचने प्राप्ते विकल्पेन बहुवचनार्थविधिः। जात्यर्थो बहुत्वं वस्यादिति यावत् ततश्च तद्विशेषणानामपि ब-
हुवचनं। संपन्ना यवाः संपन्नो यवः। जातीति किं देवदत्तः। आख्यायां किं। काश्यपप्रतिकृतिः काश्यपः। जातिशब्दोऽपि प्रतिकृतिमाचष्टे। एकस्मि-
न् किं। व्रीहियवौ। संख्यायाः प्रयोगे निषेधः। एको व्रीहिः॥ ॥अस्मदो द्वयोश्च॥ ॥एकत्वे द्वित्वे वास्मदो बहुवचनं वा॥ अहं करोमि वयं कुर्मः। आ-
वां कुर्वः। वयं कुर्मः। सविशेषणस्य निषेधः। अहं देवदत्तो ब्रवीमि। युष्मदि गुरावेकेषां॥ त्वं मे गुरुः यूयं मे गुरवः॥ ॥फल्गुनीप्रोष्ठपदानां च नक्षत्रे। फल्गु-
न्योः प्रोष्ठपदयोश्च नक्षत्रयोर्द्वित्वे बहुवचनं वा। कदा पूर्वाः फल्गुन्यः। कदा पूर्वे फल्गुन्यौ। कदा पूर्वाः प्रोष्ठपदाः। कदा पूर्वे प्रोष्ठपदे। नक्षत्रे किं।
फल्गुन्यौ माणवकौ। रामस् इति स्थिते इति। रामशब्दस्य व्युत्पन्नस्यार्थवदिति प्रातिपदिकसंज्ञायां प्रातिपदिकार्थैकत्वविवक्षायां प्रथमैकवचनं सुस्तत्र रु-

प्र·स·
॥३०॥

नडकारस्यैकदेशायां लोपे च कृते। रामस् इति स्थिते इत्यर्थः॥ कस्वरे विसर्गौ विति॥ स सकारो रुः स्यादिति सत्ये॥ रश्चैव रवसानयोः [illegible] दिसर्गः॥ रामस्य पुंस्त्व
मिकत्वे तदधिकरणमित्यमी रामपदार्थाः शुद्धाः। एवमन्यत्पदांतरे॥ रामराम औ इति स्थिते इति। रामद्वयवाचके रामशब्दद्वये स्थिते सति द्वित्व
शास्त्रे कृत्वौ इत्याप्ति न्विवक्षिते सति उच्यत इत्यर्थः॥ ॥सरूपाणां॥ ॥रूपशब्दः स्वभाववाची॥ समानं रूपं येषां ते सरूपाः इयो तिर्ज्ञानप
दे तिसमानस्य सः सरूपाणामिति निर्द्धारणे षष्ठी। याह सरूपाणां मध्ये इति समानजातीयस्यैव निर्द्धारणे संभवति न विजातीयस्येति न सरू
प एव शिष्यते। एकस्यां विभक्तौ परतो ये सरूपाः शब्दा दृष्टाः तेषां मध्ये एक एव सरूपः शिष्यते नेतरे सरूपा इत्यर्थः॥ अनुत्पन्नायां एकविभ
क्तौ एकशेषे कृते एकदेशविभक्त्युत्पत्तिः। अथवा सविभक्तिकानामेकशेषः। कथं विज्ञायते ऽनेनेति प्रातिपदिकार्थ इति विभक्तिः कारकं प
रयाद्युत्पन्नाविरेकविभक्तौ एकस्मिन्कारके परतः दृष्टे विवक्षिते यानि सरूपाणि तेषां मध्ये एक एव शिष्यते नेतरे इति। कारकं हि विवक्षित
त्वात् स्वनिमित्तां विभक्तिं जनयतीति सविभक्तिकानामेकशेषः। स हि विवक्षायां चायमेकशेषो नान्यथा। ननु जातिः पदार्थः। जातिश्चैकैव त
त्रैकत्वादर्थस्य बहूनां शब्दानां प्रसंग एव नास्ति। तत्किं एकशेषारंभेण व्यक्तिपक्षेप्यनेकार्थाभिधानसामर्थ्याद्द्विवचनाद्युपेयं। उच्यते। जातिपक्षे
प्रत्याख्यातानेकशेषत्वं स्यात्॥ नहि विभीतकदेवनशकटीक्षेषु तुल्यं किंचित्सामान्यमस्ति। व्यक्तिपक्षेपि [illegible] इति वाच्ये अने
कशब्ददर्शनात् हि रूपेषु द्वंद्वदर्शनादनेकेषामर्थानामेकेन शब्देनाभिधानमशक्यमिति यावंतस्तेर्थास्तावतां शब्दानां प्रयोगः प्राप्नोति इष्यते
चैकशब्दत्वं तस्मादेकशेषआरभ्यते। समानानामित्येव वक्तव्ये रूपग्रहणं भिन्ने प्रवर्त्तये यथा स्यात्। अक्षाः। अन्यथा अक्षशब्दस्य विभीतकशक
टाक्षादिवाच्यत्वेन सरूपत्वेप्यर्थभेदादेकशेषो न स्यात्। स्वरभिन्नानां यस्योत्तरः स्वरविधिः स शिष्यते यथा भूवादयः इत्यत्र वादयश्च वादयश्च
वादयः बहुव्रीहेः शेषः। एकग्रहणं किं। द्विवचनोः शेषो मा भूत्। एकविभक्ताविति किं। पयः पयो जरयतीत्यत्र प्रथमाद्वितीययोः सरूपयोरेक
शेषो मा भूत्॥ ॥प्रथमयोः॥ ॥प्रथमाशब्दो विभक्तिविशेषे रूढस्तत्साहचर्यात् द्वितीयापि प्रथमाशब्देनोच्यते इत्यभिप्रेत्याह। प्रथमा हि ती

प्र॥
॥३०॥

ययोरिति। अतो गुणे यदकारे पररूपत्वं तदकः सवर्णे दीर्घत्वमेव बाध्यते। न सवर्णदीर्घत्वं पुरस्तादपवादा अनंतरान्विधीन्बाधंते नो
त्तरानिति। सर्वग्रहणं अग्नी अत्र पक्षे परसवर्णे मा भूत् तादीर्घग्रहणं त्रिमात्रचतुर्मात्रानिनिवृत्तिमात्रादेशनिवृत्त्यर्थं इति प्राञ्च इति। सूत्रेण राम
औ इत्यत्र पूर्वसवर्णदीर्घे प्राप्त इत्यर्थः॥ ॥नादिचि॥ ॥आदिति किं॥ अग्नी। इचीति किं॥ रामाः॥ अनेन पूर्वसवर्णनिषेधः॥ हरिरेचीति हरि इति २
रेव स्यादेव॥ ॥चुटू॥ चुटू प्रत्ययस्येत्येकस्मिन्नेव योगे कार्ये पृथग्योगकरणमस्य विधेरनित्यत्वज्ञापनार्थं॥ तथा चाग्रे वस्यति चुटू अस्या
नित्यत्वान्न चस्येत्संज्ञेति। तेन तेन विलम्बं टुरुपो। केशाच्चुः। केशाच्चणः न तेनासिकाया। इति अवटीट इत्यादि सिद्धं। इति उलोप इति॥
बहुत्वविवक्षायां बहुवचनं॥ राम जस् इति स्थिते। जकारस्येत्संज्ञायां लोप इत्यर्थः॥ ॥न विभक्तौ॥ ॥हलंत्यमितीत्संज्ञायां प्राप्तायां नि
षेधार्थं योगः। विभक्ताविति किं। अचो यत्॥ ऊर्णायायुस्॥ स्थादिभ्यः क्नम्॥ अनित्योऽयं निषेध इति इदमस्थमुरिति मकारस्येत्संज्ञापरित्राणार्थो दु
कारानुबंधात् ज्ञायते। तेन किमोत् इदोत् इत्यत्र इत्संज्ञानिषेधो न। इति न सकारलोप इति जस इति शेषः॥ एकशेष इति सरूपाणामिति विभक्ती
त्वेन पूर्वसविभक्तिकस्य वा। पूर्वसवर्णदीर्घ इति अतो गुण इति पररूपस्य बाधकः। रामा इति रुत्वं विसर्गौ॥ ॥एकवचनं॥ ननु सुग्रहण
मेव कस्मान्न कृतं। न च सप्तमी बहुवचने तिव्याप्तिः संबोधन प्रथमाधिकारात् इति चेत्। उच्यते। प्रत्ययमात्रस्य संज्ञार्थमेकवचनग्रहणं। अन्य
था सर्वसूत्रेण तदंतस्यैव संज्ञा विहिता तदंतस्यैव स्यात्॥ एङ्ह्रस्वात्॥ ननु च एङ्ग्रहणं किमर्थं॥ यतो हे अग्ने हे वायो इत्यादावपि प्रागेव संबु
द्धिगुणात् ह्रस्वादित्येव लोपः स्यादिति चेत्। उच्यते। नित्यत्वात्परत्वाच्च संबुद्धिगुणो वक्तीयानिति प्रथमं स एव स्यात्। न च कृते ईस्वात् परः सं
बुद्धेर्हलसुनेति लोपो न स्यात्। अत एङ्ग्रहणं कर्तव्यं। हे राम हे रामौ हे रामाः॥ इति। अत्र संबोधनाभिव्यक्तये हेशब्दः प्रयुक्तः॥ ॥अमि॥ ॥प्रथमयोः
पूर्वसवर्णः इत्यतः पूर्वसवर्णग्रहणेनुवर्तमाने पिसर्वग्रहणं स्वे एव यथा स्यादिति॥ एवं सवर्णेन रत्वं मा भूत्। तेन कुमारीमीनचिमात्रेः॥ ॥लशक्
इति शलोप इति रामशस् इति स्थिते शसः शस्य लोप इत्यर्थः॥ ॥तस्मात्॥ ॥तस्मादिति किं॥ एतान् गाः पश्य॥ शस इति किं॥ रामाः॥ पुंसि

तिकिं। बह्वीर्ह्वीन्नः। इह तु वेह्वा प्रतिकृतिः स्त्रद्वा लुमनुष्य इति कनो लुपि कृते लुपि युक्तवद्व्यक्तिवचन इति पुंस्त्वेपि स्त्री[illegible] तेन नत्वं
नाश्वेन्न्वः पश्य॥ ॥अकृत्॥ आकुहणंपदव्यवाय इत्यस्य प्रतिषेधबाधनार्थं नुमग्रहणमनुस्वारोपलक्षणार्थं तेन बृंहणमित्यत्रानुस्वारव्य
वायेनुमभावेपि णत्वं स्यात्। इरिव्याप्ति प्रीणनयोः प्रहर्द्वेः उपसर्गाद्दहुळमिति प्रेंखणं इत्यत्र तु सत्यपि नुमि अनुस्वाराभावेण णत्वं न किं
पुनरिह सत्वेनासमुदायेवाक्यपरिसमाप्तिः आहोस्वित्प्रत्येकं। तत्र समुदाय इति पक्षो न घटत इति। सर्वैरप्यडादिभिः व्यवायाभावात् यदि
द्वितीयस्तदा अर्ध्वेणत्येवमादौ अनेकेन व्यवायेन स्यात्॥ तस्मात् व्यवायेणत्वं स्यादित्युपलक्षयितुमडादीनां ग्रहणं कृतं कृतरस्मिन्व्य
वाये अडादिभिर्व्यवायेते च अडादयो व्यस्ताः समस्ता वा व्यावायेन उपलक्षयितुं शक्तुं च तीत्यभिप्रेत्याह॥ एतैर्व्यस्तैः समस्तैश्च व्यवधा
नइति। इति णत्वे प्राप्ते इति राममानित्यत्वे तिशेषः॥ ॥यस्मात्॥ यस्मात्त्वातोः प्रातिपदिकाद्वा तदादीति सन्ध्यादिर्यस्य स तदादिः॥ यस्मा
दितिकिं तदादीत्यनेनसंबंधात्संज्ञिनिर्देशार्थं। प्रत्ययग्रहणं किं॥ न्यविशत इति। अत्र नेर्विश इति नेरुपसर्गाद्विधिरस्तीति तदादेरंगसं
ज्ञास्यात्॥ ततश्चोपसर्गात् आगडागमः स्यात्। विधिग्रहणं किं। प्रत्ययपरत्वमात्रेमा भूत्॥ स्त्री इयती। इदं परिमाणमस्या इति वतुप् किमि
दं भ्यामिति वस्य घः तस्ये। इदं किमोरीश्कीती दं ईश। यस्येति चेतीकारलोपः। डगितश्चेति ङीप्। स्त्रीशब्दात् जो हल्ङ्याब्भ्य इति लोपः स्त्री
स्त्री इयती तिस्थिते यदि विधिग्रहणं न क्रियते। इयतीशब्दे प्रत्यये परतः स्त्रीशब्दः स्यात्तत्तश्च यस्येतिचेति लोपः प्रसज्येत। ननु चाह्नसिद्ध
वदत्राभादित्यसिद्धईलोपः। तत्कुतोयं प्रसंगः। उच्यते। विधिग्रहणात्प्रागभाधिकारादसिद्धमित्यभिप्रायो लक्ष्यते। अथवाभाधिका
री यमसिद्धत्वमनित्यमिति। तदादिवचनं स्यादिप्रत्ययसहितस्य नुमाद्यागमसहितस्य चांगसंज्ञा यथा स्यात्॥ करिष्यामि। कुंडानि। अस्ति
हितदादिग्रहणे यस्मात्प्रत्ययविधिस्तस्य संज्ञा स्यात्। नस्यादेः समुदायस्य ततः प्रत्ययस्याविहितत्वात्। पुनः प्रत्ययग्रहणं किं। स्त्रिये इदं
अर्थं। अर्थे अस्त्य त्रचतुर्थ्येकवचनस्य विधिरित्यसति पुनः प्रत्ययग्रहणे स्त्रीशब्दस्यापि शब्दे ऐं परतोंग संज्ञा स्यात्। ततश्चेयङ् स्यात्

ततश्च यङ्-स्यात्। सति तु विहिते प्रत्यये परत इत्येवं विज्ञायते यस्मात्तो विहितः स तु विततिं भवति। यङ्-सि। णत्वमिति। रामटाङ् इति स्थिते न तु ह्र
इत्यस्येत्वो लोपे इनादेशे आद्गुणे च कृते पश्चात् दद्ध घाडितिणत्वमित्यर्थः। सुपि चेत्॥ अतः एत्वे भिसि परत्वाद्दत एस् ... भविष्यति। कृते
कृते पूर्वत्वे नातः परत्वादेस्तु निर्णयस्तथा सति। अनेकाल्शित् सर्वस्येति अनेकाल्त्वात् सर्वादेशो यमेसङ्। ङ्यः। स्थानिवद्भावादित्यादि। चतुर्थ्येकवच
नेरामङे इति स्थिते तु शङ्का। न हि तन्इतीत्वात् ङकारस्य लोपे यादेशे न च कृते स्थानिवद्भावादेशो नल्विधाविति तु वादेशश्चैयस्य स्थानिवत्त्वे निषेधो
ऽतः। अनल्विधाविति स्थानिनो ऽल्तमाश्रितो विधिर्निषिध्यते। यथा प्रथमैकवचने स्वोबल्लादित्वमाश्रित्य निषिध्यते। न च आदत्यन्तादित्वं स्थान्यति
देशे न किन्तु स्वयमेवादेशस्येति। ननु च त्वास्थानिन एकारस्यात्वात्तदाश्रयं तु सुत्वमल्लाश्रयमेवानायस्मिन् कार्येऽल एवासाधारणं रूपं निमित्ते वा
श्रीयते। अहल्लीत्यादिस एवाल्विधिः सुपि चेत्यत्रानेनैवं विधं किंचिदस्ति। केवलमुदाहरणे ऽल्मात्मकः स्थानी। ननु च संनिपातलक्षणो विधिरनिमित्तं
तद्विघातस्येति अदन्तत्वसंनिपातेन जातो यादेशः। कथमदन्तत्वं विहन्यात्। मैवं। कष्टाय क्रमणे इति निर्देशादनित्यत्वमस्याः परिभाषायास्तेन दी
र्घो ऽन्तस्येच। रामाभ्यामिति सुपि चेति दीर्घः। बहुवचने॥ ॥बहुवचने किं। रामाभ्यां। नु लिङ्किं। रामरणां। सुपीत्यनुवर्त्तत एवायजब्धं। रामादिति॥
पंचम्येकवचने रामङसि इति स्थिते। इत्वोत् ङकारेकारयोर्लोपे टाङसिङसामिनात्स्या इति आत् आदेशो ङसेः। अकः सवर्णे दीर्घः। रामाभ्यां॥
रामेभ्य इति पंचमी द्विवचन बहुवचनयोः। क्रमाद्दीर्घत्वे त्वे। रामस्येति। षष्ठ्येकवचने रामङस् इति स्थिते इत्वात् ङलोपे टाङसिङसामिति
स्यादेशः॥ ओसि। रामयोरिति। षष्ठीद्विवचने रामओसिति स्थिते। एत्वायादेशरुत्वविसर्गाः॥ ॥ह्रस्व॥ ॥आमत्र षष्ठी बहुवचनं गृह्यते एतद
पि सर्वनाम्नः सुडित्यत्र प्रतिपादयिष्यते। तदेव ह्यामग्रहणमत्रानुवर्त्तते॥ ॥नामि॥ ननु नामामित्यत्र सुपि चेति दीर्घत्वसिद्धं किमर्थं नामीत्या
रभ्यते। उच्यते अवश्यं हरीणामित्यादि सिद्ध्यर्थं एतदारब्धं तदन्यार्थमपि स्यादिति भावः। रामाणामिति षष्ठी बहुवचने आमि नुटि नामीति दी
र्घत्वे अट्कुप्वाङ्णत्वं। नामि दीर्घ आमि चेत् स्यात् कृते दीर्घे न नुट् भवेत्। रामे इति सप्तम्येकवचने ङि ङकारलोपः आद्गुण इति गुणः॥ ॥

प्र॰स॰ साम्योरिति। ङसिचेत्येकारः अयादेशः। एत्वे कृते इति सप्तमी बहुवचने नामसु इति स्थिते बहुवचने झल्येदित्येत्वे कृते इत्यर्थः॥ ॥आदेशप्रत्यययोः॥
॥३२॥ आदेशप्रत्यययोरिति षष्ठी भेदेन संबध्यते। आदेशो यः सकारः प्रत्ययावयवो यः सकार इति रामेष्विति। सकारस्य विवृतस्योष्माणो घोषस्यान्तरतम्या
त् तादृश एव षकारो भवतीति मूर्द्धन्यः॥ ॥सर्वादीनि॥ सर्व आदिर्येषां तानि तद्गुणसंविज्ञानो बहुव्रीहिः। सर्वेषां नामानीति सर्वनामानीत्यन्वर्थसंज्ञाते
न संज्ञोपसर्जनयोः सर्वनामत्वं न। एतच्चाग्रे स्वयमेव वक्ष्यति। ननु च सर्वनामानीत्यत्र पूर्वपदात्संज्ञायामग इति णत्वेन भाव्यं। अस्मादेव निपा
तनान्न भवति। सर्वादिगणं पठति। सर्वेत्यादि त्वशब्दोयमन्यपा। वीदिः पठितः स्वरभेदात्। एक उदात्तोन्योनुदात्त इति काशिकाकारमतं॥
ग्रंथकारमतं तु एकोकारान्तोन्यस्तकारान्तः। द्वावप्यनुदात्ताविति भवतोऽकच् एकशेषः॥ आसर्वनाम्न इत्यात्वे। सर्वनाम्नस्तृतीया चेत्येत
न्निप्रयोजनानि। डतरडतमौ प्रत्ययाविति। किं यत्तदोर्निर्द्धारणे द्वयोरेकस्य डतरच्॥ वा बहूनां जातिपरिप्रश्ने डतमच्॥ इति ततश्च तदंताः शब्दाः
इति प्रत्ययग्रहणे यस्मात्स विहितस्तदादेस्तदंतस्य ग्रहणमिति परिभाषया। ननु च सुप्तिङन्तं पदमित्यत्र तद्ग्रहणेन ज्ञापितं। संज्ञाविधौ तदंतग्रह
णं नेति सत्यं तथापि केवलयोः सर्वनामकार्याभावात्तदंतग्रहणमित्यदोषः॥ ॥जसः शी॥ ॥शइदिति लशक्वतद्धित इति। सच्च सर्वादेशार्थः श्री॥
। अन्यथा आदेः परस्येत्यकारमात्रस्य स्यात्॥ दीर्घोच्चारणे नपुंसकाद्वेत्यत्र समर्थं। मधुनी। सर्वे इति। अर्थवदिति प्रातिपदिकसंज्ञायां सर्वशब्दात् ॥३२॥
प्रथमा बहुवचने जस्। सर्वनाम्नः॥ अतः किं भवते। अथो अतास्मै इत्यन्यादेशे शिकृते सवर्णदीर्घ एकादेशः। प्राप्नोति। तत्रैकपदाश्रयत्वादंतरंगत्वा
त् सर्वस्मै भाव एव स्यात्। पश्चादेकादेशः। पदद्वयाश्रयत्वात् सर्वस्मै इति। चतुर्थ्येकवचनस्य ङे इत्यस्य स्मै॥ ॥ङसिङ्योः॥ ॥ङेर ल्याच्चूत्तर
स्य पूर्वनिपाते प्राप्ते परनिपातो। वैचित्र्यार्थः। सर्वस्मादिति पंचम्येकवचने ङसिः॥ ॥आमि सर्वनाम्नः॥ ॥आमीति सप्तमी निर्देशस्तत्रार्थः। इहतु
सर्वनाम्न इति पंचमी निर्देशात् षष्ठी प्रकृतिर्भवति। आमीति षष्ठी बहुवचनं गृह्यते॥ न ङे रामा। तस्याहि परत्वात् आड्याट्स्याटः स्युः॥ तेषु च कृते
पुंसुट्प्राप्तिरेव नास्ति। नहि द्वयोरादिलिंगयोः समद्वयो घटते। यच्चाद्यादामयश्च कास्प्रत्ययेत्यामन्तावपि न गृह्येते निरनुबंधग्रहणे न सानुबंधक

स्येतिपरित्राणयानोहिंसानुबंधो।एत्व वत्त्वेइति सर्वेत्र्याम् इति स्थिते।सुट्।बहुवचने मुल्यो दित्येत्वेत्र्यादेशप्रत्यय योरिति षत्वं।सर्वेस्मिन्नि
ति।सर्वङि॰ इति स्थिते ङ॰ सिङ्योरिति स्मिन्नादेशे वर्णसम्मेलनादिति।जस्ङे॰ ङ॰ सि ञाम्ङि॰ इति वचनपंचकव्यतिरिक्तं वचनषोडशकं नाम शब्दवत्सा
धनीयं।।तानि च रूपाण्येवं।सर्वः।सर्वौ।सर्वौ।सर्वं।सर्वौ।सर्वान्।सर्वेण।सर्वाभ्यां।सर्वैः।सर्वस्मै।सर्वाभ्यां।सर्वेभ्यः।सर्वाभ्यां।सर्वेभ्यः।सर्व
स्य।सर्वयोः२ सर्वेषु।।उभशब्दो द्विवचनांत इति।तस्य द्वित्ववाचकत्वात्।उभौ।उभे।इति प्रथमा द्विवचनयोर्द्विवचनमौ।उभाभ्यां३ इति तृती
याचतुर्थीपंचमी द्विवचनानि।स्याम।सुपिचेति दीर्घः।उभयोः२ इति षष्ठीसप्तमीद्विवचने।उभौ।उभिचेत्येकारः।यदि द्विवचनांत एव तत्
किमर्थोस्य सर्वादिषु पाठः।यतः सर्वनाम्नः स्मै इत्यादीनां सर्वनामकार्याणामेकवचनबहुवचनविषयत्वे।अकच्त्वपि सर्वनामसंज्ञां न प्र
योजयति विशेषाभावात्।नहि तस्मादकचि केवा कृते रूपभेदः स्वरभेदो वास्ति।अथवा अकच् तस्मान्न प्राप्नोत्येव द्विवचनटा द्विषयत्वा
दस्येत्यभिप्रेत्याह।तस्येत्यादि।अतेन तृतीया षष्ठी च यथोस्यादित्येवमर्थमभिप्रायः।। ।।एर्व।।व्यवस्थायामिति गम्यमानायामित्यर्थः।असं
ज्ञायामिति।।संज्ञायामसत्यां यदि पूर्वादयः संज्ञारूपा न भवंतीति यावत्।।गणपाठ सर्वेत्र या प्राप्नोति गणे हि पूर्वपरावरदक्षिणोत्तरापराधराणि
व्यवस्थायामसंज्ञायामिति सूत्रं पठ्यते।तेनास्मिन्विषये सर्वत्रैषां सर्वनामसंज्ञा प्राप्ता अनेन जसि विकल्प्यते।स्वाभिधेयेति।अवधिर्मर्यादा तस्य
नियमो अवश्यं भाव अवधि भावाद्यस्तेशः किं विशिष्टः स्वाभिधेयापेक्षः पूर्वादीनां स्वाभिधेयो दिग्देशकालस्वभावोर्थस्तमपेक्षते तेन वापे
क्ष्यते इति स्वाभिधेयापेक्षः।अयमर्थः पूर्वाद्यभिधेयानां दिगादीनामर्थानां यत्पूर्वादित्वं तन्नियोगतः कमप्यवधिमपेक्ष्य स्यात्।तथाहि।पूर्वदेश
स्य॰ य त्पूर्वत्वं तद्वश्यं परं देशमवधिमपेक्षते।तथा परस्यापि परत्वं तत्पूर्वं तस्मात्पूर्वा दिश इत्यवाच्यापेक्षेणाकेन चिदवधिनावश्यं भाव्यं तेन न
स्यैवावधेर्यः पूर्वादिशब्दाभिधेयापेक्षो वधिभाव एकांतिकः स व्यवस्थेति।पूर्वे।पूर्वा इति।परस्मादवधेरिति गम्यमाने दक्षिणा इति सर्वनाम
संज्ञाभावाज्जसः शीभावो न।पूर्वाणा इत्यर्थ इति।प्राचीनत्यमात्रमुपादाय।अवधि भावनिरपेक्षाः एवदक्षिणा गाथकेषु वर्त्तते इति व्यवस्थाभ्रनग

प्र॰स॰ ॥३३॥

म्यत इति भावः॥ प्रवीणाद्यर्थ इति। प्रवीण्यमात्रमुपादाय अवधिभावनिरपेक्ष एव दक्षिणशब्दो गाथकेषु वर्त्तते इति सत्यामपीत्यादि। अयं भावः॥ जं
बूद्वीपं सुमेरुं चावधिमपेक्ष्य। उत्तरशब्दः कुरुषु वर्त्तत इति व्यवस्था गम्यत एव किं तु इयं तेषां संज्ञेति न भवति। सर्वनामसंज्ञा॥ स्वमज्ञातेति। स्वमज्ञा
तिधनाख्यायामित्यस्माद्गणसूत्रात्। स्वाः स्वाः आत्मीया आत्मन इत्यर्थः॥ ॥अंतरं॥ बहिरित्यनावृतो देशः तेन योगः संबंधो बहिर्योगः सचाना
वृतस्य बाह्यस्य वस्तुनो भवति। उपसंवीयते परिधीयते तदुपसंव्यानं। कृत्यल्युटः इति कर्मणि ल्युट्। अथवा संवीयते अनेनेति संव्यानं। करणे
ल्युट्। पश्चादुपशब्देन समासः। संव्यानस्य समीपमुपसंव्यानं परिधानीयमुच्यते। सर्वनामसंज्ञेति। अंतरं बहिर्योगोपसंव्यानयोरिति। अनेन गणसू
त्रेण तत्संज्ञ इति सर्वनामसंज्ञ इत्यर्थः॥ बाह्या इत्यर्थ इति। ग्रामबाह्याश्चांडालगृहा इत्यर्थः। परिधानीया इत्यर्थ इति। प्रावरणीया इति भावः॥ ॥
सर्वादिभ्यः॥ एवं परादीनामपीति। परअवरदक्षिणउत्तरअपरअधरस्वअंतर इत्येतेषामपि रूपाणि एवमेव ज्ञेयानीत्यर्थः। शेषं सर्ववदिति। जसङ
सिङि इत्येतानि वचनानि वर्जयित्वा अन्येषु वचनेषु सर्वादीनां नवानां रूपाणि सर्वशब्दस्येव ज्ञातव्यानीत्यर्थः। सर्वादीनां शब्दानां येषां यस्मिन्नर्थे यस्मि
न्नुपाधौ च सर्वनामसंज्ञा भवति तानर्थानुपाधींश्च सार्द्धेन श्लोकेन सुखप्रतिपत्त्यर्थं संगृह्णाति। सर्वादिरिति। सर्वादिर्गणः सर्वनामसंज्ञो भवति।
विज्ञेयो गौणो नाप्रधानं न। अभिधानं न चेत्संज्ञारूपो न भवतीति। एतदुक्तं सर्वेषां नामानि सर्वनामानि इत्यन्वर्थसंज्ञाविज्ञानाल्लभ्यते गौणत्वे संज्ञायां वा
सर्ववाचकत्वं सर्वादीनां नास्तीति कृत्वा। तत्र सर्वादिश्च व्यवस्थायामिति न चेद्गौणोऽथवा त्रिधेत्येतदुत्तरत्र सर्वं चानुवर्त्तते। एतदुक्तं समुदायार्था
दपि शब्दा ज्ञायते स्वोर्थज्ञात्यन्यवाच्यपीति। सर्वादिर्गणः समसंख्यो व्यवस्थायां गम्यमानायां सर्वनामसंज्ञो भवति एतदुक्तं पूर्वपरेत्यादेर्गणाल्लभ्य
ते। समो तुल्य इति। समशब्दो सदृशवाची सर्वनामसंज्ञः। एतदन्वर्थसंज्ञाविज्ञानल्लभ्यते। अंतरे पुरि परिधाने बहिर्योगयोग इति। अंतरशब्दः सर्वना
मसंज्ञो भवति। यदि नगर्यां न वर्त्तते। परिधाने बहिर्योगे च वर्त्तते। एतदप्यंतरमित्यादेर्गणसूत्रादन्वर्थसंज्ञायाश्च लभ्यते। स्वोर्थज्ञात्यन्यवाच्यपीति।
स्वशब्दः सर्वनामसंज्ञः स्यात्। यदि धनज्ञातिवाची न भवति। एतेषामुदाहरणं वक्तुं सर्वशब्दस्य गणनां दर्शयति॥ अतिक्रांतः सर्वमिति। न बहुव्रीहौ

श्री॥ ३३॥

वित्यादेर्निषेधात्सर्वनामविधौ तदंतविधेरभ्युपगमात्। अतिसर्वाय देहीत्येतत्प्रत्युदाहरणं सर्वनामत्वाभावात्स्मैभावो न। अथ वा निषेध्यस्य प्रत्यु-
दाहरणमाह। सर्वो नामेत्यादि। सर्वादिश्चेत्यस्य प्रत्युदाहरणं। सर्वायेति। अत्र तदंतव्यवस्था न गम्यते। तमो तुच्छइत्यस्य प्रत्युप्रत्युदाहरणं। समायेति।
सदृशायेत्यनेन समशब्दस्य तुल्यत्वाचितां दर्शयति। अपुरीत्यस्य प्रत्युदाहरणं। अंतरायै पुरि प्राकाराद्बहिर्वर्त्तिन्यामित्यर्थः॥ परिधानेव बहिर्योग इत्य-
स्य प्रत्युदाहरणं। ग्रामयोरंतरे तापस इति॥ स्वायेति स्वोऽर्थज्ञात्यन्यवाच्यपीत्यस्य प्रत्युदाहरणं॥ ॥न बहुव्रीहौ॥ ॥अत्र च वृत्तौ द्विधा सूत्रार्थो लभ्यते
। बहुव्रीहाविति निषेधाधिकरणं बहुव्रीहौ संज्ञा न। बहुव्रीहेः संज्ञा नेति यावत्। बहुव्रीहाविति सर्वाद्यधिकरणं वा बहुव्रीहौ यानि सर्वादीनि वर्त्तंते
तानि सर्वनामसंज्ञानेति। विभाषा दिक्समासे बहुव्रीहावित्यनुवर्त्तमानेपि बहुव्रीहिग्रहणं तत्र सर्वेपि बहुव्रीहौ प्रतिषेधो यथा स्यात्। वस्यतेऽनेने-
ति वस्त्रं। अंतरं येषां ते वस्त्रांतराः। वसंत्यस्मिन्निति च वसनं। गृहं अंतरं येषां ते वसनांतराः। वस्त्रांतराश्च वसनांतराश्च वस्त्रांतरवसनांतराः। अन्यथा वि-
भाषा ङसीति विभाषा स्यात्। प्रथमसूत्रार्थस्योदाहरणमाह। प्रियसर्वायेति प्रियः सर्वो यस्य प्रियसर्वः तस्मै प्रियसर्वाय वा। प्रियस्य पूर्वत्वमिति प्रि-
यशब्दस्य पूर्वनिपातः। एतदुपन्यासस्तदंतविधिज्ञापनाय। ननु चान्वर्थसंज्ञाविज्ञानादेवात्र सर्वनामसंज्ञा न स्यात्तत्किमेतत्सूत्रेणेत्याशंक्याह। सूत्र-
कारमत इति। न बहुव्रीहाविति सूत्रश्रवणात्सूत्रकारमतमेवं प्रतिभाति बहुव्रीहौ सर्वनामसंज्ञानिषेधो नोपसर्जनत्वमात्रे इति भावः॥ भाष्यकारमत
इति। भाष्यकारमतेऽन्वर्थसंज्ञाविज्ञानात् गौणत्वमात्रे सर्वनामसंज्ञानिषेधान्न बहुव्रीहाविति सूत्रं व्यर्थमित्यर्थः। तथा च भाष्यं। गोनर्दीय आह॥ ॥
अकच्स्वरौ तु कर्त्तव्यौ। प्रत्यंगं मुक्तसंशयौ। मकत्पितृकस्त्वकत्पितृक इत्येव भवितव्यमिति। एतस्य तात्पर्यमुक्तं कैयटेन। गोनर्दीय आहेति सूत्रप्र-
त्याख्यानमेतत्। यथोत्तरं हि मुनित्रयस्य प्रामाण्यमिति। त्वत्कपितृक इति। त्वं पिता यस्य अहं पिता यस्येति। (सूत्रप्रत्याख्यानमेतत्) विगृह्य बहुव्रीहि
समासे कृते समासावयवयोः समासांतःपातिनोर्युष्मदस्मदोः सर्वार्थवाचकत्वेन सर्वनामसंज्ञकत्वादज्ञातार्थविवक्षायां अव्ययसर्वनाम्नामकच्
प्राक्टेरिति अकच्प्रसज्जेत तस्य हि स्मैप्रभृतीनामिवांगाधिकारविहितत्वाभावात्स्याद्युत्पत्त्यनपेक्षत्वात्। ततश्च त्वकत्पितृको मकत्पितृक इत्य

स॰
।।३४।।

नद्यं रूपं स्यात् । तस्मात्कोऽकज्मात्स्त्राणिवात्क इति कप्रत्यय एव स्यादित्येवमर्थः । न बहुब्रीहाविति सूत्रमिति न्यासकृतः काशिकाविवरणपंजि
काकारस्य जिनेंद्रबुद्धेर्मतमित्यर्थः । तथा च काशिकाविवरणपंजिकायामुक्तं । त्वं पिता यस्याहं पिता यस्येति विग्रहे बहुब्रीहौ कृते अज्ञाताद्यर्थ
विवक्षायां असति प्रतिषेधे अव्ययसर्वनाम्नामकच् प्राक्टेरिति अकच् प्रसज्येत । ततश्च त्वकत्पितृक मत्कपितृक इत्यनिष्टं स्यात् । तस्माद
कच् मात्स्वदिति प्रतिषेध आरभ्यते तेन प्राणिवात्क इति कप एव भवति । तत्र परतः प्रत्ययोत्तरपदयोश्चेति मपर्यंतयोर्युष्मदस्मदोस्त्वमादेशयो
र्कृतयोश्चेति समासांते कपि त्वत्कपितृको मत्कपितृक इति सिध्यति । ननु चान्वर्थसंज्ञाकरणादेवात्र संज्ञानिरासे कृते अकज् न भविष्यति ।
नह्यत्र सर्वार्थता संभवति विशेषविषयत्वात् । नैतदस्ति । समुदायो हि विशेषवर्ति नेष्टं पदं तु सर्वार्थता यामनपेतमेवेति ।। ।।तृतीया ।। तृती
यासमासार्थवाक्येपि नेति ।। अयमाशयः । विभाषादिक समासे बहुब्रीहौ इत्यतः समासग्रहणानुवृत्तेर्मा नेऽपि पुनः समासग्रहणं लोपेऽपि तृती
यासमासे संज्ञानिषेधार्थं । तृतीयासमासार्थवाक्यं तादर्थ्येन गौणात्तृतीयासमास इति कृत्वात्रापि निषेध इति अत्र च लक्षणप्रतिपदोक्तयोः प्र
तिपदोक्तस्यैव ग्रहणमिति परिभाषया सर्वेसदृशेत्यादिना यं तृतीयासमासं चरस्यैतितस्येदं ग्रहणं । न कृत्कर्णादत्यादेतेन त्वयकात्कृतमय
काकृतमिति सिद्धं ।। ।।द्वंद्वे च ।। उक्तं स्यादि ।। द्वंद्वे समासे सर्वादीनां सर्वनामसंज्ञा नेत्यर्थः ।। ।।विभाषा ।। ।।सर्वैतान् नित्ये निषेधे प्राप्ते विभाषा
रभ्य । व्यवस्थितविभाषा विज्ञाना ज्जसः कार्यं प्रति विभाषा । तेनाकन् न भवति । कप एव भवति । वर्णाश्रमेतरकाः । अकजि हि सति तस्य सर्वनाम
संज्ञांतःपातित्वात् स्वार्थिकः श्री भावः स्यात् । कप्रत्यये तु सति तेन व्यवधानाद्दोषप्रसंगो न ।। ।।प्रथम ।। ।।तय इति संख्याया अवयवे तयप् ।। आदि
नात्वरमेव चरमाः । अल्पे अल्पाः । अर्द्धी अर्द्धाः । शेषं रामवत् । इति । एतेषां सर्वादिमध्ये पाठाभावात् । इहापि जसः कार्यं प्रति विभाषा । तेन एते
भ्यः क एव स्यान्नाकच् । नेमशब्दस्य कच् सर्वादिमध्ये पाठात् । उभयशब्दस्य तयप्रत्ययांतस्यापि जसि अंतरं गत्वा न गणपाठान्नित्या सर्वनाम
संज्ञा ।। ।।उभय इति ।। तीयस्येति । अत्र सजातीयशब्दस्य संज्ञा भवति ।। अर्थवद्ग्रहणे नानर्थकस्येति ।। ।।ङेराम्ः ।। ।।अष्टनस्त्वाविभ

सौ॰
।।३४।।

क्वाविस्यते। विन्नक्वाविस्य तु चर्त्रे ते। तेन जरां तिकमित्याथो जरसभावो न। निर्ज्जरसावित्ति। निर्गतो जरयाः प्रादिसमासे ह्रस्वे च कृते एकदेशविकृ
तमनन्यवद्भवतीति जरशब्दस्य जरसादेशः। निर्ज्जरसेति। परत्वाज्जरसादेशः पश्चाददंतत्वाभावादिनादेशो न। एतत्तु भाष्यकारमतं। केचिदादाबित्या
दि। केचिदिति महाभाष्यकारादन्ये निर्ज्जरटा इत्यादौ स्थिते टाङसिङसामिनात्स्या इति इनादौ प्राप्ते जरसादेशे च विप्रतिषेधे परं कार्यमित्यत्र परश
ब्दस्येष्टवाचित्वात् पूर्वविप्रतिषेधेन सर्वं बलीयस्त्वेन प्रथममिनात्स्यादेशौ स्तः परत्वाज्जरसादेश इति वदंतीत्यर्थः। निर्ज्जरसैरिति। अतो भिस ऐ
सिति ऐस्भावे कृते जरादित्वाज्जरसादेशः। सन्निपातलक्षणो विधिरनिमित्तं तद्विघातस्येत्यस्याः परिभाषाया अनित्यत्वात्। निर्ज्जरस इति। चतुर्थ्ये
कवचने। निर्ज्जरसः निर्ज्जरसादिति पंचम्येकवचने क्रमेण भाष्यकारतदन्ययोर्मतेन रूपे। ज्ञादिना। निर्ज्जरसः निर्ज्जरसः निर्ज्जरसोः। निर्ज्जरसां। निर्ज्जर
सि निर्ज्जरसोः। पक्षे इति। जरसभावपक्षे हलादौ च विभक्तौ परतो रामशब्दवद्रूपाणि निर्ज्जरशब्दस्य ज्ञेयानीत्यर्थः॥ ॥पद्दन्नः॥ ॥इह शस्प्रभृतयो
निमित्तत्वेनोपात्ताः। ते च विना प्रकृत्या न घटंते इति तेषु प्रकृत्यंतराद्विहितेषु विधीयमानाः पदादय आदेशा विज्ञायंते। तेष्वादिश्यमानेषु शस्प्रभृ
तयोनुरूपामेव पादादिकं प्रकृतिमाक्षिपंतीत्यत आह॥ पादः दंतेत्यादि। केचिदत्र छंदसीत्यनुवर्त्तयंति। अपरे पुनरविशेषेणेच्छंति। तथाहि भाषायाम
पि पदादयः प्रयुज्यंते। व्यायामस्तुलगात्रस्य पद्भ्यामुद्वर्त्तितस्य च। व्याधयो नोपसर्प्यंति वैनतेयमिवोरगाः॥ इत्येवमादयः। प्रकृतिग्रहणादिति। प्रका
रार्थोयं प्रकृतिशब्द इत्यर्थः॥ तद्धितग्रहणमुपलक्षणार्थं। तेन दोषणी इत्यत्र औङः श्यामपि दोषन्। नासिकाया यतस्क्षुद्रेषु नसादेशः। नस्यं नस्तः
नः क्षुद्रः। नासिको वर्णः। नासिक्यं नगरमित्यत्र न। पद्पदेत्यादि पादशब्दस्य दंतशब्दस्य मासशब्दस्य च क्रमेण शस्तादौ पदादेशे ददादेशे मासा
देशे च कृते रूपाणि। पक्षे स्वादिषु पंचसु रामवत्। मांस्भ्यामित्यादि मास्भ्यामिति स्थिते ससजुषोरुरिति रुत्वे भोभगोअघोअपूर्वस्येति यत्वे। ह
लि सर्वेषामिति यलोपः॥ ॥सुडनपुंसकस्य॥ सुडिति प्रत्याहारग्रहणं। अ आ ओट् एकारास्तत्र पंचैव वचनान्यंतर्भवंतीत्याह। स्वादिपंचवचनानी
नि। अप्राधान्यं विधेर्यत्र प्रतिषेधे प्रधानता। प्रसज्यप्रतिषेधोयं क्रियया सह यत्र नञ्। प्राधान्यं तु विधेर्यत्र प्रतिषेधेऽप्रधानता। पर्युदासः स विज्ञेयो य
त्रोत्तरपदेन नञ्॥२॥ इति प्रसज्यप्रतिषेधपर्युदासयोर्लक्षणे। तत्र यदा नपुंसकस्येति प्रसज्यप्रतिषेधः स्यात्तदायमर्थः। स्यात्। नपुंसके नञ्यती

ति। तत्र ङसः शे। सर्वनामस्थानसंज्ञा न स्यात्॥ पर्युदासपक्षे नपुंसकस्य नपुंसकव्यतिरिक्तस्येत्यर्थः स्यात्। तेन नपुंसकेन विधिर्न प्रतिषेधः। ते
न जश्शसोः शिः। सर्वनामस्थानमित्येन न संज्ञा सिद्धा भवति। इति चेतसि कृत्वा पर्युदासपक्षमाश्रित्याह। अन्तरेस्येति॥ ॥स्वादिष्वस
च यदि सप्तमीबहुवचनादेरस्य आकपः प्रत्ययाग्रहे स्यात्। असर्वनामस्थान इति प्रतिषेधं न कुर्यात्। कृतस्त्वासौ ततो ज्ञायते। प्रथमैकवच
नादेरस्येति। ननु च राजेत्यत्र पदसंज्ञा न स्यात् प्रत्ययलक्षणेन। सर्वनाम इति निषेधात्। ततश्च नलोपो न स्यात्। नैष दोषः। नैष दोषः। यतो
यचयं न ङिसंबुद्ध्योरिति निषेधं शास्ति। तज्ज्ञापयति सोपदत्वं स्यादिति। अन्यथा संबुद्धिग्रहो व्यर्थः स्यात्॥ ॥यचि भं॥ यची ति वर्णग्रहणं
सप्तमीनिर्दिष्टं अतो यस्मिन्विधिस्तदादावल्ग्रहण इति तदादिविधिर्नात्र ज्ञाप्यमित्यभिप्रेत्याह। यकारादिष्विति। नभोंऽगिरो मनुषां वति म
त्वं वाच्यं। नभसा तुल्यं वर्त्तते नभस्वत्। अंगिरस्वत्। मनुष्वत्। वृषणोवस्वश्वयोर्भत्वं। वृषण्वसुः। वृषणश्वः। अल्लोपो नः। तपरकरणं नभ्र म
सोयमिति शंकानिरासार्थं॥ रषाभ्यां। पूष्ण इत्यादि। पूषराद्स्यरासि पूषन्नादेशः। नसंज्ञा। अल्लोपः। णत्वं॥ ॥नलोपः॥ अत्र च पदस्येत्यनुवर्त्त
ते अत्र तस्ते च प्रातिपदिकग्रहणं। असमस्त एव। सुपां सुलुगिति षष्ठ्या लुकं कृत्वा निर्दिष्टं। ततश्चान्तस्येत्यनुनाभ्यां संबध्यते प्रातिपदिकान्तस्य
पदान्तस्येति चेतसि कृत्वाह प्रातिपदिकान्तस्य पदान्तस्य नस्य लोपः स्यादिति। नलोपस्येति। एषन्नस्यामिति स्थिते नलोपे कृते सुपि चेत्यदंतत्वा
दीर्घत्वं प्राप्नोति तन्न भवति नलोपः सुप्स्वरेति सुविधिं प्रति न लोपस्यासिद्धत्वात्॥ ॥विभाषा ङिश्योः॥ ङिरिति ङीति सप्तम्येकवचने। शीति न
पुंसकात्त्वेतिप्रश्नी विहितस्तस्येदं ग्रहणं। न जश्शसोः शिरिति तस्मिन्नसंज्ञायोऽभावात्॥ द्वयोरन्होर्भवः द्व्यन्हः इति। तद्धितार्थविवक्षायां तद्धि
तार्थ इति समासः। कालाद्वञ इति ठञ्। तस्य द्विगोर्लुगनपत्य इति लुक्। राजाहः सखिभ्यष्टजिति टच् समासांतः। अन्होऽन्ह एतेभ्य इति अन्हादे
शः॥ ॥संख्या॥ संख्याविसाय इत्येवं वाच्य सर्वशब्दस्याधिकस्य ग्रहणं अधिककार्य सूचनार्थं। तेन सायान्हस्य त्वमल्लोपः सिद्धः स्यात्। द्वौ
अहनी। द्व्यन्ही। विभाषा ङिश्योरिति वाल्लोपः। द्व्यन्हे। इति अन्हादेशाभावपक्षे। द्व्यहनी इत्यादि। व्यहः इति प्रादिसमासः। शेषं द्व्यह्नवत्। सायमह्नः सा
याह्नः। सायशब्दो ह्रेकदेशवाची। संख्याविसायेति ज्ञापकादेकदेशि समासः। शेषं त्र्यहवत्। एषां रूपाणि राजशब्दवत्॥ ॥इत्यन्ताः॥ ॥विश्वपाः

विश्वं पातीति विश्वपाः॥ विच्छुपे छंदसीति वर्तमाने ऽर्थे तौ मनिन्क्वनिब्वनिपश्चेति विच्। पा रक्षणेऽस्माद्धातोः कृत्तद्धितसमासाश्चेति प्रातिपदिक-
त्वात्स्वादयः। दीर्घात्॥ ॥ननु च विश्वपा इत्यत्र पूर्वसवर्णदीर्घे वा विशेषो नास्ति तत्किमर्थं निषेधः क्रियते। उच्यते। वातप्रम्य इत्यादौ पूर्वसवर्ण-
दीर्घो मा भूदित्येतदर्थमवश्यमेतत्सूत्रं कार्य्यं। तदन्यार्थं कृतमिहार्थमपि स्यात्। हाहा आ स्यङे वृद्धिरेचि हाहाङसिङसोरामि च सवर्णदीर्घः। ऊ-
सि हाहिः ङेः गुणाः॥ ॥इत्यादन्ताः॥ ॥प्रथमयोः शिति हरि औ इति स्थिते। प्रथमयोः पूर्वसवर्ण इति पूर्वसवर्णदीर्घ ईकार इत्यर्थः॥ ॥जसि च॥॥
ह्रस्वग्रहणमंगविशेषणं विशेषणेनत्वत्तदंतविधिर्भवतीति तस्य ह्रस्वांतांगस्येत्यर्थः॥ हरिरिति। अमि पूर्वः। हरी इति प्रथमयोरिति पूर्वसव-
र्णदीर्घः। हरीनिति शसि पूर्वसवर्णदीर्घत्वं तस्माच्छसो न इति नत्वं॥ ॥शेषः॥ शेषशब्दार्थमाह॥ अनदीसंज्ञामिति॥ ॥आङ॥ आङिति तृतीयैकव-
चनस्य पूर्वाचार्याणां संज्ञेत्याह॥ आङीति। आङ् इति स्थानेऽयं तस्य निर्देशाद्दिहार्थादिकृतिः परिणामो भवतीति। घेरिति षष्ठ्यंतं प्रकृतं पंचम्यं-
तं भवतीत्याह॥ घेः परस्येति। पुंसीति वाच्ये स्त्रियामित्युक्तममुना आङ्नाऽस्त्रियामित्यनेनास्त्वमत्वयोरसिद्धत्वादिको चि विभक्ताविति नुम्न प्राप्नो-
तीति न ना आमुनेति सिद्धार्थं। अस्त्रियां किं। धेन्वा। कृत्वो घेः किं सख्या। घेः किं। सख्यो। ङितीति किं। हरिभ्यां। सुपीति किं। पट्वी ङेरूतः॥ ॥ङसि
अथ कस्मादत्र यथासंख्यं न हावेडौ चङसिङसौ इति। उच्यते। अल्पाच्तरस्य ङसः परनिपातेन लक्षणव्यभिचारचिह्नेन यथासंख्याभावो बसी-
यते॥ ॥अच्च॥ अदिति तपरकरणं स्त्रियां बुद्ध्या वित्यादौ कृते ऽत्वे दायोनिवृत्त्यर्थं। वृद्धिरिति वृद्धिरेचीति॥ अनङ्॥ ॥ङकारोऽन्तादेशार्थः। अक-
रउच्चारणार्थः। आकारो विधेये अनङ्विधाने सोर्लोपार्थः। ङित्देशस्तर्हि सोर्विधेयः। एवं सिद्धे यदनङ्विधानं तेन अनङ् एव क्वचिदपि स्यादित्यर्थः। तेन
यद्व स्यादिति उशनसः संबुद्धौ वानङ् वाच्य इत्यारब्धे हे उशन् उशनन्नित्येतदुपपन्नं॥ ॥अलोऽन्त्यात्॥ समुदायादपि पूर्वस्य संज्ञा स्यात्तन्निवृत्त्य-
र्थं अल इति विशेषणं अन्त्यात्। द्वियस्य पूर्व इत्यस्याप्यविशेषितत्वे समुदायस्य संज्ञा स्यात्॥ तन्निवृत्त्यर्थं विशेषणं वर्ण इति नाव्यं। तच्च लोकतः
सिद्धं। लोके ह्यमीषां ब्राह्मणानामंत्यात्पूर्व आनीयतामित्युक्ते एक एवांत्यात्पूर्व आनीयते। इत्येतत्सर्वं चेतसि कृत्वाह। अंत्यादलः पूर्वो वर्ण इति।

सर्वनाम॥ ॥सर्वनामस्थाने किं। राजानि। असंबुद्धाविति किं। हे राजन्॥ ॥अपृक्तः॥ ॥असहायवचन एकशब्दः॥ एकाल् किं। जागृविः। वे
रं एकस्येति न भवति। प्रत्यय इति किं। सुरं सुनोति सुरासुत् तन्माचष्टे सुरा— यतीति सुराः। सकारस्य लोपो न॥ ॥हल्ङ्या॥ लोप इति वर्तते॥
तदिह लौकिकेनार्थेनार्थवत्। कर्मसाधने लुप्यत इति लोपः। ततश्चापृक्तं हलिति प्रथमांतेन संबध्यत इति चेतसि कृत्वाह। हलंतादेव तिस्यो
र्लोपः। तिपा सहचरितस्य ग्रहणाज्जीति सिचो न ग्रहणं। ते। अभैत्सीत्। ननु हल्ङेना संयोगांतस्य लोप इत्यनेनैव सिद्धत्वात् लोपविधानं व्यर्थं।
मैवं॥ सखेत्यत्र संयोगांतलोपे तस्यासिद्धत्वान्नलोपो न स्यात्। अभिनतोत्रेस्य चातो रोरप्लुतादप्लुत इति उत्वं न स्यात् अजागर्भेवानित्यत्र
रात्सस्येति नियमात् लोप एव न स्यात्। तथा चोक्तं। संयोगांतस्य लोपे हि नलोपादिर्न सिध्यति। राजा तु तेनैव लोपः स्याद्धल्स्तस्माद्विधीयत
इति। हल्ङ्याप्भ्यः किं। ग्रामणीः। सुतिसीति किं। अभैत्सीत्। अपृक्तस्येति किं। बिभर्ति। हलिति किं। बिभेद। तनोतान लोप इति। नलोपः प्राति
पदिकांतस्येति। हे सखे। इति। ह्रस्वस्य गुणः॥ ॥सख्युः॥ संबुद्धेरन्या असंबुद्धिरिति पर्युदासोयं॥ तत्वाणिदित्यनेन सामानाधिकरण्यात् सर्व
नामस्थाने प्रथमांतं। तत्रोत्तरार्धे सप्तम्यंतमप्यसंबुद्धावित्येतद्विपर्यस्तप्रथमांततया च्वेतीत्यपि वेत्याह। संबुद्धिवर्जमिति॥ ॥अनङ्
सौ॥ अनः सखा। सुसखा॥ इत्यादिना अनङ् सौ सख्युरसंबुद्धावित्यत्र तदंतविधिरिष्यत इति दर्शयति। सुसखेति। राजाहःसखिभ्यष्टजिति
प्राप्तस्य टचो न पूजनादिति निषेधः। अतिशयितः सखा अतिसखा। अत्रापि टचो निषेधः॥ द्विसंज्ञेत्यादि। तत्कार्य्यं आङो नास्त्रियां घेर्ङि-
तीत्यादि॥ ॥ख्यत्यात्॥ ख्यत्यादिति कृतयणादेशयोर्निर्देश इत्याह॥ कृतयणादेशाभ्यामित्यादि। कृतयणादेशनिर्देशस्तु यत्रैवायं
णादेशः प्राप्नोति तत्रैवोकारो यथा स्यात्। यत्र गुणस्तत्र मा भूत्। अतिसखेरागच्छतीत्यादौ अत्र हि सख्युः समासे घिसंज्ञास्त्येवेति घेर्ङि-
तीति गुणः। परस्येति ग्रहणं। एकः पूर्वपरयोरित्यधिकारी नेहस्त्यर्थं॥ ॥औत्॥ इदुद्भ्यामित्यनेन नदीसंज्ञकात्परस्य ङेराम् विहितः
अच्च घेरिति घिसंज्ञकात्परस्य अकारसहित औकारो विहितः। तस्मात्परिशेष्यात्तान्यांयदन्यत्तदिहोदाहरणमित्यभिप्रेत्याह। हि नदीसं

ज्ञावर्जितान्यामिति। सख्युरित्यादि। ग्रहणवता प्रातिपदिकेन तदन्तविधिप्रतिषेधात्॥ ॥पतिः॥ सिद्धे सत्यारम्भो नियमार्थ इति विनाप्येवकार
करणं विपरीतावधारणनिरासार्थं। ततश्च समासश्चान्नंतरमेव कार्येयत एवकारस्ततोन्यत्रावधारणमिति। पतिशब्द एव नियम्यते न तु समा
सः। ततश्च शोभनाग्निनेत्यादि सिद्धं॥ समासे पतिशब्दस्य घित्वं विधीयते। पतिगृहे इति सर्वं निपातः सिद्धः॥ ॥बहु॥ अत्र बहुगणशब्दौ प्रा
तिपदिके। वतुडती प्रत्ययौ बहुगणशब्दयोर्वैपुल्ये संघे च वर्त्तमानयोरिह ग्रहणं नास्ति संख्यावाचिनोरेव। त्यादितिनिर्द्दिष्टत्वार्थसंख्यासंज्ञा
विधीयते। संख्यायते अनयेति संख्येति अन्वर्थसंज्ञाविधानात्। अर्द्धपूर्वपदश्च पूरणप्रत्ययान्तः संख्यासंज्ञो भवतीति वाच्यं समासकन्वि
ध्यर्थं। अर्द्धपंचमसूर्प्यः। अर्द्धपंचमकः॥ ॥डति च॥ ॥संख्येत्यत्रानुवर्त्तत इत्यभिप्रेत्याह। डत्यन्ता संख्येति। किमर्थं सेहानुवर्त्तते। पाते
र्डतिः॥ पातयइत्यत्र मा भूत्। ननु च पतिशब्दस्यापि डत्यन्तत्वात् सर्वत्र सूत्रेण संख्यासंज्ञास्त्येवेति संख्यानुवृत्त्या बपिषट्संज्ञा प्राप्नोत्येवानैष दोषः।
एवं सति हि वतुना साहचर्यात्तद्धित एव डतिर्गृह्यते न कृत् ऊह्यायं॥ ॥प्रत्ययस्य॥ अनेकसंज्ञाविधानात्तद्भावितग्रहणमिह विज्ञायत इ
त्यभिप्रेत्याह। लुक्श्लुलुप्शब्दैरिति। तद्भावितग्रहणात्संज्ञासंकरो न। प्रत्ययस्येति किं। आगस्त्यः। कौंडिन्यः। यदि प्रत्ययग्रहणं न क्रिय
ते अगस्त्यस्यापत्यानि। ऋष्यंधकेत्यण्। कुंडिन्या अपत्यानि गर्गादिभ्यो यञ् तयोरागस्त्यकौंडिन्यशब्दयोर्ङसि परतो यदा आगस्त्यकौं
डिन्ययोरगस्तिकुंडिनजिति लुक्। अगस्ति कुंडिनचौ चादेशाः। तदा वैषम्यादेकैकस्य स्थानिनस्त्रय आदेशाः पर्य्यायेण स्युः। तत्र यदा
लुगादेशः स्यात्तदा विभक्तिमात्रस्य श्रवणं प्रसज्येत अथालोन्त्यस्य स्यादेवमपि आगस्त्यः। कौंडिन्य इति स्यात्। अगस्त्यः। कुंडिना इति
चेष्यते। यदाप्यागस्त्यशब्दस्य कुंडिन आदेशः कौंडिन्यशब्दस्यागस्त्यादेशः। तदाप्यनिष्टमेव विपर्य्ययस्यानतिक्रमात्। अर्थान्तरस्यादा
गस्त्यस्यागस्तिरेव कुंडिनस्य कुंडिनच् तथापि प्राग्दीव्यतीयेऽजादौ विवक्षिते टिलोपे कृते इति स्यात्। अदृष्टत्वात्। प्रकृतेः प्रत्ययग्रह
णे तु तद्दर्शनस्यैवं यसंज्ञेति तस्यैव लुक् स्यात्। परिशिष्टस्य प्रकृतिद्वयस्य यथासंख्यमादेशद्वयं तेनागस्तयः कुंडिना इति स्यात्॥

त॰ सु॰ ॥३७॥ प्राग्दीव्यतीय अजादौ विवक्षिते गोत्रे लुगचीति लुकि निषिद्धे तत्संनियोगशिष्टत्वादगस्त्यादेशे निवृत्ते हृद्भगाठ आगस्तीया इति च स्यात्॥
षड्भ्यः॥ षट्संज्ञकेभ्यः अत्र प्रधानेन तदन्तादपि लुक्॥ परमषट्। यत्र तूपसर्जनं न तत्र न प्रियषषः॥ ॥प्रत्ययलोपे॥ प्रत्ययनिमित्तं कार्यमसत्यपि प्र
त्यये न वेदितीदमारभ्यते। प्रत्ययग्रहणे तु वर्त्तमानेपि पुनः प्रत्ययग्रहणं कृत्स्नप्रत्ययलोपे यथा स्यात्। एकदेशलोपे मा भूत्। तेन संमीते त्यत्र सी
युटः सलोपेपि प्रत्ययग्रहणेन च्युक्त्वाद्धित्वं नेत्यनुनासिकलोपो न। प्रत्ययलक्षणं किं॥ रायः कुलं रैकुलं। गवे हितं गोहितं॥ आपवादेशो न
स्तः वर्णाश्रयत्वात्॥ ॥न लुमता॥ लुमता शब्देन लुप्ते प्रत्ययलक्षणं विशेषे निषिध्यते। लुशब्दो विद्यते यस्मिन्नसौ लुमान् इति लुक्श्लुलुप इत्यभिप्रे
त्याह। लुगित्यादि॥ लुमता किं। कार्य्यतेऽनेनोत्तिचिचियीकिणि लोपे कृतेपि प्रत्ययलक्षणेन वृद्धिः। अंगस्येति किं। पंचापदस्त्वा न लोपः स्यात्।
कतिश्यूति। का संख्या परिमाणमेषां ते कति। किमः संख्यापरिमाणे डति च। तदन्तस्य च संख्यासंज्ञा॥ ततः षट्संज्ञा। ततः कतिशब्दस्य बह्वर्थवाचकत्वेन
तस्मात्प्रथमा बहुवचनमुत्पद्यते तस्य लुक्। प्रत्ययलक्षणेन प्राप्तो गुणो न लुमतेति निषिध्यते। एवमेव द्वितीया बहुवचनेपि रूपं॥ शसो लु
ग्भावात्। अव्ययेत्यादि। त्रिषु सरूपाः त्रिषु लिंगेषु समानरूपाः। लिंगरहितार्थत्वप्रतिपादकत्वेन तद्विशेषद्योतकाः प्रत्ययास्ते न्योनोत्पद्यंत
इत्यर्थः। त्रय इति। जसि चेति गुणः। त्रीनिति प्रथमयोः पूर्वसवर्णदीर्घः नत्वं॥ ॥त्रेस्त्रयः॥ ॥न लुच निजोत्रयाणामिति निपातनादेवेत्तसिद्धे तत्र किमर्थमेवं श्री॥ ॥३७॥
सूत्रं। एवं तर्हि सिद्धे सतीदमारभ्यमाणमेतज्ज्ञापयति। अबाधकान्यपि निपातनानि स्युरिति। तेन पुराणनसिद्धं स्यात्। अन्यथा हि पुराणप्रो
क्तेष्विति निपातनेन बाधितत्वादेतन्न सिध्येत्॥ ॥त्यदादीनां॥ द्विपर्य्यन्तानामिति तयोक्तं महाभाष्ये। तस्माद्द्विपर्यन्तानामिति वक्तव्यमिति
द्विरिति। कस्यचिदियं संज्ञा॥ अनिर्द्विरिति॥ द्वावपि कौ लोऽतिद्विः। अत्र द्विशब्दस्योपसर्जनत्वादप्राधान्यान्नात्वं। परमद्वाविति॥ परमौ च तौ
द्वौ च परमद्वौ। अत्र द्विशब्दस्य प्राधान्यं॥ ॥इतीदंताः॥ ॥वातप्रमीः॥ वातं प्रमिमीते इति वातप्रमीः निःसृगो मृगाकृतिः। वातप्रमीरित्युणादिसूत्रे
णाई प्रत्ययान्तो निपातितः। दीर्घादित्यादि। वातप्रम्यौ इति स्थिते प्रथमयोरिति पूर्वसवर्णदीर्घ प्राप्ते दीर्घाज्जसि चेति तस्य निषेधादिको यण॥

चीतियणादेशइत्यर्थः। वातप्रमी। मितिपरत्वादमिपूर्वइतिपूर्वरूपत्वे। वा। तप्रमीनितिशसिसवर्णदीर्घः। नत्वं। दीर्घत्वात् नुडभावइतिव
तप्रमी आमितिस्थिते दीर्घत्वाद्ध्रस्वनद्यापोनुडितिनुडनेत्यर्थः। ङौत्वितिसप्तम्येकवचनेवातप्रमी ङि इतिस्थितेङस्यसंज्ञायांलोपे अकः सवर्णेदी
र्घइतिदीर्घः। एवंदेवयज्यतिलक्ष्म्यादयइति। देवान् यजतीतिदेवयजी। ती प्रत्ययः। प्रत्ययतः कृतेभ्य न ङीद् इत्यमितिवचनात्। लक्ष्मीमतिक्रान्तो
ऽतिलक्ष्मीः। इत्यादयः शब्दा ईकारान्ताः। अथ धातवो वातप्रमीसदृशा ज्ञेया इत्यर्थः। अतिलक्ष्मीशब्दस्य वातप्रमीशब्दवद्रूपमर्वाचीनमते ज्ञेयं। प्राच्य
कारमते तु नदीसंज्ञत्वान्नदीकार्य्यं। हे अतिलक्ष्मि। अतिलक्ष्म्यै। अतिलक्ष्म्याः। अतिलक्ष्मीणां। अतिलक्ष्म्यामिति स्यात्। तथाच वाक्ये प्रथम
लिंगग्रहणं च कर्त्तव्यमित्याद्युक्त्वा अतितन्त्र्यै ब्राह्मणाय। अतिलक्ष्म्यै ब्राह्मणायेत्युक्तं। सुधीरिति। सुष्ठु ध्यायतीति सुधीः। ध्यायतेः संप्रसारण
वेति क्विप्। सुष्ठु धीर्यस्येति वा। इक इत्यादि। सुधी औ इति स्थिते। दीर्घत्वात् पूर्वसवर्णनिषेधे इको यणचीति यणि प्राप्ते उच्यत इत्यर्थः॥ ॥
अचि श्नु॥ अंगस्येत्यनुवर्त्तते। तत् श्नुप्रत्ययस्यांगस्य भ्रू इत्येतस्यांगस्य धातोरंगस्येत्येवं संबध्यते। अचीति वर्णग्रहणं। तेन यस्मिन्विधिस्त
दादावल्ग्रहणे इत्यज्ञादेः कार्ये ज्ञेयं। यत्र तु ङेव प्रत्ययो न ज्ञादिः तत्र व्यपदेशिवद्भावेनाजादित्वं ज्ञेयं। ङकारो विस्पष्टार्थः। निर्दिश्यमानस्यादे
शा इति नीति य्वोरेवादेशयोः सिद्धत्वात्॥ अचीति किं। सुधीभ्याः। श्नुधातुभ्रुवामिति किं। वातप्रम्यौ। य्वोरिति किं। चक्रतुः। अंगानुवृत्तिः किं। सुह्नु
पास्यः। इयङुवङोः यांगुणवृद्धी अचतो विप्रतिषेधेन। चयनं। चायकः। लवनं। लावकः। एतदित्यादि। एतस्येयङादेशस्य अपवादे एरनेकाचो
संयोगपूर्वस्येति अनेन यणादेशे प्राप्त इत्यर्थः॥ ॥ नभ्रूः॥ भ्रूग्रहणेन तदंतग्रहणं। केवलस्य यणादेशस्य प्रास्यभावाद्व्यर्थवचनं स्यात्॥ उवङादे
शनिषेधार्थत्वान्न व्यर्थमिति चेत्। न। एवं वर्षाभ्वश्चेति यणि विधिर्व्यर्थः स्यात्। तस्माद्यणमिनिषेधार्थमेतत्। ततो भ्रूग्रहणेन तदंतग्रहणं कार्य्यं।
अमिशसी निप्रवरूपे प्राप्ते परत्वादियङे वा॥ शसि प्रथमयोरिति पूर्वसवर्णदीर्घप्राप्ते परत्वादियङेवेत्यर्थः। एवं सुश्री यवक्र्यादयइति। सुश्री
र्यस्य सुश्रीः। यवान् क्रीणातीति यवक्रीः। प्रधीरिति। प्रध्यायतीति प्रकृष्टा धीर्यस्य वा॥ ॥ एरने॥ धातोरिति वर्त्तते तेन संयोगो विशेष्यते। धातोरवयव

प्र॰सु॰ ॥२८॥

संयोगः पूर्वो यस्माद्वर्णात् नास्ति तस्य वर्णस्य यण् स्यात्॥ यस्मात् सुधात्ववयवसंयोगः पूर्वः स्तस्य तु न स्यात् दित्याद्। धात्ववयव इति। गतिकारकेति।
किं वत्तस्य धातोर्गतिकारकपूर्वस्य यण् स्यते। सर्ववाक्यं सावधारणं भवतीति गतिकारकपूर्वस्यैव यण्यते। नान्यपूर्वस्येति अयं भावः यदि क्वि
बेतस्य धातोः सर्वपदस्य यण् क्रियते तरहि गतिकारकपूर्वस्यैव प्यते नान्यपूर्वस्य परेति किं। असंयोगग्रहणमिव वर्णविशेषणं यथा स्यात्। अंग
विशेषणं मा भूदिति। ननु चास्त्वेवं स्येन तस्मिन्नयो रित्य उवङ्नेलुलुवतुः इत्यत्रापि यण् स्यात् नेनन्दस्ति। ओः सुपीति ओः सुप्येवेति नियमादत्र
यण् निषेधः। धातुना संयोगविशेषणे किं इहापि यथा स्यात्। उन्न्यौ उन्न्यः इति। प्रध्यौ प्रध्यः इति। अमिशस्त्विपरत्वाद्गुणादेश एव। एवमिति। सु
सुनयतीति सुनी। स्नद्वितीति। क्विप्। परमधियौ। सुद्धधियाविति। अत्र परमस्य हश्शब्दो नगतीनापिकारको इति तत्पूर्वस्य न भवति। अंगस्येति
किं। ब्राह्मणस्य नियौ। अं॰ अमाम्नता। ङेराम्। ङे॰शि इति सप्तम्येकवचनेन गृह्यते। एतञ्च स्त्रियामित्यत्र बाधिति निर्देशात् ज्ञायते। ग्रामणीरिति। ग्रामं नये
तीति ग्रामणीः। अग्रग्रामाभ्यां नयतेर्णो वाच्यः स हरवेनवर्जन इति सरव इति तेनसहेति तुल्ययोगा इति बहुव्रीहिः। योपसर्जनस्येति सहस्य स
तमिलनीतिसरव्यौ इति। सखस मात्मनइच्छति इत्यर्थे सुपआत्मनः क्यच् इति क्यच् क्वचिन्वोतीत्वं। सख्रियतेः क्विपि कृते अतोलोप उस्य लोपः। लो श्री॥ ॥२८॥
पो व्योर्वलीति यल्लोपः। क्विपः सर्वस्य लोपः। कृत्वा ऋतः सरव्याविति। परनेकाचः इति यण्॥ सख्यत्यादित्यादि। सखीङ॰सि सखीङ॰स् इति स्थिते य
णादेशे कृते सख्य स्यात् स्वरस्यात्र सत्वेदीर्घस्यापि सखी शब्दस्याप्रिग्रहणात् ङ॰सोरकारस्योकारः। सुख्यमिच्छति सुखी। सुरिति। क्यङ् ईत्वं क्विप्
अल्लोपयलोपौ। सुरव्यु इति। अत्रापि पूर्ववत्। सुतमित्यादि। पूर्ववत् प्रक्रिया तकारस्थानजादिति। तकारस्य स्थाने यो जातो वर्णस्तस्मात् परस्यापि
ङ॰सि ङ॰सोरस्य उत्वमिष्यते। अयं भावः। लूञ् छेदने। क्तः। ल्वादिभ्यः इति निष्ठानत्वं। लूनमात्मन इच्छति क्यजादि पूर्ववत्। लूनीङ॰सि इति
स्थिते पूर्वत्रासिद्धन्यायेन तकारस्य स्थाने जातस्य नस्यासिद्धत्वात् ख्यत्यात्परस्येति नीशब्दात् परस्य ङ॰सिङ॰सोरुः स्यादिति। वेति केचिदिति। दी
धीव्यो स्वीतीशङ्का व्योः परयोर्ङ॰सि ङ॰सोरस्योत्वमिति शेषः। उत्वाभावपक्षे रूपाणि सरव्य इत्यादीनि तथा चायमर्थो विचारचिंतामणौ उक्तः।

सख्युः। पत्युः। प्रसिद्धेवरख्यत्यादित्याह पाणिनिः साधारणेतन्मन्यानां। सुख्युः। सुत्युः। सुखी४सुतीः। सुखीयतिसुतीयत्योर्यो क्विपि तयोर्विधिः।
निष्ठादेशस्य सर्वत्रासिद्धत्वाल्लुप्तस्यादिकं। सुख्युरित्यादिकं। सुख्यर इत्यादि साध्येतदुज्जयं भाष्य गौरवात् इतिशेषमिति। एवमिति। सखीसुखीसु-
तीलूनीशब्दानामित्यर्थः॥ ॥इतीदंताः॥ ॥शंभुरिति। शंभुशब्दो हरिवत्साध्यः। हरिशब्दे यादृशी प्रक्रिया तादृश्येवात्रेति भावः॥ ॥तृज्वत्॥ ॥क्रोष्टु-
शब्दः क्रुश आह्वाने स्मात् सितनिगमिमसिसच्यविधाञ्क्रुशिभ्यस्तुन्निति तुन्प्रत्ययांतो ऽयं जंबुकवाची॥ तस्यानेन प्रत्यासत्तेस्तृजंतस्य क्रोष्टृरूप-
मतिदिश्यत इत्यभिप्रेत्याह। क्रोष्टुरित्यादि॥ ॥ऋडुः॥ ऋकारांतस्य कनोङीतिगुणो प्राप्ते इतरेषां तु हल्ङ्याब्भ्यो दीर्घादिलोपे रुत्वविसर्जनीयाः संतदी-
र्घत्वेषु प्राप्तेषु अनङ् विधीयते। तपरकरणमसंदेहार्थं क्रोष्टेति। अनङि अंतादेशज्ञात नलोपः। सर्वनामस्थाने यो दीर्घस्यासंभवात् अकारस्य
स्थाने गुणो भवन्नोतरतम्याद्ऋति मानकार एव भवतीत्यभिप्रेत्याह॥ रपरत्वमिति उरण्रपर इत्यनेन॥ ॥अप्तृन्॥ ननु यथा तु रिष्टमेयःसु-
इत्यत्र तृन्तृचोर्यः समानोंशः तस्यैव ग्रहणं कृतं तथापि किं न कृतं अथ अर्वणस्त्रसावनञ इत्यस्य ग्रहणं मा भूदिति। मैवं। अर्थवद्ग्रहणपरिभा-
षयैव तस्य ग्रहो न स्यात्। एवं तर्हि अस्य अनित्यत्वज्ञापनार्थं तेनानिनस्मन्ग्रहणान्यर्थवता चानर्थकेन च तदंतविधिं प्रयोजयंतीत्येतदुपपन्नं
स्यात्। अथवा सामान्योक्तावपि विशेषएवज्ञापनार्थं। तेन नकोपधायाइत्यत्र सामान्योक्तावपि अकृतद्धितयोरेव कोग्रहणं तेन कमार्या इतेन यदग्रे
वक्ष्यते। अकृतद्धिताभ्यां कोपधायाः पुंवत्त्वनिषेधो चेति तदुपपन्नं स्यात्। अथ नप्त्रादयः किमर्थं गृह्यंते यतस्तेपि केचित्तृजंतास्तृन्नंताः। तत्रोच्य-
ते। केचिदस्वार्थे उणादौन्यत्र सन्तो निपातिताः प्रातिपदिकानीत्याहुः। तच्च पक्षे विध्यर्थं। केचिद्व्युत्पन्नानीत्याहुः। तत्पक्षे नियमार्थं। एवं च तानान्येषां
संज्ञाशब्दानां दीर्घो मा भूदिति। पितरौ। पितरः॥ ॥विभाषा॥ ॥अप्राप्तविभाषेयं॥ ॥ऋत उत्॥ ऋत इति तपरत्वं दीर्घनिवृत्त्यर्थं। तेन उन्यो-
र्इत्येवमादि सिद्धं स्यात्। उदित्येतदीर्घनिवृत्तये। अन्यथा हि द्विमात्रस्य स्थानिनो द्विमात्र एवादेशः स्यात्। ननु च भाष्यमानेनाणा सवर्णा-
नां ग्रहणं चेति द्विमात्रो न स्यात्। एवं तर्हि एतत् ज्ञापयति। भवत्युकारेण भाष्यमाने नापि सवर्णानां ग्रहणमिति तेन यदग्रे वक्ष्यति। स्थानेंतरतम इ-

प्र॰ सु॰ ॥३९॥

तिङ्क्स्वस्य ह्रस्वो दीर्घस्य दीर्घ ऊकार इत्येतद्रूपं च भवति॥ ॥रात्सस्य॥ संयोगान्तलोप इति सिद्धे नियमार्थं वचनं सिद्धे सत्यारंभो नियमार्थ इति
न्यायादिति चेन्न सिद्धत्वात् सकारस्यैव लोपो नान्यस्येति रेफस्य विसर्ग इति। ऊर्क्षु रस इति स्थिते सलोपे कृते खरवसानयोरिति रेफस्य विस
र्ग इति भावः। आमीत्यादि। क्रोष्टु आमिति स्थिते। रामाणामित्यादौ सावकाशो ह्रस्वनद्यापो नुडिति नुट् प्राप्नोति। क्रोष्ट्रादौ सावकाशः तृज्वद्भा
वश्च प्राप्नोति। तत्र विप्रतिषेधे परं कार्यमिति परत्वात् तृज्वद्भाव एव प्राप्नोति तस्मिन्नामि इत्यर्थः। नुमित्यादि। नुम् इको चि विभक्तौ विहितः। अचिरे
रेति। अचिर ऋत इति विहितो रः तृज्वद्भावोयमेव। एव्नो नुड् भवति एवं विप्रतिषेधेनेत्यर्थः। एवं विप्रतिषेधश्च परशब्दस्य इष्टवाचित्वाल्लभ्यते॥
क्रोष्टूनामिति। नुटि कृते अजादित्वाभावात् तृज्वद्भावो नास्ति। पक्षे त्यादि। तृज्वद्भावाभावे हलादौ विभक्तौ परतः। शंभुशब्दस्येव रूपाणि ज्ञात
व्यानीत्यर्थः। किंचिदिति दुर्गादयः। तथा च हरदुर्गः। शसादौ तु न ङ्जे तस्य तु संतस्य च प्रयोगः। पुंल्लुशब्दस्येव रूपाणि ज्ञातव्यानीत्यर्थः। किंचि
दिति दुर्गादयः॥ क्रोष्टुः च। क्रोष्टूनिति। इत्युदन्ताः॥ ॥हूहू रिति गंधर्वविशेषस्य संज्ञा। इत्यादि वा न स्त्रमी चदिति डि वर्जमिति शेषः। हूहौ
सवर्णदीर्घो न भवति किं तु यणेव हूह्वौ हि। एवमिति। चमूसेनामतिक्रान्तोऽतिचमूः॥ आदिना खलपादयः॥ अतिचमूशब्दो हूहूशब्दवदिति। अर्वा
चीनमतं। नाप्यमते तु नदीकार्यं स्यादिति। हे अतिचमु। अतिचम्वै। अतिचम्वः। अतिचमूनां। अतिचम्वामिति। खलपूरिति खलं पुनातीति
खलपूः। पूञः क्विप्॥ ॥ओः सुपि॥ ॥सुपि किं। लुलुवतुः अनेकाचः किं। लुवौ। धात्ववयवसंयोगपूर्वस्य तु नेति किं। कटप्रुवौ। गतिकार
कपूर्वस्यैवेति किं। परमलुवौ। स्वभ्रुवाविति। स्वस्माद्भवतीति। न भूसुधियोरिति यणो निषेधः। कटप्रूरिति। कटं प्रवते। क्विब्वचीति क्विप् दी
र्घश्च। अत्यल्पमिदमुच्यते। वर्षाभ्वश्चेति। वर्षाभ्वः इत्यादि पुनः पूर्वस्य भुव इति वक्तव्यमिति महाभाष्यकारवचनमर्थतोऽनूद्य तद्वचनबलात् दृन्
यण् भवतीत्याह। दृन्कारस्यादि। वचनादिति वचनं दृन्भूशब्दस्य यण् न स्यात्। काशिकादावदृष्टत्वादिति शं कान्त कार्यासाङ्गाद्येतद्
त्वादिति प्रामाणिकत्वप्रदर्शनार्थं॥ ॥इत्यूदन्ताः॥ ॥धातेति। एवं तृचापिति तृचः। अनडुहादि। धातारावितिकृते तृज्वद्दीर्घः एवमिति अ

प्रा॥ ॥३९॥

नेनप्रकारेण नप्त्रादयः तृन्तृजंता अव्युत्पन्नाश्च ज्ञातव्या इत्यर्थः। अप्तृन्नित्यादिति विनृशब्दस्येति शेषः। ननु च पितृशब्दो पि[illegible]न पुनेष्ट इत्या
दिना निपात्यतां स्वसा। तथाप्यप्तृन्निति सूत्रे उणादिव्युत्पन्नेन तच्च निरूक्तग्रहणादव्युत्पन्नेन स्यात्। यथा चैतन्न्यासे [illegible]। कुत्र केचिदत्र
क्रोष्टुशब्दस्य तृज्वद्भावः क्रोष्टुरसीत्यनुवर्तयंतितेन भाषायां न भवति आचार्याणां मतेन तु भाषामपि भवतीति क्रोष्टुरसीति नो [illegible] तथा च तृणामेको भाष्य
स्त्वमसि पयसामर्णव इत्यादि प्रयोगो भाषायां दृश्यते॥ ॥इति ऋदंताः॥ ॥गोतः॥ ॥ननु च हे स्वित्र गो हे चित्र गवः इत्यत्र [illegible]
र्थेन। उच्यते॥ अंगोत्यकार्ये वृत्ते पुनर्नांगोत्यकार्यमिति। अथ चैव गोतः इति संबंधे षष्ठी। ततश्च गोतो य सर्वनामस्थानमिति। यत्र [illegible] स्येकत्वा
दौ सर्वनामस्थाने तत्र गोः सर्वनामस्थानमित्युच्यते। चित्रगुशब्दात्परे य सर्वनामस्थानं तदन्यपदार्थस्येकत्वादौ॥ ॥ओतः॥ ॥ओकार[illegible]सर्वना
मस्थाने णिन्निर्दृश्यते तिन च द्वौ प्रासायामाकारो विधीयमानस्तो बाधते। अमे च द्वितीयेकवचनं गृह्यते शस्सा साहचर्यात्। सुपीत्यधिकारात्। तेनावि
नवमित्यत्र गोतइत्यादि। गोतो णिदित्यस्मिन्सूत्रे गोत इति तपरकरणमोकारांतानां शब्दानां उपलक्षणार्थं। तेन सुद्यौ इत्यादि सिध्यति। ननु च
तपरकरणं तत्कालावधारणार्थं। तत्किमुच्यते ओकारांतोपलक्षणार्थमित्याशंक्याह॥ यस्मादिति॥ यस्माद्धेतोस्तत्कालावधारणार्थं तपरत्वे वर्णनि
र्देशे प्रसिद्धं। वृद्धिरादैजित्यादौ। न चायं वर्णनिर्देशः किंतु शब्दनिर्देशः तस्मादित्र तपरत्वमोकारांतोपलक्षणार्थमेव तेन सुद्यौरित्यादि सिध्यति॥ के
चिद्गोतो णिदिति सूत्रे पठंति तदपि प्रमाणं उभयथाप्याचार्येण शिष्याः प्रतिपादिताः॥ ॥इत्योदंताः॥ ॥रायः॥ ॥हिरण्यद्रविणं द्युम्नमर्थ
रैः विभवा अपीत्यभिधाने पुल्लिंगस्याप्युक्तयोस्तु सि॥ ॥इत्यैदंताः॥ ग्लौरिति। ग्लौर्मृगांकः कलानिधिः॥ ॥इत्यौदंताः॥ अथ चकारांतल्हृका
रांता एकारांताश्च प्रसिद्धत्वान्नोदाहृताः॥ ॥इति॥ श्रीरामाचार्यसुतो हरिहरस्तज्जेनैकाग्रधीः श्रीनृसिंहाचार्ये येमाणिक्यवाप्यजनयत्तु तं
विठ्ठलाचार्यमार्ये॥ तस्य श्रीपाणिनीयाद्यनुगुणसगुणे प्रक्रियाकौमुदीयव्याख्याने स्मिन्प्रसादे सुविशदमिह पुंसि शब्दा अजंताः॥ ॥ श्री। ॥ ॥
॥ ॥अथ स्त्रीलिंगा अजंताः प्राह्या उच्यंते॥ ॥आवंतत्वादीवंतत्वादिति॥ ॥रमाशब्दस्याद्यतष्टाविति टावंतत्वेनावंतत्वाज्जसमोडित्यादिना स्वा

सुत्यन्तिरित्यर्थः॥ तत्र प्रथमैकवचने रमा सु इति स्थिते॥ हल्ङ्याबिति सोर्लोपो भवतीत्याह॥ हल्ङ्याबिति। हल्ङ्याब्भ्य इति सूत्रे यद्दीर्घग्रहणं तस्य
सुदाहरणव्याजेनाबन्तयोर्ह्रस्वत्वे जाते यादृशं रूपं भवति तद्दर्शयति। दीर्घादित्यादि। खट्वामतिक्रान्तोऽतिखट्वः अतिगतः कौशाम्ब्या निष्कौशाम्बिः
गोस्त्रियोरुपसर्जनस्येति ह्रस्वत्वं॥ ॥औङ आपः॥ प्रथमाद्वितीययोरेकारयोर्ग्रहणार्थमौङिति ङित्करणं न च ङित्त्वेऽस्य परत्वाद्याडादीनि कार्याणि
स्युः इत्याशंकनीयं। ङिदिति हि वर्णनिर्देश इति ङिदादौ विधीयते। अथवा सर्वत्र स्थानिवर्णानां संज्ञेयं। औकारस्य शी इत्येतच्च न सिद्धं त्वाह। औङिति
त्यादि तथा चोक्तं। औकारे यः शीविधौ ङिद्गृहीते ङि आस्याक्तं नास्ति कोऽयं प्रकारः सामान्यार्थस्तस्य च संज्ञेने स्थानिवत्कार्यं तन्न्यायप्रसक्तस्य दो
षः ङित्त्वे विद्याद्वर्णनिर्देशमात्रं वर्णे यस्मात्तत्र विधानं तदादौ। वर्णश्चायं तेन ङित्त्वप्यदोषो निर्देशोऽयं सर्वसूत्रेणावास्यात्। इति। औङिति पूर्वापू
र्वापां सामान्यग्रहणं॥ आङि॥ ङ्यापिति ङ्यापोर्ग्रहणे दीर्घग्रहणं दीर्घविशेषणग्रहणात् ह्रस्वयोर्माभूदिति अतिखट्वे इत्येवं त्वेन अयं भावः हल्ङ्या
ब्भ्यो दीर्घादिति योगविभागः कर्त्तव्यः। इह शास्त्रे यावत् ङ्यापोः कार्यं तावत्सर्वं दीर्घयोः स्यात्॥ ह्रस्वयोर्माभूदिति॥ ततः सुतिस्यपृक्तं हल इति द्वि
तीयो योगः॥ हल्ङ्याब्भ्यो दीर्घादिति वर्त्तते॥ याट्। अतिखट्वायै इत्यत्र अकृते दीर्घे ङ्याप्ग्रहणे दीर्घग्रहणाद्याडागमो न भवति। कृते तु लाक्षणि
कत्वान्न भवति। आटः॥ चकारोऽधिकविधानार्थः तेन उस्वामात्मन ऐच्छत्। औस्रायत्। औकारीयत्। आ ऊढा औढा। औदां ऐच्छत्। औदीयत्। इस्य
उसुस्य पदान्तात्॥ ओमाङोश्चेति पररूपं न भवति। ननु च रमा या ए इति स्थिते। वृद्धिरेचीति रमायै इति सिध्यति। रमा या इत्यादि तु सवर्णदी
र्घेण तत्किमेतत्सूत्रारंभेणेति पदोषः यद्यप्येतन्न सिध्यति तथाप्येसिद्धेस्यादिर्न सिध्यति। तदर्थमेतत्सूत्रमवश्यमारब्धव्ये तदर्थं कृतमेतदर्थ
मपि भवति। याटोऽपवादत्ते आडस्तीति चेत सिद्धत्वाच्चेदं सूत्रं पठितमाचार्यैः॥ तथा च धर्मकीर्त्तिना रूपावतारे जाया शब्दरूपवर्णने याडापू इत्येतद्
स्य आडाश्चेत्येतत्प्रवृत्तिं। जायायै जायाया इत्येतद्रूपसिद्ध्यर्थं। तथा च विचारचिन्तामणौ वोपदेवपण्डितेरपि पठितं। शिवाप्राप्तशिवाभिर्याडा
पू आटश्च ह हिः शिवायै च शिवाभ्यो च शिवाभ्यः पुनरप्य सू इति॥ सर्वनाम्नः॥ याडोऽपवादः॥ आपः किं। भवत्यै। भवत्याः। विभाषा। न बहुव्री

श्री॥
॥८०॥

हलि०७३

हा। विति प्रतिषेधेऽप्राप्ते विकल्प आरभ्यते। दिशां समासो दिक्समासः। उत्तरस्यैवं स्यैइति। उत्तरस्याः एवं [illegible] न्तरालं। उत्तरपूर्वी दिङ्मान्येतराल
इतिसमासः। सर्वनाम्नो वृत्तिमात्रे पूर्वपदस्य पुंवद्भावइति पुंवत्। समासग्रहणं समासएवयो बहुव्री [illegible] स्तत्रैव स्यात्। बहुव्रीहिवद्भावेनयो बहुव्री
हिस्तत्र मा भूत्। दक्षिणास्यै देहीति। आ बाधे चेति द्विर्वचनं बहुव्रीहिवद्भावश्च। अपुरीति अन्तरो पुरित्यत्रापुरीत्युक्तेरन्तरायै स्य नगरी वाच्यक
स्य सर्वनामसंज्ञा नेति अन्तरायै इति या ट्स्यात्। नस्याडित्यर्थः॥ विभाषा॥ पुनस्तावितिपुनस्तौ प्रयोगौ द्वितीयस्याः द्वितीयायाः इति। अवार्थी
अवार्थो मात्रर्था: मातुर्माननजादेशो वाच्यः संबुद्धौ अर्हन्तं पुन्नमिधातुं चो तो दात्तार्थः। गार्गीमातृ उत्कवती नामितिड उकाया समस्य
तीनां संतिताड उक वरु स्य। अथवा अर्थगतेनस्त्रीत्वेनां वार्थो नोनि दिष्टाः। अत्र संयुक्तो उकागृह्यते॥ अतोऽक्त अक्षुइ स्व हृस्वस्यादेवाजरा
याजरसन्यतरस्या मित्यविवाजरसादेशः स्यादित्यहा। अचीत्यादि। जरसाविति। जरस् औ इति स्थिते। औड आप इति शीभावः प्राप्तोति जरस
नावस्थत्वपरत्वाज्जरसादेश एव भवति। केचिदिति। तथाच दुर्गसिंहवृत्तौ औरीतिसूत्रव्याख्याने उक्तं। जरसी इति। केचिदिच्छंतितानसः न
सादिति। नासिकाशब्दस्य नसादेशे शासिटाप्प्रत्यये च रूपेपक्षे सर्वनामस्थाने च रमवत्॥ व्रश्च॥ ओव्रश्चू छेदने भ्रस्जो पाके। सृजविसर्गे। मृजूष
शुद्धौ। यजदेवपूजासंगतिकरणदानेषु राजृदीप्तौ। भ्राजृदीप्तौ। निडन्त्यामित्यादि। निशसमाधौ। छ्विव [illegible] ततः आपंचैव हल्ले तानामिति अनु
रिमतेनाप्ततनो निश आदेशः। पथ्यासः यद्यपि तिडपश्च त्रस्तो निस्तते दादेर्घइ स्यतो धातोरित्यनुवर्त्तते। नहि आवमाव पक्षेरूपं निड्भ्यामिति
गोपा विश्वपावदिति। गोः पतीति गोपाः। अयं विश्वपाशब्दवत्। आवं तत्त्वा भावा दाछि धिर्नस्याडि ति भावः। इत्याद्यंताः॥ टाइस्य स्यननात्वमि
तिस्त्रीत्वादेव। ङिति॥ यस्त्र्याख्यौ नदीत्यनेन दीर्घयोर्नदीसंज्ञा टिहिते तिङ्क्ष्वयोर्न प्राप्नोतीति नेयङुवङ्स्थानावस्त्रीतीयङुवङ्स्थानयोश्च
निषिद्धात्तस्माद्ध्रस्वयोरियङुवङ्स्थानयोश्च ङिति वा विधीयते। इयङुवङ्स्थाना वित्यादि। इयङुवङ्स्थौ नौ नित्यस्त्रीलिंगाविकारोकारौ ङस्वो
न्नियस्त्रीलिंगौ इकारोकारौ स्त्रीलिंग एव वा नदीसंज्ञौ स्तो न तु लिंगांतरे स्त्रीशब्देनेत्यर्थः। तथा चोक्तं। महाभाष्ये। ह्रस्वौ च इयङुवङ्स्थानो न्य ग्रह

प्र॰कौ॰ ॥५९॥

तौ च प्राक् प्रवृत्तेः स्त्रीत्वनावेव नदीसंज्ञौ न त्वत्रेति वक्तव्यं। किं प्रयोजनं। श्रियै अतिश्रियै वा ब्राह्मण्यै। क्रमान्नृत्त। श्रिये अतिश्रिये ब्राह्मणाय। भ्रु-
वै अतिभ्रुवै ब्राह्मण्यै। क्रमान्नृत्त। भ्रुवे अतिभ्रुवे ब्राह्मणाय। शकट्यै अतिशकट्यै। क्रमान्नृत्त॥ शकटये अतिशकटये ब्राह्मणाय। धेन्वै अतिधेन्वै
ब्राह्मण्यै क्रमान्नृत्त। धेनवे अतिधेनवे। ब्राह्मणायेति॥ तथा चोक्तं। प्रथमलिंगग्रहणं चोदितं तेन दृष्टं विजानीयात्। सर्वमेव विकल्प्यते। इति त-
दाचार्य्यः सुहृद्भूत्वा चष्टे इति। आण्नद्याः॥ मतये इति नदीसंज्ञाभावे घिसंज्ञा। ततो ह्रस्वौ ङे॰ ली॰ ह्र्याभ्यां नदीसंज्ञाभ्यामुत्तरस्य ङेराम् स्यादिति। ननु
तिगुणः मत्यामिति। अत्र च स्पष्टत्वाद्व्याख्यातं सूत्रं। इदुद्भ्यामिति तेन ङेराम् इत्यस्यायमर्थः। इकारोकाराभ्यां नदीसंज्ञाभ्यामुत्तरस्य ङेराम् स्या-
दिति। ननु च यद्यपि न द्या इति वर्त्तते ङेराम्नद्याम्नीभ्यः इत्यनेनैव सि। ह्रः किं सिद्धं ङ्याम् इत्यनेनैवं वाच्यः। औदिति औत्त्वे परत्वाद् दामं वा घि-
त्वात् स्यात् अन्यार्थमिदं पृथक् सूत्रं। ननु च औदिति सूत्रे घिनदीसंज्ञा च वर्जिता ज्यामिति व्याख्यातमर्थं च नदीसंज्ञस्तत्कुतस्त्व प्रसंगः॥
नैष दोषः। इदुद्भ्यामित्येतस्मिन्नष्ट योगे सति न ह्याख्यानेनान्यथेति तस्मिन्नेव सूत्रे सूचितं। मतौ इति। नदीसंज्ञाभावे अच्च घेः इत्यौत्वमत्रादेशा-
ख्याकारः। त्रिचतुरोः स्त्रियामिति किं त्रयः॥ चत्वारः। प्रियत्रौ किं। त्रिजार्य्यः चतुर्जार्य्यः संज्ञायां कन्निति स्वभावो वाच्यः॥ तिस्रः का। त्रतस्तृश
ष्टस्यादुदात्तत्वं निपात्यं। चतस्रः पश्य अचतुरः ॥शशी॥ शेषस्वरो मात्र दिति चतसृणामित्यत्र नुषड्ढि चतुर्भ्यो ह्रो नादिरित्येष एव स्वरोऽर्थ इति
हलादिग्रहणसामर्थ्यान्निपातनस्वरबाधनात्॥ अचि र। गुणादीर्घत्वानामपवादः। ति। गुणस्य ऋतो ङि सर्वनामस्थानयोरिति प्राप्तस्य दी-
र्घस्य प्रथमयोः पूर्वसवर्णः इति पूर्वसवर्णदीर्घस्य। उत्त्वस्य ऋत उदिति प्राप्तस्यापवादः। बाधको रेफः इत्यर्थः। न च गुणस्यैवं विप्रतिषेधेन तरयोः
परविप्रतिषेधेन॥ न तिसृ च॥ अयमेव प्रतिषेधो ज्ञापकोऽविप्रत्यपूर्व विप्रतिषेधेन नुट् स्यादित्यस्यार्थस्य। त्रिचतुरोः स्त्रियामित्यत्र सूत्रे वर्त्तमान
स्त्रियामिति पदमंगस्य प्रकृतत्वात्तस्यैव विशेषणं न त्रिचतुरोरिति कस्यचिदाशंकास्यात्तामपनुदन्नाह स्त्रियामित्यादि। यत स्त्रियामित्येतत्सदेवप्र-
त्यासत्तेस्त्रिचतुरोरेव विशेषणं नांगस्येति नकारे ऽणोरस्य स्त्रियां प्राधान्येन वृत्ता येपि स्त्रियामप्राधान्येन यो त्रिचतुरशब्दोस्ति स च तत्स्ता॰

कौ॰ ॥५९॥

कुतेनाः। खर्वरचितोपस्पोक्षरः खरविषिः सशिष्यत इति बहुव्रीहिः शेषः। नतोलोहितादिसूत्रेकेतस्यातइतिनसूत्रसंग्रहीतस्यचनतस्या
शाकलशब्दस्य शाकल्यस्य इमे छात्राः शाकलाइत्यपस्यात् इति ष्यङ्लोप्रयोजने॥ कौरव्यमांडूकाभ्यां च॥ ॥आ स्युर्यां ङिष्ठयाघ्वकः स्यात्॥ कु
शाष्टात्कुर्वादिण्य कृते मंडूकशब्दात् ढक् मंडूकादित्यणि च यथाक्रमं टापडीपोरपवादः ष्फः। कौरव्यायणी। मंडूकायनी कौरव्येति ल्यंत
स्य ग्रहणात् तस्येदमित्यणंता न्नकौरवीति स्यात्। आसुरायणी॥ वयसि॥ कालकृतावस्थावयो वनादि विवक्षितः कुमारीति। कुमार
शब्दः प्रथमवयसि रूढः। यस्तु वृद्धायामपि वृद्धकुमारीति प्रयोगः स कुमारी साधर्म्यात् पुंयोगाद्यभावात्। भवति हि साधर्म्यात्ताच्छब्द्य
प्रयोगो वाहिकोदयसि। ननु चैवं ज्ञानशयालोहितपादिके स्याद्विडीषायात्। यतो बाल्यमवगम्यते बाल्ये हि ज्ञानशयालोहितपादिका
स्यात्। मैवं नेतो वयोवचनौ किंतु ज्ञानशयनलोहितपादतावचनो। वयस्तु प्रकरणादिनागम्यते। वयस्य चरम इति। अनंत्ये वयसीति वाच्य
मित्यर्थः। एतच्चयेषां चत्वारि त्रीणि वा वयांसि पक्षः। तन्मते च वक्तव्यं। यौवनातिरिक्तचतुष्टयशब्दयोः प्राङ्यौवनस्त्रीवाचिनो द्वितीयावयसो
वाचित्वात् प्रथमवयोवाचित्वं न येषां तु द्वे एव वयसी तन्मते तु न वक्तव्यं। तन्मते यौवनस्यापि प्रथमवयोरूपत्वात्। तथा च मतभेदः। केचित्कौ
मारयौवनमध्यत्ववृद्धत्वानि चत्वारि वयांसीच्छंति। तथा चाहुः प्रथमे वयसि नाधीतं द्वितीये नार्जितं धनं। तृतीये न तपस्तप्तं चतुर्थे किं करि
ष्यतीति। अन्ये तु कौमारयौवनस्थविरत्वानि त्रीणीच्छंति। तथा चाहुः। पिता रक्षति कौमारे भर्त्ता रक्षति यौवने। पुत्रश्च स्थाविरे भावे न स्त्री स्वा
तंत्र्यमर्हतीति। केचित्तु बाल्यमध्यत्ववृद्धत्वानि त्रीणीच्छंति। तथाहुः। आषोडशाद्भवेद्बालो यावत्क्षीरनिवर्त्तकः। मध्यमः सप्ततिर्यावत्प
रतो वृद्ध उच्यते इति। केचित्तु द्वे वयसी इच्छंति। यावत्यो वृद्धिमत्योऽवस्थास्तास्सर्वा राशीकृत्य प्रथमवयः। यास्त्वपचयवत्यस्ता राशीकृत्य द्वि
तीयं। तथा चोक्तं। वर्द्धतां यावदनेन वर्द्धितव्यं पश्चादपायेन युज्यतामिति। कन्यायौने सु इति। कन्यायाः कनीनश्चेति निर्देशान्ज्ञापकादिति भावः
द्विगोः॥ ॥पंचमूलीति। पंचानां मूलानां समाहारः॥ ॥अपरिमाण॥ ॥स्वैर्विस्ताडीत्युपनिषिध्यते विस्तादीनां परिमाणं तु सर्वतः। आयामस्तु प्रमाणं

प्र॰प्र॰सु॰ ॥७३॥

स्यात्संख्याबाह्यात्तु सर्वत्र इति। कालसंख्ययोरपरिमाणत्वज्ञापकात्। तथा हि। यद्येवं परिमाणं तस्या संज्ञा शाणायोरित्येव द्विसौवर्णिकः। द्विशा
णिक इत्यादावुत्तरपदवृद्धौ सिद्धायां संख्यायां वत्सरसंख्यस्येति संख्यासंवत्सरग्रहणं करोतीति तज्ज्ञापयति। कालः संख्या परिमाणेनेति। एतत्स ३१
दाचार्यैर्द्विवर्षेत्युदाहृतं। कालस्य परिमाणेन त्वत्र तु कालस्यौपचारिकं परिमाणत्वमित्यविरोधः॥ पंचाश्वा द्विवर्षेति। अपरिमाणान्तस्योदाहृ
रणं। पंचभिरश्वैः क्रीतेति। तेन क्रीतमिति ठक्। तद्धितार्थेति द्विगुः॥ अध्यर्द्धेति ठको लुक्। द्विवर्षेति। द्विवर्षं भूतेति तमधीष्टो भृतो भूतो भावीत्ये
नेन विहितस्य ठकोऽवर्षाल्लुगिति पाक्षिको लुक्। वित्त। चित्ते तु प्रत्ययार्थस्य विवक्षिते चित्तवति नित्यमिति नित्यमेव लुक्। द्विबिस्तेति। द्वौ बिस्तौ पच
तीति संभवत्यवहरति पचतीति ठञ्। अध्यर्द्धेति ठको लुक्। केचित्तु बिस्तशब्दमुन्माने मन्यन्ते सुवर्णबिस्तो हेम्नोऽक्ष इति बिस्तग्रहणादुन्मानमपि प २२
रिमाणग्रहणेन गृह्यत इति तन्मते ठञो लुक्। एवं द्वावाचितौ पचति। आचितो दश भारः। द्व्याचितमिदं केवल्या। द्वाभ्यां कंबल्याभ्यां क्रीता। कंब
पंत ल्यमूर्णाशतं। कंबल्याच्च संज्ञायामिति यत्। द्व्याढकीति। द्वौ आढकौ पचति। आढकाचितपात्रात् खोऽन्यतरस्यामिति वर्त्तमाने द्विगोष्ठंश्चेति ठ
ञ्चयोरभावपक्षे ऽनुज्ञातठक्। तस्याध्यर्द्धेति लुक्। पंचाश्वेत्यत्र कथं तद्धितलुक् स्यादित्यत आह॥ अध्यर्द्धेति ठको लुगिति द्विवर्षादौ ह श्री॥
क्तो विशेषो ज्ञेयः। तद्धितलुकीति किं। पंचानामश्वानां समाहारः पंचाश्वी॥ कांडान्त। परिमाणवाचीति। अत्र परिमाणशब्दो मानसामान्यपरस्तेन कः ॥७३॥
स कांड विशेषणत्वात्प्रमाणे पर्यवस्यति। कांडशब्दो हि मानदंडवाची प्रमाणविशेषमाह। तथा च काशिकायां वृत्तावुक्तं कांडशब्दस्य परिमाण
वाचित्वात्तु सर्वे लोकप्रतिषिद्धे सेत्र नियमार्थं वचनं। इह मा भूत्। द्विकांडी त्रिकांडी रज्जुः। प्रमाणविशेषः कांड इति। अथवा प्रमाणवाचीति पाठः॥
द्विकांडेति। द्वे कांडे प्रमाणमस्याः द्विकांडा क्षेत्रभक्तिः। प्रमाणे द्वयसज्दघ्नञ्मात्रच इति द्वयसच्॥ ॥पुरुषात्॥ ॥अपरिमाणान्तत्वान्निषे
धप्राप्ते विकल्पार्थं वचनं। द्विपुरुषीति द्वौ पुरुषौ प्रमाणमस्याः एवं द्वयसच्। तस्य लुक्॥ प्रमाणे किं। द्वाभ्यां पुरुषाभ्यां क्रीता द्विपुरुषा। तद्धितलु
कीत्येव। पंचानां पुरुषाणां समाहारः पंचपुरुषी॥ ऊधः॥ ङिश्चादादेशो येन प्रत्ययः प्रत्ययत्वे हि ङित्वं व्यर्थं स्यादित्यभिप्रेत्याह अनङ् आदेशः

स्यादिति। तत्र अश्वगवां गणाः प्रस्तुतयावरोधस इत्यादि सिद्धं॥ ॥बहु॥ ॥ऊधसोनङ् इति समासांते कृते अनो बहुव्रीहेः डाबुभाभ्यामन्यतरस्यां
मिति ङाप्निषेधयोः प्राप्तयोरिदमुच्यते। अन उपधालोपिन इत्यस्यापि ङीपोयं बाधक इष्यते॥ पीनोध्नीति पीनमूधो यस्याः। स्त्रियां किं। महोधाः
पर्जन्यः। ङीषः षकारो ङीपो सामान्यलोपेन इत्यकारलोपः। बहुव्रीहेः किं। प्राप्तमूधः प्राप्तोधाः स्त्री॥ प्राप्ता पन्ने च द्वितीययेति समासः। स्त्रियां किं॥
महोधाः पर्जन्यः। ङीषः षकारो ङीपो सामान्यग्रहणार्थः। आद्युदात्तत्वं तु दात्तो ङीषु ङीपू त्वनुदात्तौ। सुप्पितावित्यनुदात्तः। इति स्वरे भेदोऽनयोः
। बहुव्रीहेरूधसो ङीषित्यस्य व्याख्यानेनैव व्याख्यातप्रायत्वात् अत्र न तिविशेषोदाहरणत्वाद्वोपेक्षितं स्त्रैव व्याख्यायते॥ ॥संख्याव्ययादेर्ङीप्॥
॥ स्त्रैणङीषि प्राप्ते ङीप् विधीयते। संख्यादेरव्ययादेश्च यः शब्दोन्ताद्बहुव्रीहेर्ङीप् स्यात्॥ व्यूध्नी॥ आदिग्रहणाद्व्यवधानेपि स्यात्। द्विविधोध्नी॥ ॥
दाम॥ ॥संख्याग्रहणमेवेह स्वरितत्वादनुवर्त्तते। नाव्ययग्रहणमस्वरितत्वादित्यभिप्रेत्याह। संख्यादेरित्यादि। दामहायनान्तात् ङीप्निषेधविकल्पयोः प्राप्ते
षु नित्यत्वार्थं वचनं। हायनोन्तात् टापि। द्विहायनी त्रिहायनीत्यादि। हायनशब्दांताद्बहुव्रीहेर्वयसि गम्यमाने ङीप् स्यात्। त्रिचतुर्भ्यां परस्य हायनशब्दस्य
णत्वं च वाच्यमिति गम्यमाने स्यादित्यर्थः॥ ॥अंतर्वत्॥ ॥अंतर्वदित्यत्र अंतः शब्दस्याधिकरणप्रधानत्वेन तद्धितमत्वर्थत्वाभावाद्भिन्नसामा
नाधिकरण्यासंभवाद प्राप्तो मतुप् निपात्यते। वत्वं तु माडुपधायाश्चेति सिद्धं। पतिवच्छब्दे वत्वमेव निपात्यते। मतुपः सिद्धत्वात्। तयोर्नुमागमोनेन विधीय
त इत्यभिप्रेत्याह। एतयोरित्यादि। नांतत्वादिति। गर्भयोगे अंतर्वत्नीशब्द इष्यते। गर्भयोगश्च तस्याः स्यात् यस्याः कुक्षौ गर्भः स्यात्। भर्तृयोगे पतिवत्नी
शब्दः। इह च भर्तृग्निसाक्षिकेन पाणिग्रहणेन संबंधी यः स एव गृह्यते। तस्याश्च भर्तृयोगः स्यात्। यस्याः पतिर्जीवति। तथाचांतर्वत्नी गर्भिणी पति
वत्नी जीवद्भर्तृकेत्यर्थः। तथाचोक्तं वार्त्तिककारेण। अंतर्वत्पतिवतोर्नुक्॥ मतुब्वत्वे निपातनात्॥ गर्भिण्यां जीवत्यां च वा छंदसि तु नुग्विधिरिति॥
अन्यत्रेति। गर्भभर्तृयोगाभाव इत्यर्थः। अंतर्वत्नी शालेति शेषः। ननु च अंतर्वत्नीति मतुप् नोपपद्यते अधिकरणप्र[illegible]त्वेन॥ शब्दः। तथाचांतर्वि
द्यते यस्यां शालायामिति वाक्यमेव प्रत्युदाहार्य्यं। तथाचोक्तं महाभाष्ये। अथांतःशब्दस्य गर्भयोगे किं। प्रत्युदाहार्य्ये[illegible]। अंतरस्यां शालायामिति।

प्र॰प्र॰सु॰ किंपुनःकारणंवाक्यंप्रत्युदाह्रियतेनपुनर्मतुपामतुबस्तिसामानाधिकरण्येमतुब्विधौ।येनेनचार्थोऽस्तिनासामानाधिकरण्यमिति।किंपुनस्त्यादिना
॥७४॥ ख्यंकैय्यटेनव्याख्यातं।किंपुनरिति।अंतर्वत्नीतिनुगतावःप्रत्युदाहार्य्यइतिमन्यते।नन्वावेति।अंतःशब्दस्याधिकरणप्रधानत्वादितिभावइति।अं
तोंतर्वतीतिप्रत्युदाहरणंनोपपद्यतइतिकेचित्।उच्यते।सत्यं।मध्यवाचिनोंतःशब्दादधिकरणप्रधानत्वान्मतुब्नेतिवाक्यमेवप्रत्युदाहार्य्यं।य
स्तुपरिग्रहवाच्यंतःशब्दःसआधेयप्रधानोप्यस्तीतिचेतसिकृत्वाचार्यैःप्रत्युदाहृतं।बहुतरप्रयोगदर्शनात्।तथाचानेनैवाभिप्रायेणबोपदेव
पंडितैर्विचारचिंतामणावुक्तं।अंतर्वत्नीचगर्भिणी।सत्यवापतिवत्न्यंतर्वत्नीपलिमस्त्यपीति।तथापाणिनीयमतदर्पणेप्युक्तं।अन्यथांतर्वती
शाब्दः।पतिमतीपृथिवीति।पतिःस्वामीविद्यतेयस्याःसापतिमतीति॥ ॥पत्युः॥ ॥यज्ञसंयोगइति।यज्ञेनसंयोगोयज्ञसंयोगः॥पतिशब्दवाच्य दे
स्यार्थस्यजायायायज्ञसंबंधेगम्यमानइत्यर्थः।यजमानस्यभार्य्यायांगंप्रतिसाधनत्वमस्तिनहिभार्यारहितस्यैवर्त्तिकोयज्ञेऽधिक्रियते।अतो
यज्ञस्यसाधनत्वात्पत्न्यायज्ञसंयोगः।यज्ञफलभोक्तृत्वेपत्न्यायज्ञसंयोगःस्वस्वामिभावलक्षणः।ननुचवृषलस्यैवतावद्यज्ञेनसंबंधोनास्त्यविकृतेत्वा जयि
त्।किंपुनस्तद्धार्यीत्याशंक्याह।वृषलपत्नीत्युपमानादिति।पत्नीसाधर्म्यात्पत्नीवपत्नी॥ ॥विभाषा॥ ॥सपूर्वस्येतिवर्त्तमानःपूर्वोवयवो श्री॥
सोऽस्यसपूर्वः।प्रागुक्तंचेति।नांतादेशोवा।नांतत्वात्ङीप्।अयज्ञसंयोगार्थप्राप्तविभाषेयं॥दृढपतिरिति।दृढपत्नीति।दृढःपतिर्यस्याःसा।सप ॥७४॥
र्वस्यकिं।पतिरित्येनित्ये।पूर्वेणविकल्पेप्राप्ते।नित्यार्थंवचनं।प्रारंभसामर्थ्यादेवनित्यत्वेसिद्धेपिसग्रहणंविस्पष्टार्थं।लाघवार्थंसमासेतिवा
च्यं।समानाद्यर्थंसपत्न्यादिषुस्थितिरित्युक्तं।सपत्नीति।समानःपतिरस्याः।एकपत्नीति।एकःपतिरस्याः।वीरपत्नी।पिंडपत्नी।भ्रातृपत्नी।पुत्रपत्नी॥ ॥
॥पूत॥ ॥अंतरस्त्वेतदोहोनवचनादैकारआदेशः।प्रत्ययेत्वेतुहिप्रत्ययस्वरेणोदात्तत्वसिद्धेरुदात्तवचनंव्यर्थंस्यादित्यभिप्रेत्याह।एत्र्यादे
शइति।पुंयोगइत्येवेति।इतआरभ्ययेयोगाङीसहिताः।पुंयोगादाख्यायामितिप्रकरणेनुवर्त्तते।ननुअपुंयोगइत्ययचैवार्थःएतत्कार्य्यंना
स्त्वेतिभावः।तथाचोक्तंमहाभाष्ये।एतकृत्वादीनांपुंयोगप्रकरणेनुवर्त्तनंचनं।एतकृत्वादयःपुंयोगप्रकरणेवक्तव्याः॥एतकत्वाःस्त्री

पूतक्रतायी। यथा हि सन्तः क्रतवः पूतक्रतुः सा भवति। एतच्च भाष्ये कैयटे च व्याख्यातं। पूतक्रत्वादीनामिति। त्रय एते पुंयोगात् ङीप्सहिताः
पुंयोगादाख्यामित्यनुवर्तयितव्याद्युक्तं भवति। तेन यदा पुंयोगात् स्त्रियां एते क्रत्वादयो वर्तन्ते तदायं विधिर्नान्यथेति। वृषा॥ वृषाकपि
शब्दो लक्ष्ये वेदे द्वयोश्च बह्वचो गुरुरिति फिट्सूत्रेण मध्योदात्तः उदात्तस्वरवचनं प्रयोजनमिति॥ अग्न्यादिषु पुनरन्तोदात्तेषु स्पष्टं। निवङ्गावादेव सिद्धे वृ
षाकपायीति। वृषाकपेः स्त्री। अग्न्यादिनाग्नायी। कुसितेनायी। कुसीदायी। पुंयोगे किं। वृषाकपिः स्त्री॥ ॥मनोः॥ ॥मनुशब्दश्चाद्युदात्तः॥ त
स्योपदेशावैकारौकारौ वृद्ध्युदात्तौ स उदात्त इत्यनुवर्तते॥ वर्णो त॥ एता एनीति। वर्णानां तणतिनितान्तानामिति फिट्सूत्रेणाद्युदात्तः तस्मा
त्वात्पदमेकवर्ज्यमित्यनुदात्तः श्वेतेति। श्वेतादीनां फिट्सूत्रेणान्तोदात्तः पिशंगाद्वेति। पिशंगशब्दो लघावन्ते इत्यादिना मध्योदात्तस्ततोन्यतो
ङीपि प्राप्ते ङीपुपसंख्यानं॥ असितेत्यादि वर्णानां तणतिनितान्तानामित्याद्युदात्तौ। क्नमेक इति। एके आचार्या असितपलितशब्दयोस्तक
स्थाने क्नमिच्छन्ति। तथा चोक्तं महाभाष्ये। छन्दसि क्नमेक इति। आचार्यास्तु छन्दसीति नोक्तवन्तो भाषायामपि दर्शनात्। तथा चोक्तं काशिकायां वृत्तौ।
भाषायामपीष्यते तेन गुणास्तृणीमसिक्निकानामिति वर्णादिति किं। प्रकृता। गतिरनन्तर इति आद्युदात्तः। नोपधात्किं। अन्यतो ङीषेव स्यादिति॥ अन्य
तः॥ ॥नोपधापेक्षया अन्यत्वमित्याह॥ नोपधादन्यत इति। स्वरे विशेष इति॥ ङीपृ ङीषोरिति शेषः। ङीपोनुदात्तौ सुप्पितावित्यनुदात्तत्वं। ङीषस्तु
आद्युदात्तश्चेति प्रत्ययाद्युदात्तत्वेनोदात्तत्वमिति स्वरे विशेषः। शबलीति वलच्प्रत्ययः। पकारस्य च वकारः। प्रत्ययाद्युदात्तत्वेन मध्योदात्तः। शबल
शब्दोन्तोदात्तस्ततः कपिलेति। कमुकान्तो कमेः पश्चेति इलच् मकारस्य च पकारः। चित्स्वरेणान्तोदात्तः। पिङ्गैरेति ङीषि पिंगेति। नर्त्तकीति। शिल्पिनि ष्वु
न्। गौरादीति। गौरशब्दस्य वर्णवाचित्वेपि प्रातिपदिकस्वरेणान्तोदात्तत्वात्सर्वत एव ङीष् पुनः प्राप्तो तत्। तिगौरादिषु पाठः॥ सूर्याच्च भस्येत्यनुवर्त्त
ते। तत्र यदि भसंज्ञत्वेन सूर्यादयो विशेष्येरन् तदा तद्धिते लोके दिक् सौरी बलाका इत्यत्र लोपो न स्यात्। न ह्यत्र सूर्यशब्द इति भसंज्ञकः किं तर्हि
न्यदेवाणन्तं शब्दान्तरं तत्सम्बन्धे योजना। भसंज्ञस्य उपधायलोपः स्यात् सम्बन्धे भसंज्ञकः सूर्यादीनामिति। तेन यदापि सूर्यादीनां भत्वं नास्ति तदा

व
प पु

प्र·प्र·सु· पितस्योपधायकारस्यलोपःस्यादेव।आचार्यवर्यैस्तुनस्येस्येतद्वस्तुवर्तमानमप्युपेक्षितं।विषयपरिगणनादत्रतस्यानुवृत्तेरनुपयोगात्।तुविष
१७५।। यपरिगणनेचैवंकर्तव्यमित्याह।मत्स्यस्येत्यादि।सोऽयंयोदाहरणप्रत्युदाहरणानिकथ्यंते।मत्सीइहमान्तु।मत्स्यस्येदं।सूर्यागस्त्य
योरितिसौरी।सौरीयं।आगस्ती।आगस्तीयः।इहनसौर्य्यैचरुः।।आगस्त्यं।तिष्यपुष्ययोरिति।नक्षत्राणिनक्षत्रसंबंधीयोऽण्।तस्मिन्नित्यर्थः
तिष्यपतानक्षत्रेणयुक्तःकालः।तैषःपौषः।उपधायाइतिकिं।मत्स्यचरी।ययेग्रहणेहलस्तद्धितस्येत्याद्यर्थं।अव्रतस्तेत्रेऽन्यत्रापिवाच्यः।
अंतिकशब्दस्यतसिप्रत्ययःयेपरेकादेरेवयवस्यलोपः।आद्युदात्तत्वंचवाच्यं।अंतिकआगतोऽन्तरात्।तमप्रत्ययेपरेंतिकशब्दस्यतादेः
कादेश्चावयवस्यलोपोवाच्यः।तादिलोपः।अंतमः।कादिलोपः।।अंतितमः।कादिलोपोवाबहुलं।अन्यत्रापिदृश्यते।अंतिकेसीदतीतिअं
तिषत्।हर्षवपदादितिषत्वं।येव।अंतियः।मत्सीति।गौरादित्वात्ङीष्।मत्स्यशब्दस्ययोपधत्वाज्जातेरस्त्रीतिङीषप्राप्तइतिगौरादिषुपाठः
अनडुही।अनड्वाही।तिगौरादिगणेङीषंतयोःपाठोस्तिसआम्नुत्वार्थः।पुंवद्भावप्रतिषेधार्थश्चेतिदर्शयितुंमध्यस्थलोवेतोनड्वाहीपठति।अ
नडुह्यादि।तथाचानडुहीभार्यइस्यत्रपुंवद्भावोन।पितृव्यमातुलमातामहपितामहइत्यत्रचपितृमातृभ्यांपितरिवाच्येडामहच्निपात्य श्री।।
ते।मातरिषिच्चेतिमातरिवाच्यायांडामहच्चैवतस्यषित्वं।ततःषित्वादेवङीषिसिद्धेपुनर्गणेअनयोःपाठोऽनित्यःषितांङीषुइत्यस्यज्ञ १७५।।
पितामही ापनार्थइतिदर्शयितुंपठितवान्।मातामहीत्यादि।उत्यादीतिगौरादिगणोऽयमित्यर्थः।मनुष्यं।श्रेग।गवय।मुकय।अस्यश्रंगवर्जि
तानांतेषांयोपधत्वाज्जातिलक्षणस्यङीषोनिषेधेप्राप्तेपाठः।श्रंगशब्दस्यतुस्त्रीविषयत्वनिषेधेप्राप्ते।द्रोण।हरिण।कण।पटर।उकण।आ
मलक।कुवल।वरदर।विवानकर।पुष्कर।शष्कंड।सुखच।सुनंद।गडुल।खंडस्य।आढक।आढक।आनंद।सुपाद।शष्कुल।सूर्म।सूर।सूर्य
सूर्प।वातक।सल्लक।हालक।मातल।मालक।चेतस।एष।अनस।उमा।भंग।मह।मड।छेद।पेस।मेद।एतेषामादिवर्जितानांस्त्रीविष
यत्वादस्त्रीविषयादितिनिषेधेप्राप्ते।आनंदशब्दस्यतुअजातित्वात्ङीषिप्राप्ते।तस्कल।अनयोर्नित्यम्ङीषिप्राप्ते।एवंत्वकरणेऽप्युच्यते

ऽन्येषां॥ करणे किं। दुःखेन तस्या मित्यधिकरणे ङीवेव स्यात्। एषणी। स्वरे विशेषः। देहङीपि प्राप्ते देहनी। कावङ्गना। गवाङ्गनाटेन
ए। रज्जुना। नोडव। उत्वणापानपदेलेषां टिल्लुस्वरेणोङीपि प्राप्ते॥ मेवं॥ अस्याना नित्यात् ङीष्यप्राप्ते। गोतम। शाङ्गरवादित्वात् ङीनि प्राप्ते पस्ते
वचना असोपिस्यात्। आपस्तूत। गौरिकि। मोलिङ्गि। औद्गाहमानि। आतुविरतेसो लि ओरिलिङीष्यङि प्राप्ते आपिङ्गिक। अस्मा ज्ञानपदश
ह्वात स्वरियादजेनातङीपि। आलिधिकोरट। नाट। मूलाट। एषां स्त्री विषयत्वात् ङीष्यप्राप्ते। शाबन। पातन। आस्तरण। अधिकरण। ए
षां टिल्लुस्वरेणोङीपि। अधिकार अस्मात्वपि। आग्रहायणी। अणन्तत्वात् ङीपि। ईकारान्तस्य पाठः पुंवद्भावनिषेधार्थः। आग्रहायणी नाथ्ये
इति सिवना। प्रत्यवरोहिणी। टिल्लुस्वरेण ङीपि इकारान्तस्य पाठः। पट। पिंड। ऊर्ही। मृद्दी। पाड। लोहांड। कंदर। कदल। कतुंद। स्त्री विषयत्वा
त् ङीष्यप्राप्ते। तरुण। तलुनी। अनयोर्द्वयोर्ल्लस्वरेणोङीपि। बृहत महत। उगित्वात् ङीपि। सौधर्म आणि ओरितिष्यङि। रोहिणीन क्षत्रे रेवतीनक्ष
त्रे। विकल। निष्कल। यपि प्राप्ते। करो ल्लुलि वचने। पिप्पल्यादयश्च। पिप्पली। हरीतकी। कोशातकी। शमी। शरी। पृथिवी॥ ईकारान्तनिपातनं पुं
वद्भावनिषेधार्थं। पृथिवी नार्थः। अदृत्कारणादा नेतिगणो यं। देहेति। दंशदशने। दाम्नी। शशगुपुनेति श्रुत्॥ ॥जानपद॥ ॥अन्येभ्यादिवृत्ति
व्यतिरिक्तेर्थे अनन्तत्वात् टिड्ढाण इति ङीपि प्राप्ते वृत्तौ चापि जानपदीत्येवरूपं भवति को विशेष इत्यत आह। स्वरे भेद इति। ङीपि सति प्र
त्ययस्वरेणान्तोदात्तः स्यात्। ङीपि सति आद्युदात्तः स्यात्॥ जानपदशब्दस्य ञित्स्वरेणाद्युदात्तत्वात्। कुंडीति। अमत्रं चेदिति। पात्रं चेदाच्यमि
त्यर्थः। कुंडान्येति। क्रियाशब्दः। कुंडिदाहे। गुरुश्च हलः इत्यकार प्रत्ययः। यस्तु द्रव्यवाची कुंडशब्दः नित्यं क्लीवएवेति न प्रत्युदाहार्यः। इत्यादीति
आदिना। गोणी भवति। आवपनं चेत्। आवपनमिति प्रक्षिप्य धान्यादिनीयते तेन स्यात्। गोणान्या। स्थली स्यादकृत्रिमा चेत्। स्थलान्या। भाजीस्या
त् श्राणा पक्वा चेत्। भाजान्या। नागी स्थूला चेत्। नागशब्दस्य गुणवचनस्येदं ग्रहणं। जातिवाचिनस्तु ङीपु सिद्ध एव। नागान्या। काली वर्णश्चेत्॥
कालान्या। नीली अनाच्छादनं चेत्॥ अनाच्छादनेपि ओषधौ। प्राणिनि चेत्। वा प्रयोग इत्याह। औषधौ प्राणिनि चेति। संज्ञायां चेति। अनाच्छा

प्र॰प्र॰सु॰ ॥७६॥

दन एवार्थविकल्पः। कुशी अयोविकारश्चेत्। कुशान्या। कामुकी मैथुनेच्छा चेत्। कामुकान्या। कबरी केशवेशश्चेत्। कबरान्या। शोणात् वर्णो
नोतणतिनितो तानामित्याद्युदात्तत्वादन्यतोङीषि प्राप्ते विकल्पार्थं वचनं॥ वोतः॥ गुणमुक्तवान् गुणवचनः स पुनर्यः प्राग्गुणमभिधाय पश्चा
न्मतुब्लोपादभेदोपचाराद्वा द्रव्यमभिधत्ते स ज्ञेयः ननु च गुणो नाम कः॥ उच्यते। सत्त्वे निविशतेऽपैति पृथग्जातिषु दृश्यते। आधेयश्चाक्रि
याजश्च सोऽसत्त्वप्रकृतिर्गुणः॥ सत्त्वं द्रव्यं। वाक्यं हि व्यक्तं द्रव्य एव वर्त्तते॥ तज्जातिव्याप्तिरित्याह। अपैतीत्यपगच्छति। अर्थात् सत्त्वादेव। यथा पीतता ते आ
यां जातायां आम्रादेर्नीलता। नैवं द्रव्यत्वं द्रव्यादपैति। एवं चेद्ज्ञत्वं स्वस्तिमत्यादेर्वर्त्तते। अश्वादेश्चापैति। तज्जातिव्याप्तिरत आह। पृथग्जाति
षु दृश्यत इति। गोत्वं हि द्रव्यत्वावान्तरजातिषु दृश्यते। गुणस्तु दृश्यते यथाश्वे दृष्टा नीलता तृणादिष्वपि दृश्यते। एतेन समुदितेन सकलजातेर्व्यव
च्छेदः एवं तर्हि कर्म द्रव्ये वर्त्तते ततोऽपैति पृथग्जातिषु दृश्यते चेति तज्जातिव्याप्तिरत आह। आधेयश्चाक्रियाजश्चेति। आधेय उत्पाद्यः यथा पुष्पयो
गाद्गन्धो वस्त्रे। अक्रियाजो नित्यः। यथाकाशादेर्महत्त्वादिः। कर्म तु न तथा। उत्पाद्यानुत्पाद्यं किं तर्हि कर्मैव॥ एवं तर्हि द्रव्येति व्याप्तिस्तद्धि द्रव्य मी॥ ॥७६॥
मारंभके च वर्त्तते। तद्विनाशेऽपैति पृथग्जातिषु अवयवेषु दृश्यते निर्वर्त्यो निर्वर्त्यस्वरूपं चेति। अवयविनो निर्वर्त्यत्वात्। आकाशादेश्चानिर्वर्त्यत्वा
त्। अत आह। सोऽसत्त्वप्रकृतिरिति। गुणो न द्रव्यस्य भावः। द्रव्यत्वं तु द्रव्यस्य भाव इति। ननु पूर्वार्द्धं व्यर्थं। उत्तरार्द्धेनैव सर्वजातिव्यावृत्तेः। नित्यत्वेन
मनु तासामुत्पाद्यस्वभावात्। न च सति पूर्वार्द्धे यथा तैजसं परमाणुरूपं च मिलितमुत्पाद्यानुत्पाद्यस्वभावमिति द्वयोरपि गुणत्वं। तथा पाकजद्रव्यरू
पं जातिश्चेति मिलितमुत्पाद्यानुत्पाद्यस्वभावमिति जातिरपि गुणः स्यात्। अतः पूर्वार्द्धेन जातिव्यावृत्तिः। इति वार्त्तिकाद्वृत्तिः। विचारविशेषः प्रकी
र्णकांडादवगंतव्यः। मृद्वीत्यादि। मृदुशब्दो मृदुत्वं गुणमुक्त्वा तद्द्रव्यमभिधत्त इति गुणवचनः। अथ मदभ्रस्तासंज्ञा संप्रसारणं सलोपश्चेति ऊ पो
प्रत्ययांतः। प्रत्ययस्वरेणान्तोदात्तो मृदुशब्दः। शुचिशब्दो गुणवचनो नन्तकाशोत्तः। आखुरिति। जातिवचनोऽयं न गुणवचनः॥ अच्छस्वनीविति ठी
वक्तव्यं। तथा चोक्तं भाष्ये। गुणवचनान्ङीबाद्युदात्तार्थः। गुणवचनान्ङीब्वक्तव्यः। किं प्रयोजनं आद्युदात्तार्थः। आद्युदात्ताः प्रयोजयन्ति व

स्त्रीइति। एतच्च कैयटेन भाष्यप्रदीपव्याख्याने। वस्त्रीति। धान्येनिदित्यत्र निदिति वर्त्तमाने रदृसृस्त्रिह्रीति वसुशब्द आद्युदात्तो वस्वादित्यतः न
स्मात्तद्धीपिसतीकारोनुदात्तो भवति। ङीपुदात्तः स्यात्। अत्रोदात्तात्तु ङीपङीषोर्विशेषाभावः। उदात्तयणो हल्पूर्वादिति ङीप उदात्तत्वविधा
नादिति। खरुसंयोगोपधान्नेति। खरुशब्दात्संयोगोपधात् ङीषू नेत्यर्थः। खरुः पतिंवरा कन्या॥ ॥बह्वादिभ्यश्च॥ बह्वीति। बहुशब्दस्य गु
णवाचिन इह पाठो नित्यं छंदसीति एतदर्थः आदिना। अवति अवहति। वहति। शकटि। शक्तिः शास्त्री। शक्तिः शाक्ती। शस्त्र इति किं। शक्तिः सा
मर्थ्यं। अन्ये तु शक्तिः शस्त्रीति द्वयं पठंति शक्तिः शक्ती। शस्त्रिः शस्त्री॥ सारि। वारि। राति। अहि। कपि। मुनि। यष्टि। चंड। अराल। कमल। कृपाण।
विकट। विशाल। विशंकट। भरुज। चंद्रभागान्नद्यां। चंद्रभागी। चंद्रभागा नदी। नद्यां किं। चंद्रभागा देवता। कल्याण। उदार। पुराण। — — ति। अयं
केवलस्त्रियां नास्तीति। तदंत उदाहार्यः। दीर्घजिह्वी शरत्। पक्षेडाप्। निषेधो। दीर्घाही दीर्घाहा। इतः प्राण्यंगादिति। गणसूत्रे क्तिवि दिकारादक्ति
क्तिन इत्यपि गणसूत्रं। तस्यायमर्थः। कृत इकारः कृदिकारः। तदंतात् ङीष् स्यात्। सर्वतोक्तिन्नर्थादित्येके इति च॥ एके आचार्याः सर्वतः सर्वस्मा
त् इकारांतात् कृतो ऽकृतो पि अक्तिः भावार्थो न विद्यते क्तिन्नर्थो यस्य सोयमक्तिन्नर्थस्तस्मात् ङीषू स्यादित्याहुरित्यर्थः। अक्तिन्नर्थादिति किं। अ
करणिः। अहरणिः। सर्वतोक्तिन्नर्थादित्येतत्सिद्धे शकट्यादीनां पाठः प्रपंचार्थः। बह्वादिराकृतिगणः॥ ॥पुंयोगात्॥ ॥पुंयोगादिति हेतौ
पंचमी आख्यायामिति पंचम्यर्थे सप्तमी इत्यभिप्रेत्याह॥ या पुमाख्येत्यादि। पुंस आख्या पुमाख्या पुंसो वाचकः शब्द इत्यर्थः। पुंयोगात्स्त्रियां व
र्त्तत इति पुंसो योगः संबंधः। तस्येयमिति। तस्माद्धेतोः स्त्रियां वर्त्तत इति वाक्यार्थः। यः शब्दः पुंसो वाचकः अनंतराश्चात्पुरुषसंबंधात्स्त्रियां व ९१
र्तते तस्मात्तशब्दात् ङीष् स्यादिति। गोपीति। गाः पातीति गोपः। आतोनुपसर्गे कः। तस्य स्त्री गोपी। अत्र गोपशब्दस्य रक्षणरूपप्रवृत्तिनिमि
त्तं तस्य पुंसि सत्त्वेपि न स्त्रियां तस्मात्पुंवाचको गोपशब्दः पुंसंबंधात्स्त्रियमाहेति अतो ङीषू ज्ञानः। पुंयोगात्किं। देवता। अत्र देवदत्ताशब्दो
न पुंयोगात्स्त्रियमाह॥ यतः स्त्रिया इयं संज्ञा। आख्यायामिति किं। प्रसूता। अयं जातप्रसवा चेत्यर्थे। तस्या हि प्रसवस्य पुंयोगो निमि

प्र॰व्र॰सु॰ ।७७। त्तेतस्मात्पुंयोगात्स्वस्थताशब्दः स्त्रियांवर्त्तते। ननुपुंलात्किंकः। गोपालिकादीनांनेतिपालकशब्दात्स्त्रीत्वेधद्वर्यर्थः। तथाचोक्तं पालितोयम
तदर्पणे। अपालकंतादित्यत्र वाच्यं गोपालिकेतिदिग्गिति। तथाशामकोतुकीपि। पालकांतान्निषेधो गोपालिकापशुपालिकेति। सूर्य्यादि
ति॥ चकारोंतोदात्तार्थः। पकारसामान्यग्रहणार्थः हल्ड्याविति। सूर्येतिराजस्वपसूर्येतिकथंतोयमाचुदात्तः। तस्माच्छापिचितइत्यनेनां
तोदात्तो भवति। अन्यासूरीइति। अदेवतासूरी। ङीषुसूर्यतिष्येतियलोपः। इंद्रादेषामत्रपुंयोगइष्यते। तेषामागममात्रविधिः। ङीषतुप
र्वेणैवसिद्धिः। अन्येषांतु अर्थेविधीयते। अनुकासिद्धा वानुकरणमिंद्रमाचष्टे इंद्रयति ततः क्विपि इंद्रस्त्री। त्यत्रइंद्राणीतिदीर्घश्रवण
र्थ। इत्यादीति। आदिनावरुणाणी। भवानी। शर्वाणी। रुद्राणी। मृडानी। ब्रह्माणीतिकेचिदिति। तथाचमुग्धबोधइत्युक्तं। ब्रह्मरुद्र
७ भवशर्वमृडेंद्रवरुणाद्दुंति। हिमारण्ययोरितिमहत्वेगम्यमाने हिमशब्दादरण्यशब्दाच्चस्त्रियामानुक्ङीषो। अरण्यानीति। महदरण्यं
यवाद्दोषइति। यवाद्दोषेगम्यमाने स्त्रियांएवंवत्। यवानी। दुष्टोयवोयवानी। यावानानीति। यवानीलिपिः। तस्येदमित्यण्प्रसंगेङीपू
आनुगागमः। अणातु तदर्थस्यङीषैवोक्तत्वात्। मातुली त्यादि। मातुलस्यस्त्री उपाध्यायस्यस्त्री। आचार्यादणत्वंचेति। सुधादिषु श्री॥
द्रष्टव्यो यमितिभावः। आचार्याणीति। आचार्यस्यस्त्री। स्त्रयांतीवेतिकेचिदिति। तथाचोक्तं मुग्धबोधे मातुलोपाध्यायस्त्रियांत्वार्या ।७७।
स्त्रयांद्वेतिआनङनुवर्त्तते। क्रीतात्॥ क्रीतांतात्। करणादेरितिअदंतात्प्रातिपदिकादितिशेषः। प्रातिपदिकादिति इतिसर्वत्रानुवर्त्त
र्वस्त्रक्रीतीति। वस्त्रशब्दस्यकरणस्य क्रीतशब्देनकर्तृकरणे कृताबहुलमितिगतिकारकोपपदानांकृद्भिः सहसमासःप्राक्सुबुत्प
त्तेरितिपरिभाषयासुबुत्पत्तेःप्राक्समासः। क्वचिन्न। धनक्रीतेति अयंभावः। धनेनक्रीता धनक्रीता। यत्वेतेनसमासः। अत्र त्यात इत्यनुवर्त्ती ८।४३
तेततोनङीषिति। ननुवाचापिसुबुत्पत्तेःप्राक्समासेनङीषर्थं उच्यते। कर्तृकरणेकृताबहुलमितिबहुलवचनात्गतिकोपपदानांकृ
द्भिः सहसमासः प्राक्सुबुत्पत्तेः एतदपिबहुलंकरणपूर्वात्किं सुक्रीता॥ क्तात्॥ अल्पाख्यासमुदायोपाधिः। अत्र त्रिसीतिलिपूउपदे
लिपी

ह्रस्वः। अल्पे रमे र्लिसा इत्यस्मिन्नर्थे विवक्षिते सुब्सुपेति समासः। अल्पशब्दो गतार्थत्वान्न प्रयुज्यते। अल्पाख्यायां किं। चंदनलिप्ता। ब-
हुचंदनानुलिप्तेत्यर्थः। बहु॥॥ अस्वांगपूर्वपदाद्वेति वक्ष्यतीति स्वांगपूर्वमुदाहरति। ऊरुभिन्नेति। भिन्नौ ऊरू यस्याः जातिकालसुखा-
दिभ्यः परा निष्ठेति क्तांतस्य परनिपातः जातिकालसुखादिभ्यो नाच्छादनात्क्तोऽन्तमिति प्रतिपन्ना इयं तोदात्तत्वे। जातिवाची हि ऊरुशब्दः।
बहुव्रीहिः किं पादपतिता। अंतोदात्तात् किं। वस्त्रच्छन्ना। दंतजातेति। जाता दंता यस्याः पूर्ववत्क्तांतस्य परत्वमंतोदात्तत्वं च। बहुकृतेति। बहुकृते-
त्यत्र पूर्ववत्परस्वांतोदात्तत्वे। आदिना अकृता॥ मासजाता। सुखजाता। पाणिगृहीतीति। यस्या अग्निसाक्षिकं पाणिर्गृहीतः सा न्याय्या
तस्यां वाच्यायामित्यर्थः। पाणिगृहीतान्येति। यस्याः यथा कथंचित् पाणिर्गृहीतः सा॥ ॥ अस्वांग॥ ॥ अस्वांगादेरिति। स्वांगलक्षणमंतर-
मेव परिष्यति। न स्वांगमस्वांगं नञादिः यस्य बहुव्रीहेः। सुरापीतीति। पीता सुरा यया॥ जातिकालेति परनिपातः। जातिकालसुखादीत्यंतो-
दात्तत्वे। अंतोदात्तादित्यनुवर्तत इत्यभिप्रेत्याह। अंतोदात्तात्किमिति। वस्त्रछन्नेति। अनाच्छादनादिति अंतोदात्तत्वनिषेधात्। बहुव्रीहौ प्र-
कृत्या पूर्वपदमिति पूर्वपदप्रकृतिस्वरेणाद्युदात्तत्वे। अनुदात्तं पदमेकवर्ज्यमिति शेषमनुदात्तं। बहुलं संज्ञाछंदसोरिति वक्ष्यं। प्रवृद्धविलूनी॥
। प्रवृद्धविलूना। प्रवृद्धा चासौ विलूनेति नायं बहुव्रीहिः॥ ॥ स्वांगाच्च॥ ॥ सुमुखीति। सुष्ठु मुखं यस्याः इति बहुव्रीहिः। अत्र च प्रथमानि-
र्दिष्टमिति। सुखशब्दस्योपसर्जनत्वे। अतिकेशीति। कुगतिप्रादय इति तत्पुरुषः एकविभक्तिकेति केशशब्दस्योपसर्जनत्वे। स्वांगात् किं। ब-
हुयवा। उपसर्जनात् किं। अशिखा। नञ्तत्पुरुषः। स्वांगलक्षणमाह। अद्रवमित्यादि। मुखनासिकासंचारी वायुः प्राणः सो ऽस्यास्तीति प्रा-
णी। तत्र प्रतिष्ठितं तत्स्थानि स्थं मुखादि स्वांगमुच्यते। यद्येवं स्वेदेऽपि स्वांगं स्यात् प्राणिस्थत्वादत आह। अद्रवमिति॥ स्वेदस्तु द्रवरूपो ऽतो न तत्र
प्रसंगः। एवमपि ज्ञाने स्वांगं स्यात्। प्राणिस्थत्वाद्द्रवत्वाभावेत्यत आह। मूर्तिमदिति। असर्वगतस्य द्रव्यस्य परिमाणं मूर्तिः स्यो सा यस्यास्ति त-
न्मूर्तिमत्। न च सा ज्ञानस्यास्तीति। निर्गुणत्वाद्गुणानां। ज्ञानस्यात्मगुणत्वात्। यन्मते काठिन्यादिस्पर्शविशेषो मूर्तिस्तन्मतेनापि नेदं मूर्ति

प्र.प्र.सु. ।।९८।।

२

मवज्ञाने। नहि ज्ञानस्य स्पर्शोऽस्ति। एवमपि शोफस्याप्ययुतसिद्धस्य स्वाङ्गत्वं स्यात्। यथोक्तविशेषणविशिष्टत्वादत आह। अविकारजमिति।
विकारो वातादिवैषम्यं तज्जं विकारजं न विकारजमविकारजं। शोफस्तु विकारजः एवं चेद्वध्यापरिगतानां केशादीनां स्वाङ्गता न स्यादप्राणि
स्थत्वादत आह। अतत्स्थं तत्र दृष्टं चेदिति तस्मिन्प्राणिनि तिष्ठतीति तत्स्थं न तत्स्थमतत्स्थं। अप्राणिस्थमपि केशादि स्वाङ्गं स्यात् यदि तत्प्र
प्राणिनि दृष्टं स्यात्। एवमपि प्रतिमावयवानां मुखादीनां स्वाङ्गता न स्यात्।। अप्राणिस्थत्वादत आह।। तेन चेत्तत्तथा युतमिति। तेन प्राणिना
येन प्रकारेण स्थानविशेषेण संबद्धं तथा यद्यप्राणिना संबद्धं स्यात्।। अथवा तेन चेत्।। मुखादिना तत्। अप्राणिशरीरं द्रव्यं तथायुक्तं स्यात्। यथा प्रा
णिद्रव्यं एवमपि स्वाङ्गं स्यादिति। सर्वथायमर्थः।। यादृशं प्राणिनो मुखादि स्वाङ्गं तादृशमेव यद्यप्राणिनः स्यात् एवमपि स्वाङ्गं भवतीति। स्वा
ङ्गलक्षणपद्ये सर्वाङ्गस्थपदानां प्रयोजनं दर्शयन् प्रत्युदाहरति। बहुस्वेदा इत्यादिना विकारजत्वादित्यन्तेन। अत्र सर्वत्र स्वाङ्गत्वाभावान्

श्री

ङीषोऽभावः। सुकेशी सुकेशा रथ्येति तृतीयचरणस्योदाहरणं। अप्राणिस्थस्येत्यादि तत्र लक्ष्यप्रदर्शनं। सुस्तनीत्यादि चतुर्थचरणस्योदा
हरणं। प्राणिवदित्यादि लक्षणप्रदर्शनपरं सर्वमेतच्छ्लोकव्याख्यानरूपं व्याख्यानप्रायं।। ।।नासिका।। ।।स्वाङ्गाच्चोपसर्जनादित्येव सिद्धे बहु श्री।। ।।९८।।
चलक्षणे संयोगोपधलक्षणे निषेधे प्राप्ते वचनं। सहनञ्विद्यमानपूर्वलक्षणः निषेधः स्यादेव। आदिना शातोदरी शातोदरा। बिंबोष्ठी बिंबो
ष्ठा। दीर्घजंघी दीर्घजंघा। समदंती समदंता। चारुकर्णी चारुकर्णा। तीक्ष्णशृंगी तीक्ष्णशृंगा। पुच्छाच्चेति वक्तव्यं। कबरेत्यादि। एत्याः परा सु
च्छान्निर्दिष्टं ङीषित्यर्थः। आदिना मणिपुच्छी। विषपुच्छी। शरपुच्छी। श्येनपक्षीत्यादि। श्येनवत्पक्षौ यस्याः। श्येनवत्पुच्छं यस्याः।। ।।नक्रोडादिः
।। ।।स्वाङ्गादिति प्राप्तो ङीषु निषिध्यते। सुक्रोडेति। सुष्ठु क्रोडा यस्याः सा सुक्रोडा। अश्वानामुरः क्रोडा स्त्रीलिंगोयं। उत्तरपदस्य गोस्त्रियोरु
पसर्जनस्येति ह्रस्वः।। ततो ङीषो निषेधे टाप्।। सुखुरा। शाखा। वाला। शफगुल्फ आकृतिगणोयमिति अयं क्रोडादिराकृतिगणः। तेनास्य सुभ
गा। सुभगेत्यादि सिद्धं। सुजघनेति बहुच उदाहरणं।। ।।सह।। ।।स्वाङ्गा। इति। नासिकोदरेति च प्राप्तो ङीषु निषिध्यते। सकेशेति। सहके

शोर्वर्त्तते। तेन सहेति तुल्ययोगेति समासः। चोपसर्ज्जनस्येति सः। अनासिकेति। अविद्यमाना नासिका यस्याः नञोऽस्त्यर्थानामिति समासः॥
॥नख॥ ॥पूर्वपदात्संज्ञायामग इति णत्वं॥ ॥वहः॥ ॥वाह इति। ण्वि प्रत्ययान्तस्य निर्देशः। कर्मण्युपपदे वहेर्ण्विविधानात्
केवलस्य वहेः संभवोऽस्तीति सामर्थ्याद् अदन्तविधिर्विज्ञायते इत्यभिप्रेत्याह। वाहन्तादिति। अत्र स्वरितत्वात् ङीषनुवर्त्तते न ङीप् अस्वरितत्वा
दित्यभिप्रेत्याह ङीषस्यादिति। जारोहीति। जारं वहतीति विग्रहः ण्वेति ण्विः। एवेः सर्वापहारिलोपः। प्रत्ययलक्षणेनोपधावृद्धिः। ङीषि वाह ऊठिति
ऊठ्। एत्येधत्यूठ्स्विति वृद्धिः। सख्य॥ ॥एताविति सखिशब्दात् ङीष् सखी। नास्याः शिशुरस्ति अशिश्वी शब्दादपि ङीष्। अशिश्वीति निपात्य
त इत्यर्थः। भाषायां किं सखा सप्तपदी भव। अशिश्वुरेव॥ ॥जातेः॥ ॥ जातिवाचकत्वात् प्रातिपदिकं। जातिशब्देनोक्तं। अभिधेये अभिधानोपचा
रादित्यर्थः। जातिवाचीति। अस्त्रीविषयादिति विषयशब्दोऽनन्यत्रापि वर्त्तते अत एवाह। यन्न च स्त्रियां नियतमिति। जातिलक्षणं चोक्तं। आ
कृतिग्रहणा जातिर्लिङ्गानां च न सर्वभाक्॥ सकृदाख्यातनिर्ग्राह्या गोत्रं च चरणैः सहेति। ग्रह्यते नेनेति ग्रहणं करणे ल्युट्। आकृतिः संस्थानं ग्रह
णं यस्याः सा आकृतिग्रहणा उपसर्जनत्वान्न ङीप्॥ अवयवविशेषव्यङ्ग्येत्यर्थः। एतेन गोत्वमृगत्वघटत्वादिजातिर्लक्षिता। ब्राह्मणक्षत्रियाद्या
कारैः सादृश्यात्। ब्राह्मणत्वजातिरनेन संगृहीतेति तामाह। लिङ्गानां च न सर्वभागिति। या सर्वाणि लिङ्गानि न भजति सा आकाराव्यंग्यापि
जातिः एतच्च प्रायः प्रायणाय च वचनेन आकृतिग्रहणेत्यस्य संकोचस्य मितित तदादौ सर्वलिंगत्वेप्याकृतिव्यंग्यत्वान्नित्त्वं सिद्धं। ब्राह्मणादिर्हि ब्राह्म
णो ब्राह्मणी तिद्वे लिंगे भजति। न तु क्लीबमिति लिंगानां न सर्वभाक्॥ सर्वशब्दस्योपपदस्य लिंगापेक्षत्वेपि गमकत्वात् ण्वो ण्विः प्रत्ययः॥ उ
पपदस्य समासश्चालिङ्गानामिति कर्मणि षष्ठी। सकृदाख्याननिर्ग्राह्येति सकृदुपदिष्टा सती। निश्चेतुं शक्येत्यर्थः। अनेन ब्राह्मणजातिर्बद
वदत्तौदैरसर्वलिंगत्वेपि सकृदाख्याननिर्ग्राह्यत्वाभावान्न जातित्वं। नित्यत्वं प्रत्येकपरिसमाप्तत्वमित्येते जातिधर्माश्च सकृदाख्याननिर्ग्राह्येत्य
नेनोक्ताः। तथाहि। यद्येकान्यस्यादेकस्मिन्गोपिंडे गौरिति सकृदुपदिष्टा पिंडान्तरेण गृह्येत नित्या चेन्न स्यात् यदा पदिष्टात्तस्मिन्न पिंडे नष्टे न स्पृशेत।

एकर्लेर

प्र॰प्र॰सु॰ ॥७५॥

यदि प्रत्येकं परिसमाप्ता न स्यात्तत्राख्याता तास्मिन्नपि पिंडे सा दृश्येत नान्यदेशेषु । किं पुनः पिंडांतरे । अनुक्तं संगृह्णाति । गोत्रं च चरणैः सहेति । गोत्रमिति र
वीप्स्वायीणां संज्ञा अपत्यस्य । अपत्यप्रत्ययांता च जातिरित्यर्थः ।। साहिनाकारव्यंग्या ।। नाडायनो नाडायनी नाडायनमिति सर्वलिंगं प्राक् । अतः पृथग्ग्र
हणं । चरणशब्दो वेदशाखाध्ययनक्रियासंबंधाः क्रियाशब्दात्तन्न जातिशब्दात् । तेषां जातित्वप्रतिपादनाय चरणैः सहेत्युक्तं विचारविशेषस्तु प्रकी
र्णकोडादवगंतव्यः । भृगी । हंसीति । आकृतिग्रहणाज्जातेरुदाहरणं । ब्राह्मणीति । असर्वलिंगत्वाज्जाडः । पटीति तु । एवं यास्त्र । गोत्रचरणावपीति । एत
दव्याख्यातं ।। नाडायनीति गोत्रलक्षणा जातिः । कठीवह्वृचीति । चरणलक्षणा । मुंडेति मुंडगुणयोगान्मुंडा । गुणशब्दोयं ।। बलाकेति जातिवाच्यप्ययं
सर्वदा स्त्रियामेव नियतः । क्षत्रियेति । गोत्रमिह जातिः । क्षत्रात् घ इति अपत्ये घविधानात् । असर्वलिंगत्वात् सति सकृदाख्यातनिर्ग्राह्यत्वाद्वा जाति
त्वं । गवयहयेत्यादि । गौरादिषु गवयादीनां पाठ इदानींतनः । तथा चोक्तं प्राप्यदीपके यद्येनं । गौरादिषु इदानींतने गवयादयः प्रक्षिप्ता इति । वार्त्तिका
रेणाहि ज्ञायत इति ।। पाक ।। स्त्रीविषयत्वात् पूर्वेणा प्राप्ते ङीष् विधीयते । पाककर्णादयः समुदाया जातिविशेषवाचिनः । ऊङुतः ।। अचेती । ति । अचेते
रपत्यं स्त्री । दैह्यैत्कौशलाजादाः ष्यङ् स्त्रियामवंतिकुंतिकुरुभ्यश्चेति लुक् । मनुष्यग्रहणं किं । तित्तिरिः । आकृतिग्रहणा जातिः । जातेरित्यनु
वर्त्तमाने पुनर्जातिग्रहणं योपधादपि यथा स्यात् । उदमेयस्यापत्यं अत इञ् औदमेयी । इञ्ग्रहणमुपसंख्यानमजाद्यर्थं ।। सुतंगमेन निर्वृत्ता सौतंगमी ।
कुञ्जलशादिस्त्वरेणा चातुरर्थिकरुञ् ।। न चेयं जातिः । तपरकरणं त्वकृतं तादर्थ्यं प्रमतेः क्विपि न ङीषु । अवंत्रीरिति ।। ऊङुतः ।। ङकारो नोङ्धात्वोरि
ति विशेषणार्थः । सवर्णदीर्घत्वेनैव दीर्घत्वे सिद्धे यदीर्घोच्चारणं तल्लोपाद्दि ज्ञापयति प्राक्तस्य कण्ठो बाधनार्थं तेन ब्रह्मबंधूरिति नित्यमूकारो न एव
स्यात् । हे तस्याध्यायहीना यां ब्राह्मणजाता बंधवे ब्रह्मद्वी हि विचर्तिते । तथा जीवबंधः । सवर्णदीर्घ इति । कुरोरपत्यं स्त्री । उवौदिस्योएयः । स्त्रियामवंतिः
कुंतिकुरुभ्यश्चेति लुक् ।। गोत्रत्वाज्जातिः ।। ततः कुरुशब्दादूङ् । अकः सवर्णे दीर्घ इति दीर्घः । ततः कुरूरिति स्थिते । चयंता । योयमिति । एकः पूर्वपर
योरित्यधिकारेण य एकादेशो विधीयते सः । एवं स्वयम्भ्वादि । ययोः तस्यां त आदिवदंतवद्भूतस्तद्ग्रहणेन गृह्यते तद्वदेकादेशोपि तद्ग्रहणेन गृह्य

वी॰ दे॰
श्री ॥
॥७५॥

तदस्यातिदेशार्थः। सर्वपरयोरिति स्थानषष्ठ्यं तत्त्वेन श्रवणात्। सर्वपरसमुदाय एकादेशस्य स्थानी न सर्वपरौ समुदायिनौ समुदायो
ह्येकादेशेन निवर्त्यते न त्वावयविनिवृत्तिं विना समुदायनिवृत्तिर्नेति अवयवयोर्नान्तरीयकतया निवर्त्यते इति अवयवयोरानुमानिकं स्थानित्वं
तत्र श्रुतानुमानिकयोः श्रुते नैव संबंधो बलीयानिति अवयवाश्रयं कार्यं स्थानिवद्भावाद् अप्राप्तमित्यन्तादिवद्भावो विधीयते। एवं स्थिते कुरू
रित्यत्र प्रातिपदिकांतो यदुकारो यश्चो ङ ऊकारस्तयोर्य एकादेशस्तस्य सर्वस्यांतवदित्यन्तवद्भावे सति यदि स्वादिसिध्यति तदा ह्यन्त्यादि
वद्भावादिति। आदिवद्भावः सर्ववद्भावः प्रस्तुते प्रातिपदिकवद्भाव इति यावत्। ततो ङ्याप्प्रातिपदिकादित्यधिकारेण विधीयमानानां स्वादीना
मुत्पत्तिः स्यादित्यर्थः। वर्णाश्रयविधावंतवद्भावो नेष्यते। तेन षष्ठ्याम्भिरित्यत्र नेवद्भावात् अतो भिस ऐसिति ऐसन। ऊङ् यतः आश्रयेनांतादि
दिति ज्ञेयं। कर्कन्धूरिति। ननु स्याच ऊङ् ङीष्मति को विशेषः। यत ऊङ्स्त्यपि तदेव रूपं स एव स्वरः। तथाहि ङेच्चक्कः। फल्गुक्का। कर्कन्धू इत्यप्रत्य
योत एव ऊङ्स्यादित इति चेत् उच्यते। कर्कन्धूघ्ना कर्कन्धूघ्ने इत्यत्र नोङ्धात्वोरिति विभक्त्या त्युदात्तत्वनिषेधार्थं। अन्यथा यथा खञ्जी खञ्ज्वै इत्य
त्रस्मन्न। तथेहापि न स्यात्। स्पष्टत्वात् सूत्रं न व्याख्यायते।। ।। बाह्वन्तात्संज्ञायां।। ।। बाह्वन्तात् ऊङ् स्यात् भद्रबाहूः संज्ञायां किं। वृत्तौ बाहू
अस्याः वृत्तबाहुः।। ।।पंगोः।। ।।श्वशुरस्येति। अस्मात् ऊङ् प्रत्ययः अस्योकाराकारयोर्लोपश्च वक्तव्यः। श्वश्रूरिति। श्वशुरः श्वश्रूरिति तौ यो
तनिर्देशात् ज्ञापकात् स्वाद्युत्पत्तिः।। ।।ऊरू।। करभोरूरिति। करभ इव ऊरू यस्याः सा। साक्षाद्वा वार्थमूर्वंतादिति वाच्ये उत्तरपदादित्युक्तं यत्र के
वल ऊरुशब्द उत्तरपदं तत्र यथा स्यात् इह मा भूत्।। स्वामिन ऊरू स्वाम्यूरू हस्तिन इव स्वाम्यूरू यस्याः हस्तिस्वाम्यूरूरिति भवति स्येन
इर्वं तं प्रातिपदिकं। न त्वरूत्तरपदं किं तु स्वाम्यूरूत्तरपदं औपम्ये किं। वृत्तोरूः।। ।।संहित। आदिना शफोरूः। शफशब्दः संश्लिष्टवाची। लक्षणो
रूः लक्ष्मीवद्वाची लक्षणशब्दः। वामोरूः। तन्वादेरिति। तथा चोक्तं मुग्धबोधे। तन्वादेर्वेति। स्पष्टत्वात् सूत्रं न व्याख्यायते।। ।।संज्ञायां।। ।।
कद्रुकमंडलुशब्दाभ्यां संज्ञायां विषये स्त्रियामूङ् स्यात्। अलिदीर्घवचनं। कद्रूः। कमंडलूः। संज्ञायां किं। कद्रुः। कमंडलुः।। ।।शार्ङ्गर।। आदिना।।

प्र॰प्र॰सु
॥८०॥

कापटवः। बाहवः। गौतमः। गोडुलः। एतेभ्यश्च गौत्ते नातो ङीपि प्राप्ते वचनं। गौतमशब्दात् गौरादित्वात् ङीषपि। कावीमंडव्या। ब्राह्मणकृतेय।
ऋलिषेय। आशोकेयाः एते द्विगीत्याः अश्वा पिङी पि बाह्यायन। जायन। जाव्यता। कैशेय। वर्गतः। काव्यशेब्यौ यडेतौ। नतश्चापि प्राप्ते। रहि॥
पर्य्येहिः कृदिकारांतौ नतो ङीषि। औरपाने। शुंडिकाद्यंतः। अराजुः। चंडा। डावतंड। जातित्वात् ङीषि। गोगवद्धो श्ववतोः संज्ञायां। उमिलु
रत्नेभ्यो ङीविप्राप्ते। ननु चेमावाद्युदात्तौ ततश्च ङीपि ङीनिवाविशेषाभावात्। आह॥ आद्यादिषु नित्यहस्वत्वार्थे। गोगवत्तितरा। गोरिमनित
रेति। अन्यथा उगितश्चेति वा ङ्हस्वत्वं स्यात्। इति शार्ङ्गरवादिः। वैदीति। अनुष्यानंतर्ये विदादिभ्यो ङ्‌गोत्रत्वात् जातित्वस्ते ङीविप्राप्ते
ङीन्विधिः। स्वरे विशेषः। रुन्नरयोर्हेतेङ्ग्रेति। शार्ङ्गरवादिगणस्थं सूत्रं। नृशब्दात् दंतत्वात् ङीपि नरशब्दाद्ध्यपि प्राप्ते वचनं॥ जातित्वात् ङी
पि वा। यङः। चः स्वरार्थ इति। चितइत्यंतोदात्तार्थः। पकारः सामान्यग्रहणार्थः। कौमुदगंध्येत्यादि। कुमुदस्येव गंधोस्य करीषस्येव गंधोस्य
कुमुदगंधिः। करीषगंधिः। तस्य गोत्रापत्यं स्त्री अण्। वाराहस्य गोत्रापत्यं स्त्री अतइञ्। ततो अणिञो रनार्षयोर्गुरूपोत्तमयोः ष्यङ् गोत्र इति अ
णिञोः ष्यङादेशः। ततश्चाप्। पौतिमाष्येति। पूतिमाषस्य गोत्रापत्यं गर्गादित्वाद्यञ्। ततश्चाप्। आवट्यात्रपायत्वात् उक्तं। आवट्याच्च॥ गर्गादि
यञंतादवटशब्दाच्चाप् स्यात्। आवट्या। यञश्चेति ङीपि प्राप्ते वचनं। यूनस्तिः। ङीपोवादइति। अन्येभ्य इति प्राप्तस्य। तद्धितत्वादिति। तद्धि
तत्वादित्यनुवृत्तेरिति भावः। कथं युवतीति। यौवतेः शत्रादिके कृते उगितश्चेति ङीप्॥ ॥ श्रीरामाचार्यसूनुर्हरिहरभक्तेर्नै
कायधीः श्रीनृसिंहाज्ञाप्यौयं माणिकां वा प्पजनयदसुरं विठ्ठलाचार्यनामाचार्य॥ ॥ तस्य श्रीपाणिनीयाद्यनुगुणसगुणप्रक्रियाकौमुदी
व्याख्याने स्मिन्प्रसादेसुविशदमतः प्रत्ययाः संप्रदिष्टाः॥ ॥ अथ विभक्त्यर्था उच्यते॥ ॥ प्रातिपदिकार्थलिंगेति॥ ॥ प्रातिपदिकार्थः
सत्तेति। सत्तेत्युपलक्षणं॥ यत्रार्थांतरानपेक्षयाशब्दप्रवृत्तिः॥ स सर्वप्रा॥७७॥ ॥७॥ ॥७॥ ॥७॥ ॥७॥ ॥७॥ ॥७
॥श्री॥ ॥श्री॥ ॥श्री॥ ॥श्री॥ ॥७॥ ॥श्री॥ ॥७॥ ॥७॥ ॥७॥ ॥श्री॥ ॥७॥ ॥श्री॥ ॥७॥ ॥श्री॥

७२

श्री॥
॥८०॥

तिपदिकार्थः शब्दप्रवृत्तिनिमित्तमिति यावत्। लिंगं पुंस्त्रीनपुंसकवाच्यः क्रमात् उपचयापचयस्थितिरूपो वस्तुधर्मः। तथा चोक्तं माहाभा
ष्ये। संस्त्यानप्रसवौ लिंगमिति। संस्त्यानं संहतिरपचयः। प्रसवः प्रवृत्तिरुपचय इत्यर्थः। तत्र संस्त्यानविवक्षायां स्त्री प्रसवविवक्षायां
पुमान्। उभयोरविवक्षायां नपुंसकमिति। तच्च क्वचिदुपचयो यथा ह्रदः। क्वचिदपचयो यथा गंगा। क्वचिदुपचयापचययोरभावः। यथा ज्ञा
नं। क्वचिदुपचयापचयौ। यथा मृगः मृगी। क्वचित्त्रयं यथा तटः तटी तटमिति। अयं च लिंगस्यैकः प्रकारो वर्णितः। लिंगप्रकारविशे
षास्तु भर्तृहरिणा प्रकीर्णकाण्डे उक्ता ज्ञेयाः। तेन स्तनकेशादिसंबंधो विशिष्टा वा स्तनादयः। तदुपव्यंजना ज्ञानिर्गुणावस्था गुणा एव या।
शब्दोपजनितोऽर्थोऽस्या शब्दसंस्कार इत्यपि। लिंगानां लिंगतत्त्वज्ञैर्विकल्प्याः संप्रदर्शिताः। इत्यारभ्य इदमपि यत् वेति शब्दसंस्कारमात्रं चेति। मि
मित्तदर्शनादर्थः केचित् सर्वत्र लक्ष्यते। तादृशं विषयत्वेन निमित्तं व्यवतिष्ठते तदुक्तं तेन ग्रंथसंदर्भेण सर्वप्रकारविशिष्टं लिंगं सम्यग्विचारि
तं। परिमाणं खारीद्रोणप्रस्थ इत्यादिकं। संख्यैतौ मानं तत्त्वोन्मानादेरुपलक्षणं। वचनं एकत्वद्वित्वबहुत्वानि॥ मात्रशब्देति॥ मात्रशब्दस्य प्र
तिपदिकार्थमात्रे लिंगमात्रे परिमाणमात्रे वचनमात्रे प्रथमेत्यर्थः। उच्चैः नीचैः इति। प्रातिपदिकार्थस्योदाहरणं। स्त्रीलिंगमात्रसंख्या चेतीते
वद्धे तास्यादि निरपेक्षस्यार्थमात्रस्य॥ यदि प्रातिपदिकार्थमात्रे प्रथमा नोच्येत तर्हि उच्चैः नीचैः इत्यादौ षष्ठी शेष इति षष्ठी स्यात् ततस्तत्र
मउच्चैः नवस्वमित्यत्र स्वर्वाया। प्रथमायां विशेषलिंगविकल्पे जनेमध्यादि विधिर्न स्यात्। कुरुः श्रीः ज्ञानमित्यत्र लिंगस्योदाहरणं न
न्वत्र प्रातिपदिकार्थ इत्येव प्रथमा सिद्धा लिंगस्यापि प्रातिपदिकार्थत्वात्। तिरश्च यथा राज्ञः पुरुष इति। न सिद्धा। तथा हि विशेष्यं किं विना कुला
दयः शब्दाः किं पुंसा समाख्यस्यन्ते उत स्त्रीत्वेन क्लीबत्वेनेति संदेहो भवति। तच्च यथा राज्ञः पुरुष इति। प्रातिपदिकेनानुपात्ते स्वस्वामिसंबंधे तस्या
भिधानार्थं षष्ठ्यपेक्ष्यते। तथा चापि पुंस्त्वादीनामभिधानार्थं षष्ठी स्यात्। अत्र न्यायत्वप्रशस्त्रियाः सविशेषपर्यायवादय इत्यर्थः। तदा स्त्रीत्वस्य प्राति
पदिकार्थत्वात् कुमारी इत्यादौ प्रथमा न स्यात्। तस्माल्लिंगग्रहणं कार्यं। खारी द्रोण इति परिमाणस्योदाहरणं। ननु चात्र प्रातिपदिकार्थेइ

प्र॰प्र॰सु ॥८१॥

स्येव सिद्धा प्रथमा॥ तथाहि द्रोणादयः शब्दास्तौ हि दारुमये वा परिमाणे अर्थान्तरे सिद्धा यदा परिमाणे वर्त्तन्ते नैपेक्षा एव वर्त्तन्ते। सत्यं प्रसिद्धा यदा परिमा

णे वर्त्तन्ते। यदा तु तत्परिमाणपरिमिते धान्यादौ सो यमित्यभिसंबंधात् वर्त्तन्ते। द्रोणपरिमितो व्रीहिर्द्रोण इति। तत्र प्रथमा न स्यात्। ततः परि

माणग्रहणं। यद्येवं निमित्तरूपेण निमित्तिनो भिधानात् तु व्यतिरिक्त एव प्रातिपदिकार्थ इत्येव प्रथमा इति प्रातिपदिकार्थ न स्यात्॥ गुरुर्वैति ॰ स

गौणस्य ग्रहणायोगात्। अत्र तु परिमाणस्याधिक्यात् न त्वेवमपि लिंगग्रहणादेव प्रथमा स्यात्। मैवं॥ यत्र हि परिमाणे नास्ति सो वकाशो लिं

गग्रहणस्य स्यात्। अत्र तु परिमाणस्याधिक्यात् षष्ठ्येव स्यात्। तस्मात् परिमाणग्रहणं। तच्चोन्मादेरप्युपलक्षणं तेन वृत्ते पठं। हस्तः पटः॥ ना

दीर्घकाष्ठमित्यत्रापि प्रथमा स्यात्। एकः द्वौ बहव इति वचनग्रहणस्योदाहरणं। उक्ते प्यप्ये कृत्वादिषु प्रथमा यथा स्यादिति वचनग्रहणं। अन्य

था अनभिहिताधिकारात् उक्तेष्वेव कृत्वादिषु न स्यात्। ननु प्रातिपदिकात् प्रथमा विधीयते। तत्रासत्यपि प्रातिपदिकग्रहणे अर्थग्रहणमात्रे सति

प्रातिपदिकार्थ एवेति विज्ञास्यते। तत्किं प्रातिपदिकग्रहणेन। उच्यते। निपातस्यानर्थकस्य प्रातिपदिकत्वमुक्तं। ततो पि यथा स्यात्। प्रलंबते मी॥

अध्यागच्छतीति। कृत्तद्धितसमासाश्चेति कृदंतस्य तद्धितांतस्य समासस्य च प्रातिपदिकत्वात् तदर्थस्य च प्रातिपदिकार्थत्वात् कृदर्थादौ प्राति ८१॥

पदिकार्थे त्वनेनैव प्रथमा स्यादित्याह॥ कृदर्थ इत्यादि। युड् इति। युजिर् योगे। अस्मात्कर्त्तरि त्विगिलिक्विन्। औपगव इति। उपगोरपत्यं। र

तस्यापत्यमित्यपत्यार्थे अण्। तद्धितः। चित्रगुरिति। चित्रा गावो यस्येति अनेकमन्यपदार्थे इत्यन्यपदार्थे बहुव्रीहिः समासः। संबोधने॥ आ

भिमुखीकरणं हि संबोधनं तस्य प्रातिपदिकार्थाद् अधिकत्वात् पूर्वेणान प्राप्नोतीत्यारंभः। हे पचन् हे पचमानेत्यत्र संबोधनस्य शतृशानच्प्रत्ययो

उक्तत्वात् प्रातिपदिकार्थान्तर्भूतत्वात् पूर्वेणैव प्रथमा। एतत्तात्पर्यकं सूत्रं व्याख्यायते। सामंत्रितं संबोधने प्रथमायास्तदंतं शब्दरूपं आमंत्रि

तं स्यात्। आमंत्रितप्रदेशाः आमंत्रितस्य चेत्येवमादयः। सेति वचनं प्रातिपदिकार्थेति। या संबोधने प्रथमा विहिता तस्या अपि यथा स्यादेव

मर्थं। हे पचन्निति। अन्यथा अनंतरस्य विधिर्वा भवति प्रतिषेधो वेति। अनेनानंतरसूत्रेण या विहिता तत्रैव स्यान्नान्यत्र॥ ॥ इति निरूपिता प्रथमा॥ ॥

कर्तुः॥ ॥अत्र यद्यपि क्रिययेति नोक्तं तथापि कर्तृशब्दस्य संबंधिशब्दत्वात् क्रियोपस्थानमित्यभिप्रेत्याह॥ कर्तुः क्रिययेति। ईप्सितशब्दोयमाप्ति
दे।मि रूढोभिप्रेतोस्ति च क्रियाशब्दः। आप्तुमिष्टइति तत्र रूढिशब्दस्य कर्तृसाध्यया क्रियया संबंधाभावात् क्रियाशब्दोत्र गृह्यतइत्यभिप्रेत्याह। आप्तुमिष्टत
ममिति। तच्च कर्म त्रिविधं। निर्वर्त्यं विकार्यं प्राप्यं चेति। तत्र निर्वर्त्यं यदसदेव जायते। यथा कटं करोतीति। विकार्यं तु यत्सत्ताकमेवावस्थांतरमापद्य
ते। तदपि द्विविधं। एकं प्रकृत्युच्छेदसंभूतं यथा काष्ठं भस्म करोतीति। अपरं गुणांतराधानेन व्यपदेशांतरनिमित्तं। यथा सुवर्णं कुंडलं करोतीति।
प्राप्यं तु यत्र निर्वर्त्यविकार्यसंबंधिनो विशेषाः प्रत्यक्षेणानुमानेन वा न प्रतीयंते केवलं प्राप्तिमात्रं प्रतीयते। यथा आदित्यं पश्यतीति। तथा चायम
र्थो भर्तृहरिणोक्तः। यदसज्जायते सद्वा जन्मना यत्प्रकाशते। तन्निर्वर्त्यं विकार्यं च कर्म द्वेधा व्यवस्थितं। प्रकृत्युच्छेदसंभूतं किंचित्काष्ठादिभस्म
वत्। किंचिद्गुणांतरोत्पत्त्या सुवर्णादिविकारवत्। क्रियाकृतविशेषाणां सिद्धिर्यत्र न गम्यते। दर्शनादनुमानाद्वा तत्प्राप्यमिति कथ्यतइति। एवमीप्सि
सु ततमं त्रिविधं। तथा चोक्तं निर्वर्त्यं च विकार्यं च प्राप्यं चेति त्रिधा मतं। तत्रेप्सिततमं कर्म चतुर्धान्यत्तु कल्पितं। औदासीन्येन यत्प्राप्यं यच्च कर्तुरनीप्सितं॥
संज्ञांतरैरनाख्यातं यद्यच्चाप्यन्यपूर्वकमिति। कर्तुरिति किं। माषेष्वश्वं बध्नाति। कर्मण ईप्सिता माषा न कर्तुः। ईप्सितइति किं। अग्नेर्माणवकं वारयति। ण:
तमग्रहणं किं। पयसा ओदनं भुंक्ते। अधिशीङ्स्थासां कर्मेत्यतः कर्मेत्यनुवृत्तौ पुनः कर्मग्रहणं आधारनिवृत्त्यर्थं। नह्याधारेण संबद्धं तदनु
वृत्तावाधारस्याप्यनुवृत्तिः स्यात्। ततश्च गेहे प्रविशतीत्यादौ एव स्यात्॥ ओदनं पचतीत्यत्र न स्यात्। पुनः कर्मग्रहणात्तु सर्वं सुसिध्यति॥ कर्मणि
अनभिहितइत्यनुवर्तते। तत्राभिपूर्वो दधातिः सर्वविधानीमादत्त इति बंधने वर्तते। श्लोके अभिहितइत्युच्चारणे। अर्थो अभिहितइति प्रतिपादने॥
स्पा हि नेतेरपि गतिरिह ह्यर्थोऽभिपूर्वस्याभिहितमिति स्यात्। तत्र कर्मादीनां बंधनाद्यर्थासंभवात् प्रतिपादनार्थोभिहितशब्दः। तथा यद्यनभिहिते
कर्मणि द्वितीयेति। सामान्येनोच्येत। ततो यथा कृतः कट इत्यत्र क्तेन कर्मणउक्तत्वाद्द्वितीया न॥ तथा कटं करोति भीष्ममुदारं दर्शनीयमित्यत्रा
पि कटशब्दादुत्पद्यमानतया द्वितीयया भीष्मादिगतस्य कर्मणउक्तत्वात् भीष्मादिभ्यो द्वितीया न स्यात्। अतः परिगणनं कर्तव्यमित्येतत्सर्वं

चेतसि कृत्वाह। तिङ्कृत्तद्धितसमासैरित्युक्ते कर्मणीति। तैरेवैरनुक्ते कर्मण्यभिहितायां संख्यायां द्वितीया स्यादित्यर्थः। संख्याया विभक्त्यर्थत्वात्॥ ॥
तथोक्तं च हरिणा। निमित्तमेकमित्यत्र विभक्त्या नाभिधीयते। तद्गतं तु यदेकत्वं विभक्तिस्तत्र वर्तत इति। तथा च सति अनभिहिते कर्मणि द्विती
या। बहुषु बहुवचनमित्यादेरेकवाक्यता सिध्यति। तथा चोक्तं काशिकायां वृत्तौ। बहुषु बहुवचनमित्येवमादिना संख्या वाच्यत्वेन विभक्ती
नामुपदिष्टा। तद्विशेषणार्थमिदमारभ्यते अनभिहितकर्माद्याश्रयेष्वेकत्वादिषु द्वितीयादयो वेदितव्या इति। हरिं भजतीति देवदत्त इति शेषः
अत्र देवदत्तस्य कर्तुर्भजनक्रियया हरिराप्तुमिष्टतम इति कर्म तत्र प्राप्यं। एवं निर्वर्त्यविकार्ययोरुदाहार्यं। तिङाद्यनभिहितेत्विति। तिङ्कृत्तद्धितसमासै
रुक्ते कर्मादौ कारके प्रातिपदिकार्थेति सूत्रेण प्रथमेत्यर्थः। तथा चोक्तं कारकपरीक्षायां तत्कर्मादिषु कारकेष्वनभिहितेषु द्वितीयादयः कर्त
व्याः। अभिहितेषु प्रथमेत्येव विभक्तीनां विषयविभाग इति। अत एवोक्तं न्यासकृता। अभिहितो योऽर्थः संपन्नः प्रातिपदिकार्थ इति। तच्च तिङाद्यभि
हितस्य कर्मण उदाहरणान्याह। सेव्यत इत्यादि। प्राप्तानंदो लक्ष्म्या सेवितो हरिर्मया सेव्यत इत्यन्वयः। सेव्यत इति षेवृ सेवने। अस्माल्लः कर्मणी
ति कर्मणि लट्। भावकर्मणोरित्यात्मनेपदं॥ सार्वधातुके यक्। अत्र हरिः कर्म सन् तिङोक्त इति प्रथमा उक्ता। सेवित इति तस्मादेव धातोः क्तयोरे
वेति कर्मणि क्तः। स च क्तेनोक्ते कर्मेति सेवित इति प्रथमा। प्राप्तानंद इति। प्राप्त आनंदो यमिति। कर्मण्यन्यपदार्थे अनेकमन्यपदार्थ इति बहुव्री
हिः समासः। तत्र समासेनोक्तं कर्मेति प्राप्तानंद इति प्रथमा। शत्य इति। शताच्च ठन्यतावशत इति। क्रीतार्थे तद्धितो यत्। तेन क्रयस्य कर्मोक्तमिति
शत्य इति प्रथमा॥ हि तिङ्कृत्तद्धितसमासैरिति परिगणनं कर्तव्यं॥ तथा चोक्तं न्यासे॥ कटशब्दस्तु विशिष्टद्रव्यवचन इति तत उत्पद्यमाना द्वि
तीया तद्गतमेव कर्म शक्नोत्यभिधातुं नान्यत्। तत्कथं तया भीष्मादिकर्माभिधीयते। तथा च निरर्थकं परिगणनं। तस्मात्तिङ्कृत्तद्धितसमासै
रेवाभिधानं भवतीति संभवदुदाहरणप्रदर्शनमेतत्परिसंख्यानं वेदितव्यमिति॥ ॥तथा॥ ईप्सिततमवत् क्रियया युक्तमिति। येन प्रकारेणेई
प्सिततमं कर्तुः क्रियया युज्यते। तेनैव चेत्प्रकारेण। अनीप्सितमपि युज्यते तर्हि अनीप्सितमपि कर्मसंज्ञं स्यादित्यर्थः। ईप्सितादन्यमनीप्सितमिति।

श्री

पर्य्युदासोयं। तेनयत् द्वेष्यं यच्चोपेक्षणीयं तत्त्द्वयमप्यनीप्सितं। एतदेवाभिप्रेत्योदाहरणद्वयमाह। विषं भुंक्ते इति द्वेष्यस्योदाहरणं। ग्रामं गच्छं
स्तृणं स्पृशतीत्युपेक्षणीयस्योदाहरणं॥ ॥अकथितं॥ ॥अपादानादीति॥ अपादान। संप्रदान। अधिकरण। करण। कर्म। कर्तृभिः कारक संज्ञा
विशेषैरनुक्तमित्यर्थः। कारकमिति। अत्र च कारके इत्यधिकारोस्ति। तस्य चायमर्थः॥ कारकं निमित्तं तच्चापादानादिविषयं विशेषणत्वेनाधि
क्रियते। कारके इति निर्द्धारणे सप्तमी। जात्यभिप्रायेणैकवचनमिति। ततश्चात्रायमर्थः कारकेषु मध्ये अपादानादिविशेषैरकथितं यत्क्रियाया
निमित्तं तत्कर्मसंज्ञं स्यादिति। कारकं किं। माणवकस्य पितरं पंथानं पृच्छति। माणवकस्येत्यत्राकारकत्वात्। कथितेपि कर्मसंज्ञा न। नटस्य गा
थां शृणोतीत्यादि। अन्यथा तु व्यवच्छेदार्थं परिगणनं करोति। दुह्याच्यर्थेत्यादिना श्लोकेन। तेन दुहादीनामेव प्रयोगे अकथितस्य कर्मसंज्ञा
नान्येषां। श्लोकस्यायमर्थः। अपादानादिविशेषैरकथितं कारकं कर्मसंज्ञं स्यादित्युक्तं। तच्च कारकं विशिनष्टि। दुह्याच्यर्थेत्यादिना। दुह प्रपूर
णे। याच्यर्थः याञ्चार्थः। रुधिर आवरणे॥ पच्छ ज्ञीप्सायां॥ चिञ् चयने॥ ब्रूञ् व्यक्तायां वाचि॥ शासु अनुशिष्टौ। जि जये। एतेषां धातूनां द्वंद्वः। ते
तेषां कर्म कर्तुरीप्सिततमं मन्वादि तेन सह युनक्तीति कर्मयुक्। एतद्धातुकर्मसंबद्धमित्यर्थः। तथा णी प्रापणे। हृञ् हरणे। कृष विलेखने। थि
मंथ विलोडने। वह प्रापणे। दंड दंडने॥ ग्रह उपादाने॥ मुष स्तेये॥ डुपचष् पाके। एतेषामपि यत्कर्म तत्तु भजतीति कर्मभाक्॥ एवंविधं यदकथि
तं कारकं तत्कर्मसंज्ञमित्यर्थः। तथा चोक्तं वार्त्तिककारेण॥ दुहियाचिरुधिप्रच्छिभिक्षिचिञामुपयोगनिमित्तमपूर्वविधौ। ब्रूविशासिगुणेन च
यत्सचते तदकीर्त्तितमाचरितं कविनेति। दुहादीनां प्रयोगे अपूर्वे विधौ सति यदुपयोगनिमित्तं तदकीर्त्तितमाचरितं कविना सूत्रकारेण। अन्वयः। उ
पयुज्यत इति उपयोगो मुख्यः॥ दुहादिकर्म तस्य निमित्तं संपादकं। अपूर्वविधिरपादानादीनामविवक्षा। गुणेन कर्मणा सचते संबंधं प्राप्नोती
ति। तथापि नीवह्योर्हरतेश्चापि गत्यर्थानां तथैव च। द्विकर्मकेषु ग्रहणमिति। अत्रापि चकारेण जयत्यादीनां समुच्चयः। तथा चोक्तं न्यास
कारेण। अत्रापि श्लोके चकारो जयतिप्रभृतीनामनुक्तसमुच्चयार्थ इति॥ दुहादीनां प्रयोगे क्रमेणोदाहरणान्याह॥ सार्द्धश्लोकचतुष्टयेन

प्र॰प्रसु॰ ॥८५॥ योऽद्यदेहेत्यादिनातं हरिं वन्देऽहमित्यग्रिमेणान्वयः। तं कं यः पृथुरूपधरः सन् धरामवनमदनीयं वसु दुदोह। स्मारयामास। दुहे लिट्॥ अत्रान्ते मुख्यक
र्म। तत्र कर्त्तुरीप्सिततमं कर्मेति कर्मसंज्ञा। कर्त्तुः क्रियया ईप्सिततमत्वात्। धराया प्रधानं। तत्राकथितं चेति कर्मसंज्ञा। अपादानादिविशेषैरकथि
तत्वात्। ननु चात्रोक्तापादानसंज्ञा। तथा हि। धरा न स्मरति। तद्वेगद्धा हरिः स्मारयति। एवं तल्लक्षार्थ्यमाणे ततो पक्रामतीति स्पष्ट एवापायस्त
तो नेदमुदाहरणमिति चेन्न॥ मैवं। यद्यप्यत्रापायोस्ति तथापि नात्र धराया अवधित्वं विवक्षितं किंत्वन्यं प्रति निमित्तत्वमात्रमतः स्यादेवो
दाहरणं। ननु च धरामित्यादौ तथायुक्तं चानीप्सितमिति कर्मत्वं स्यात्। दीप्सितादन्यत्वात्॥ मैवं॥ धरादेरपि प्रकर्षेरहितस्य ईप्सितत्वस्य विव
क्षितत्वात् अतो कथितं चेत्यनेनैव कर्मत्वं। कर्मणि द्वितीयेति द्वितीया। तथा यो वामनरूपधरः सन्। बलिं दैत्यं वसुधां पृथ्वीं ययाचे याचि
तवान्। वसुधामित्येतदीप्सिततमं कर्म। बलिमित्येतदकथितं। सर्वत्र कर्त्तुरीप्सिततममिति कर्मत्वं॥ उत्तरत्राकथितं चेति। एवमत्र सर्वत्र
ज्ञेयं॥ ननु चात्रापि बलेः सकाशाद्वसुधां याचत इत्यस्यापायस्ततोपादानत्वं स्यात्॥ मैवं॥ नह्यत्र याचनादेवापायः स्यात्। किं तर्हि याचितो
सौ यदा दास्यति तदानीमपायस्तत्समये नापायः। अथवापायो न विवक्षितः। तथा दैत्यान् दितेः पुत्रान् पाताले अधोभुवने रुरोध प्रवेशया ॥ श्री॥ ॥८५॥
मास स्थापयामास वा। पातालेन हेतुना दैत्यान् स्थापयामासेति यावत्। अत्र दैत्यानितीप्सिततमं मुख्यं कर्म॥ पातालमित्यप्रधानं अकथि
तं। ननु चात्र प्रवेशयामासेत्यर्थे कर्त्तुरिति कर्मसंज्ञा स्यात्। स्थापयामासेत्यत्रार्थे आधारोधिकरणमिति अधिकरणसंज्ञा॥ ॥सत्यं॥ ॥ य
दा पातालस्येप्सिततमत्वमाधारत्वं वा विवक्ष्येत तदा एते स्याताम्। न चैवं ह्यत्र विवक्षिते॥ किं तर्हि अवरोधनक्रियां प्रति निमित्तत्वमात्रं विव
क्षितमतो कथितत्वं। तथा यस्तपेंद्रः सन् इंद्रममराधीश्वरं वांछितमभिलषितं पप्रच्छ वा पृष्टवांश्च॥ अत्रैवं शब्दः सर्वत्र संबध्यते वांछितमि
त्येतन्मुख्यं कर्म। इंद्रमित्येतदकथितं। ननु चात्राप्यपायोस्ति स हि तस्मादुपदेशमादित्सते॥ मैवं॥ नात्रापायो विवक्षितः किंतु प्रश्नक्रिया
निमित्तमात्रत्वं॥ तथा यो वेदं धर्मान् वाचितो ऽस्तु वेदेन कारणेन धर्माक्त्वयं बकारेति। यावत्। अत्र च धर्मानिति मुख्यं कर्म। वेदमित्यकथि
तं

पा ८
त्रि ५
५

ते। ननु चात्राप्यपायोस्ति। वेदाद्धि धर्मोन्नादत्ते।। मैवं।। तस्याविवक्षितत्वात्। धर्मो वत्त्वयं प्रतिहेतुत्वमात्रस्य विवक्षितत्वात्। तथा यस्तात्मधर्मो न स्वसे
विनः स्वसेवकान अब्रवीत्। प्रत्यपादयत्। स्वसेविभिर्निमित्तभूतैर्धर्मान् ददातीति यावत्। अत्र धर्मानिति मुख्यं कर्म। स्वसेविन इति अकथितं। ननु चात्र सं
संप्रदानं स्यात्।। धर्मेणाहिंसप्रदेयेन स्वसेविनामभिप्रेयमानत्वात्।। मैवं।। अविवक्षितत्वात् संप्रदानत्वस्य धर्मदानक्रियानिमित्तत्वमात्रस्य विवक्षितत्वा
त्। तथा यः पार्थिवान् पृथिवीश्वरान् जल्किमन्वशात्। प्रत्ययोहयत्।। अत्र जल्किमिति मुख्यं कर्म।। पार्थिवानित्यकथितं। अत्र संप्रदानप्रसंगपरिहारो
वचनं वत्। एवमुत्तरत्रापि अपादानादित्वाशंकायामविवक्षैवोत्तरं ज्ञेयं। तथा यस्त्रिलोकीं त्रयाणां लोकानां समाहारस्त्रिलोकी। तां रिपून् जयत्
।जिगाय अत्र रिपूनिति मुख्यं कर्म। त्रिलोकीमित्यकथितं। यो बंधून्स्व सुहृदो द्वारकां पुरीमनयत् नीतवान्। अत्र बंधवो मुख्यं कर्म द्वारकात्वकथितं
। तथा यो रुक्मिणीं भीष्मकन्यां पुरंदरकामदहरत्। जहार। नीतवानिति यावत्। अत्र रुक्मिणीमिति मुख्यं कर्म। पुरमित्यकथितं। तथा यः कंसं रवग्र
तुलं विपिनं गहनं च कर्ष। आकृष्टवान्। अत्र कंसो मुख्यं कर्म। विपिनमकथितं। तथा यः क्षीरधिं समुद्रं सुधाममृतं ममंथ मथितवान्। अत्र सुधा मुख्यं
कर्म क्षीरधिमित्यकथितं। तथा यः सिंधुं समुद्रं मंदरं मंदरनामानं पर्वतमवहत्। उवाह। समुद्रेण निमित्तेन मंदरं दधारेति यावत्। मंदरो मुख्यं कर्म
सिंधुरकथितं। तथा योऽरीन् वैरिणोऽसून् प्राणान् अदंडयत्। दंडितवान्। वैरिभिर्निमित्तभूतैः प्राणान् जग्राहेति यावत्। अत्रासवो मुख्यं कर्म वै
रिणोऽकथितं। तथा यो द्युतरुं पारिजातं शक्रं अजयाहरत् हृतवान्। शक्रेण निमित्तेन द्युतरुं जहारेति यावत्। अत्र द्युतरुर्मुख्यं कर्म। शक्र
इत्यकथितं। तथा यो दितिजात् दैत्यात् सुधाममृतममुष्णात्। अपजहार। अत्र सुधा मुख्यं कर्म। दितिजास्त्वकथितं। तथा यः प्राणिनां कर्मध
र्मीधर्मो धर्मलक्षणं। फलं स्वर्गनिरयादिलक्षणं पचति। कर्मनिमित्तेन फलं निःपादयतीत्यर्थः। अत्र फलं मुख्यं कर्म। कर्मेत्वकथितं। तं हरिं भजे
सेवे इत्यर्थः।। ।।एवं द्विकर्मका उदाहृताः।। ।।इत्यादीत्यादिना।। अकर्मकधातुप्रयोगे देशकालाध्वभावा अपि अकथितं कर्म भवंति तेष्वुदा
हरणं उच्यंते। तथा चोक्तं महाभाष्ये। कालभावाध्वगंतव्याः कर्मसंज्ञा ह्यकर्मणां। देशश्चाकर्मकाणां च कर्मसंज्ञा भवंतीति। देश उदाह्रियते। कु

५ नोभवेद्धि।

प्र॰सु॰ ।१८५॥ कृतास्तेकृत्स्नस्त्वपिति। कालः॥ मासमास्ते। अध्यक्रोशमास्ते। अध्यादः गोदोहमास्ते इति। एते देशादयोऽकथिताः। तयोक्तं न्यासकारेण। सर्वे चैते
कालादयोऽकथिताः सर्वविधेः कस्यचिदविषयत्वादिति मतीनां। अर्थशब्दो गतिबुद्धिप्रत्यवसानैः प्रत्येकमभिसंबध्यत इत्याह। गत्यर्थादीना
मितिप्रत्यवसानमभ्यवहारः। गत्यर्थानां ज्ञानार्थानां अभ्यवहारार्थानां धातूनां तथा शब्दकर्मकाणामकर्मकाणां च॥ अणौ यः कर्त्ता स णौ इति हेतुमति
चेति प्रयोजकव्यापारे विधीयमानो यो णिच् तस्मिन् सति एषां धातूनां कर्त्ता स एवं तासामेषां कर्मसंज्ञः स्यादित्यर्थः। गत्यर्थादीन् क्रमेणोदाहृ
पद्येनउदाहरति। शत्रूनित्यादि। स श्रीहरिर्मम गतिः सकः यः शत्रून्स्वर्गमगमयत्। प्रापयत्। अत्र अणौ एवं तस्य गत्यर्थस्य गमेर्धातोः स्वर्गं गच्छंतः
शत्रवः कर्त्तारः। ते एवं तस्य तस्यैव कर्मसंज्ञा जातास्तत्र शत्रूनिति द्वितीया। यः स्वान् स्वकीयान् वेदार्थमवेदयत् ज्ञापयामास। अत्राणौ एवं तस्य ज्ञाना
र्थस्य विदेः कर्त्तारो वेदार्थं विदंतस्ते णे एवं तस्य तस्यैव कर्म जाताः॥ यो देवान् अमृतमाशयत् भोजयामास अत्रापि अमृतमश्नंतो देवाः प्रत्यवसानार्थ
स्य अश्नातेः एवं तस्य कर्त्तारो एवं तस्य कर्माऽभवन्। तथा यो विधिं ब्रह्माणं वेदमध्यापयत् पाठयामास। अत्राधीङ् धातोर्वेदलक्षणशब्दकर्मणो
एवं तस्याध्येता एवं तस्य कर्त्ता विधिः आसीत् एवं तस्य कर्माऽभूत्। एवं सामर्थ्यः सश्रीहरिर्मे गतिः। ननु केवल तत्स्त्वं स्वयं अर्थ। यतो णेस्ते धातो प्रयोजकव्यापा
रेण प्रेषणादिना प्रयोज्यस्य कर्त्तुर्व्याप्तुमिष्टतमत्वात् कर्तुरीप्सिततमं कर्मेत्यैव कर्मसंज्ञा सिद्धा। सत्यं। नियमार्थमेतद्वचनं। प्रयोजकव्यापारे
णव्याप्यमानस्य यदि कर्मसंज्ञा स्यात् तर्हि गत्यर्थादीनामेव स्यात् नान्येषामिति। नीवह्योर्नेति। नीञ् प्रापणे। वह प्रापणे। गत्यर्थत्वादनयो
तयोः कर्त्ता कर्मसंज्ञः प्राप्तः स निषिध्यते। भृत्येनेति। अत्र एवं तस्य कर्त्तरि भृत्ये णौ सत्यपि कर्त्तृकरणयोस्तृतीयेति तृतीया जाता। नियंतृ इति
नियच्छति। विशिष्टे विषये स्थापयतीति नियंता सारथिः। नियंता कर्त्ता यस्य स नियंतृकर्त्तृकः॥ तस्य वहेः न निषेध इति। अत्र एवं तस्य कर्त्ता णौ क ।१८५।
र्मसंज्ञो भवत्येवेत्यर्थः। वाहयतीति। वाहमर्थं वहंति। तान्भृतः सारथिर्वाहयतीत्यर्थः। अचवाहानि त्यत्र अणौ एवं तत्कर्त्तरि णौ सति कर्मत्वाद्द्विती
या॥ अदीति। अद भक्षणे। खाद भक्षणे। प्रत्यवसानार्थत्वात् तयोः प्राप्ता कर्मसंज्ञा निषिध्यते। भक्षयतीत्यादि। बटुरन्नं भक्षयति तमन्यो भक्षणे

य

प्रेरयतीत्यर्थः। ननु चाचारे णौ कर्त्ता नास्ति सर्वमपि स्वार्थिकणिजंतत्वात् जुसस्तेस्ततः प्राप्तिरेव नास्तीति व्यर्थो निषेधः। मैवं। गतिबुद्ध्यादिसू
त्रे हेतुमण्णिचू ग्रहणं। तस्य पूर्वं कर्तुः संभवात्। न स्वार्थिकस्य तस्य पूर्वकर्त्तुरसंभवात्। ततश्च हेतुमण्णिचः पूर्वं कर्त्ता बटुः तस्मिन्नागते कर्म
त्वं प्राप्नोतीति निषेधात् अस्ययस्यमास्यमिति। हिंसयतीत्यर्थः। अयहेति। केचिदिति भाष्यकारादयः। तथोक्तं भाष्ये। शृणोत्यादीनां चोपसंख्या
नमशब्दक्रियत्वात्। के पुनः शृणोत्यादयः। शृणोति विजानाति उपलभ्यत इति। तथा दृशेः सर्वत्रोपसंख्यानं कर्त्तव्यं। पश्यति रूपं तर्कः। प्रका
र्षापणं। तं दर्शयते रूपं तर्कं कार्षापणमिति। कांचिदासस्तु ग्रहिंण्यंतं हि कर्मकं प्रयुक्तवान्। अया चितारं न हि देवदेवमद्रिः सुतां ग्राहयितुं श
शाकेति। तथा भट्टिकाव्येऽपि प्रयोगः। अजिग्रहत्तं जनको धनुस्तदिति। अयोति केचिदिति भाष्यकारादयः। तथोक्तं महाभाष्ये। शब्दकर्मनि
र्देशे शब्दक्रियाणामिति चेत्। ह्वयतीत्यादीनां प्रतिषेधो वक्तव्यः। के पुनर्ह्वयत्यादयः। ह्वयति क्रंदयति शब्दायते इति। तथा चोपदेवपंडितेन
पि पुरुषबोधे उक्तं। खादादेस्तु रक्षोस्य खादयदनाययदूह्लोकमाक्रंदयत्कपिञ्जिरायपदास्तु गामः। शब्दापयन्रिपुमजूहवदाद्रपद्ब
शैलानवाह्वयद्रक्षस्य यद्दिग्रकस्यामिति।। हृक्रोः।। ।। गत्यर्थादयो निवृत्ताः तेनोभयत्र विभाषेयं। यदाहरति गौ त्यर्थो अभ्यवहारार्थो वा हरति
कारं देवदत्तः।। अभ्यवहरति ओदनमिति। करोतिश्चाकर्मकः स्यात्। ओदनस्य पूर्णश्छात्रा विकुर्वते इति तदा प्राप्तेयं। यदाहरति। स्तेऽभ्यव प
र्थो हरति ओदनमिति। करोतिश्चाकर्मकः स्यात् (ओदन) करोति कटं देवदत्त इति। तदा तु प्राप्ते।। अभिवादयते दर्शयतेइति लिच श्चेयात्मनेपदे। अ
धिशीङ्।। आधारोऽधिकरणमित्यधिकरणसंज्ञायां तदपवादः कर्मसंज्ञानेन विधीयते। एषामिति। शीङ् स्वप्ने ष्ठा गतिनिवृत्तौ। आस उपवेशने।। ।।
।। ।।अभिनि।। ।। अधिकरणस्यापवादः।। ।। विशतेरिति विश प्रवेशने अस्य अभिनिविशते सन्मार्गमिति। सदाचारेण तत्परो भवतीत्यर्थः।। उप
विन्चेति। परिक्रयणे संप्रदानमन्यतरस्यामित्यतो अन्यतरस्यामित्यनुवर्त्तते सा च व्यवस्थितविभाषा तेन क्वचिन्नेत्यर्थः।। ।।उपान्व।।
लुग्विकरणालुग्विकरणयोरलुग्विकरणस्यैव ग्रहणमिति परिभाषया वस निवास इति भौवादिको गृह्यते। न चैवं सत्याच्छादन इति

व

भ

अ॰ सु॰ अदादिरित्यभिप्रेत्याह॥ उपादिपूर्वस्य वसतेरिति। अभुक्त्यर्थस्येति। अभोजनार्थस्येत्यर्थः। उभसर्वतसोरिति। उभयसर्वशब्दयो
॥८५॥ स्तसिप्रत्ययान्तयोर्योगे द्वितीया कार्या। षष्ठ्यपवादोऽयं। अत्र यद्यप्युभशब्दः पठितस्तथापि सामर्थ्यादुभयशब्दो गृह्यते नोभशब्दः।
स्य तस्य नित्यद्विवचनान्तविषयत्वात्तसोऽभावात् तथा चोदाहरिष्यति। उभयतो गोपाः कृष्णमिति। तथा धिक्शब्देनापि योगे द्वितीया कार्या
॥ तथा उपर्यादिषु त्रिषु उपरि अधि अधस् आम्रेडितान्तेषु उक्तद्विर्वचनेषु सत्सु तद्योगे द्वितीया कार्या ततो यथोक्तं अन्यत्रापि द्वितीय
दृश्यते। इत्थं वार्तिकार्थः। क्रमेणोदाहरति। उभयत इत्यादि। पञ्चम्यास्तसिल्। धिगित्यादि। धिक्शब्दः कुत्साद्योती। धिग्जाल्मेत्यादौ जा त
ल्मादयः कर्मत्वेन न विवक्षिताः किन्तु संबोध्यत्वेन तस्मान्न द्वितीया। उपर्युपरीत्यादि। उपर्यध्यधसः सामीप्य इति द्विर्वचनं॥ ततोऽन्य
त्रापि दृश्यत इत्युक्तं क्वान्यत्र दृश्यत इत्याशंक्याह॥ अभित इत्यादि। अभितः परित इति शब्दौ सर्वत इत्यर्थौ। समया निकषा शब्दौ सामीप्य ६८।
लक्षणशीलकौ। स चोभयाश्रित इति यद्यप्युभयोरपि ताभ्यां योगस्तथापि यत्र षष्ठी प्राप्ता तत्रैव द्वितीया स्यात्। षष्ठ्यपवादत्वात्॥ अथवादे
हुत्सर्गनिवर्तक इति तद्विषयमेवावलंब्यते॥ प्रतिशब्दः क्रियाविशेषणं न कर्मप्रवचनीयः॥ कृष्णं प्रतीति ज्ञाति भक्तिरिति शेषः। अपि शब्दो
विकल्पार्थः तेन हा मातः हा पितरित्यादि सिद्धं स्यात्॥ ॥अन्तरा॥ ॥ एतौ द्वावपि निपातौ वचनद्वयेनेति न। तवान्तरायां पुरि वसति टाबन्तस्यान्तर श्री॥
शब्दस्य योगे द्वितीया न। तथा किं तवैतयोरन्तरेण ज्ञातेनेति विशेषवाचिना तृतीयान्तेनान्तरेणेति शब्देन योगे न द्वितीया। अन्तरा त्वां मां च हरि ॥८५॥
रिति त्वं मम च मध्ये हरिरित्यर्थः। अत्र हरिशब्दस्य स्वार्थे प्रवृत्तिः। युष्मदस्मदोस्तु परार्थे हरिविशेषणार्थे प्रवृत्तत्वात्। न च हरिशब्दात्स्वार्थेव
र्तमानात् प्राधान्येऽस्ति नाम्ना प्रातिपदिकार्थेऽत्र प्रवृत्तत्वात्प्रथमैव स्यात्। युष्मदस्मद्भ्यां त्वप्रधानाभ्यां प्रथमान्तेन हरिणा पञ्जमिते। व्यतिरेके
षष्ठ्यां प्राप्तायां तदपवादो द्वितीया विधीयते॥ अन्तरेण हरिमिति हरिं विनेत्यर्थः। युक्त इति किं। अन्तरा त्वां मां च वटोः पटः। अत्र न वटुशब्द
स्यान्तराशब्देन योगः॥ ॥अनु॥ ॥ कर्मप्रवचनीया इत्यधिकारः स्नादनुवर्तते कर्मप्रवचनीयग्रहणं। कर्म क्रियां प्रोक्तवन्तः कर्मप्रवचनी।

इति

याउत्यन्वर्थसंज्ञाविज्ञानार्थं महती संज्ञा क्रियते॥ ततश्च क्रियायोगद्योतितवन्तो नतु संप्रति क्रियां द्योतयंति केवलं संबंधविशेषं द्योतयंति
ते कर्मप्रवचनीयाः। उक्तं स्यात्। लक्षणमित्थं हेतुर्विवक्षितः। ननु लक्षणेत्थंभूतमित्यादिनैव सिद्धे एतत्सूत्रारंभस्य किं प्रयोजनं। तत्र लक्ष
णेत्थमित्यत्र सूत्रे ग्रंथकार एव वक्ष्यति॥ ॥कर्म॥ ॥जपमनु प्रावर्षदिति जपेन हेतुना प्रावर्षत् जपमनु निशम्य प्रावर्षदित्यर्थः॥ तृतीया॥
उक्तसंज्ञः कर्मप्रवचनीयसंज्ञ इत्यर्थः। अवसितेति षिञ् बंधने इत्यस्य निष्ठायां रूपं सहार्थो वर्त्तते यार्थः। सहयुक्तेऽप्रधान इति सहार्थे तृती
याविधानात् इत्यभिप्रेत्याह। नद्या सह संबद्धेत्यर्थः॥ हीने॥ अनु हरिं सुरा इति हरिमपेक्ष्यान्ये देवा हीना इत्यपेक्षया योगजनितः संबंधः तत्र
षष्ठीं प्राप्तायां तदपवादो द्वितीया। अप्रसिध्यानशक्तिः स्वाजात्या उत्कृष्टादेवस्यात्रैवैकैव विजात्या संबंधस्य द्योतितत्वात् सुरा इत्यत्रापरासं
बंधविवक्षितः॥ ॥उप॥ ॥अधिकमित्यध्याहृत्य सूत्रमुच्यते। न चानधिकेन विनाधिकत्वं संभवति। ततश्चानधिकानधिकसंबंधे अध्याहृतद्वि
याजनिते संज्ञेयं चकाराद्धीने च। अधिके सप्तमी वक्ष्यत इति यस्मादधिकं यस्य चेश्वरवचनं तत्र सप्तमीति सूत्रेण। उपहरिमिति हरेर्हीना
देवा इत्यर्थः॥ ॥लक्षणे॥ ॥लक्षणं चिन्हमिति हाभिप्रेतं। इत्थंभूतमिति अयं प्रकारः इत्थंभूतमभिविष्टः प्राप्तवान् किंचित्प्रकारं प्राप्त इत्यर्थः॥
तस्याख्यानमित्थंभूताख्यानं उच्यत इति भागः स्वीक्रियमाणोंऽशः पदार्थानां व्याप्तुमिच्छा वीप्सा॥ लक्षणे हरिं प्रतीति। प्रकाशेते भ
क्तिरिति शेषः। हरिर्लक्षणं प्रकाशमाना भक्तिर्लक्ष्यं हरिं प्राप्य भक्तिः प्रकाश्यत इति प्राप्तिक्रियाजनितो लक्ष्यलक्षणसंबंधः प्रतिना द्यो
त्यते। एवं हरिं परीत्यादावपि पर्यादिभिः संबंधो द्योत्यत इति ध्येयं। ननु अनुरपि लक्षणे वर्तमानोऽत्र कर्मप्रवचनीयश्चेत्स्यात्तर्ह्यनु
र्लक्षण इति सूत्रं व्यर्थमित्याशंक्याह॥ हेताविति॥ इत्थंभूताख्याने भक्तो विष्णुं प्रतीत्यादि। भक्तिरूपं प्रकारं प्राप्तस्य देवदत्तस्य विष्णोश्च वि
षयविषयिभावं प्रत्यादयः प्रकाशयंति। विष्णोर्भक्त इति तात्पर्यार्थः॥ भागे लक्ष्मीर्हरिं प्रतीत्यादि। लक्ष्मीरूपस्य भागस्य हरिणा स्वीका

प्र॰ प्र॰ सु॰ रजनितं स्वस्वामिभावः प्रत्यादिभिर्द्योत्यते। हरेः प्रति लक्ष्मीरिति तात्पर्यार्थः। वीप्सायां॥ वृक्षं वृक्षं प्रतीत्यादिव्याप्तुमिष्टस्य वृक्षसमुदा
॥८६॥ यस्य वृक्षैः समुदायेन संबंधो वप्स्यादिभिर्द्योत्यते। एकैकस्मिन्वृक्षे प्रत्युरस्तीत्यर्थः। एवं किं। परिषिंचतीत्यादि। परितः सर्वतः सिंचतीत्य
र्थः। कर्मप्रवचनीयसंज्ञाभावस्य फलमाह। अत्रेत्यादि। अत्र कर्मप्रवचनीयत्वाभावात् उपसर्गत्वेन तस्य उपसर्गात्सुनोतीत्यादिना षत्वमि
त्यर्थः॥ ॥अभि॥ ॥हरिमभिवर्त्तते इति लक्षणे॥ भक्तो हरिमभीतीत्थंभूताख्याने। देवं देवमभिषिंचतीति। वीप्सायां। अत्र कर्मप्रवच
नीयसंज्ञोपसर्गसंज्ञाया बाधितत्वान्न षत्वं। यदत्र मामभिष्यादिति। असोरल्लोपइत्यकारलोपः। कर्मप्रवचनीयत्वाभावादुपसर्गत्वमस्त्येव तेनो
पसर्गप्रादुर्भ्यामित्यादिना षत्वं॥ ॥परिमिति॥ ॥यद्यप्यस्तिरकर्मकः तथाप्यकर्मका अपि ते धातवः सोपसर्गाः सकर्मका भवंतीति कर्मलिङ्गि प
तीया॥ अतिः॥ निष्पन्नेपि फले क्रियाप्रवृत्तिरतिक्रमणं। अतिदेवान्कृष्ण इति। दीव्यंतीति देवास्तान्देवनेनातिक्रम्य वर्त्तते कृष्ण इत्यर्थः।
संज्ञायामुदाहार्यमतिसिक्तं भवता साध्वतिसिक्तं भवतानुपयोगित्वात् त्यक्ताभिश्चत्वारि सूत्राणि प्रसंगाद्व्याख्यायंते। अभिपूरी अनर्थकौ॥
एतावनर्थकौ कर्मप्रवचनीयसंज्ञौ स्तः। कुतोध्यागच्छति। कुतः पर्य्यागच्छति गतिस्तु उपसर्गसंज्ञे मा भूतामिति वचनं। सुः पूजायां कर्मप्रवचनी श्री॥
यः॥ सुसिक्तं सुस्तुतं भवता। उपसर्गसंज्ञाभावः षोन॥ पूजायां किं सुषिक्तं॥ ॥अपिः पदार्थसंभावनान्ववसर्गगर्हासमुच्चयेषु॥ ॥एष्वपिः ॥८६॥
कर्मप्रवचनीयः। अप्रयुक्तपदस्यार्थः सर्पिषोपि स्यात्॥ मात्रायाद्यर्थोपिः। संभावने अपि सिंचेद्बुलं। अन्ववसर्गः स्वैरानुज्ञा॥ अपि सिंच।
अपि स्तुहि। गर्हायां। अपि सिंचेत्पलांडुं। समुच्चये अपि सिंच अपि स्तुहि॥ ॥विभाषाकृञि॥ ॥अधिः कर्मप्रवचनीयो वा॥ यदत्र मामधि
करिष्यति। कर्मप्रवचनीयत्वपक्षे। तिङि चोदात्तवतीति निघातो न॥ कालं॥ ॥अत्र लभ्यस्तानमति कालोत्यंतः सच्चासौ संयोगश्च अत्यंत
संयोगः साकल्येन संयोग इत्यर्थः॥ मासं कल्याणीति। कल्याणगुणेन कालस्य मासस्यात्यंतसंबंधः॥ मासमधीत इति। अध्ययनक्रि

रि

यथा मासस्यात्यंतसंबंधः॥ मासं गुडधानाः इति गुडेन मिश्रा धाना गुडधानाः गुडधानाभिर्द्रव्येणात्यंतसंयोगो मासस्य। क्रोशं कुटिला
नदीत्यत्र कुटिलगुणेनात्यंतसंयोगोऽध्वनः क्रोशस्य। क्रोशं गिरिरिति गिरिणा द्रव्येणात्यंतसंयोगोऽध्वनः। क्रोशमधीते। अध्ययनक्रिययात्यं
तसंयोगोऽध्वनः क्रोशस्य। अत्यंतसंयोग इति किं॥ मासस्य द्विरधीते॥ क्रोशस्यैकदेशे पर्वतः॥ ॥इति निरूपिता द्वितीया॥ ॥स्वतंत्रः॥
॥ ॥क्रियायामिति क्रियायां सिद्धौ स्वातंत्र्येण प्राधान्येन गुणीभावेन विवक्षितो योऽर्थः स कर्तृसंज्ञ इत्यर्थः॥ यावंति क्रियासिद्धौ सर्वे
षां व्यापारस्तथापि यस्य स्वातंत्र्यं विवक्ष्यते स एव स्वतंत्रः कर्ता नान्य इत्यर्थः। किं तावत् स्वातंत्र्यं नाम॥ इतरकारकाप्रयोज्यत्वे सति सकल
कारकप्रयोक्तृत्वं। ननु चैवमिहे वस्यात्। देवदत्तः काष्ठैः स्थाल्यामोदनं पचतीति। इह न स्यात् देवदत्त आस्ते शेते इत्यादौ तत्प्रयोज्यानां क
रणादीनामसंभवात्॥ एवं तर्हि धात्वर्थक्रियत्वं स्वातंत्र्यं॥ यदीयो व्यापारो धातुनोच्यते स कर्ता। तथा चोक्तं। धातुनोक्तक्रिये नित्यं कारके
कर्तृतेष्यते इति सर्वत्रागुणीभावः स्वातंत्र्यमिति तात्पर्यं कर्तृप्रदेशाः कर्तृकरणयोस्तृतीयेत्येवमादयः। स्पष्टत्वात्युक्तं सूत्रं व्याख्यायते॥
॥ ॥तत्प्रयोजको हेतुश्च॥ ॥तस्य कर्तुः प्रयोजकः तत्प्रयोजको निपातनात्समासः। अन्यथा कर्तरि चेति निषेधः स्यात्। अथवा यं निर्दिशो ज्ञाप
कारकं हेतुसंज्ञं स्यात् चकारात्कर्तृसंज्ञं च। कुर्वाणं प्रयुंक्ते कारयति। हेतुत्वाभिचो निमित्तं कर्तृत्वात्कर्तृप्रत्यये नोच्यते। हेतुप्रदेशा हेतुमति चे
त्येवमादयः॥ ॥साध॥ ॥क्रियासिद्धावित्यादि॥ ॥यत्क्रियासिद्धौ विषये प्रकृष्टमत्यर्थमुपकारकं। अथवा प्रकर्षः प्रकृष्टं न पुंसके भावे क्तः। प्रक
र्षेणोपकारकं विवक्ष्यते तत्करणसंज्ञं स्यादित्यर्थः॥ तथा चोक्तं हरिणा प्रकीर्णकांडे। क्रियायाः परिनिष्पत्तिर्यद्व्यापारादनंतरं विवक्ष्यते यदा त
त्करणत्वं तदा स्मृतमिति। ननु चात्र साधकतममिति तमग्रहणं न कार्यं विनापि हि तेन प्रकर्षो गम्यते। तथा हि कारकाधिकारादसाध
के संज्ञायाः प्रवृत्तिर्नास्तीति साधकं करणमित्युक्ते अंतरेणापि तमग्रहणं साधकतममिति गम्यं यथा नजिरुपाय कन्यादानप्रतीतिर्नास्ती यन्नि

रूपायदेयेत्युक्ते विनापि प्रकर्षप्रत्ययमभिरूपतमायेति गम्यते। तद्वितमग्रहणेनेति चेत्॥ उच्यते॥ ज्ञापनार्थं तमग्रहणं। एतदनेन ज्ञाप्यते
अन्यत्र तमग्रहणं विना प्रकर्षो नाश्रीयत इति। ततश्चाधारोऽधिकरणमित्येतेन गंगायां घोष इत्यादावमुख्यस्याप्याधारस्य गंगादेरधिकरण
संज्ञा स्यात्॥ ॥कर्त्ता॥ ॥तिङाद्यनुक्तइति तिङ्कृत्तद्धितसमासैरनुक्त इत्यर्थः। रामेणेत्यादि॥ अत्र हननक्रियां प्रति स्वातंत्र्येण रामो विवक्षित
इति कर्तृत्वं तस्य बाणस्तु तत्र प्रकृष्टोपकारकमिति करणं ततोऽन्ययच तृतीया। तिङाद्युक्तौ त्विति। तत्र तु विशेषः। प्रथमास्यादिति भावः॥ ह
रिः करोतीति अयं तिङ्कर्त्तरि ज्ञात इति हरिरिति प्रथमा॥ जीवन इति जीवत्यनेनसंजीवनः। करणाधिकरणयोश्चेति करणे ल्युट् तेन कृता
करणमुक्तं इति प्रथमा॥ शार्ङ्गिकेशादिकरोतीत्यर्थे शब्ददर्दुरं करोतीति कर्त्तरि टक् तद्धितः तेनोक्तः कर्त्तेति शार्ङ्गिकः इति प्रथमा। कृतविश्व इ
ति कृतं विश्वं येनेति समासेनोक्तः कर्त्तेति प्रथमा॥ प्रकृत्यादिभ्य इति वक्तव्येति शेषः। प्रकृत्याचारुरिति अत्र क्रियाया अभावात्कर्तृकरण
योरभावः केवलः संबंधः प्रतीयते। अतो षष्ठी प्राप्ते तृतीया विधिः। एवं प्रायेण सः। गोत्रेण गार्ग्यः इत्यत्रापि ज्ञेयं। समेनेति विषमेण एती
ति शेषः। यद्यप्यत्र क्रियास्ति तथापि नात्र समविषमशब्दौ करणत्वेन विवक्षितौ किंतु कर्मत्वेन अतो द्वितीया स्यात्। द्विद्रोणेन धान्यं क्रीणा
ति इत्यादावपि कर्मत्वेन विवक्षितस्तथाहि द्वौ द्रोणौ क्रीणात्येवार्थो विवक्षितः। पंचकेन पशून्क्रीणातीत्यत्र पंच परिमाणमस्य पंचकः
संघः पंचकवर्गं कृत्वा पशून्क्रीणातीत्यर्थः। सुखेन दुःखेन यातीति सुखयुक्तो दुःखयुक्तो यातीत्यर्थः। आदिना॥ नाम्ना भेत्रो द्विजो जात्या
स्वभावेन मनोहरः इत्यादि॥ ॥दिव॥ ॥ दिवु क्रीडाद्यर्थः तस्य इत्यर्थः। अक्षैरित्यादि॥ पाशैः क्रीडतीत्यर्थः॥ ॥अपवर्गे॥ ॥ मासमधीतोनायात
इति। अत्र केवलो कर्तृव्यापारनिर्वृत्तफलप्राप्तिः॥ ॥सह॥ ॥ अत्र च युक्तग्रहणात्सहार्थो भिप्रेत इत्याह। सहार्थेन युक्ते इति सहार्थो नाम क्रि
यागुणद्रव्यैस्तुल्ययोगो विद्यमानता च। यस्य शब्देन क्रियादिसंबंधः प्रत्याय्यते तत्प्रधानमितरदप्रधानं पुत्रेण सहागत इत्यत्रागमनक्रिया
संबंधः पितुरेव शब्देनोच्यते शब्दशक्तिस्वाभाव्यात् अतः पिता प्रधानं अत एवागत इत्येकवचनं॥ अन्यथा द्विवचनं स्यात्॥ तथा पिता पुत्रा वाग

राविस्यादौ।पुत्रस्यतुतुल्ययोगादर्थात्प्रतीयतेइतिसोऽप्रधानं।ततस्तृतीया।गुणद्रव्याभ्यांतुतुल्ययोगस्योदाहरणंतुपुत्रेणसहस्थूलःपुत्रे
णसहगोमान्विद्यमानतायांतुसहैवदशभिःपुत्रैर्भारंवहतिगर्दभीति।विद्यमानैरित्यर्थः।सहार्थेनयोगेविधानात्पर्याययोगेपिस्यादित्याह।।प
र्वसाहंसाकंसमंयोगेपीति।विनापीति।सहशब्दार्थेगम्यमानेसहशब्दयोगंविनापितृतीयास्यादित्यर्थः।तत्रहेतुमाह।।वृद्धोयूनेतिनिदर्शनादि
तिसूत्रेतितृतीयानिर्देशदर्शनादित्यर्थः।। ।।येन।। ।।अंगानिसंत्यस्यांगंशरीरं।अर्शआदित्वादच्।येनेतितदवयवोद्देहेतुत्वेननिर्दिश्यतइत्यभि
प्रेत्याह।।येनांगेनेत्यादि।ततइतिविकृतादंगात्।अक्ष्णाकाणइति।अत्रावयवधर्मेणावयवीव्यपदिश्यते।तेननुत्वाचकस्मादक्षिशब्दःप्रयुज्यतेतत्रय
तोविनापितेकाणत्वविशिष्टोदेहःप्रतीयतएव।।सत्यं।लोकस्यशब्दप्रयोगेगुरुलाघवंप्रत्यनादरात्।तथाचोक्तंपाणिनीयमतदर्पणे।।अक्ष्यादि
शब्देनविनापिदेहःस्यादेवकाणत्वादिगुणःप्रतीतेः।अथापिलोकेगुरुलाघवंप्रत्यनादराच्छब्दमपिप्रयुंक्तेइति।अंगेत्यंगिग्रहणंकिं।अक्षिकाण
मस्येति।असतिशरीरवाचिनोग्रहणेकाणशब्दात्तृतीयास्यात्।लक्ष्यतेहिकाणशब्देनसमुदायावयवस्याक्ष्णोविकारः।कृतादिक्रियाध्या या८
हारेणकर्तृकरणयोरित्येवतृतीयासिद्धौसंबंधषष्ठीबाधनार्थंवचनं।। ।।इत्थं।। ।।कंचित्प्रकारमित्यनेनेत्थंशब्दस्यार्थमाचष्टे।तथाहि।प्रकारव
चनेइदमस्थमुप्रत्ययेकृतेइत्थमितिस्यात्।सामान्यस्यचभेदकोविशेषप्रकारः।प्राप्तइत्यनेनभूतइत्यस्यार्थमाचष्टे।तथाहि।प्राप्त्यर्थस्यभू
धातोःक्तांतस्यभूतइतिस्यात्।तल्लक्षणादिति।तस्यकंचित्प्रकारंप्राप्तस्यलक्षणेलक्ष्यतेनेनेतिलक्षणंचिन्हंतस्मादित्यर्थः।छात्रैरित्यादि।अत्र
मनुष्यत्वस्यसामान्यस्योपाध्यायत्वमध्यापकत्वंप्रकारस्तमुपाध्यायःप्राप्तस्तस्यचिह्नंछात्राः।इहनकमंडलुपाणिःछात्रइतिलक्षणस्यसमासेन
भूतत्वात्।इत्थंभूतलक्षणंकिं।विद्युत्प्रतिविद्योततेवृक्षंप्रतिविद्योततेविद्युत्।नात्रविद्योतनप्रकारंप्राप्तस्यकस्यचिद्वृक्षोलक्षणंकिंतर्हि
विद्योतनस्यैव।। ।।संज्ञः।। ।।पित्रापितरंवासंजानीतेइति।अवेक्षतइत्यर्थः।संप्रतिभ्यामनाध्यानइतितङ्।स्मरणत्वेतु।।अधीगर्थेतिपर
त्वात्षष्ठी।मातुःसंजानाति।कृत्ययोगेतु।अनाध्यानेपिकर्तृकर्मणोःकृतीतिपरत्वात्षष्ठी।मातुःसंज्ञेति।। ।।हेतौ।। ।।त्वत्प्रयोज्यकोहेतुश्चेतिप

अस्त्वीयेहेतौ कर्त्तरीत्येव तृतीयासिद्धा। अतः फलमनिष्पादयन्नपि फलसाधनयोग्यो लोके हेतुरित्युच्यमान इह गृह्यते तथोक्तं हरिणा। अनाश्रि
तं तु व्यापारे निमित्तं हेतुरिष्यत इति। पुण्येन हरिर्दृष्ट इति। अत्र पुण्यव्यापारादनंतरं दर्शनक्रियानिष्पत्तिरविवक्षिता केवलं क्रियासाधनयोग्यता
विवक्षिता अतः पुण्यं हेतुः। यथा धनेन कुलं। विद्यया यश इत्यादौ। अत एव करणत्वाभावादसिद्धा तृतीया। मानादित्यादि मीयतेऽनेनेति मानं। तथो
क्तं मुग्धबोधे मानाद्वीह्यायां लडिति॥ ॥वारणार्थेति॥ ॥एतच्च प्रकृत्यादिभ्य उपसंख्यानमिति सिद्धं॥ अथवा करणविवक्षया विलंबेन किं सि
साध्यमित्यर्थो वाक्यात्। तृतीयात त्कृतार्थेति॥ इदमर्थशब्दयोगे तृतीयासमासविधानं तृतीयाविधिज्ञापकमिति भावः। सर्वावरो नार्थादियोरो
पीति। अत्रापि सर्वसदृशमानोनार्थकलह निपुणमिश्रश्लक्ष्णैरिति। एभिर्योगे तृतीयासमासविधानं ज्ञापकं तृतीयाविधेः। अशिष्टव्यवहार
इति। अत्रापि दाणश्च सा चेच्चतुर्थ्यर्थे इति संप्रदाने दाणश्च चतुर्थ्यर्थे तृतीयायोगे आत्मनेपदविधानं ज्ञापकं सा चाशिष्टव्यवहारे स्यादित्यत्र लौकि
कः प्रयोगो नियामकः। अथवा वक्तव्यमेतत्। तथोक्तं काशिकायां वृत्तौ वक्तव्यमेतदशिष्टव्यवहारे तृतीया चैव चतुर्थ्यर्थे भवती। दास्यासंय
छते कामुक इति। यो धर्मशास्त्रविरुद्धं दासीकामयितुं तस्यै ददाति तस्या सा वशिष्टव्यवहारो भवतीत्यस्य प्रकर्षेण दीयते अस्मै। तत्संप्र
त्वाशिष्टव्यवहारः॥ ॥इति निरूपिता तृतीया॥ ॥कर्मणा॥ ॥संप्रदानमिति महत्याः संज्ञायाः करणात्सम्यक् प्रकर्षेण दीयते अस्मै तत्संप्र
दानमित्यन्वर्थता विज्ञायते। तथा चोक्तं संप्रदानेन देवस्यात्। पूजानुग्रहकाम्यया दीयमानेन संयोगात्स्वामित्वं लभते॥ यदीति। ततश्च
ददाति कर्मणो वयमभिप्रैतीति विज्ञायत इत्युक्तिरेत्याह दानस्य कर्मणा यमभिप्रैतीति। दानं हि नाम पूजानुग्रहकाम्यया स्वीयद्रव्यस्य प
रित्यागेन परस्वत्वापादानं। तेन रजकस्य वस्त्रं ददातीत्यादौ न। अभिप्रैतीति अभिसंबध्नातीति सुसंबध्नातीति यावत्। अथवा अभिप्रैति
ईप्सतीत्यर्थः॥ कर्मणेति किं यमभिप्रैतीति स संप्रदानमित्येतावत्युक्ते कर्मण एव संप्रदानसंज्ञा स्यात्। कर्मसंज्ञायास्तु ददाति कर्मणोऽन्यच
कर्मावकाशः स्यात्। यमिति किं। कर्मणाभिप्रैतीति स संप्रदानमित्युच्यमाने योऽभिप्रैति तस्य संप्रदानसंज्ञा स्यात्। कर्तृसंज्ञायास्तु यत्र क

र्मसंबंधो नास्तीति सोवकाशः स्यात्। आस्ते देवदत्त इत्यादि। अभिप्रग्रहणं किं। कर्मणा यमेति स संप्रदानमित्युक्ते कालेऽपि च स्यास्यात्॥ तत्र अवि
प्राय गामदात् दास्यतीत्यत्र न स्यात्। अभिप्रग्रहणे तु सति सर्वत्र स्यात्। अभिराभिमुख्ये वर्त्तते तत्र अतीते ऽविद्यमानत्वात्। प्रशब्दे प्रभंजेस
त्यातीतायां भाविन्यामपि स्यात्। तत्रश्चोपसर्गद्वयोपादानसामर्थ्याद्वकालानवच्छिन्ना क्रियाश्रीयते। यदा त्वीप्सतीत्यर्थस्तदा ग्रहणं क
र्यमेवा संप्रदानं त्रिविधं अनिराकर्तृ प्रेरकमनुमंतृ चेति। तत्रानिराकर्तृ यथा आदित्याय पुष्पं ददाति। नात्रादित्यः प्रार्थयते नानुमन्यते न च
निराकरोति। प्रेरकं यथा विप्राय गां ददाति विप्रेण हि मां मह्यं देहीति प्रेरितो ददाति। अनुमंतृ यथा। उपाध्याय गां ददाति उपाध्यायो हि
सर्वैर्न प्रार्थितवान् अथ च दीयमानामनुमन्यते इदं कृतमिति। तथोक्तं वर्द्धहरिणा। अनिराकरणात् कर्तुस्त्यागांगं कर्मणेप्सितं प्रेरणानु
मतिभ्यां च लभ्यते संप्रदानतामिति॥ ॥चतुर्थी॥ ॥दानीयो विप्र इति दीयते स्मै दानीयः कृत्यल्युटो बहुलमिति संप्रदानेऽनीयर्न्च
त॥ क्रियये ति॥ एतच्च वक्तव्यं प्रयोगदर्शनविषयं। पत्ये शेत इति शयनेन पतिमभिप्रैति पतिमाभिमुख्येना रूपशेत इत्यर्थः। कर्मसंप्रद २
नयोरिति॥ एतत्सूत्रारूढं यदन्तत इत्यत्रैव ज्ञेयं॥ रुच्य॥ ॥रुचिरर्थो येषां ते रुच्यर्थाः रुचिना समानार्था इति यावत्॥ यद्यपि रुचिर्दीप्तौ
पवर्त्तते तथापीहान्यकर्तृके अभिलाषे वर्त्तते। तत्रैव प्रीयमाणार्थस्य संभवात्। रुच्यर्थानां धातूनां प्रयोगे प्रीयमाणस्तर्प्यमाणो योर्थस्तत्का
रकं संप्रदानसंज्ञं स्यादित्यर्थः। हरये रोचते भक्तिरिति भक्तिर्हरेरात्मविषयमभिलाषवतीत्यत्र देवदत्तस्य संप्रदानसंज्ञा न। अभिलाषमुत्पा
दयतीत्यर्थः। हरिस्तस्याभिलाषस्य भक्तिः कर्त्रीत्यन्यकर्तृकताभिलाषस्य। तत्र च देवदत्तो मोदकमभिलषतीत्यत्र देवदत्तस्य संप्रदा
नसंज्ञा न। अभिलाषस्यान्यकर्तृकत्वाभावात्। प्रीयमाणः किं। देवदत्ताय रोचते मोदकः पथि इहाधिकरणस्य पथो प्रीयमाणस्य संप्रदान
त्वं मा भूदिति॥ ॥श्लाघह्नुङ्॥ श्लाघ कत्थने। ह्नुङ् अपनयने। स्था गतिनिवृत्तौ। शप उपालंभे। एतेषां प्रयोगे ज्ञापयितुमिष्ट इति बोधयितु
मभिप्रेत इत्यर्थः। गोपी स्मरात् कृष्णाय श्लाघते इति। गोपी मदना वस्तुया कृष्णं श्लाघमाना स्तुवंतीतां श्लोघ्यो तमेव ज्ञापयितुमिच्छतीत्यर्थः।

अथवा स्नानमेव श्लाघमाना नोम्मुलीं यां कृतश्लेषबोधयितुमिच्छति आत्मानं स्वगुणान् बोधयतीति। ह्नुते सन्निहितमेव कृष्णे सपत्नीभ्यो नि
ह्नुवाना तामेव निह्नुतिं तमेव ज्ञापयतीत्यर्थः। अथवा श्लाघ्यत्वात् वस्तु गुह्ये इदमहं ह्नुवे इति कृष्णं ज्ञापयतीत्यर्थः। तिष्ठते। स्वाभिप्रायं कृष्णे प्रति
प्रकाशयतीत्यर्थः। प्रकाशनस्थेयाख्ययोश्चेत्यात्मनेपदं॥ शपते॥ अनसत्यमेतदिति प्रकटयतीत्यर्थः। ज्ञीप्समान इति किं। देवदत्ताय श्लाघते॥
॥ ॥धारेः॥ ॥धृङ्। अवस्थाने स्य हेतुमति णिच्। तस्य प्रयोगे उत्तमर्णो धनस्वामी धनप्रयोक्ता उक्तसंज्ञः। संप्रदानसंज्ञः स्यात्॥ भक्ताय धारयति
मोक्षं हरिरिति अत्र भक्तो उत्तमर्णो हरिरधमर्णः। उत्तमर्ण इति किं। देवदत्ताय शतं धारयति ग्रामे अत्र ग्रामस्यानुत्तमर्णत्वान्न॥ ॥स्पृहेः॥ ॥स्पृ
हई प्सायां चुरादावदंतः। इष्टोऽभिप्रेतः। हरये स्पृहयतीति हरिमभिलषतीत्यर्थः। ईप्सित इति किं। पुष्पेभ्यो वने स्पृहयति॥ ॥क्रुध॥ ॥क्रु
धाद्यर्थानामिति। क्रोधद्रोहेर्ष्यासूयार्थानां धातूनामित्यर्थः। क्रोधोऽमर्षः। द्रोहोऽपकारः। ईर्ष्या परसंपत्त्यसहनं। असूया गुणेषु दोषारोपः
। यं प्रति कोप इति सर्वेषां सामान्येन विशेषणं। यतः क्रोधः कोप एव द्रोहादयोऽपि कोपप्रभवाः एव गृह्यन्ते। हरये क्रुध्यतीत्यादि गोपी स्मरात्।
हेतो हरिं प्रति क्रोधादिकं करोतीत्यर्थः॥ भार्यामीर्ष्यतीति। अस्ति भार्यायामीर्ष्या न तु तां प्रति कोपः। केवलं परैरीक्ष्यमाणां तां न क्षमते॥ न
नु च योऽस्मान्द्वेष्टीत्यत्र कुतः संप्रदानत्वं न। उच्यते द्विषेरक्रोधाद्यर्थत्वात्। अप्रीतौ ह्येनं स्मरन्ति तथा चैतेन वपि प्रयुज्यते। औषधं द्वेष्टि ॥औ॥ ॥८७॥
नाभिनन्दतीति गम्यते। क्रुधद्रुहोरकर्मकत्वात् कर्म्यां प्राप्तायामारंभः। इतरयोः सकर्मकत्वाद्द्वितीयायां॥ ॥क्रुध॥ ॥उपसृष्टयोरु
पसर्गसंबद्धयोः प्रागुक्तः इति यं प्रति कोपः स इत्यर्थः॥ ॥राधीक्ष्योः॥ ॥राध संसिद्धौ। ईक्ष दर्शनांकनयोः। एतावत्रोदाहरणे शुभाशु
भपर्यालोचने वर्त्तेते इत्यभिप्रेत्याह पृष्ट इत्यादि। यस्य निग्रहणं विस्पष्टार्थं। यं यतीति हि वर्त्तते तत्र यं प्रति विप्रश्न इत्येतावतैव यस्येत्यस्या
र्थो गम्यत एव॥ ॥प्रत्याङ्॥ ॥प्रतिपूर्व आङ् पूर्वश्च शृणोति रभ्युपगमरूपे प्रतिज्ञाने वर्त्तते। स चाभ्युपगमः परेण प्रयुक्तस्य सतः स्यात्॥ त
था हि अन्येन केनचिद्दीयतामिति प्रयुक्तो हि प्रतिजानीते करिष्यामीत्यभिप्रेत्याह॥ पूर्वस्या इत्यादि॥ सूत्रे पुंल्लिंगनिर्देशो यापेक्षया

सत्त्वार्थो विचार्यमाणः क्रियैव स्यात्॥ यतः क्रिया एव कर्त्री नान्यस्येत्यस्यानिष्टेत्याह प्रवर्त्तनक्रियायाः कर्त्तेति। विप्राय गां प्रतिशृणोतीति अत्र
विप्रः पूर्वस्या याचनक्रियायाः कर्त्ता विप्रेण हि पूर्वं गां मह्यं देहीति याचितो ददामीति प्रतिजानीते। अत्र हेतुसंज्ञायां प्राप्तायामयमारंभः। पूर्व
स्याः प्रवर्त्तनक्रियायाः कर्त्ता विप्रः प्रतिज्ञातुः प्रयोजकः पूर्वस्य कर्त्तेति। एतस्मिन्नसति गवादेः स्तूयमानस्य कर्मणः स्यात्। पुरस्तादेव
वादत्ते नोत्तरं कर्मत्वस्यैव बाधात् असति तस्मिन् हेतुसंज्ञामेव बाधेत॥ ॥अनु॥ ॥अनुप्रतिगृणश्च इति सूत्रे प्रयोगेति निर्देशात् गृणाद् इति
श्यादिपठितस्य गृह्णं न तौदादिकस्य गॄ निगरण इत्यस्य। अस्य धातोरित्यादि। अनुपूर्वस्य प्रतिपूर्वस्य गृणातेः कारकं पूर्वस्याः क्रियायाः
कर्त्तृभूतं संप्रदानसंज्ञं स्यादित्यर्थः। होतारं शंसतमित्यनेन पूर्वस्याः स्तुतिरूपक्रियायाः होता कर्त्तेति दर्शयति। प्रोत्साहयतीत्यर्थ इत्यनेनानु
गृणाति प्रतिगृणातिशब्दयोरर्थमाचष्टे। पूर्वे कर्त्तेति किं। होत्रे अनुगृणाति सदसीत्यत्राधिकरणस्य माभूत्॥ ॥परिक्रयणे॥ ॥क्रयणे वे
तनादिना स्वीकरणं परिपूर्वेण क्रयणशब्देन नियतकालं स्वीकरणमुच्यते। क्रयणस्य समीपमिति अव्ययीभावे परिक्रयणे इत्याह नियत
कालमित्यादि। न तु सर्वथा वेतनेन। ॥तादर्थ्ये॥ इति। तद्धेन कार्यं निर्दिश्यते तस्मै इदं तदर्थं चतुर्थीसमासः तदर्थशब्दः कार्यप्रयोजनेकारणमाह॥
तदर्थस्य भावस्तादर्थ्यं। ष्यञ्॥ तादर्थ्यशब्दः कार्यप्रयोजनस्य कारणस्य कार्यस्य च यः संबंधस्तमाह॥ तत्र षष्ठ्यां प्राप्तायां चतुर्थी विधीयते॥
यत्तु दुर्गसिंहेन यस्मै दित्सा रोचते धारयते वा तत्संप्रदानमित्यायुक्ते तादर्थ्ये चतुर्थ्यां सिद्धमिति। तदसत्॥ यतो विप्राय गां ददातीत्यादौ न विप्रास्यो
दानादीनां प्रयोजनानि किंतु साधनानि अतस्तादर्थ्याभावान्न तादर्थ्ये चतुर्थ्यां सिद्धं। मुक्तये हरिं भजतीति मुक्तिरूपेण कार्येण प्रयोजनाय हरिसे
वनमित्यर्थः। ॥क्लृप्यर्थ॥ इति। क्लृपि धातोरर्थ इवार्थो यस्य धातोस्तस्य प्रयोगे संपद्यमाने संपत्तिरित्याह। तत्तद्भावस्तत्र यद्रूपं संपद्यते ततो विका
राच्चतुर्थी वाच्येत्यर्थः। भक्तिर्ज्ञानाय कल्पते इति भक्तिर्ज्ञानलक्षणविकाररूपेण भवति भक्तिर्ज्ञानं भवतीति यावत् विकाररूपापत्तेश्च
तुर्थीविधानादिह न भवति देवदत्तस्य संपद्यते शाटक इति। यद्वा च प्रकृतिविकारयोरभेदविवक्षा तदा परत्वात् प्रथमैव स्यात् ज्ञानमियं से

प्र·प्र·कु· पद्यते ऽक्षेभ्य इति । यदा तु जनिकर्तुः प्रकृतिरिति सूत्रमपादानत्वं विवक्ष्यते तदाऽक्षेभ्यः पंचम्येव स्यात् ज्ञानं संपद्यतेऽक्षेभ्य इति उत्पातेनेति ॥
॥६०॥ प्राणिनां शुभाशुभसूचको ऽद्भुतविकार उत्पातः । वाताय कपिला विद्युदिति । अत्र कपिला विद्युदुत्पातस्तेन ज्ञापिते वाते चतुर्थी ॥ ॥क्रिया॥ ॥
प२ उपपदमिह तत्रोपपदं सप्तमीस्थमिति पारिभाषिकं न गृह्यते । तत्र उपपदे क्रियार्थक्रियाप्रयोजने विचार्यमाणे । तुमुन्ण्वुलौ क्रियायां क्रियार्थायामित्यत्र क्रि
यायां क्रियायामिति सप्तमीनिर्दिष्टा क्रियाऽर्थे उपपदं भवति नान्यत् इति क्रियार्थोपपदग्रहणेन तद्विषयो लक्ष्यते इत्यभिप्रेत्याह क्रियार्थोपपदस्येत्यादि । क्रियार्थ
र्थप्रयोजनं यस्याः सा क्रियार्था एवंविधा क्रिया उपपदं यस्य तस्य स्थानिन इति पदं व्याचष्टे अप्रयुज्यमानस्येति अयमाशयः तिष्ठत्यस्मिन् शब्द
इति अर्थः स्थानं । तदस्यास्तीति स्थानीयस्यार्थो ज्ञायते न च स प्रयुज्यते स स्थानीत्युच्यते इति तुमुन् इति प्रत्ययग्रहणे यस्मात् अविहितस्तदादे
स्तदन्तस्य ग्रहणमिति न्यायात् तुमुन्प्रत्ययान्तस्य धातोः कर्मणि चतुर्थी स्यादित्यर्थः । फलेभ्यो यातीति । आने । अप्रयुज्यमानस्यैव कर्मणि स्य ०
णा स्यात् प्रयुज्यमानस्य मा भूत् फलान्याहर्तुं यातीति । क्रियार्थोपपदस्य किं । प्रविश पिंडीं अत्र गृहं प्रविश पिंडीं भक्षयेति गम्यमानत्वात्स्य
स्थिरत्व स्थानी न तु क्रियार्थोपपदः तुमुन्प्रत्ययान्तत्वाभावात् ॥ ॥तुमर्थाच्च॥ ॥तुमुना समानार्थास्तुमर्थः भाववचनाश्चेति यावत् तदर्थे आदीन् श्री ॥६०॥
वक्ष्यति तेषामिदं ग्रहणं तत एव च तुमर्थाद् भाववचनाः संभवंति न्याद्यस्मिन्निन्द्रस्याहात्तुमर्थाच्च भाववचनाच्चादय इति । यागाय यातीति यजेर्नी
धा· भाववचनाश्चेति तुमर्थको ... तादर्थ्यं गम्यते तेन तथापि चतुर्थी न स्यात् । तादर्थ्यस्य भाववचनेनैव द्योतितत्वात् । यागं पश्यत्य कोऽपि त्यजती चा ५
त्यच । तेन चतुर्थीविध्यर्थमिदं । अथवा भाववचनादेव यथा स्यादिह मा भूत् पाचको व्रजतीति नियमार्थं । नायं भाववचनः किंतु कर्तृवचनः ॥ ॥
॥नमः॥ ॥संबंधषष्ठ्या बाधार्थं वचनं । हरये नमः इत्यादीति । आदिना स्वस्ति प्रजाभ्यः स्वाहाऽग्नये स्वधा पितृभ्यः वषडिंद्राय । अलमिति पर्या
प्त्यर्थग्रहणमिति सामर्थ्यार्थस्य ग्रहणमित्यर्थः । तस्मै प्रभवति संतापादिभ्य इत्यलं मासमानार्थे न प्रभवति नायोगो चतुर्थी निर्दिष्टा ल्लिंगात्
। तेन सामर्थ्यापर्यायाणां प्रयोगे स्यादित्याह ॥ तेनैदैत्येभ्यो हरिः प्रभुः समर्थ इत्यादि । अलमित्यस्य तु पर्याप्त्यर्थस्यैव योगे चतुर्थी स्यान्नेन

कन्यामलंकुरुते इत्यादौ भूषणार्थयोगेन। आशिषीत्यादि। चतुर्थी चाशिषीत्यादिना शीर्विवक्षायां पक्षे षष्ठी विधीयते तामपि बाधित्वा चतुर्थ्येव
ञाप्येतिस्वीकार इत्यर्थः नमस्करोति देवानिति। देवानित्यत्र नमोयोगेन प्राप्ता चतुर्थी उपपदविभक्तिः। कर्मणि द्वितीयेत्यनया बाध्यते। न त्वां तृणाय म
न्ये इति। तृणादपि निकृष्टतरं त्वां मन्ये इत्यर्थः। ननु श्वयुगादेः कस्मान्न चतुर्थी। एतदपि हि मन्यतेः कर्म। व्यवस्थितविभाषाविज्ञानात्। मन्यतेः
किं। न त्वां तृणं चिन्तयामि मन्यते इति श्यना विकरणनिर्देशात् तनादिकस्य मनु अवबोधने इत्यस्य कर्मणि न। न त्वां तृणं मन्ये। अप्राणिष्वितीति व्यवस्थि
तविभाषाविज्ञानादिति भावः। इह तु स्यादेव चतुर्थी। न त्वां श्वानं मन्ये न त्वां शुने मन्ये॥ ॥गत्यर्थ॥ ॥यदि हि क्रियामात्रमत्राभिप्रेतं स्यात् चेष्टाग्रहणम
नर्थकं स्यात्। सर्वो हि धातुः क्रियार्थ एव। तस्माच्चेष्टाग्रहणात् शारीरव्यापारवाची अत्र चेष्टाशब्दः। अध्वनीत्यर्थग्रहणमर्थप्रधानत्वान्निर्देशस्य स्व
रूपेत्याह। अनध्वनीति किं मार्गं यातीति। मार्गमाक्रम्य याति मार्गेण यातीत्येवंवत्। उत्पथगन्ताविति। उत्पथेनामार्गेणान्वेन अध्वानं प्रतिगतिः स्यात्
तदात्रापि चतुर्थी स्यादेवेत्यर्थः। द्वितीयाग्रहणमित्यादि कर्मणि चतुर्थ्यां विकल्पितायां द्वितीयाग्रहणं कर्तृकर्मणोः कृतीति कृद्योगे षष्ठी स्यात्तस्या बा
धनार्थमित्यर्थः। ननु गत्यर्थेत्यत्रार्थग्रहणं किमर्थं। यतो गतिरर्थ एव उच्यते। या गतिर्गमिनैव शब्दतस्तत्संनिधानादनपेक्षेणाभ्यूह्यते पादविहरण
त्मिका प्रधानभूता तस्या ग्रहणं यथा विज्ञायतेत्येवमर्थं। तेनेह न स्त्रियं गच्छति। अजो ग्रामं नयतीति। अत्र हि गमनं मैथुनमर्थः स्त्रीशब्दसंनिधा
नात् गम्यते। ननु गमेरेव केवलात्। नयतेश्च प्रापणमेव प्रधानं तद्विशेषणं तु पादविहरणमप्रधानं॥ ॥इति निरूपिता चतुर्थी॥ ॥ध्रुवं॥ ॥अपाय
इति विश्लेषो विभागस्तद्धेतुभूतो गतिविशेषः इति यावत्। तस्मिन्साध्य इति विषयसप्तमी। अपाये साध्यत्वेन विषयभूत इत्यर्थः। यद्यपि ध्रुवशब्दो
लोके एकरूपतामात्रे ध्रुवमस्य रूपमिति। तथाप्यपायं गतिविशेषं प्रतिया ध्रुवतो प्रयुज्यते सैवेहोपादीयते। सा चापायेनानाविष्टता तदुपेयो ति
ता चौदासीन्यं न साचापायादवधिभाव एव तस्मादपायसंनिधौ प्रयुक्तो ध्रुवशब्दो ऽवधिभावमात्रे वर्तत इत्याह। यत् ध्रुवमवधिभूतमिति तेन चलेप्यपादान
संज्ञा सिद्धा स्यात् इत्यभिप्रेत्य धावतोऽश्वात्पततीति द्वितीयोदाहरणमाह॥ तथोक्तं अपाये यदुदासीनं चलं वा यदि वाऽचलं। ध्रुवमेवतदावेशात्

प्र.त्र.सु. दपादानमुच्यतइति।तथापततःपतितद्दूरात्त्रिभुक्तत्वमुक्तं।पततोध्रुवएवाश्वोयस्मादश्वात्पतनंतस्यैव।तस्यत्वश्वस्यपतनेनकुड्यादिध्रुवईष्यते
॥९१॥ इति।तथापरस्परस्मात्मेषावपसर्पतइत्यत्राप्युक्तं।मेषांतरक्रियापेक्षमवधित्वंपृथक्पृथक्।मेषयोःस्वक्रियापेक्षंकर्तृत्वंचपृथक्पृथगिति
जुगुप्सेति।जुगुप्सानिंदा॥विरामोविरतिः।प्रमादोनवधानता।एतेर्थायेषांतेभ्यस्तदप्यपादानसंज्ञःस्यादित्यर्थः॥ ॥भीत्रा॥ ॥भयंभीः।त्राणंत्राः
संपदादित्वात्क्विप्।भीत्रार्थावर्थायेषांतेषांभीत्रार्थानांप्रयोगापेक्षयाबहुव्रीहिइत्येतन्नत्वेतसिकृत्वाह।भयार्थेत्यादि॥भयहेतुरितिकिं॥अ
रण्येबिभेति।नात्रारण्याद्भयंकिंतुतत्रस्थेभ्यश्चौरादिभ्यः।ननुचात्रपरत्वादधिकरणसंज्ञाबाधिकास्यात्तत्किमेतन्निवृत्त्यर्थेनभयहेतुग्रहणे
नेत्युच्यते॥एवंस्यायंयोगःश्रुतेंन्नुप्रपंचः।नहिदेहसंबंधपूर्वकएवापायः।किंतर्हिज्ञानसंबंधपूर्वकोपि।तथाहियोहिपंडितःसन्तुयदिमांचौराःपश्ये
युर्ध्रुवंमेमृत्युरितिविचारयंस्तान्ज्ञानेनप्राप्यततोनिवर्ततइत्यस्यापायः।एवंसर्वत्रनंतरेपियोगाःएवंस्यैवप्रपंचार्थत्वाःतत्राप्यपायस्यसंभवा
त्।यथाश्वापायोस्तितथाभाष्यउपपादितं।प्रपंचश्चगुरुलाघवेनचिंत्यमित्यदोषः॥ ॥पराजेः॥ ॥सोढुंशक्यःसह्योनसह्योसह्यः।पापात्प
राजयतइतिपापमभिभवितुंनपारयति।पापंकर्तुंनशक्नोतीतियावत्।असोढइतिकिं॥शत्रून्पराजयते॥ ॥वार॥ ॥प्रवृत्तिविघातोवारणं॥ई श्री॥
प्सितशब्दोयंक्रिययाप्तुमिष्टमाह॥नात्मिष्टत्वेसत्येवेप्सितःकर्तुःकर्मणीत्याविशेषात्कव्वात्।ततश्चाग्नेर्माणवकंवारयति।कूपादंधंसित्याद्यपिसि ॥७१॥
द्धं।यवेभ्योगावारयतीत्यत्रपरत्वादीप्सिततममेकर्मसंज्ञा।ईप्सितइतिकिं।यवेभ्योगाःवारयतिक्षेत्रे॥ ॥अंतः॥ ॥अंतर्द्धिर्विनिविषयस
प्तमीनिमित्तस्येसप्तमीसत्सप्तमीवा।येनेत्यदर्शनस्यकर्ता।ननुचात्रकर्तृकर्मणोःकृतीतिषष्ठीप्राप्नोति।न।उभयप्राप्तौकर्मणीतिनियमात्।एवं
मेण्यैवस्यात्।कर्मत्वेत्वदर्शनस्यात्मा।यद्यप्यत्रसूत्रेतच्छब्दोनोपात्तःतथापियत्तदोर्नित्यसंबंधात्लभ्यतइत्येतत्सर्वंचेतसिकृत्वाह।अंत
र्द्धिरित्यादि।मातुर्निलीयतेकृष्णइति।मांमातामाद्राक्षीदितिनिलीयते।अत्रकृष्णोमाताकर्त्रीआत्मनःकर्मकृष्णस्यादर्शनंव्यवधाननिमित्तमिच्छ
ति।अंतर्द्धौविनिर्दिकिं।चौरान्दिदृक्षते।इच्छतिग्रहणंसत्यपिदर्शनेअदर्शनेच्छायांयथास्यात्॥ ॥आख्यातो॥ ॥विद्याःस्वीकारेणनियमपूर्वकं

विद्याग्रहणे। तस्मिन्निति आख्याता प्रतिपादयिता। उपयोगे किं। नटस्य गाथां शृणोतीति॥ ॥जनि॥ ॥जनेः कर्त्ता जनिकर्त्ता अयमेव निर्देशो ज्ञापयति कृ
द्योगे चेति समासनिषेधो नित्य इति। जन्यर्थस्य जन्मनः कर्त्ता स च जायमान एवेत्यभिप्रेत्याह॥ जायमानस्येति। प्रकृतिशब्दोऽत्र कारणसामान्यवाची॥ नो
पादानमात्रवाची। अन्यथा पुत्रात्प्रमादो जायते। अत्र न स्यादित्यभिप्रेत्याह। प्रकृतिर्हेतुरिति॥ भुवः॥ भुवनं भूः इति संपदादित्वात् क्विप्। ननु हि
मवतः इत्यत्र सर्वेणैव सिद्धं। यतो नायमर्थो हिमवतो गंगा जायत इति तदर्थमेतदित्याशंक्याह। प्रथमं दृश्यत इत्यर्थः इति एवं चार्थो भातेरनेकार्थ
त्वात्। तेन च जन्यर्थो न। न हि हिमवान् गंगायाः कारणं किंतु कारणांतरोत्पन्ना केवलं तत्र प्रथमं दृश्यते॥ ल्यब्लोप इति॥ प्रासादात्प्रेक्षते आसनात्प्रेक्ष
ते इत्यत्र प्रासादमारुह्य आसने उपविश्य प्रेक्षत इति गम्यमानार्थत्वादप्रयुज्यमानस्यापि ल्यबंतस्य शब्दस्य संबंधे कर्मणि द्वितीया अधिकरणे सप्तमी
ति प्राप्ते नीतिः इह पंचमी विधीयते॥ प्रश्नाख्यानयोरिति। कस्मात्त्वमित्यादौ आगच्छसीत्याद्यविवक्षायामेतद्वक्तव्यं। आगच्छसीत्याद्यनुमाने तु अपादान इ
त्येव सिद्धं॥ ॥यतश्चेति॥ ॥यस्मादवधेरध्वनः कालस्य वा निर्माणं परिच्छेदस्तत्र पंचमी॥ तद्युक्तस्तेन युक्तो योऽध्वा तस्मात्प्रथमासप्तम्यौ स्तः। तद्युक्ता
त्कालात्सप्तमी भवतीति वक्तव्यार्थः। पञ्चमी आपादानत्वादेव सिद्धा॥ ॥अन्या॥ ॥अन्य इत्यर्थग्रहणमिति। तेन पर्यायप्रयोगेऽपि स्यादिति भावः। तथा
चोदाहृतं। अन्यः कृष्णाद् भिन्नो रामादिति। अथ अन्यो देवदत्तात्। यद्यदन्य इत्यत्र यद्दत्तादपि पंचमी कस्मान्न। उच्यते॥ तद्विशिष्टमन्यत्वमेकत एवो सन्न
या शक्यं प्रतिपादयितुमिति द्वितीयाश्रसंबंधिनः पंचमी न। आराद्वनादिति॥ आराच्छब्दो दूरांतिकयोर्वर्त्तते तत्र दूरांतिकार्थैः षष्ठ्यन्यतरस्यामिति प्राप्ते पं
चम्युच्यते। इतरो रामादिति। इतरशब्दोऽयं निर्दिश्यमानस्य प्रतियोगिनमाह॥ यथा क्वचिद्द्वौ प्रवृत्तौ रामश्यामौ। तत्रैकस्तावन्निर्दिश्यते रामः श्याम इति॥
तस्य निर्दिश्यमानस्य यो द्वितीयः प्रतियोगी स इतरशब्देनोच्यते। इतरो रामात्कातर इति॥ ऋते न्यायाद्दन्यः। ऋते कृष्णादिति। ऋते इत्यव्ययमेव ज्ञेयं। दिक्
शब्दा इति शब्दग्रहणाद्दिशि दृष्टाः शब्दाः तेन यद्यपि संप्रति दिक्शब्दो देशकाले च वर्त्तते सोऽपि दिशि दृष्टः शब्द इति तद्योगात् पंचमी स्यात् इति चेत
सिद्धत्वाद्देशवर्त्तिना योग उदाहृतं। पूर्वो ग्रामादिति। कालवर्त्तिना अयमस्मात्पूर्व इत्युदाहृतं। दिग्वर्त्तिना तु योगे इयमस्याः पूर्वेत्युदाहरणं ज्ञेयं॥ प्राक्

प्र.प्र.कु. ॥७२॥

यौग्यमादिति। प्रस्वीदं चैतत्। किंनिनदंतादिक्शब्देभ्यः सप्तमीपंचमीप्रथमाभ्यो दिग्देशकालेष्वस्तातिः। तस्यांचेर्लुगिति लुकि कृते प्रागि
त्युदाहरणं। एवं चेद्दिक्शब्देऽस्तातिर्वसिद्धे किमर्थं पृथक् ग्रहणं। अतसर्थषष्ठीबाधनार्थमिति ब्रूमः। आच् इति दक्षिणादाजिति विहित आच् प्रत्य
यः। आहीत्याहि च दूरे इत्यनेन विहित आहिः। आरन्येति। आङ्एर्वस्य न चेल्लोपि रूपं प्रत्नेऽत्यर्थयोग इति यावत्। तथाहि कालिदासेन प्रयु
क्तं। असूत सद्यः कुसुमान्यशोकः स्कंधात्प्रभृत्येव सपल्लवानीति। तथा मुग्धबोधेप्युक्तं। अन्यारत्याद्योरादित्यादि। बहिर्योगे चेति। तथा च म
हाभाष्ये। अपपरिबहिरंचवः पंचम्येत्यत्रोक्तं। इदं तर्हि प्रयोजनं। बहिःशब्दयोगे पंचमी न विधीयते। अत्रापि यथा स्यादिति। तथा कथमिवेत
त्सिध्यति पंचमीग्रहणसामर्थ्यादिति चोक्तं॥ ॥अप॥ ॥परकृते तेन संबंधिना कस्यचित्संबंधो वर्ज्जनं। वर्ज्जने किं। ओधनं परिषिंचति। कर्मप्रवचनी
यत्वाभावादुपसर्गत्वेनोपसर्गात्सुनोतीति षत्वं॥ ॥आङ्॥ ॥मर्यादा अवधिः। अत्राभिविधिग्रहणाभावादभिविधौ वर्त्तमानस्य आङः कर्मप्रवचनीयत्वे
नेति भ्रमं निराचिकीर्षुराह वचनग्रहणादिति। वचनग्रहणे हि सति मर्यादेत्येतद्वचनं यस्मिन्नुक्ते तन्मर्यादावचनमाङ् मर्यादाभिविध्योरिति सूत्रं। त
त्रस्थत्वेऽप्यात्त्वाङः कर्मप्रवचनीयः स्यात्। तत्र चाङ्मर्यादाभिविध्योर्वर्त्तमानत्वे पात्तद्द्वयमत्रापि सिध्यति। अथवा अभिविधिर्मर्यादाविशेष एव। त
था हि या मर्यादा कार्यसंबंधात् साभिविधिरुच्यते यातु कार्यासंबद्धा सा मर्यादेति। एवं स्थिते वचनग्रहणाद्विशेषो नाश्रीयते तेन मर्यादोक्तिमात्रे स्या
त्। अन्यथा वचनग्रहणं व्यर्थं स्यात्। यदि मर्यादाविशेष एवाभिविधिस्तर्ह्याङ् मर्यादाभिविध्योरित्यादाव अभिविधिग्रहणं व्यर्थं। न व्यर्थं। मर्यादा
सामान्यप्रपंचार्थं॥ ॥पंचमी॥ ॥अप हरेरित्यादौ हरिं वर्ज्जयित्वा संसार इत्यर्थः॥ परिरत्र वर्ज्जने इति। अत्र पंचम्यपाङ्परिभिरिति सूत्रे परि
वर्ज्जनार्थ एव गृह्यते न लक्षणाद्यर्थोपि न साहचर्यादित्यर्थः। परेर्वर्ज्जन इत्यत्र परेर्वर्ज्जने वा वचनमिति वक्तव्यात् द्विर्वचनाभावः॥ आ मुक्तेरिति। मुक्तिं
मर्यादीकृत्येत्यर्थः॥ आसकलादिति। सकलमभिव्याप्य ब्रह्मावर्त्तत इत्यर्थः॥ ॥प्रतिः॥ ॥मुख्यसदृशः प्रतिनिधिः। दत्तस्य प्रतिनिर्यातनं प्रतिदानं।
॥ ॥प्रतिनिधि॥ ॥प्रद्युम्नः कृष्णात्प्रतीति कृष्णो मुख्यस्तत्सदृशः प्रद्युम्नस्ते कृष्णमनुकरोतीत्यत्रानुकार्यानुकरणभावः संबंधः। प्रतिना द्योत्यते।

रम श्री॥ ॥७२॥

निष्कादित्यादि। अत्र चोत्तमर्णाधमर्णभावलक्षणः संबंधश्रुतिनाद्योतते निष्क्रम्य गृहीत्वा माषान् ददातीति यावत्॥ ॥अकर्त्तरि॥ ॥तृतीया
पवादो योगः। ऋणादित्यादि ऋणं यो हेतुरकर्तृत्वेन विवक्षितस्तस्मादित्यर्थः। अकर्त्तरि किं। शतेन बंधितः। जातमत्र ऋणं केवलं। किं तु प्रयोजकक
र्त्तृ॥ ॥विभाषा॥ ॥धने नक्षुमिति। धनं द्रव्यं न गुणः। द्रव्याश्रितो हि गुणो न तु द्रव्यमेव। अस्माद्धेतुः उपलक्षेः पदद्व्यादौ तु विभाषेति योग विभाग
त्पंचमी। योगविभागादिष्टसिद्धिरिति धनेन बद्धमित्यादौ न। अथवा अस्मादिकमुपलक्ष्य ज्ञात्यादि ज्ञानातीति ल्यब्लोपे पंचमी॥ ॥पृथक्॥ ॥
सर्वे इमे पृथगादयो सहायेऽर्थे वर्त्तंते नैदेन रूपादानं पर्यायांतरनिवृत्त्यर्थं। तेन हि रुग्देवदत्तस्येत्यादौ न। मंडूकप्लुत्या पंचम्यनुवर्त्तते॥ पृथ
ग्विना नाना भिरिति योगविभागात् पक्षे द्वितीया वेत्यपि वित्याहु पक्षे पंचमी द्वितीये इति॥ ॥करणे॥ ॥अत्र करणे तृतीया सिद्धौ पक्षे पंचमी
विधीयते। यद्योगात् द्रव्यं स्तोकादिव्यपदेशं प्राप्नोति स गुणो यदा स्तोकादिशब्दैरभिधीयते तदेषामद्रव्यवचनता यदा तु स्तोकमित्यभिसंबं
धात् अभेदेन द्रव्यमाह तदेषां द्रव्यवाचित्वं। करणे। किं। क्रियाविशेषणे कर्मणि मा भूत्॥ स्तोकं पचति। सर्वत्र हि क्रियासाध्यत्वात् कर्मणि
तद्विशेषणमपि कर्म भवति। तस्मात् द्रव्यं क्रियाया अद्रव्यत्वेन तद्विशेषणस्याप्यद्रव्यत्वात्॥ स्तोकादीनामेकार्थत्वेपि भेदेनोपादानं पर्या
यांतरनिवृत्त्यर्थं। तेन हृतमात्रयामुक्त इति॥ ॥दूर॥ ॥द्वितीया सा अस्माद् उच्यते पंचम्यनुवर्त्तते तृतीया चकारेण समुच्चीयत इति चेत न सिद्ध
त्वाह। द्वितीया पंचमी तृतीयास्तु इति। सत्त्ववाचिभ्यस्तु यथायथं विभक्तयः स्युः। दूरः पंथाः दूराय पथे देहि दूरस्य पथः स्वं॥ ॥इति निरूपिता
पंचमी॥ ॥षष्ठी॥ ॥प्रकृतादन्यः शेषः शब्दो वदन् प्रकृतेभ्यः कारकप्रातिपदिकार्थेभ्यो अन्यं तस्येदं भाव रूपं संबंधमाहेत्याह कारकेत्यादि। स्व
स्वामिसंबंधादिरिति संबंध इति शेषः॥ आदिना अवयवावयविजन्यजनकभावादेर्ग्रहणं॥ तथोक्तं॥ हरिणा प्रकीर्णकांडे। संबंधः कारकेभ्योन्यः क्रि
याकारकपूर्वकः॥ श्रुतायामश्रुतायां वा क्रियायां सोभिधीयत इति। तत्र श्रुतायां क्रियायां माषाणामश्नीयादित्यादिः। अश्रुतायां तु राज्ञः पुरु
ष इत्यादि। न च संबंधस्य द्विष्ठत्वात् उभयोरपि अपर्यायेण पर्यायेण वा षष्ठी स्यादित्याशंक्याह यद्वा प्रधाने शेष इति। अथवा प्रधानेषु शेषशब्दो

प्र॰प्र॰सु॰ ॥६९॥

स्यत इत्यर्थः॥ अप्रधानस्य शेषत्वं परार्थत्वात्॥ न चेहा विप्रयुक्ता वैतनि परार्थः शेष इति। फलमाह। तेनेत्यादि। तेन कारणेन द्वयोरप्यपर्यायेण वा षष्ठी
न भवतीति। अप्रधानस्यैव शेषत्वेन तत एव षष्ठी उपलभ्यमानत्वादिति भावः। तथा च काशिकायां वृत्तावुक्तं। शेषसंबंधे यदप्रधानं ततः षष्ठी नो-
च्यते। तेनोभयत्र पर्यायेण वा न भवति षष्ठीति। तथा न्यासकारेणोक्तं एकस्मादुत्पद्यमाना षष्ठी विशेषणादेव भवति। विशेष्यात्तु प्रथमैव॥
यस्मात् शेषशब्दो यथाप्रकृतादन्यमाचष्टे तथा परार्थमपीति॥ तथा च हरिणा विप्रकीर्णकांड उक्तं। द्विष्ठोप्यसौ परार्थत्वाद्गुणेषु व्यतिरिच्यते।
तत्राभिधीयमानश्च प्रधानेप्युपयुज्यत इति। तथा कय्यटेनाप्यदीप उक्तं। संबंधो गुणोपदं तस्य हि द्विष्ठत्वात्प्रधानमपि संस्पृशतीति। राज्ञः पुरुष
इति। अत्र राज्ञो विशेषणत्वादप्रधानत्वात्ततः षष्ठी जाता पुरुषस्तु विशेष्यत्वात्प्रधानमिति। ततः प्रातिपदिकार्थेति प्रथमा। तथोक्तं परार्थे स्वार्थ-
निक्षेपादप्रधाने विशेषणं। विशेष्यं तु प्रधानं स्यात् स्वार्थस्यैव प्रकाशनात्। भेद्यभेदकयोः श्लिष्टिः संबंधोन्योन्यमुच्यते। द्विष्ठो यद्यपि संबं-
धः षष्ठ्युत्पत्तिस्तु भेदकादिति यदा तु पुरुषो विशेषणं स्यात् तदा पुरुषस्य राजेति स्यात्। यदा तु द्वावप्यप्रधानत्वेन विवक्ष्येते तदा द्वयोरपि ष-
जि ष्ठी॥ राज्ञः पुरुषस्य वस्त्रमिति। शेषग्रहणं किं॥ कर्मणो द्वितीयेत्यादौ प्रत्ययनियमार्थे नियमश्चेति द्वौ पक्षौ। तत्र प्रत्ययनियमपक्षे यदि शेष इति
नोच्येत कर्मण्येव द्वितीयेति कर्मादिरनियत इति तत्रापि षष्ठी स्यात्। अतः शेषग्रहणं। शेष एव यथा स्यादन्यत्र मा भूदिति। अर्थनियमे तु शेषग्र- श्री॥ ॥६९॥
हणं न कार्यं। कर्मण्यपीति। केचिदिति काशिकादयः सर्वोपदेवपंडितादयः। तथा च कुमारसंभवे कालिदासेन प्रयुक्तं। न केवलं यो महतो विभाष-
ते शृणोति तस्मादपि यः स पापभागिति। तथा च बोपदेवपंडितेन मुग्धबोधे उक्तं। समार्थेनाद्यास्तस्त द्वितसुरेवर्नि द्वीरसंबंधे दचषीति तथो-
दाहृतं चैतैः शार्वस्य पदयोर्मेडिदिति॥ पाणिनीयानां तु मते कर्माविवक्षायां संबंधविवक्षयैतत्सिध्यति। एतदेवाभिप्रेत्य हरिणोक्तं। श्रुताया-
मिति। तथा पाणिनीयमतदर्पणे कविदर्पणेनोक्तं॥ श्रुतायां यथा न माषाणामश्नीयात्। सुकाषितस्य सिक्षते। न ते कुरुखस्य जानंति॥ अ-
न्नस्य नो देहि॥ अक्षाणां दीव्यति। पुनः एधुं ददाति। न तस्य शृणोति। हंसस्य पचं पर्णेति महतो विभाषते इति। अनुहरत कन्येति। वत्सला

मपि कर्मादीनामविवक्षया शेषत्वमिति॥ ॥षष्ठी हे॥ ॥हेतुरिति हेतुशब्दो गृह्यते। प्रयोगस्य शब्दधर्मत्वात् इत्यभिप्रेत्याह। हेतुशब्दप्रयोग इ
ति। ननु च अन्नस्य हेतोरित्यत्र शेषविवक्षयैव षष्ठी स्यात्। तत्सामानाधिकरण्याच्च हेतुशब्दात्। सत्यं। सैव शेषविवक्षानेन नियम्यते। मन्दधियोनुग्रहीतुं
हेतुतृतीयापवादो वा योगः॥ ॥सर्व॥ सर्वनामेत्यादि। निमित्तकारणेत्यादि वर्णोपग्रहेतुमर्थे निमित्तवाचिनां शब्दानां ग्रहणमुपलक्षणार्थमित्य
भिप्रेत्योदाहरति। किं प्रयोजनमिति। निमित्तादीत्यादि। केचिदिति क्वचिद्दर्पणादयः। तथाचोक्तं पाणिनीयमतदर्पणे। आद्यग्रहणादसर्वना
प। म्नस्तृतीयाद्याः। धनेन हेतुना वसति अशुनापहेतवे इत्यादि वेधने न निमित्तेनेत्यादीति। तथा पदमञ्जर्यामुक्तं। भाष्यकारस्तु हेतावित्य
त्र पठितत्वादसर्वनाम्नोप्येतद्विधानं मन्यते। तत्र प्रायग्रहणादसर्वनाम्नः प्रथमाद्वितीये न भवतः। अन्येऽस्त्वस्तु यथादर्शनं भवतः। अन्नेन कार
णेन न वसतीत्यादि॥ ॥षष्ठ्यत॥ दक्षिणोत्तराभ्यामतसुजित्यादि। अतसर्थप्रत्ययायेदिक्शब्देभ्यः स्वार्थे विहितास्तद्धितास्तद्योगेऽन्यारादित
रर्त्ते इति पंचम्यां प्राप्तायामिदं वचनं। दक्षिणतो ग्रामस्येति दक्षिणोत्तराभ्यामतसुच्॥ पुरस्तात् ग्रामस्येति दिक्शब्देभ्य इत्यादिना स्तातिः॥ अ
स्ताति चेति पुरादेशः। एवमुत्तरतो ग्रामस्य पुरो ग्रामस्य उपरि ग्रामस्य उपरिष्टाद्ग्रामस्य। तत्र पश्चाद्ग्रजतीति भाष्यकारप्रयोगात् पंचमी॥ ॥एनपा॥
एनबन्यतरस्यामदूरे पंचम्या इति एनबंतस्य लिंतेन योगे सर्वेण षष्ठ्यां प्राप्तायामिदं वचनेनैनपोप्यतसर्थत्वात्॥ एनबन्यतरस्यामदूरे पंचम्या
ष्येति एनेन योगविभागः षष्ठ्यर्थे कार्यः। अन्यथा हि द्वितीया स्यात् बाध्येतेत्यभिप्रेत्याह षष्ठी चेति॥ ॥दूरां॥ ॥पृथग्विनेत्यतोऽन्यतरस्यांग्रहणं। अनुवर्त्त
मानेऽपि पुनरन्यतरस्यांग्रहणं पक्षे पंचम्यर्थं। अन्यथा हि सर्वेणान्यतरस्यांग्रहणेन पक्षे पूर्वसूत्रप्राप्ता तृतीया स्यादित्यभिप्रेत्याह। पक्षे पंचमी
ति॥ ॥ज्ञोवि॥ ॥यद्यपि बहवो विदस्तथापि स्वार्थे ज्ञो वृत्तिः संभवति तदर्थस्यैव निषेधे ग्रहो युक्तः। विद ज्ञाने इत्यस्य स्वार्थे ज्ञो वृत्तिः संभवति तत्ता
विदर्थस्य निश्चयार्थं निवेशमित्यभिप्रेत्याह॥ ज्ञानात्तेरज्ञानार्थस्येति सर्पिषो जानीत इति। अकर्मकाच्चेति तङ्। सर्पिषेत्यादि। अनेका
र्थत्वाद्धातूनां प्रवृत्तिरिह ज्ञोऽर्थः। अथवा ज्ञो त्यासर्वं कुरुकादिकं सर्पिःरूपेण प्रतिपद्यत इति मिथ्याज्ञानं ज्ञोऽर्थः। तदपीह ज्ञानमेव॥ ॥ ५

प्र॰ प्र॰ सु॰ ॥९४॥

॥ अधीगर्थ॥ ॥अधीगर्थो इति। अधिइक् स्मरणे अधीक्। तदर्थो ऽर्थो येषां ते तथा। दय दानगतिरक्षणेषु। ईश ऐश्वर्ये। कर्मणि शेषत्वेन
विवक्षित इति। कर्मादि अविवक्षा शेषः। कर्मत्वेनाविवक्षिते कर्मणि केवलं संबंधित्वेन विवक्षिते इत्यर्थः॥ सतोपीह्यविवक्षा स्यात्। यथा अनुदरा
कन्येति। ननु वैवं त्वविवक्षायां षष्ठी शेष इत्यनेनैव सिद्धौ। सत्यं। नियमार्थं प्रकरणं। अत्र विषये षष्ठी स्यादेव श्रूयत एव न लुप्यते। ततश्च समासो
नेत्युक्तं स्यात्। तेन प्रतिपदविधाना न समस्यत इति सिद्धं। तेनेदं प्रकरणं शेषषष्ठी समासनिषेधार्थं। मातुः स्मरणं। कारकषष्ठी समास
स्तु स्यादेव। मातृस्मरणं। कः पुनर्विशेषः शेषषष्ठी समासे कारकषष्ठी समासे वा। अयमस्ति विशेषः। कारकषष्ठ्या समासे सति कृत्स्वरः स्या
त्। शेषषष्ठ्यास्तु समासे समासान्तोदात्तत्वमिति॥ मातरं स्मरतीति। अत्र कर्मणः कर्मत्वेन विवक्षितत्वात् संबंधस्याविवक्षितत्वान्न षष्ठी॥ क
र्मणीति किं। मातुर्गुणैः स्मरति। कर्मग्रहणात् गुणानां करणत्वेनोक्तानां शेषत्वविवक्षायामपि नेयं षष्ठी न। कृञः॥ सतो गुणान्तराधाने प्रतिय
त्नः। अत एवाह गुणाधाने ऽर्थ इति। एधोदकस्योपस्कुरुत इति जातिरप्राणिनामित्येकवद्भावः। गंधनादिसूत्रेण तङ्। उपात्प्रतियत्न इति
सुट्। कृञः किं। एधोदकमीक्षते। प्रतियत्ने किं। कटं करोति। शेषत्वेन विवक्षित इत्येव। एधोदकमुपस्कुरुते। कर्मणीत्येव। एधोदकस्योप
स्कुरुते प्रज्ञया॥ ॥रुजा॥ ॥ सर्वे रुजार्था धातवो भाववचना एवेति भाववचनग्रहणसामर्थ्यान्नात्र धातुवाच्यो भावो विवक्षितः किंतु
घञादिप्रत्ययवाच्यः चक्षीति वचनः। कर्तरि ल्युट्। भावो वचनो येषां ते तथा। रुजार्थानां भावस्य वचन क्रियाकर्तृत्वेन संभवतीति सा
मर्थ्यात् वचनशब्देन प्रकृत्यर्थं परित्यज्य प्रत्ययार्थमात्रं कर्तृत्वं विवक्षितमिति ज्ञायते ततश्च भावकर्तृत्वेन संभवतीति का इत्यर्थः। क्वि
न्नृ इत्यपि प्रत्याह॥ भावकर्तृकाणामिति सूत्रे भावकर्तृकाणामिति वाच्ये भाववचनानामिति वैचित्र्यार्थमुक्तं। रुजार्थानामिति रुजादिश
ब्दाद्धृञिदादि पाठात् केचित्साधुत्वं वदंति केचित्त्वसामर्थ्याद्वा निपातनात्। रुजा अर्थो येषां ते रुजार्थाः तेषां। चौरस्येत्यादि। अत्र रोगो भावः क
र्ता। नदीकूलं रुजतीति अत्र नदीद्रव्यमेव कर्त्रिति न भावकर्तृको रुजिः। ननु ज्वरस्य रुजा शब्दो व्याधिमेवाह अंगवाची वात्र रुजिः। ज्वररोगपदादि।

श्री॥ ॥९४॥

एवं तर्हि प्रत्युदाहरणं दिग्दिग्ये दर्शिता इदं त्वत्र प्रत्युदाहरणं भृत्यो धानापुरुषं रुजतीति चौरं ज्वरयति संतापयति चेति रोग इति शेषः ज्वररोग
वचादिः रुजार्थानां किं। एति जीवंतमानंदो नरं वर्षशतादपि। शेष एवेति शेषे इति स्य स्यात्। नु हत्तिं प्रतिशेकान कार्य्येत्यर्थः। चौरं रुजतीत्यत्र
कर्मणो विवक्षितत्वान्न षष्ठी। आशिषि॥ नाथः॥ नाथृ याच्ञोपतापैश्वर्याशीःषु॥ सर्पिषो नाथते इति। सर्पिर्मे भूयादित्याशास्त इत्यर्थः।
आशिषि नाथ इत्युपसंख्यानान्नेह॥ जासि॥ ॥जसु हिंसायां ताडने चेति चुरादिर्न्नेड जसु मोक्षणे इति दिवादिः। निप्रस्यो वोहंतिर्नट क्राथो चु
रादिर्हिंसार्थो जासीति विकृतनिर्देशो अत्रास्यैतद्रूपं तत्र यथा स्यात्। उद्दमान्नतु दस्युमजीजसत्। नेदर पिपिविकृतनिर्देशात् दस्युमनी
नवदित्यत्र न षष्ठी॥ क्रथेस्तु विकृतनिर्देशो दस्युमपि क्रथदित्यत्र षष्ठ्यभावार्थो घटादित्वे पिक्राथयतीत्यादौ निपातनाद्ध्रस्वाभावश्च॥ ॥
धानाः पिनष्टीति। अत्र हिंसा नास्तीति तस्याः प्राणिधर्मत्वात्। एषां किं। चोरं हंति। अन्द्वाव कर्तृकार्थ वचनं॥ ॥व्यवहृपणोः॥ ॥व्यवहृत्वो हन्त्र
हरणे पण व्यवहारे स्तुतौ च शतस्य व्यवहरते पणते वा। द्यूते विक्रये वा विनियुंक्ते दीव्यतीत्यर्थः॥ पणत इत्यत्र स्तुत्यर्थत्वान्नायः। स्तुत्यर्थस्य
वायस्य एत्वा शलाकां व्यवहरतीति गणयतीत्यर्थः। अत्र वार्थो पाणीर्नार्थ्नेत इत्यस्य समानार्थत्वं। स्तौतीत्यर्थ इति पणायतीत्यस्य। अत्र चार्थव्य
वहरतिर्न्न वर्त्तत इत्यसमर्थत्वं॥ दिवः॥ तदर्थस्येति व्यवहृपणसमानार्थत्वो व्यतइत्यभिप्रेत्या हृत्वार्थस्य तितन्यवहारार्थस्य तथा तदर्थ
स्यापिके। ब्राह्मणं दीव्यति स्तौतीत्यर्थः। योगविभाग उत्तरार्थः॥ ॥विभाषा॥ ॥तदर्थस्येत्येव। शलाकां प्रति दीव्यति क्रीडादिरत्रार्थः। कृत्वोर्थ॥ ॥
संख्यायाः क्रियाभ्यावृत्तिगणने कृत्वसुजिति वक्ष्यति कृत्वसुचे तदर्थानां प्रत्ययानामित्यर्थः। पंचकृत्वोन्हो भुंक्त इति। पंचवारान् दिवसे भुंक्ते
इत्यर्थः। द्विरन्हो भुंक्ते इति द्वित्रिचतुर्भ्यः सुजिति सुच्। शेष एवेति। अधिकरणत्वेनाविवक्षिते चाधिकरणे इत्यर्थः। कृत्वोर्थग्रहणं किं। अहनि शेते।
प्रयोगग्रहणं किं। अह्नि भुंक्ते। अत्र प्रकरणादेर्गम्यते द्विस्त्रिर्वेति न तु प्रयुक्तं॥ काले किं। द्विः कांस्यपात्र्यां भुंक्ते। अधिकरणे किं। द्विरह्नो भुंक्ते॥ ॥
॥कर्तृकर्मणोः॥ कृद्योगे कर्तरि कर्मणि च षष्ठी स्यात्। ... जगतः कर्ता ... कृतवर्तीकं ... मिति एवं कृतमनेन सर्वी

प्र.प्र.सु. ॥६५॥

च्चेतीति। अत्र कर्तरि तद्धिते नैवोक्तमिति तत्र षष्ठी। प्राप्तिरेव न कर्मणि तु नोक्तमिति। अत्र सति कृद्योगलक्षणात् षष्ठी स्यात्। ननु वाक्यमेवैतन्न घटते तत
यादि कर्मनिष्ठयोक्तमिति द्वितीया न स्यात्। न त्वपि न द्वितीया समर्थत्वात् तत्र सापेक्षत्वात्। तथा हि कृत् तत्र शब्दः कटमपेक्षते तेन तद्दोषः॥ धातोर्हि सा
निष्ठा कर्मसामान्यमेवाह। धातुं समर्थेन कर्मविशेषं कटं गतं। वाक्ये तु कृत्तद्धितयोः समानाधिकरण्यात् कटस्यापि कर्मत्वमुच्यते। तद्धि त
तस्यान्ते एकार्थीभावात् सामानाधिकरण्यं निवृत्तमिति केवलकटादेः कर्मत्वमुच्यते। क्रियानुप्रवेशस्य वैशिष्ट्यात् वाक्ये गुणानां साधनसंबंध
मनुभवति तथा वृत्तावपीति कृदन्तस्यार्थापेक्षे कटस्य कर्मत्वे घटते तस्मात् स्यादेव द्वितीया। वृत्तिसमानार्थेन च वाक्यं स्यात्॥ न च वृत्तौ बाह्यकटा
दिकर्म गम्यते। तेन प्रत्ययेन क्रियमाणे वाक्ये कटादिकर्मापेक्षा व्यर्थेति न क्रियते। अत एवैवं विगृह्यते। कृतं पूर्वं मनेनेति। अतो न सापेक्षतेति स्या
दिवतद्धितः शेष इति निवृत्तमिति। कर्मणीत्यनुवर्तमाने पुनः कर्मग्रहणं पूर्वस्य कर्मग्रहणस्य निवृत्तिमाख्याति तन्निवृत्तौ तत्संबद्धं शेषग्रहणम
पि निवृत्तमिति भावः॥ ॥ उभयप्राप्तौ कर्मणि॥ षष्ठी नियम्यते। उभयप्राप्ताविति न तत्पुरुषः। किंतु बहुव्रीहिरित्यभिप्रेत्याह उभयोः प्राप्तिर्य
स्मिन् कृतीति। एकस्मिन्नेव कृति यदि कर्तरि कर्मणि च षष्ठी प्राप्नोति तर्हि कर्मण्येव षष्ठी स्यादित्यर्थः। चित्रमित्यादि। देहइत्यांनिद्धेऽस्कृत
तत्प्रयोगे गवामित्यत्र कर्मण्येव षष्ठी जाता न तु गोपकर्तरि। बहुव्रीहिः किं। आश्चर्यमिदमोदनस्य पाके विप्राणां च प्रादुर्भावः। अत्र ओदनः पाकस्य
कर्म विप्राः प्रादुर्भावस्य कर्तार इति एकस्मिन् कृति नोभयोः प्राप्तिः॥ स्त्रीप्रत्यययोरिति। स्त्रियामित्यधिकारेण विहितयोरकाकारयोः प्रयो
गे नियमो नेति वाच्यं। अकः पर्यायार्हणोत्पत्तिषु ण्वुजित्यादिः। अकारः प्रत्ययादिति। भेदिकेत्यारुद्रेण जगतो भेदनेच्छा तु मिच्छावेत्यर्थः। यथा
कर्मणि ण्वुल् कारो शेष इति अकाकारव्यतिरिक्ते। केचिदिति। तथा काशिकाकारेण तदेव पठितं। केचिद्विशेषेणेत्यादि॥ ॥ क्तस्य च॥ ॥ न लोके
ति षष्ठीनिषेधापवादः। सतां ज्ञात इति मतिबुद्धीति वर्तमाने क्तः। सतामिति कर्तरि षष्ठी॥ शीलितो देवदत्तेनेत्या। दौर्येऽद्यपि वर्तमाने क्तो विहित
स्तथाप्यत्र चतुर्थ्यर्थे बहुलं छन्दसीत्यतो बहुलग्रहणानुवृत्तेर्न षष्ठी॥ कान्तो हरिश्चन्द्र इव प्रजानामित्यादौ तु स्यादेवेति। क्तस्य किं। अन्नं पचमानः

७

का० ॥६५॥

वर्त्तमाने किं। आसंगतः। नपुंसके भाव उपसंख्याने इत्युपसंख्याने शेषविज्ञानात् सिद्धमित्युपसंख्यानप्रत्याख्यानं चार्थतः पठति नपुंसकइत्यादि॥
नपुंसके भावे यः क्तो विहितस्तस्य योगे षष्ठी स्यात्सा च शेषविवक्षायां। कर्माद्यविवक्षायां। तथा चोपसंख्यानं विना षष्ठी शेष इत्यनेनैव सिद्धेत्यर्थः॥
।कर्तृत्वे त्विति। यदा कर्तृत्वं विवक्ष्यते तदा शेषाभावात्तृतीयैव स्यात्तथा च सद्भिर्गतमित्यादि स्यादित्यर्थः॥ अधिकरण। इदमेषामाध्येयपदादेः
सर्वत्र विधीत्वाद्यर्थेनेनोक्तानीति परिभाषया॥ ॥नलोक॥ ॥कर्तृकर्मणोः कृतीति प्राप्ता षष्ठी निषिध्यते कुर्वन् कुर्वाण इति लटः शतृशानचौ॥
चकृवानिति क्वसुश्चेति लिटः क्वसुः। दित्यादि। चक्राण इति लिटः कानच्चेति कानच्। चक्रिरिति। आदृगमहनजनः किकिनौ लिट्चेति किकिनौ
यदापि किकिनोरादेशत्वेन लड् इति ग्रहो नास्ति तथापि लिडतिदेशेन स्यात्। विशेषातिदेशे हि नान्तरीयकः सामान्यातिदेशः विशेषस्य सा
मान्यं नान्तरीयकत्वात् ल इति सामान्याश्रितो निषेधः किकिनोरपि स्यादिति युक्तं च क्रिरित्युदाहरणं। ऋषिभिस्त्वष्टीनज्ञातादिदस्युरिति स
नाशंसभिक्ष उरित्युः। अलंकरिष्णुर्वेति अलंकृञ्निराकृञित्यादिना इष्णुच्। धातुक इति लषपतपदेत्यादिना उकञ्। कमेरिति कमुकञो। अस्मात्परस्यो
कञः प्रयोगे षष्ठ्या अनिषेधः। स्मृत्वेति समानकर्तृकयोरिति क्त्वा। कर्तुमिति। तुमुन्ण्वुलौ क्रियायामिति तुमुन्। अव्ययनिषेधेतोऽसुन्कसुनोर निषेधः॥
सृप्यस्योदेनोः। पुराकृत्स्य विस्पृपः हतवान् हन्ता इति निष्ठेति क्तक्तवतू। ईषत्कर इति ईषद्दुःसुषु इत्यादिना खल्। घ्नन्निति तितत तत्र लटः
शतृशानचावित्यारभ्य द्विषन्निति सूत्रपर्यंताः प्रत्यया गृह्यन्ते तेन शानन्चानशः शतृलामपि निषेधः। पवमान इति पूङ्यजोः शानन्। मेडया
मान इति ताच्छील्यवयोवचनशक्तिषु चानश्। अधीयन्निति इङ्धार्योरिति शतृ। कर्त्तेति तृन्निति तृच्। द्विषञिति द्विषेः परोयः शतृ तस्य प्रयोग
चानिषेध इति वाच्यो। द्विषन्निति द्विषोऽमित्र इति शतृ॥ ॥अकेनोः॥ ॥भविष्यत्यकस्येति। आधमर्ण्येन तस्यासंभवात् भविष्यदाधमर्ण्यार्थेन इ
तिदन उभयत्रापि संभवात् सतः पालक इति तुमुन्ण्वुलौ क्रियायामिति ण्वुल्। सतः पालयितुमवरतीत्यर्थः। व्रजं गामीति। गमेरिनिः। इ णो णा दि
क इनिः स्त्वङ्गविष्यति गम्यादय इति भविष्यति॥ शतं दायीति आवश्यकाधमर्ण्ययोर्णिनिः। भविष्यदाधमर्ण्ययोः किं यवान्नो लावकः

प्र॰प्र॰सु॰ वर्त्तमाने ण्वुल्। अवश्यंकारी कटस्य आवश्यके णिनिः। कथं वर्षशतस्य पूरकः पुत्रपौत्राणां दर्शक इति नायं ण्वुल् भविष्यदधिकारविहितः। किंतु
॥७६॥ ण्वुल्तृचाविति सामान्यविहितः॥ कृत्यानां॥ ॥कर्त्तरि वा॥ गेयो माणवकः साम्नां। भव्यगेयेति कर्त्तरि यो निपातितः। साम्नामिति कर्मणि
षष्ठी। नेतव्या इति। कर्मणि तव्यः वक्तव्या कुञ्चयचनषष्ठी॥ ॥तुल्या॥ शेषविषयत्वात्पक्षे षष्ठी सन्निकृष्टस्याह तृतीयाषष्ठ्यौ स्त इति। तुल्यार्थैरित्य
त्र बहुवचननिर्देशादेव स्वरूपविधिर्नास्तीत्यर्थग्रहणं येषां तु निरपेक्षतया तुल्यता मादृश्यस्य स्थिग्रहार्थं तेन द्योतका इवादयो निवर्त्तितः।
गौरिव गवयः। यथा गौस्तथा गवय इति। चेत्यनुवर्त्तमानेन्यतरस्यां ग्रहणमुत्तरसूत्रे चकारेण तस्यानुकर्षणार्थं। इतरथा हि तृतीयानुकृष्येत।
तुल्यां यदारोहति दंतवाससेति सप्तम्यर्थे तृतीयेति न दोषः॥ चतुर्थी च॥ तृतीयांत निर्देशे अपरिसमाप्तत्वादस्य वाक्यस्य योग इत्यधिक्रियते धमा
स्यो द्विसचयेगोर्थे रवस्यात् न शब्दे इति। सामर्थ्यादर्थग्रहणं सिद्धं। अतोर्थशब्दः एतद्योगेव निमित्तमिति ज्ञायते। कुशलायेत्यादि चिरंजी
वितमायुष्यपर्यायः। एवमायुष्यादिष्विति। कुशलायत्कुशलस्य वा चिरमायुष्यं भूयात्। मद्रं भद्रं कुशलं सुखं अर्थो हितं वा कुशलायत्कुशल
स्य वा भूयात्। एवमेतत्पर्याया अप्युदाहार्याः। आशिषि किं। आयुष्यं देवदत्तस्य लभः॥ ॥इति निरूपिता षष्ठी॥ ॥आधारः॥ ॥आध्रियं श्री॥
ते क्रिया अस्मिन्नित्याधारः। अध्यायन्यायेत्यादिना घञन्तो निपातितः। अत्र यद्यपि कारक इत्यधिकारात्तस्य चाक्रियासाधक ॥७६॥
त्वात् क्रियाया एव आधारः सोधिकरणमिति स्थिते कर्त्तृकर्मणोरेवाधिकरणसंज्ञा स्यात् तयोरेव साक्षात्क्रियाधारत्वात्। तदाधारस्य व्यवधा
नात्। तथापि परत्वादनवकाशत्वाच्च कर्त्तृकर्मसंज्ञाभ्यां बाधितत्वात् कर्त्तृकर्मणोर्न किंतु व्यवहितस्यापि तदाधारस्य भवतीति सिद्धं सिद्ध
त्वाह क्रियाश्रययोरित्यादि। तथा चोक्तं नत्वा हरिणा। कर्त्तृकर्मव्यवहितामसाक्षाद्धारयत्क्रियां। उपकुर्वत् क्रियासिद्धौ शास्त्रेधिकरणं स्मृत
मिति। गौणस्याप्याधारस्याधिकरणत्वं स्यादिति साधकतमं करणमिति तमब्ग्रहणेन ज्ञापितं। तच्च चैव प्रतिपादितं॥ ॥सप्तमी॥ ॥औपश्लेषि
क इत्यादि। करणत्वं स्यादिति साधकतमं करणमिति तमब्ग्रहणेन) आधाराधेययोरन्यत्र सिद्धयोः प्रादेशिकः संबंधः उपश्लेषः॥ तत्र भवयो

औपश्लेषिकः। सामीप्यं सान्निध्यं तत्कृतः सामीपिकः। विषयस्त्वनन्यत्रभावः। तच्चत्वेव्यपुपावरेता विषयः॥ अपृथग्देशयोराधाराधेययोः
सकलावयवसंबंधः तत्रकृतो व्यासः। एवमाधारत्वं कर्तृकर्मद्वारा इत्यादि इत्यर्थः। कटे आस्ते स्थाल्यां पचतीत्यौपश्लेषिकस्योदाहरणे। तत्र कटे आस्त इ
ति क्रियाश्रयकर्त्राधारः। आसनक्रियाश्रयस्य देवदत्तस्य कर्तुः कट आधार इति। स्थाल्यां पचतीति क्रियाश्रयकर्माधारः। विक्लित्याश्रयस्य ली
ओदनस्य कर्मणः स्थाल्याधार इति। नद्यामास्त इति सामीपिकआधारः। नदीसमीपे घोषआस्त इत्यर्थः। नद्या सह घोषस्य संयोगाभावान्नौ
पश्लेषिकोयं। नापि वैषयिको व्यापको वा विषयाद्यभावात्॥ अतोयं पृथक्कृतः तर्के कुशल इति विषयस्योदाहरणं। तर्कविषये कौशलमस्या
स्तीत्यर्थः। देवदत्तस्य कौशलं तर्काद्न्यत्र नास्तीति तर्कस्य विषयत्वं। ननु वास्ति क्रियाश्रयस्य कर्तृभूतस्य कौशलस्य न तर्केण सह सं
बंधः संयोगः समवायो वा तत्कथं समयमाधारः। आधारो ह्याश्रयः स च संयोगेन समवायेन वा स्यात्। नैष दोषः। यतो यदधीनायस्य स्थितिः
स विनापि संयोगसमवायाभ्यां तस्याश्रयो भवति। यथा पुरुषस्य राजा। अत्र यद्यपि राज्ञा पुरुषस्य संयोगसमवायौ न तथापि तदायत्तस्थिति
त्वाद्राजाश्रयः पुरुष इत्युच्यते लोके। तथात्रापि कौशलस्य तर्काधीनस्थितित्वाद्युक्तस्तर्कस्य कौशलं प्रत्याधारभावः। गुरौ वसती
त्याद्यपि विषयस्योदाहरणं ज्ञेयं। न सर्वस्मिन्स्थित इति व्याप्तस्योदाहरणं। सर्वमभिव्याप्य स्थितो विष्णुरित्यर्थः। अत्र यद्यपि विष्णोः सर्वेण स
ह संबंधोस्ति तथापि देशविभागाभावान्न संश्लेषव्यवहारो नास्तीति औपश्लेषिकात्पृथगुच्यते। तिलेषु तैलमित्याद्यपि व्याप्तस्योदाहरणं
ज्ञेयं। क्तस्येति। इन्विषयोयः क्तः तदीये कर्मण्यपि सप्तमी वाच्या। क्तस्येन्विषयः क्तः यस्तेनैव सह प्रयुज्यते। अधीती व्याकरण इति। अधी
तमनेनाधीती। इष्टादिभ्यश्चेतिनिः। साध्वसाधुप्रयोगइति। अनर्चार्थे साधुग्रहणं॥ अर्चायां साधुनिपुणाभ्यामित्येव सिद्धत्वात्। अर्हणा
मित्यादि। क्रियां प्रति येषां कर्तृत्वं न्याय्यं तेषामकर्तृत्वे सति सप्तमी वाच्या। क्रियां प्रति येषां कर्तृत्वमन्याय्यं तेषामकर्तृत्वे च सप्तमी वाच्या।
तद्विपरीतस्येवेति। येषां क्रियां प्रति कर्तृत्वं न्याय्यं तेषामकर्तृत्वे। येषां त्वन्याय्यं तेषां कर्तृत्वे च सप्तमी वाच्येत्यर्थः। सत्सु तरत्स्वादितरणक्रियां प्रति ये

प्र॰प्र॰सु॰॥ साधनत्वावमनुभवंतिसंतस्तेषामेवं चेह कर्तृत्वं इति सप्तमी जाता॥ अस्मत्सुदुत्यादि अत्र तरणक्रियां प्रति येषां कर्तृत्वं तन्न्याय्यं तेषामेकाकर्तृ
॥८७॥ त्वं। सत्सु तिष्ठत्सु इति। अत्र तरणक्रियां प्रति येषां कर्तृत्वं तन्न्याय्यं तेषामेव कर्तृत्वं एतत्सर्वं यस्य च भावेनेति सिद्धं॥ निमित्तादिति। कर्मणा यो
गे सति निमित्तादपि सप्तमी वाच्येत्यर्थः। चर्मणि द्वीपिनं हंतीति। अत्र हननस्य निमित्तं चर्म तस्य द्वीपिना कर्मणा सह संयोगः॥ ॥यस्य॥ ॥
यस्य क्रिययेति प्रसिद्धया क्रियया क्रियांतरं लक्ष्यते नहि स्वयमप्रसिद्धापरस्यैरे लक्षणं भवते॥ ॥सप्तमीपंचम्यौ॥ ॥कारकेनाम क्रियानिमि
त्तभूता शक्तिः। अद्य भुक्त्वेति। अत्र भुजिक्रियायाः कर्त्री रिद्वे शक्ती व्यवस्थिते एकाद्य भुक्त्वेऽस्मा धनभूता। अपरा द्व्यहे तीने इति भिन्नयोर्द्व
योः कर्तृशक्त्योर्मध्ये वर्त्तते। द्व्यहलक्षणः काल इति। तत्र सप्तमीपंचम्यौ जाते। इहस्थ इति। इहस्थो यं क्रोशे लक्ष्यं कर्मतयोः कारकयोर्मध्ये व
र्तिते क्रोश इति तत्र सप्तमीपंचम्यौ जाते। अत्र वायतः शरो नियोतितदपादानं यच्च लक्ष्यं कर्मतयोर्मध्ये क्रोशः। अथ वेहेत्यनेन निर्दिश्यते यद
धिकरणं यच्च लक्ष्यं कर्मतयोर्मध्ये क्रोशः। अथ कालाध्वनोरध्वनः पंचमीति संख्यातानुदेशः कस्मान्न अस्वरितत्वात्। स्वरितेनाधिकार इ
त्यत्र स्वरितेनेति येताविज्ञागात्यत्र स्वरितत्वं तत्र यथासंख्यमिति व्याख्येयं। अधिकेनेति। तथोक्तं बोपदेवपंडितैः। निर्द्धारे धिकेन क्रियां ॥८७॥
तः कालाध्वनोरपि चेति॥ ॥स्वामीश्वरः स्वामी स्वत्वमपेक्षते॥ तत अस्य स्वस्वामिसंबंधे इत्यर्थो लभ्यत इत्यभिप्रेत्याह स्वस्वामिसंबंध
इति॥ यस्मात्॥ ॥उपपरार्द्धे इति उपाधिके चेत्युपशब्दस्य कर्मप्रवचनीयत्वा॥ स्वाक्यामिन इति कथं॥ स्वस्वामिसंबंधे अधिककर्मप्रवचनी
यइत्युक्तं। तत्र यदा स्वमप्रसिद्धत्वात् विधीयते तदा तस्य प्राधान्यं। स्वामिप्रधानमिति। ततः षष्ठ्यां प्राप्तायां तदपवादः सप्तमी स्यात् यदा तु स्वा
म्यप्रसिद्धो विधीयते। तदा विपर्ययो ज्ञेयः। कथं पुनर्यस्येश्वरत्वनमित्युच्यमाने स्वादपि विभक्तिः स्यात्। नहि स्येश्वरव्यपदेशोऽस्ति नचदो
षः। अनुक्तसमुच्चयार्थः चकारः क्रियते तेन स्येयेच्च स्ववचनमित्यस्याप्यर्थस्य विज्ञानात्॥ ॥षष्ठी॥ ॥लुदनीत्यादि नुदंतमानादत्यव
वज्यां क्रूत्वानि त्यर्थः॥ ॥स्वामी॥ ॥स्वामीश्वराधिपतीनां ग्रहणं पर्यायांतरनिवृत्त्यर्थं गोषु लक्षणायां षष्ठ्यामेव प्राप्तायां वचनं॥ आयुक्त॥ ॥

स्य ३

आयुक्तोव्यापृतः। कुशलो निपुणः। आभ्यां योगे षष्ठी। [illegible]स्तः। तात्पर्येण गम्यः। आयुक्ता निपुणा वा हरिस्मरणे विषये इति सप्तम्यामेव
प्राप्तायां पक्षे षष्ठीविध्यर्थो योगः। आसेवायां किं। आयुक्तः शकटे गौः। ईषद्युक्त इत्यर्थः॥ यतः॥ ॥ निर्द्धार्यमाणावयवः समुदायात् यतस्तत इ
ति सप्तमी यदा तदाधारत्वेन विवक्ष्यते तदा सप्तमी सिद्धैवा यथा वृक्षे शाखा इति। यदा त्ववयवसंबंधः तदा षष्ठी यथा वृक्षस्य शाखेति किमर्थं व
चनं तस्येव प्रपंचार्थमित्यदोषः। जातिगुणक्रियाभिरेकस्य वंशदर्शनं अमीषां ब्राह्मणो देवदत्तः पटुरिति। संज्ञायामपि निर्द्धारणदर्शनात्॥ पंचमी॥
श्र५५, विभागो विभक्तत्वं यस्मिन्नस्ति स विभक्तो निर्द्धारणाश्रितइत्यस्यैवेत्याह। विभक्तवति निर्द्धारणाश्रयइति। सर्वस्मिन्नेव निर्द्धारणाश्रये वि
भागोऽस्तीति विशेषणसामर्थ्यात्तु विभाग एव। यत्र सर्वदा चिदात्मन्येव न जीवः सइह निर्द्धारणाश्रयो विज्ञायते तेन नृणां गवां बहुक्षीरेत्य नक५१
त्र न भवति यतोऽत्र यद्यपि नृणां गोमंडलानां पृथक्क्रियते तथापि गवात्मना अंतर्जवतीति न विभाग एव। ठदीव्यादाक्षिणात्येभ्यः श्रो
त्रिया इत्यत्र तु यद्यपि प्राणित्वेनांतर्जीवोऽस्ति तथापि शब्दोपात्ताकारापेक्षयानेतर्जीव इति विभाग एवेत्ययमस्य योगस्य विषयः अन्ये त्वेवमाहुः।
यत्र राशीभूतस्य पृथक्क्रिया स सर्वस्तत्रस्य विषयः। यत्र पुनः पृथक्कृतस्यैव गुणविस्फुरणं सोऽस्येति अयमपि योगः प्रपंचार्थः एवं अपादाना
देव च सिद्धा पंचमी॥ ॥साधु॥ ॥पद्मसुंदरीकारमते साधुनैपुणयोरिति योगाद्भ्रस्तस्य केवलेनेति प्रत्युदाहरणमन्याय्यं॥ तत्र साध्वसाधुप्रयोगे चेति सप्तमी भ
व्येव [illegible] ग्रहणं निपुणार्थं निपुणोऽन्त्याराद्भ्रइति न लक्षणेन प्रत्युदाहरणं न्याय्यं। अप्रत्यर्थीचेति। येऽत्र साणौ ठेकतारव्यानेत्यादिसूत्रे कर्मप्र
वचनीयसंज्ञा उक्ताः प्रतियत्नेन वक्तव्यं गृह्यते॥ प्रसितो॥ प्रकृष्टः सितः अभ्युक्तः इति गुणवाच्यप्यस्ति प्रसितशब्दः क्रियावाच्यप्यस्ति षिञ् बंधनइ
त्यस्य क्तांतस्य प्रसितस्य नात्रोत्सुकशब्देन क्रियावाचिना साहचर्यात् क्रियावाच्येव गृह्यते इत्याह प्रसितप्रसक्त इति। अधिकरणे सप्तमी सि
द्धौ पक्षे तृतीयार्थं वचनं॥ ॥नक्षत्रे॥ ॥नक्षत्रे च लुपीति सुब्लुपि नक्षत्रेण त्वम्यर्थे सप्तमी अत एवाह॥ लुबंतान्नक्षत्रवाचिन इति। पुष्ये पुष्येण वेति।
नक्षत्रे रायुक्तः काल इति विहितस्याणो लुब्विशेषइति लुप्। तत्र [illegible] पूर्वफल्गुनीभ्यां नक्षत्रेणाच्छेदित्यत्र लुबंतविशेषणत्वाद् तत्र नाभ्यामित्यत्र

प्र॰प्र॰सु॰ ॥१९८॥

तृतीयास्यात्। अपवानस्वेचेप्रकृत्यर्थेसतियोऽनुपंसङ्गाल्लुतस्यप्रत्ययस्यार्थस्तत्रवर्तमानादितिलुवंतादित्यादेरर्थस्तेनस्यात्। पुष्येशनिरिति।
सामीप्येऽधिकरणेसप्तमी। अन्नेनसचेतदिदंस्यन्त्या। विवक्षितत्वात्। अन्यत्र। अकर्मकेतिदेशोजनपदादिर्नद्यादिर्वातिकेचित्सकालोनिमेषादि
शब्दव्यपदेश्योनिमेषादिक्रियापरिच्छिन्नः। आदित्यादीनांक्रियासंतानः। अध्वाक्रोशादिशब्दव्यपदेश्यः। इतिविशेषः। भावोनामसंसर्गिभिः
परिच्छिन्नयागादिशब्दव्यपदेश्योधात्वर्थः। क्वचिदितिनन्दीहरिप्रमुखाः। तथाहिरुनद्धिहरिः। अत्रतन्दीतक्रियान्तरेरेवसर्वैरकर्मकैर्धातुभिर्योगेदे
शादीनांकर्मत्वमाह। तथाप्ययदातन्द्रितक्रियान्तरताअकर्मकाणांविवक्ष्यते। तदादेशादिभ्योद्वितीयापदानविवक्ष्यतेतदाऽधिकरणत्वात्सप्त
मीदेशादिभ्योभवति। तथाचोक्तं। कालभावाध्वदेशानामन्तर्भूतक्रियान्तरैः। सर्वैरकर्मकैर्योगेकर्मत्वमुपजायते। ततश्चनदीमित्यादेरयमर्थो
द्वितीयापक्षेवसन्नदीमतिक्रामतीति। सप्तमीपक्षेतुनदीसमीपेवसतीति। तथाशयानोरात्रिमतिक्रामतीत्यादिज्ञेयं। स्वमतेतुक्रियान्तर्भावंवि
नाप्यकर्मकयोगेदेशादीनांकर्मत्वमितितद्योपपादितं॥ ॥छ॥ ॥इतिनिरूपितासप्तमी॥ ॥छ॥ ॥इतिश्रीमदाचार्यरत्नहरिहरनन्दनेनाप्रथी-
श्रीनृसिंहाचार्यांघ्रिमाणिक्यांबुजनयद्वल्लुलेविठ्ठलाचार्येणाचार्ये। तस्यश्रीपाणिनीयव्याकरणसगुणप्रक्रियाकौमुदीयव्याख्यानेऽस्मिन्प्रसा
देसुविशदमधुनाकोविभक्त्यर्थईदृक्॥ ॥अथसमासानिरूप्यन्ते॥ ॥समासश्चतुर्द्धेति। समसनंसमासःसंक्षेपः। सचानेकपदैक्यं। सचच
तुःप्रकारःस्यात्। प्रधानार्थस्यचातुर्विध्यात्। तथाचोक्तंमहाभाष्येइहकश्चित्समासःपूर्वपदार्थप्रधानः। कश्चिदुत्तरपदार्थप्रधानः। कश्चिद
न्यपदार्थप्रधानः। कश्चिदुभयपदार्थप्रधानइति। तदेवचातुर्विध्यंदर्शयति। पूर्वपदार्थेत्यादिना। वृत्तिपदयोर्मध्येपूर्वपदस्यचार्थःसप्रधानं
यस्मिन्समासेप्रायेणससमासोऽव्ययीभावइत्युच्यते। तथोक्तंकाशिकायांवृत्तौ। अन्वर्थसंज्ञाचेयंमहती। पूर्वपदार्थप्राधान्यमव्ययीभावस्यदर्श
यतीति। उत्तरपदार्थेति। उत्तरपदस्ययोर्थःसप्रधानंयस्मिन्समासेप्रायेणसतत्पुरुषोनामसमासः। तथोक्तंकाशिकायां॥ पूर्वाचार्यसंज्ञाचेयं
महतीतदंगीकरणमुपाधेरपितदीयस्यपरिग्रहार्थं। उत्तरपदार्थप्रधानस्तत्पुरुषइति। ननुद्विगुणौकर्मधारयावपिपृथक्समासौस्तस्तत्कथं

अकर्मकैर्योगेदि सञ्ज्ञाहस्ते पञ्चतानव्या ख्यावसाने।

२७३

श्री॥ ॥१९८॥

चातुर्विध्यमेवेत्यत आह। द्विगुकर्मधारयाविति। तत्पुरुषस्यैव भेदौ उत्तरपदार्थप्राधान्यादिति भावः। अन्यपदार्थे प्रधान इति। द्वित्रिपदव्य
तिरिक्तं यत्पदं तस्यार्थः प्रधानं यत्र प्रायेण स बहुव्रीहिसंज्ञकः स्यात्। उभयेति। उभयोर्द्वित्रिपदयोर्योऽर्थौ तौ प्रधाने यस्मिन् समासे प्रायेण
स द्वंद्वसंज्ञकः समासः स्यात्। एतदेवोक्तं महाभाष्ये। पूर्वपदार्थप्रधानोऽव्ययीभावः। उत्तरपदार्थप्रधानस्तत्पुरुषः। अन्यपदार्थप्रधानो बहुव्री
हिः। उभयपदार्थप्रधानो द्वंद्व इति। अत्र हि द्वौ पक्षौ वाक्यमेव समासः स्यादित्येकः। समासोऽन्यो वाक्यमन्यदेव रूढमिति द्वितीयः। कृत्तद्धितसमासा
नामभिधानलक्षणत्वात्। तत्र द्वितीयं पक्षं स्वयमनु विग्रहलक्षणमाह समासेति। प्रथमं त्वग्रे सूचयिष्यति। तस्य चतुर्विधस्यापि समासस्यार्थबो
धयति यद्वाक्यं तद्विग्रह इत्युच्यते। समासेत्युपलक्षणं वृत्तेः। वृत्त्यर्थबोधकं यद्वाक्यं तद्विग्रह इत्यर्थः। तेन तद्धितार्थादिबोधकमपि विग्रहः। वि
शेषेण गृह्यते ज्ञायतेऽनेनेति विग्रह इति व्युत्पत्तिरिति भावः। समासार्थो वाक्यार्थ एव। वाक्यं पुनर्मतभेदेनैकप्रयोजनत्साकांक्षपदसमूहा ह्यनेक
लक्षणं। तच्च मतभेदानुपन्यस्य वाक्यपदीये सम्यगुपपादितं। साकांक्षावयवं भेदे परानाकांक्षशब्दकं कर्मप्रधानं गुणवदेकार्थं वाक्यमुच्यते इ
ति इति लक्षणं प्रायशोऽभिप्रेतं। वाक्यार्थः पुनः संसर्गो भेदो भेदसंसर्गौ वा। संसर्गः संबंधः भेदो व्यावृत्तिः। तत्र राज्ञः पुरुष इत्यनेन स्वविशेषस्य स्वा
मिविशेषेण स्वामिविशेषस्य स्वविशेषेण यः संबंधः स उच्यते। स्वांतरेभ्यः स्वामिनं तरेभ्यश्च या व्यावृत्तिः सार्थसिद्धा। न ह्यव्यावर्तमानयोः संबं
धोंतरेभ्यः संसर्गो घटते इति संसर्गं वाक्यार्थं मन्वानस्य मतं भेदो वाक्यार्थं मन्वानस्य तु मते व्यावृत्तिरुच्यते। संसर्गोऽर्थगृहीतः। न ह्यन्यस्माद्व्याव
त्तस्य संबंध्यंतरेण संबद्धस्य अवस्थानं संभवति। उभयं वाक्यार्थं मन्वानस्य तु मते भेदसंसर्गौ गृह्येते इति विवेकः॥ अयं पुनर्वाक्यार्थो समासार्थस्य भे
दो यदेकार्थीभावः। समासे हि भिन्नार्थानां पदानां साधारणार्थं तावस्था विशेषः स्यात्। वाक्ये तु भिन्नार्थत्वान्न साधारणता नास्ति। अत एव भेदनिबं
धनात्तत्र षष्ठ्युपजायते राज्ञः पुरुष इति। अयं भावः समासे हि विशेषणं विशेष्यमनुप्रविशति एकीभवति विशेष्येण वाक्ये तु विशेषणतः पृथक् ज्ञाय
ते। तथा हि वाक्ये एकार्थीभावाभावाद्राज्ञो गोश्वस्य पुरुषस्येति भिन्नार्थनिबंधनसमुच्चयप्रतिपादनाय चशब्दः प्रयुज्यते। समासे तु एकार्थीभा

प्र॰ प्रसु॰ ॥६७॥

वसद्भावान्न प्रयुज्यते राजगवाम्ब्रपुरुषा इति। एतच्चान्यच्च महाभाष्ये। इह द्वौ पक्षौ वृत्तिपक्षो ऽवृत्तिपक्षश्चेत्याद्युक्त्वा अथ येयं वृत्तिर्वर्त्यते तिवि-
तत्राहुः। परार्थाभिधानं वृत्तिमाहुः। अथ केषामेवं ब्रुवतां जहत्स्वार्था वृत्तिराहोस्विदजहत्स्वार्था भवतीत्यादिना ग्रंथसंदर्भेणोभयविधाम-
पि वृत्तिं प्रतिपाद्य सम्यगुपपादितं। ततो ऽवगंतव्यं। तत्राव्ययीभावे समासमाह। स द्विधा। अव्ययपूर्वपदो नाम पूर्वपदश्च तत्र तावदव्ययपूर्वप-
दमाह॥ अव्ययमित्यादि। एष्वर्थेषु वर्तमानं विभक्त्यादिषु षोडशस्वर्थेष्वित्यर्थः। वचनग्रहणं प्रत्येकमपि संबध्यते। सुबंतं समर्थमिति। अन्वययोग्य-
मित्यर्थः। एतच्च समर्थः पदविधिरित्यस्याः परिभाषाया लभ्यते। अस्याश्चायमर्थः। विधीयत इति विधिः। पदानां विधिः पदविधिः। समासादिर्यः
कश्चन इह शास्त्रे पदविधिः स समर्थो ज्ञेयः। समर्थः शक्तः स्वार्थप्रतिपादने यो विग्रहवाक्यस्यार्थाभिधाने शक्तः स समर्थो ज्ञेयः। अथवा स-
मर्थपदाश्रयत्वात् समर्थः। तत्र समर्थानां संबद्धार्थानां पदानां विधिस्तथा समर्थानां संसृष्टानां च पदानां विधिर्ज्ञेय इत्यर्थः। तथा च सम-
र्थशब्देन व्यपेक्षा एकार्थीभावश्चोक्तो भवति। तत्र वाक्ये व्यपेक्षालक्षणं सामर्थ्यं तथा हि राज्ञः पुरुष इत्यत्र वाक्ये राजा पुरुषमपेक्षते ममाय-
मिति पुरुषो ऽपि राजानमपेक्षते अहमस्येति। समासे तु एकार्थीभावः सामर्थ्यं तच्चानेतरमेवोपपादितं। सुबंतेनेति एतच्च सह सुपेत्येत-
स्मादधिकाराल्लभ्यते। अस्य चायमर्थः। सुपा मे वित इत्यतः सुपि इति वर्त्तते सह इति च सुपेति च द्वयमधिकृतं वेदितव्यं। य-
दित ऊर्द्ध्वमनुक्रमिष्यामस्तद्वेति। सहग्रहणं योगविभागार्थं। तत्र चाव्ययस्य समासस्यान्यल्लक्षणं नास्ति तस्येदं विधायकं स्यात्। सह सुं स-
स्यत इति तस्याप्यनुप्रावर्षदिति तिङंतेनाप्यनुः समस्यते ततः समासांतो दाच्त्वे स्यात्। नित्यं समस्यत इति॥ संक्षिप्यते। समाससं-
ज्ञये कार्थीभावं प्राप्यत इत्यर्थः। अनेन वृत्तिपक्षो ऽभिप्रेत इत्याख्यायते। समस्यत इत्येतस्मात्कडारा समास इत्यस्मात्प्रवृत्ताल्लभ्यते।
अस्य चायमर्थः। कडाराः कर्मधारय इति कडारसंशब्देनाप्राग्यानित ऊर्द्ध्वमनुक्रमिष्यामः समाससंज्ञास्ते वेदितव्याः। प्राग्वचने सं

॥श्री॥ ॥६७॥

ज्ञा समावेशार्थं। समासोऽव्ययीभावसंज्ञः स्यादिति। एतच्चाव्ययीभाव इत्यस्याग्रे वक्ष्यते। ननु समाससंज्ञया व्ययीभावसंज्ञया च किं
प्रयोजनं। न च वाच्यं एकार्थीभूतार्थवाचित्वं एवं पदार्थवाचित्वं च यदानं क्रियत इति। यतः शब्दानां पदार्थाभिधानं स्वाभाविकं न वाच
निकमित्यर्थः। नादेशनात् इत्यादिना ग्रंथसंदर्भेण भाष्यकृतोपपादितमित्याशंकामपनुदन्नाह। ऐकपद्यमिति। समासस्य प्रयोजन
मैकपद्यं समाससंज्ञायाः प्रयोजनमैकपद्यमित्यर्थः। ऐकपद्यमित्युपलक्षणमैकस्वर्यमेकविभक्तिकत्वं च। अत एवोक्तं धर्मकीर्त्तिना।
ऐकपद्यमैकस्वर्यमेकविभक्तिकत्वं च समासप्रयोजनमिति। अव्ययीभावादिसंज्ञानां तु स्वरसमासांतादिप्रयोजनं ज्ञेयं। विभक्तौ
तावदिति। विभक्त्यर्थे वर्त्तमानस्याव्ययस्य। दौ समासप्रकारः कथ्यत इत्यर्थः। हरौ अधिकृत्येति विग्रह इति। अधिहरि इत्यस्य समास
स्यार्थबोधके वाक्ये एतादृशो स्थिते सतीत्यर्थः। ननु च अव्ययं नित्यं समस्यत इत्युक्तत्वान्नित्यसमासोऽयं नित्यसमासश्चाविग्रह इति
वदंति वृद्धाः तत्कथमयं विग्रहः क्रियते। नैष दोषः। अत्र पदविग्रहस्यापि नित्यसमासस्यांगीकारात्। तथा चोक्तं धर्मकीर्त्तिना। अवि
ग्रहो नित्यसमासोऽस्वपदविग्रहो वेति। अत्र च वर्त्तिपदव्यतिरिक्तेनाधिकृत्येति पदेन विग्रहः क्रियते हरौ अधि इति स्थित इति। तिङ्कृ
त्तद्धितसमासैरित्यनभिहितत्वे परिगणितत्वाद्दधिनाधिकरणे सप्तम्यर्थद्योतितेपि हरिशब्दात्सप्तमी। भवतीति सप्तम्यंतो हरिशब्दः स
मस्यते। अधिशब्दस्तु प्रथमोक्तः। तत्रस्थायमर्थः। अधीत्येतस्मिन्प्रथमांते विभक्त्यर्थे व्यये सप्तम्यंतेन हरिशब्देन समस्यमाने हरौ अधीति
स्थिते इति कर्त्तव्यतोच्यत इति॥ ॥प्रथम॥ ॥समासा हि कृष्टश्रितादयो न तेषु किमपि प्रथमानिर्दिष्टं समस्ति समासे तु भक्तेया प्रथमोत्प
द्यते सा समासादेव न तदव्ययवात॥ अंतर्वर्त्तिनीं च या प्रथमा सा श्रित्येतच्छब्दाभ्याः च समासत्वात्प्राग्बोत्पन्ना। अतो मुख्यस्य समासस्यासं
भवात्तद्विधायिशास्त्रे तादर्थ्याच्च समासशब्देनोच्यत इत्यभिप्रेत्याह। समासशास्त्र इति प्रथमांतं यदुच्चारितं समासशास्त्र इत्यर्थः। अत्र चा

प्र·प्र·सु· व्ययं प्रथमान्तमुच्चारितमिति तस्योपसर्जनत्वं। यद्येवमव्ययशब्दादेरेवोपसर्जनता स्यान्नाधिशब्दादीनां न हि ते शास्त्रे प्रथमानिर्दिष्टाः
॥१००॥ निषदोषः। यतोय एवाव्ययस्य प्रथमानिर्देशः स एवाधिशब्दादीनां तत्स्वरूपत्वात्तस्य। अत्र चोपसर्जनमिति महासंज्ञा अन्वर्थता विज्ञा
यते। तथा हि लोके अप्रधानमुपसर्जनमुच्यते एवमप्यप्रधानमेवोपसर्जनं। प्रधानाप्रधानशब्दौ च संबंधिशब्दावेतौ तेन यत्प्रतिपद
प्रधानं तदेव प्रति तदुपसर्जनं स्यात्। तेन राजकुमारीं श्रितस्य द्वितीया श्रितेत्यत्र प्रथमानिर्दिष्टस्यापि कुमारीशब्दस्य संज्ञा न। यदि स्या
स्यात्सर्वनिपातानियम उपसर्जनह्रस्वत्वं च स्यात्। अन्वर्थत्वे तु श्रितादीनपेक्ष्य द्वितीयान्तमुपसर्जनमिति नेह प्रसंगः। यद्यन्वर्थसं
ज्ञा तर्हि पाचकवृंदारकः पुरुषव्याघ्रः अर्द्धपिप्पली एवंकायइत्यादौ प्रधानेपि कथमुपसर्जनत्वं। उच्यते विशेषणं विशेष्येण बहुलमित्या
दिनैव समासे सिद्धे वृंदारकनागकुंजरैः पूज्यमानमित्यादीनां प्रथमानिर्देशात् नामुपसर्जनतैव प्रयोजनं। अथवा एकविभक्तिचापूर्वनि
पात इति अत्र वर्त्तमानस्य चशब्दस्यानुक्तसमुच्चयार्थत्वादुपसर्जनत्वं स्यात्॥ उपसर्जनं पूर्वं वक्ष्यं परप्रयोगनिवृत्त्यर्थं। यद्यपि प्रयोगवि श्री॥
पर्ययो न दृष्टस्तथापि पुरुषापराधाद्विपरीतप्रयोगोपि संभाव्यते। यन्मते वाक्यमेव समासी न भवति तन्मते वाक्यस्यानियतक्रमत्वात्तद्वि ॥१००॥
कारोपि समासो नियतक्रमः स्यादिति इत्यधीरिति। प्रथमानिर्दिष्टमित्युपसर्जनत्वादनेनाधिशब्दस्य प्राक्प्रयोगः स्यादित्यर्थः। कृत्तद्धि
तेत्यादि। समासत्वादधिहरावित्यस्य प्रातिपदिकसंज्ञेत्यर्थः॥ सुपः॥ ॥ धातुप्रातिपदिकयोः। किंत्वस्तः। अनेन सूत्रेण अधिहरावित्या
त्र वर्त्तमानायाः विभक्तेः सप्तम्या लोपः। स्वाद्युत्पत्तिरिति॥ अधिहरि इति स्थिते स्वौजसमौडिति स्वाद्युत्पत्तिः॥ अव्ययीभावः॥ अव्ययीभा
स्याव्ययत्वे किं प्रयोजनमित्याशंक्याह। लुपो लुगिति। अव्ययादाप्सुपः इत्यनेन। मुखस्वरोपचारनिवृत्तिश्च प्रयोजनं। उपाग्निमुखः मुखस्वरो
गमित्युत्तरपदांतोदात्तत्वे प्राप्ते नाव्ययदिक्शब्द इति तस्मिन्निषिद्धे पूर्वपदप्रकृतिस्वर एव स्यात्। उपपयः कामद्रुति विसर्गस्थानिकस्य स

न्व

कारस्योपचार इति संज्ञा। तत्राव्ययत्वादतः कृकमिकंसकुंभपात्रकुशाकर्णीष्वनव्ययस्येति पर्य्युदासः सिद्धं स्यात्। न त्वन्यान्यपि अव्यय
त्वप्रयोजनानि संति। उपाग्निमित्यत्राकचु उपकुंभंमन्य इत्यत्र मुमः प्रतिषेधः तत्कथमेतान्येवेति नियमः उच्यते। एतद्धि सूत्रे स्वरादावपि पंच
त्पुनर्वचनमनित्यत्वज्ञापनार्थं तेनैतद्व्यतिरिक्तं कार्य्यमनित्यं स्यादिति। संतीत्यादि॥ अत्र हरौ गुणाः संतीति तानधिगच्छेत्यन्वयः। तत्र हरौ
अधित्योरन्वयाभावात् समासो न ज्ञातेत्यर्थः। समीप इति। समीपवर्त्तमानमव्ययं समस्यते। कृष्णस्य उपेति समीपार्थे नोपशब्देनोपजनिते
व्यतिरेके कृष्णशब्दात् षष्ठी स्यादिति षष्ठ्यंत एव समस्यते। अत्र प्राग्वदिति समासः। प्रथमानिर्दिष्टस्येत्युपसर्जनत्वमुपशब्दस्य एवं निपा
तः। प्रातिपदिकत्वे सुपो लुक्। स्वाद्युत्पत्तिः अव्ययत्वे। ततः सुपो लुकि प्राप्त उच्यते॥ ॥नाव्ययी॥ ॥ अत्र द्वे वाक्ये नाव्ययीभावादत इत्ये
कं लुक्निषेधकं। अम्त्वपंचम्या इति द्वितीयमम्विधायकं। तत्रापंचम्या इत्यनंतरत्वादम एव निषेधो न तु लुकः। यदि ह्येकमेव वाक्यं स्या
त्तदा कार्यद्वयस्यैकवाक्यत्वा विधीयमानत्वात्कार्यद्वयस्यापि पंचम्याः प्रतिषेधः स्यात् तच्चानिष्टमित्येतद्द्वैतसिद्धत्वात्॥ अदंतादित्यादि
। उक्तार्थस्तु शब्देनैव द्योतितः। ननु अव्ययीभावस्य पूर्वपदार्थप्रधानत्वं। पूर्वपदस्य चाव्ययत्वेन तदर्थस्यासत्त्वभूतत्वं ततस्तस्य क्रि
यांतरेण संबंधो नास्तीत्यपादानत्वाभावादव्ययीभावात् पंचम्यादिसंभव एव नास्ति कथमपंचम्या इति निषेधः। नैष दोषः। एवं पदार्थ
प्रधानत्वेपि गुणभूतोत्तरपदार्थापेक्षः क्रियायोग उपपद्यते। उन्मत्तगंगादित्यादिरन्यपदार्थप्रधानत्वात्तस्य वाच्यमव्ययीभावः क्रिया
संबंधसद्भावादपादानत्वात् पंचम्या मुख्यमुदाहरणं॥ तृतीया॥ बहुलशब्दार्थमाह बहुलमित्यादि। बहूनर्थान् लातीति आदत्ते इति ब
हुलं तेन च बहवोर्थाः। कचित्प्रवृत्यादयः तथा चोक्तं। कचित्प्रवृत्तिः कचिदप्रवृत्तिः कचिद्विभाषा कचिदन्यदेव। विधेर्विधानं बहुधा स
मीक्ष्य चतुर्विधं बाहुलकं वदंति। कचित्प्रवृत्तिरित्यनेनैव कचिन्निषिद्धमपि स्यादिति संगृहीतं। उन्मत्तगंगमिति। अन्यपदार्थे च संज्ञा
यामिति समासः। सुमद्रमिति मद्राणामाधिक्येन वृद्धिर्वर्त्तत इत्यर्थः। यदा समृद्धेः प्राधान्यं तदा अव्ययीभावः। यदा तु तस्या अप्रा

ऽन तथा दुर्यवनमिति यवनानामभावः। किंतु तदीयर्द्धेरभावः। अर्थाभाव इति। अर्थाभावे वर्त्तमानमव्ययं समस्यते॥ अ-
धान्यं तदा न सुरूपः। सुमद्रा इति ऋद्धिमत्ता मद्रा इत्यर्थः। व्यृद्धाविति। ऋद्धेर्विगमो व्यृद्धिः। दुर्यवनमिति यवानामृद्धिविगमो वर्त्तत इत्यर्थः॥
ननु च ऋद्धिविगमोऽर्थाभाव एव तत्किं पृथगुच्यते। व्यृद्धिरिति। उच्यते। अर्थाभावो ह्युत्तरपदार्थाभावस्तथा हि निर्मक्षिकमिति मक्षिकाणा-
मभाव उच्यते। ननु चाभाव इत्येव सिद्धे अर्थग्रहणं किमर्थं धर्म्यभाव इतरेतराभावे च समासाभावार्थं। धर्म्यभावे न भवति ब्राह्मणः अत्र ब्राह्मण-
त्वधर्मो निषिध्यते। इति नार्थाभावोऽयं। इतरेतराभावो गौरश्वो न भवतीति। अत्राप्यर्थान्तरत्वं निषिध्यते नार्थः। अत्ययी॥ सर्वपदार्थप्रधा-
नस्याऽलिंगत्वे प्राप्ते अन्यपदार्थप्रधानस्योन्मत्तगंगमित्यादौ विधेयवल्लिंगे प्राप्ते वचनं क्लीबत्वाद्ध्रस्वत्वे ते। ह्रस्वो नपुंसके प्रातिपदिकस्ये-
ति। अत्यय इति। अत्ययोऽतिक्रमः प्रध्वंसाभावस्तत्र वर्त्तमानमव्ययं समस्यते। ननु चात्ययोऽर्थाभाव एव पृथग्वचनं व्यर्थं। मैवं॥ अर्थाभावः क्वचि-
द्देशविशेषे वस्तुनः कालत्रयेऽप्यभावः। अत्ययः पुनरुत्पन्नस्य प्रध्वंस इत्यर्थाभावाद्भिन्नत्वात्पृथगुच्यते। असंप्रतीति। संप्रत्यभाव इत्यर्थः॥ अ-
नेनोपभोग्यस्य वस्तुनो यो वर्त्तमानः कालः तस्यैव निषेधः क्रियत इति अर्थाभावादत्ययाच्च पृथगुच्यते। शब्दप्रादुर्भाव इति। शब्दप्रादुर्भावः
शब्दप्रकाशः। पश्चादिति। पश्चादर्थे यदव्ययं तत्समस्यते। अनुरूपमिति। योग्यतार्थे वर्त्तमानोऽत्रानुः समस्यते। वृक्षं प्रतीति। प्रतिवृक्षमित्य-
स्य विग्रहः। ननु च नित्यसमासत्वात् वाक्याभावात्स्वपदविग्रहः कथं क्रियत इति चेत्। उच्यते। अर्थं अर्थं प्रतीत्यादिभाष्यकारप्रयोगाद्वा-
क्यमपि स्यात्। यद्वा प्रतिशब्दस्य वीप्सार्थे कर्मप्रवचनीयसंज्ञा विहिता तद्योगे द्वितीयाप्राप्त्यर्थं तस्यां च वाक्य एव प्रयोगः इति वाक्यमपि स्या-
त्। इति स्वपदविग्रहः कृतः। पदमंजरीकारमते तु नात्राव्ययं वीप्साद्योति किं तर्हि कर्मप्रवचनीयत्वात्संबंधावच्छेदकं वीप्सा तु द्विर्वचनद्योत्येति
अस्वपदविग्रहः। पदार्थानतिक्रमवाच्यव्ययसमासोदाहरणं। यथासादृश्य इत्यत्र वक्ष्यति सादृश्योदाहरणं चानंतरमेव वक्ष्यति योगप-
द्य इति। योगपद्यमेककालता॥ अव्ययी॥॥ ननु काल इति कालवाचिन्युत्तरपदे न भवतीत्यर्थः। चक्रेणेत्यादि। चक्रं शंखं युगपद्धारयेत्य-
र्थः॥ सादृश्य इति। सादृश्यं तुल्यता। गुणभूतेऽपि सादृश्ये स्यादिति पुनर्वचनं यदि सादृश्यमिति नोच्येत तदा सर्वपदार्थप्रधानोऽव्ययी

भावइति। यदि सादृश्यं विशेष्यत्वात्प्रधानं स्यात्तदैवस्यात्समासः। यदा तु सादृश्यं विशेषणत्वादप्रधानं स्यात्तदा न स्यात् अस्मात्तु वचनात्त।
दापि स्यात्॥ सदृशः सख्येति सादृश्यवतः प्राधान्यदर्शनेन सादृश्यस्य गुणभावं दर्शयितुं सदृश इत्युक्तं। ननु च संपत्तिः समृद्धिरेव त
त्कस्मात्पुनरुच्यते संपत्तिरित्याशंक्याह ऋद्धेरित्यादि। ऋद्धेर्हि स्त्यश्वादिकाया आधिक्यं समृद्धिरित्यर्थः। अनुरूप आत्मभावइति। अ
नुरूपः सदृशो यः आत्मभावः स संपत्तिरित्यर्थः। सक्षत्रमिति शालंकायनानामिति शेषः क्षत्रभावोनुरूपः शालंकायनानामित्यर्थः
तथा सब्रह्म बाभ्रवाणामित्यादि संपत्त्युदाहरणं ज्ञेयं। तवापि बाभ्रवाणामनुरूपो ब्रह्मभावइत्यर्थः। साकल्यइति। साकल्यम
शेषता। तृणेनेत्यादि न किंचिदभ्यवहार्यं परित्यजंतीत्यर्थः। अधिकार्थवचनेन साकल्यं प्रतिपाद्यते। अंत इति परिग्रहापेक्षयास
माप्तिरुच्यते। अग्निग्रंथेत्यादि इयं समाप्तिरसकलेप्यध्ययने स्यादिति साकल्यात्पृथगुच्यते॥ यथा॥ ननु च यथार्थे यदव्ययमिति
सर्वेणैव सिद्धे समासे किमर्थं वचनमित्याशंक्याह सादृश्यनिरासार्थमेतदिति। यावत्॥ अवधारणं परिमाणनिश्चयः। यावंत इत्यादि। य
र्तीतपरिमाणश्लोकैः प्रणाम परिमाणमिहावधार्यते। अवधारणे किं। यावद्दत्तं तावद्भुक्तं नावधारयामि कियन्मया भुक्तमिति। स्पष्ट
त्वात्कत्ता नाम सर्वं पदाव्ययीभावप्रतिपादनपरं सूत्रत्रयं व्याख्यायते॥ सुप्प्रति नामात्रार्थे॥ अल्पार्थे वर्तमानेन प्रतिना सह सुबंतं सम
स्यते सोव्ययीभावः। सूपोल्पोस्मिन्नोदने। सूपप्रति। शाकप्रति। मात्रार्थे किं। वृक्षं प्रति विद्योतते विद्युत्। सुबिति वर्तमाने। पुनः सुप्ग्र
हणमव्ययनिवृत्त्यर्थं। अक्षशलाकासंख्याः परिणा। अक्षादयः परिणा समस्यंते सोव्ययीभावः। कितवव्यवहारे चायमिष्यते पंच
का नाम द्यूतं। तत्र पंचभिरक्षैः शलाकाभिर्वा स्यात्। तत्र यदा सर्वे उत्तानाः अवांचो वा पतंति। तदा पातयिता जयति। अन्यथा पाते
पराजयते। अक्षेणेदं न तथा वृत्तं यथा पूर्वं जये न। अक्षपरिशलाकापरिसंख्या। एकपरि द्विपरि त्रिपरि चतुःपरि पंचसु त्वेकरूपासु
जय। तथा चोक्तं वार्त्तिके। अक्षादयस्तृतीयांता पूर्वोक्तस्य यथा न तत्। कितवव्यवहारे स्यादेकत्वे क्षशलाकयोरिति॥ विभाषा॥

मात्रा अल्पार्थे
कमिति पर्याय

प्र॰प्र॰मु॰ ॥१९-२॥ यदित्तदुर्ह्व मनुक्रमिष्यामस्तत्रविभाषेत्यधिकृतं ज्ञेयं॥ अप॥ अपविष्णो रित्यादि। अपपरी वर्जने इति कर्मप्रवचनीयसंज्ञा पंचम्यपाङ्परिभि
रिति पंचमी। बहिर्वनादिति। अत एव ज्ञापकात् बहिर्योगे पंचमी। प्राग्वनादिति। अन्यारादिति पंचमी॥ आङ्॥ आमुक्तेरित्यादि। आङ् मर्यादाव
चन इत्याङ् कर्मप्रवचनीयः। पंचम्यपाङ्परिभिरिति पंचमी। लक्षणेनेत्यभिप्रती। अभ्यग्नि शलभा इत्यादि। अग्निमभि अग्निं प्रति शलभाः पतंतीति वि
ग्रहः। अभिरभागे इति कर्मप्रवचनीयता। प्रतिस्तु लक्षणेत्थमिति। कर्मप्रवचनीययुक्ते द्वितीयेत्यग्निशब्दात् द्वितीया। अत्र चाग्निर्लक्षणं ते
न शलभपातो लक्ष्यते। अभिप्रती आभिमुख्ये वर्तेते। तथा हि अभ्यग्नि प्रत्यग्नीति। अग्नेराभिमुख्यमेव शलभाः पतंति न पार्श्वतो न पृष्ठत इति प्रती
यते। लक्षणेनेति किं। स्रुघ्नान्मथुरां प्रस्थितो दिल्लीहात स्रुघ्नमेव प्रति निवृत्तः। यद्दिश्याभिगच्छति तदेव लक्षणं स्यादिति न त्वत्र स्रुघ्नो ल
क्षणं। अभिप्रती इति किं। येनाग्निस्तेन गतः। अत्र त्वाग्निर्लक्षणं आभिमुख्यमप्यस्ति किंतु अभिप्रती न स्तः। आभिमुख्ये किं। अभिनवो
को यासां ताः अभ्यंकाः। प्रतिनवांको यासां ताः प्रत्यंकाः। अंको लक्षणं भवति। आभिमुख्यं तु नास्ति। नन्वत्रापरत्वाद्बहुव्रीहिर्बाधकः स्यात्
किमाभिमुख्यग्रहणेनेमेवमशेषत्वात् बहुव्रीहिर्न स्यात्। अथैव तत्तज्ज्ञापयति। बहुव्रीहिरव्ययीभावेन बाध्यते। ततश्च द्वौ मुनी वंश्यौ द्विमुनिव्या श्री॥ ॥१९-२॥
करणमिति सिद्धं। अन्यथा स्वपदार्थे कृतार्थोऽव्ययीभावो द्विमुनिव्याकरणमित्यत्र बहुव्रीहिणा बाध्येत। स्पष्टत्वात्स्यतेः सूत्रं॥ अनुर्यत्समया॥ य
स्य सामीप्यमाहानुस्तेन सह समस्यते सोऽव्ययीभावः। अनुवनमशनिर्गतः। वनस्य समीपं गत इत्यर्थः। अनुः किं। वनेसमया। समया किं। वृक्षमनु
विद्योतते विद्युत्। अव्ययं विभक्तिसमीपेत्येव सिद्धे पुनर्वचनं विभाषार्थं। यस्य। अत्रोपचारेण यामवाचित्वादनुरेव यामशब्देनोच्यतइति
अभिप्रेत्याह। यस्य दैर्घ्यवाच्यनुरिति। अनुगंगमिति यथा गंगा प्राग्रायता तथा काशीत्यर्थः। यद्यप्यत्र गंगाकाश्यावायामवत्यौ तथापि दैर्घ्य
वत्तया प्रसिद्धत्वाद्गंगैवात्र लक्षणं न काशी। प्रसिद्धं हि लक्षणं स्यात्। गंगादैर्घ्येणेत्यादि। हेतावेषा तृतीया गंगादैर्घ्यलाभहेतुना तद्वत्या गंगया
लक्षणभूतया करणत्वमापन्नया काश्यायामो लक्ष्यत इत्ययमर्थो ज्ञेयः। दिग्बहुप्रभृतीति तिनिचेत्यव्ययीभावत्वाद्व्ययत्वमित्यग्रेवक्ष्यतिते

न व्याख्यात प्रायत्वात्स्पष्टं व्याख्यायते॥ तिष्ठद्गु प्रभृतीनि च। एते समुदाया एव निपात्यंते अव्ययीभावसंज्ञाः। तिष्ठंति गावो यस्मिन्काले विशेषदोह
नायति ष्ठद्गु कालः। खलेयवादीनि प्रथमांतानि विभक्त्यंतरेण नैव संबध्यंते। अन्यपदार्थे च वर्त्तंते। चकारोवधारणार्थः। तेनान्यः समासो न। परमं
तिष्ठद्गु। तिष्ठद्गु वहद्गु। आयतीगवं। खलेयवं। खलेवुसं। लूनयवं। लूयमानयवं। पूतयवं। पूयमानयवं। संहृतयवं। संह्रियमाणयवं। संहृतवुसं।
संह्रियमाणवुसं। एते कालवाचिनः। समंभूमि। समंपदाति। सुषमं। विषमं। दुःषमं। अपरसमं। आयतीसमं। प्रस्थं। प्रमृगं। प्रदक्षिणं। अपरदक्षिणं। संप
ति। असंप्रति। पापसमं। पुण्यसमं। आयतीसमं। पा स्सं ईच् कर्मव्यतिहारे केशाकेशि॥ पारे॥ विभाषेत्यनुवर्त्तमाने पुनर्वाग्रहणं पक्षे षष्ठीसमासस्त्यनुसा
र्थमित्याशंक्याह। पक्षे तत्पुरुष इति। यदि पक्षे तत्पुरुषो वा वचनात्स्यात्तदा महाविभाषया किं क्रियत इत्यत आह। महाविकल्पात्तेनेति। संख्यावंश्य
पाणिनामेकस्वभावः संतानः। विद्यया वैयाकरणवंशः। उपाध्यायवंशः। जन्मना ब्राह्मणवंशः। क्षत्रियवंशः। तत्र भवो वंश्यः। इति दिगादित्वाद्यत्। द्वौ मुनी
इति। पाणिनिकात्यायनौ त्रिमुनीति पूर्वोक्तौ द्वौ भाष्यकारश्चेति त्रयो मुनयः। व्याकरणस्येति षष्ठी॥ विद्यावता पाणिनिप्रभृतीनामतिशयेन विद्यायोगमाख्या
तुं यदा व्याकरणस्य पविद्याया अन्येदो विवक्ष्यते तदा सामानाधिकरण्यं स्यादित्याह। विद्यातद्वतामिति। नदी। चकारेण संख्यानुकृष्यते इत्यभिप्रेत्याह। सं
ख्येति नदीभिरिति बहुवचननिर्देशात्तदर्थस्य ग्रहणं तेन सर्वैरित्याह। नदीभिः समासः स्यात्। समाहार इति चशब्दोवधारणे समाहार एव नान्य चेति। सप्तगंगा
मिति सप्तगंगाः समाहृताः। द्वियमुनमिति द्वे यमुने समाहृते। तृतीयासप्तम्योर्बहुलमित्यत्र उन्मत्तगंगमित्युदाहरणात्क्वचिदेव व्याख्यानतत्त्वात्स्पष्टं सत्वे व्याख्या
यते। अन्यपदार्थे च संज्ञायां॥ संख्येति निवृत्तं। नदीग्रहणमनुवर्त्तते। नदीभिः सह सुबंतमन्यपदार्थे समस्यते संज्ञायां सोऽव्ययीभावः। विभाषाधिकारेपि नित्यस
मास एवायं न हि वाक्येन संज्ञा गम्यते। उन्मत्तगंगं नाम देशः। लोहितगंगं। कृष्णगंगं। शनैर्गंगं। अन्यपदार्थे किं। कृष्णा च सा वेणा च कृष्णवेणा। संज्ञायां किं। शीघ्र
गंगो देशः। इतः प्रभृतीनि अव्ययीभावसंज्ञाहीने ये समासांता उच्यंते तान्दर्शयति तथा तत्पुरुषादौ वक्ष्यति साधारणांस्तु समासांतान्नञ्शब्दे वक्ष्यति। अव्ययी
समासांत इति समासांतः इत्यधिकारसूत्राच्छेद्य। अस्यायमर्थः। इत आरभ्य पादसमाप्तेर्ये प्रत्यया विधास्यंते ते समासांताः। अवयवाः स्युः। तद्ग्रहणेन गृह्यंते
इति ज्ञेयं। प्रयोजनं अव्ययीभावादिसंज्ञा तेन उपशरदमित्यादौ नाव्ययीभावादिति विधिः स्यात्। द्विपुरीत्यत्र द्विगोरिति ङीप् स्यात्। कोशनिषदिनी द्वहोपताप
गद्यो दितीनिः स्यात्। विधुरः तत्पुरुषे तुल्यार्थेति सर्वपदप्रकृतिस्वरः स्यात्। उच्चैर्धुरः। बहुव्रीहौ प्रकृत्या पूर्वपदमित्येतन्न स्यात्। उपशरदमिति सामीप्येऽव्ययीभा
वः। प्रतिविपाशमिति लक्षणेनाभिप्रती इति समासः। गणपठितशरदित्यादिभ्यः यत्र ज्ञेयाः। तेषां नित्यार्थवचनो। जरायाजरस इति गणसूत्रे अस्य चायमर्थः। जरा

प्र॰ प्र॰ मु॰
॥१०२॥

शद्वाद्दच्च स्यात् अस्य उरसादेशश्च। प्रतिपर इत्यादि अस्यापि गणस्यायमर्थः। प्रतिपरःसमनुभ्यः परस्मादक्षिशब्दात् टच् स्यादि॥ अक्षिशब्दादि
ति व्याप्ति अस्मादपि कृतेयं चिन्त्यमिति न संज्ञायां॥ तद्धिताः॥ बहुवचनमनुक्तेत्तद्धितपरिग्रहार्थं। ततः पृथिव्याय अञ्जो इत्यादयो ढ्यौ ज्ञाः स्युः। महासंज्ञाक
रणमन्वर्थ नाज्ञापनार्थं। तेभ्यो हिता स्तद्धिता इति तदित्यनेनैते किं का वैदिकाः शब्दाः प्रत्यय मुख्यं तेनैषां व्युत्पाद्यत्वेन प्रकृतत्वात् तेनेनत्वेवाणादयः
स्युः। यत्र वैतस्तेषामुपकारिणः स्युरन्योन्यत्वे त्वभिधानलक्षणं तद्धितानामुपपन्नं स्यात्। प्रत्यक्षमिति अक्ष्णोः प्रति मुख्यं। लक्षणेनाभिप्रती इति समासः
अथवा अक्ष्यक्षि प्रति वीप्सायां समासः। परोक्षमिति अक्षिभ्यां परे परोक्षं। अत एव समासांत विधानाद्व्ययीभाव समासः। परःशब्दः परार्थेऽस्तो।
उस्त्वन्यथा व्याख्यत। समक्षमन्वक्षमिति। अक्ष्णोः समीपं सर्वत्राव्ययमिति समासः। उच्चरत्वानुच्चं अनयेति॥ अनश्च॥ समासांतः॥ नस्तद्धिते॥ उप
राजमिति सामीप्ये अव्ययीभावः। अध्यात्ममिति। आत्मन्यधि इति विभक्त्यर्थे। नः किं। सात्वतः। तद्धिते किं। शर्मणा। नोनस्य टिलोपे सब्रह्मचारि पीठस
र्पिः कलापि कुथुमि तैतिलि जाजलि लांगलि शिलालि शिखंडि सूकरसद्म सुपर्वणां टिलोपस्योपसंख्यानं। अत्र य इने तास्तेषामिनण्प्रत्यय इति
प्रकृतिभावः प्राप्तः ये त्वनेनास्तेषामन्निति। सब्रह्मचारिण इमे साब्रह्मचाराः। पीठसर्पिण इमे पैठसर्पाः। कलापिना प्रोक्तमधीयते कालापाः। कुथुमिन इमे
कौथुमाः। तैतिलिजाजलिना वाचार्यौ तत्कृतो ग्रंथ उपचारात्तेति लिजाजलि शब्दाभ्यामुच्यते। तमधीयते तैतिलाः जाजलाः एवं लांगलाः शिलालिन इमे
शैलालाः। शिखंडिन इमे शैखंडाः। सूकरसद्मन इमे सौकरसद्माः। सुपर्वण इमे सौपर्वाः। चर्मणः कोश उपसंख्यानं। चार्मः कोशः। चार्मणोऽन्यः। शुनः संको
च उपसंख्यानं। शौवः संकोचः। शौवनोऽन्यः॥ नपुंसकात्॥ नपुंसकग्रहणमुत्तरपदविशेषणमित्यभिप्रेत्याह। अन्नंतं यदित्यादि। एवं च णनित्ये प्राप्ते विकल्पा
र्थं वचनं॥ ॥नदी॥ एभ्य इति नद्यादिभ्यो ऽव्ययीभावाट्टाच् स्यादित्यर्थः। नदीग्रहणेन स्वरूपं गृह्यते न संज्ञा। यदि संज्ञाग्रहणं स्यात् पौर्णमास्याग्रहणं न
कुर्यात्। स्यादी स्यादिना उपाग्रहायणं। उपाग्रहायणि॥ ॥झयः॥ झय इति प्रत्याहारग्रहणं॥ गिरेः॥ ननु च नपुंसकादन्यतरस्यामित्यतोऽन्यतरस्यामित्य
नुवर्त्तमाने पि सेनकग्रहणं किमर्थमित्याशंक्याह सेनकग्रहणमिति॥ ॥ श्रीरामस्वामिसूनुर्हरिहरभजनैकाग्रधीः श्रीनृसिंहाचार्यो यं माणिकोवाप्यड
नयदतुलं विठ्ठलार्यमाचार्यं॥ ॥ तस्य श्रीपाणिनीयाद्यनुगुणसगुणप्रक्रियाकौमुदीयव्याख्यानेऽस्मिन्नुपसादेसु विशद ममल्लोऽव्ययीभावः समस्तः॥ ॥अथ
तत्पुरुषः सत्तु द्वेधा व्यधिकरणपदः समानाधिकरणपदः संख्यापूर्वपदश्चेति तत्र तावत् व्यधिकरणपदमाह॥ ॥द्वितीया॥ समासस्तत्पुरुष इति तत्पु

श्री॥
॥१०२॥

रुषः इत्यधिकारस्तत्पुरुषः द्वितीयांतस्य श्रितादिभिः समासविधिर्ज्ञायते श्रितादिषु कर्त्तरि क्तः इति सर्वत्र गत्यर्थेत्यादिना तत्र येन गत्यर्थोदयस्ते ऽत्योनुक्तः समुच्च
याच्छ्रकारात्। कष्टं श्रित इति न लोकेति षष्ठीनिषेधः। कष्टश्रित इति समासे कृते प्रथमानिर्दिष्टमित्युपसर्जनत्वात् द्वितीयांतस्य पूर्वं निपातः। प्रातिपदिकत्वे
सुपो लुक् स्वाद्युत्पत्तिः। एवमुत्तरत्र प्रक्रिया ज्ञेया। इत्यादीत्यादिना। कष्टमतीतः कष्टातीतः। कूपं पतितः। ग्रामं गतः। तरंगानत्यस्तः तरंगात्यस्तः सुखं प्राप्तः सु
खमापन्नः सुखापन्न इति। गम्यादेरिति। गम्यादेः समासस्येष्टिः। द्वितीयांतं गम्यादिभिः समस्यत इत्यर्थः। गम्यादयश्च प्रयोगतो ज्ञेयाः। ग्रामं गमीति। ग्रामगमी
ति विग्रहः। गमेरिनिरित्यौणादिको ऽभविष्यतीनिः। ग्रामं गामीति आवश्यकाधमर्ण्ययोर्णिनिः। उभयत्र अकेनोर्भविष्यदाधमर्ण्ययोरिति षष्ठीनिषेधः। अन्नं बु
भुक्षुरिति भुजेः सन्नंतादुः सनाशंसभिक्ष उः। पश्य कष्टमित्यादि। अत्र कष्टशब्दस्य पश्येत्यनेन संबंधः। श्रितशब्दस्य साधुनित्यनेन अतः कष्टश्रितशब्दयोर
न्ययाज्ञावात्समासो न॥ स्वयं॥ स्वयमित्यस्याव्ययत्वात् द्वितीयासंबंधो नास्तीति द्वितीयाग्रहणमुत्तरार्थमनुवर्त्तते। स्वयंकृतमिति। आत्मना कृतमित्यर्थः
। एकपद्यमैकस्वर्यं च समासात् स्यात्॥ ॥खट्वा॥ ॥खट्वारूढ इति आङ्पूर्वाद्रुहेः क्तप्रत्यये आरूढ इति स्यात्। अत्र विमार्गप्रस्थानेन निंदा क्रियते। अल्पस्य
पातोधीत्य गुरुकुलादित्यनुज्ञातेन खट्वारोहणं न्याय्यं। यस्त्वन्यथा खट्वारोहणं तद्धि मार्गप्रस्थानेन खट्वारोहणमिदं विमार्गप्रस्थानस्योपलक्षणं तेयं सर्व एवाविनीतः
खट्वारूढ उच्यते। निंदा च समासार्थ एव तेन विभाषाधिकारेपि नित्यसमास एवायं। नहि वाक्येन निंदा गम्यते॥ ॥सामि॥ ॥सामीत्येतदव्ययं अर्द्धे पर्यायस्तस्या
सत्त्ववाचित्वात् द्वितीयासंबंधो नास्ति तथापि तेन क्तांतेन समस्यते स तत्पुरुषः॥ ॥काला॥ ॥अत्यंतसंयोगे वक्ष्यमाणत्वादनत्यंतसंयोगार्थं वचनमित्याह। अनत्यं
तसंयोगेपीति मासःप्रमितः इति माङ् माने इत्यस्मादादिकर्मणि क्तः द्यतिस्यतीत्वं मासं प्रमातुमारब्ध इत्यर्थः। चंद्र इति प्रतिपच्चंद्रो बोध्यः चंद्रो विवक्षितः। तत्रस्थ प्रतिप
च्चंद्र इत्यसमानमासस्य व्याप्तिरिति नास्तीहात्यंतसंयोगः। अत्यंत॥ ॥काला इति वर्त्तते हेनेति निवृत्तं॥ अत्यंतसंयोगः॥ कृत्स्नसंयोगः कालस्य स्वेन संबंधिना नव
यवेन व्याप्तिः कालवाचिनो द्वितीयांताः सुपा तेन समस्यंते। अत्यंतसंयोगे गम्ये। मुहूर्त्तं सुखमिति कालाध्वनोरत्यंतसंयोग इति द्वितीया॥ ॥तृतीया॥ ॥तत्कृतेन ये
तदसमस्तमेव सुपां लुगिति लुप्तविभक्तिकं गुणवचनेनेत्यस्य विशेषणं तृतीयांतेन गुणस्य करणं न संभवत्यतः सामर्थ्याद्दर्थे कृतेनेति ज्ञायते इत्येनतत्स
र्वं चेतसि कृत्वाह तृतीयांतार्थकृत गुणो नेति। तृतीयांतेन कृतस्तृतीयांतार्थकृतः। तृतीयांतकृतेन गुणेन यस्य गुणीनः स तृतीयांतकृतगुणो गुणी तद्वाचि

प्र·प्र·सु· नेत्यर्थः। ननु चैवं गुणवचनेनेत्यास्तां तावत्तेन कथं गुणी लभ्यते उच्यते। गुणमुक्तवान् गुणवचनः। अथवा गुणमुक्तो येन स गुणवचनः कर्त्तरि करणे वा कृ-
॥२·४॥ त्यल्युटो बहुलमिति ल्युट्। यश्च पूर्वं गुणे वर्तित्वा पश्चाद्गुणवति द्रव्ये वर्त्तते स गुणवचनः। एतच्च वचनग्रहणसामर्थ्याल्लभ्यते। अन्यथा गुणे-
नेत्येवावक्ष्यत्। ततश्च वचनेन पाटवं शंकुलया खंडेन मित्येवमादौ गुणेन समासो न। शंकुलया खंड इति खंडशब्दो गुणे खंडने वर्तित्वा पश्चा-
न्न तु जीलोपादवच्छेदोपचाराद्वा तद्वति द्रव्ये वर्त्तते इति गुणवचनः। अस्त्राकाण इति येनांगविकार इति तृतीया। नात्र तृतीयोनार्थेना स्त्रगादेव-
दत्तस्य काणत्वं किं तर्हि अन्येनैव केनचित्। अस्त्रेण तु केवलं काणगुणयुक्तो लक्ष्यते गुणवचनेनेति किं। गोभिर्वपावान् गोभिः सपावान् धेनो
न तु वपावानित्ययं शब्दो गुणमुक्तवान् गुणवचनत्वात्॥ नार्थः शंकुलया खंडो येति अत्र शंकुलयेत्यस्यार्थशब्देन संबंधः खंडेत्यस्य गम्यो व्य-
नेन संबंधः। ततः शंकुलया खंड इत्यनयोः संबंधाभावेनासामर्थ्यान्न समासः। समर्थानां वृत्तिरिति। समर्थानां सर्वेष्वेव विशेषणः
समासे तद्धिते च समर्थः पदविधिरिति परिभाषया इति भावः॥ ॥पूर्व॥ मासेन पूर्व इति। अस्मादेव समासविधिसामर्थ्यात् तृतीया। एवं सदृशा-
द्यावपि पितृसदृशः पितृसदृशः मात्रासमः मातृसमः। पापेनोनः पापोनः। पापेन हीनः पापहीनः। शास्त्रेण कलहः। आचारेण निपुणः आ- प्री॥ ॥१०·४॥
चारनिपुणः। तिलैर्मिश्राः तिलमिश्राः। वाचा श्लक्ष्णः वाक्श्लक्ष्णः॥ ॥कर्तृ॥ ॥हरिणा त्रात इति कर्त्तरि तृतीया॥ नखैर्भिन्न इति करणे। कर्त्तृ-
करण इति किं। भिक्षाभिरुषितः हेतावेषा तृतीया॥ बहुलग्रहणं सर्वोपाधिव्यभिचारार्थं। तेन दात्रेण लूनवान् इत्यादौ न। पादहारकः
गलेचोपकः इत्यादौ स्यात्। पूर्वस्यैव सूत्रस्य प्रपंच इति तद्व्याख्यानेनैव व्याख्यातत्वात् अस्य सूत्रं व्याख्यायते॥ ॥कृत्यैरधिकार्थवचने॥॥
स्तुत्यर्थं निंदार्थं वा असतः समारोपितस्यार्थस्य वचनमधिकार्थवचनं तस्मिन् द्योत्ये कर्त्तरि करणे च या तृतीया सा कृत्यैः सह सम-
स्यते। कर्त्तरि। काकपेया नदी। करणे वाष्पच्छेद्यानि तृणानि। एवं नाम पूर्णतोया नदी यात्तटस्थैः काकैरपि शक्या पातुं। एवं नाम
कोमलानि तृणानि यद्बाष्पेणापि छेद्यानीति एवं स्तुतिप्रयुक्ते अधिकार्थवचने उदाहरणे। एते एव निंदार्थप्रयुक्ते प्यधिकार्थवच

नेयथाहि एवं नामाल्पतो यान्नदीयत्कोकेरपि पातुं शक्या एवं नामकर्षिता निम्नगा नियद्वाष्पेणापि छिद्यंते॥ ॥अन्नेन॥ ॥संस्कार्यम
भ्यवहार्यं मोदनादि। संस्कारकं व्यंजनं क्षीरादि। क्षीरोदन इति। ॥उपसेचनादिक्रियां विना संस्कारकत्वं न संभवतीति॥ इत्तावुप
सेवनादिक्रियां तन्नीवा दत्र व्यंजनयोः सामर्थ्यं॥ अत एव हृर्यशवाक्यं दर्शितं॥ क्षीरेण संस्कृत ओदन इति॥ ॥भक्षेण॥॥
खरविशदमभ्यवहार्यं भक्ष्यं तस्य संस्कारकं मिश्रीकरणं अमिश्रं मिश्रं क्रियते ऽनेनेति मिश्रीकरणं। गुडधाना इति इत्तौ मिश्रणक्रियायाः अंतर्भावा
त्तत्र चोत्तरपदयोः सामर्थ्यं॥ ॥चतुर्थी॥ ॥तदर्थशब्देन तच्छब्देन सर्वनाम्ना चतुर्थ्यंतस्यार्थः परामृश्यते तस्मा इदं तदर्थमिति एतदभिप्रेत्याह॥ चतुर्थ्यंत
यदिति। अर्थादभिप्रेतिरर्थवलिहितसुखरक्षितैः तदर्थेनेति तदर्थेन सह समासः। प्रकृतिविकारभाव एव स्यात् इत्यादि। यूपाय दारु इतिता
दर्थ्ये चतुर्थी अत्र तु दारु प्रकृतिः यूपो विकृतिः॥ रंधनाय स्थाली इति तादर्थ्ये एव चतुर्थी। अत्र स्थाली न रंधनस्य प्रकृतिः किंतु आधारमात्रं। अर्थेनेति॥
अर्थशब्देन चतुर्थ्यंतस्य नित्यसमासः स्यात्स च विशेष्यलिंगता च समासे सति स्यादिति वक्तव्यं अन्यथा विभाषाधिकारादनित्य एव समासः स्यात्। परवल्लिंगं
द्वंद्वतत्पुरुषयोरिति परपदवल्लिंगतैव च स्यात्॥ बलिरिति॥ भूतेभ्यो बलिः तादर्थ्ये चतुर्थी एवं चापि सर्वत्र तादर्थ्ये एव चतुर्थी। गोहितमिति गोभ्यो
हितं हितयोगे चेति चतुर्थी। गोसुखमिति गोभ्यः सुखं चतुर्थी चाशिष्येति चतुर्थी। गोरक्षितमिति तादर्थ्ये चतुर्थी॥ ॥पंचमी॥ ॥पंचम्यंतं भयशब्दे
न वा समस्यते इत्यर्थः। चौराद्भयमिति भीत्रार्थानामित्यपादानत्वात् पंचमी॥ बहुलोक्तेरिति कर्तृकरणे कृता बहुलमिति बहुलोक्तेर्ग्रामनिर्गतो धर्म
जुगुप्सुरित्यादौ समास इत्यर्थः। तस्य च बहुलग्रहणस्यायं प्रपंचः॥ ॥अपेत॥ ॥अल्पशब्दस्यानेन समासस्याल्पतारव्यायते। अल्पत्वात् त्वेन पंचमी
समस्यत इति तदिदमाह क्वचिदिति अपादिना कल्पनापोढः॥ चक्रसुक्तः स्वर्गपतितः तरंगापत्रस्तः॥ ॥स्तोक॥ ॥स्तोकान्मुक्तः इति करणे स्तोका
ल्पेति पंचमी। ननु स्तुक्षो धातुप्रातिपदिकयोरिति पंचमी लोपेन [illegible] समासस्य प्रातिपदिकत्वादित्याशंक्याह। पंचम्याः स्तोकादिभ्य इत्यलुगिति॥ ॥
॥ ॥षष्ठी॥ ॥राजपुरुष इत्यस्योपलक्षणं [illegible] कर्तृकर्मणोः कृतीति प्राप्तायाः षष्ठ्याः स्यानेनेव समासे

प॰प्र॰सु॰ सिद्धे पुनर्वचनं व्यर्थमित्याशंक्याह षष्ठीसमासे त्यादि प्रतिपदविधानाषष्ठ्या न समास इत्यग्रे विष्य तावत्कथ्येनयः षष्ठीसमासनिषेधस्तस्यापवाद इत्यर्थः।
॥२०५॥ व्यासकृतिरित्यादि व्यासस्य कृतिः कर्तरि षष्ठी। आरसस्य श्रवणं कर्मणि॥ ॥याजक॥ ॥ वक्ष्यमाणेति तृजकाभ्यां कर्तरि कर्मणि चेति वक्ष्यमाणस्य नि
षेधस्यापवाद इत्यर्थः। रथगणकपक्षिगणाकीर्णसमस्तपाठगणकृशद्धस्यरथपत्तिशद्धाभ्यामेव समास इति देशेयितुं॥ ॥न॥ ॥निर्द्धारणे जातिगुणक्रि
याभिरेकदेशविवेचनं नृणामिति। यतश्च निर्द्धारणमिति षष्ठी। ननु च प्रतिपदविधानसमास इत्यनेनैव प्रतिषेधे सिद्धे व्यर्थं वचनं॥ मैवं॥ ॥यतोऽयतश्च
निर्द्धारणमित्यनेन सप्तम्येव विधीयते। षष्ठी तु षष्ठी शेष इत्यनेनैव प्राप्ता सप्तम्या मा वाधीति चकारेणानुकृष्यते॥ अत एव सर्व गृहस्वामीत्यादौ स्वामीश्व
रेत्यादिना सामान्यलक्षणविहिता या एव षष्ठ्यास्तु कारेणानुकृष्टेरेवेति समासः। प्रतिपदविधानेति। षष्ठी शेष इति सामान्यलक्षणविहितां षष्ठीं स
त्यक्त्वान्या विशेषविहिता षष्ठी प्रतिपदविधाना। सर्पिषो ज्ञानमिति ज्ञोऽविदर्थस्य करणे इति षष्ठी॥ ॥पूरण॥ ॥अर्थशब्दः प्रत्येकमभिसंवध्यते तेन स्वरूप
विधिर्न स्यादित्येत्याह॥ एतदर्थैरिति सतां षष्ठ इति षष्ठः पूरणः तस्य पूरणे डट्॥ षट्कतिकतिपयचतुरां थुगिति थुक्॥ सतामिति॥ समुदायसमुदायिसंबं
धे शेषलक्षणैव षष्ठी॥ एवंपटस्य शौक्ल्यमित्यादिषु गुणगुणिभावादिसंबंधे शेषलक्षणैव षष्ठी ज्ञेया॥ भावप्रत्ययान्त इत्यादि। गुणवाची गुणशब्दो भावप्रत्य
यान्तो वस्त्वे निषिध्यते। तथोदाहृतं पटस्य शौक्ल्यमिति। काशिकावृत्तावप्युदाहारि वलाकायाः शौक्ल्यं। काकस्य कार्ष्ण्यमिति। भाष्यकारेण पिवलाकायाः जी॥
शौक्ल्यमित्याद्युक्तोक्तं॥ एतदेव तस्मिन्योगे उदाहरणमिति। अथवा पुनः पुनः गुणमेव वक्तीति गुणवाची भावी भाव्यस्त्येण निः। न कदाचिद्द्रव्यवाचीति यावत्॥॥ ॥२०५॥
भावप्रत्ययान्त एव सन् यः केवलं गुणवाची भावप्रत्ययान्तस्तद्भावेन गुणवाची गुणिद्रव्यवाची च सोऽत्र निषिध्यत इत्यर्थः॥ तेन पटस्य शौक्ल्यं पटस्य शुक्लो गुणो
ब्राह्मणस्य शुक्ला दंता इति सर्वत्र समासो न। तथोक्तं। कादाचित्कः प्रयोगोऽस्ति गोः शुक्लो गुण इत्ययं तेनैवमादिषु बुधैः समासोऽपि निषिध्यत इति॥ ॥ ॥
सदा गुणवाचिन इति। यः सदा गुणमेव वक्ति न कदाचिद्द्रव्यं तस्य समासनिषेधो न। तथा चोक्तं महाभाष्ये। तत्स्थैश्च गुणैः षष्ठी समस्यत इति वक्तव्यं॥॥
ब्राह्मणवर्णः। चंदनगंधः। पटहशब्दः। नदीघोषः। ननु तद्विशेषणेऽरिति कर्त्तव्यं॥ ॥घ॥ तस्य तीव्रो गंधः॥ चंदनस्य मृदुरिति। तस्मिन्गुण एव तिष्ठंतीति
तत्स्थाः सदा गुणवाचिन इत्यर्थः॥ उदाहरति चंदनगंध इति॥ गंधो हि केवलं गुण एव वर्त्तते। न कदाचिद्गुणिनि। यथोक्तं न कदाचित्स योगोऽस्ति चंद

नेगंधइत्ययं। चंदनस्येव गंधो हि स्वप्रधानः प्रतीयते। कथं गोविंशतिः। यतः संख्यायागुणत्वान्निषेधः स्यात्। नैष दोषः। यदयं शतसहस्रांताच्च निष्का
दित्याह तत्ज्ञापयति संख्यायाः समासः स्यात् इति। नहि सं विना शतसहस्रांतता प्रातिपदिकस्य स्यात्॥ संज्ञाप्रमाणत्वात्। उत्तरपदार्थप्राधान्यमि
त्यादिमुनित्रयप्रयोगादनित्यो गुणनिषेध इति॥ करणपाटवं बुद्धिमांद्यं यत्नगौरवमित्यादि सिद्धं फलानां तृप्तइति। तृप्त्यर्थानां करणे षष्ठी वेति शेषवि
वक्षायां षष्ठी। सदिति शतृशानचोः संज्ञा। द्विजस्य कुर्वन्नित्यादौ शेषषष्ठी। कुर्वन्निति। किं कुर्वन्नित्यर्थः॥ सतां कर्तव्यमित्यत्र कृत्यानां कर्तरि वेति षष्ठी। त
व्यतेत्यादि निरनुबंधकग्रहणे न सानुबंधकस्येति परिभाषया तव्यतो ग्रहणात्तेन समासो न भवत्येवेत्यर्थः। द्विजकर्तव्यमिति गतिकारकोपपदा
त्कृदिति स्वरकृत्स्वरेणांतस्वरितमुत्तरपदं स्यात् तव्यतस्तित्वात्। यदि तु निरनुबंधकेनापि समासः स्यात् तदा द्विजकर्तव्यमित्यत्र प्रकृतिस्वरे कृते
तव्यस्य प्रत्ययस्वरेणाद्युदात्तत्वे सति मध्योदात्तं स्यात् तच्च नेष्टं। अतो निरनुबंधेन समासनिषेधो न सानुबंधेन ननु च समानाधिकरणस्य षष्ठीसमास
निषेधेपि विशेषणं विशेष्येण बहुलमिति समासः स्यादेव। एवं चावश्यं ज्ञापिनि समासे यदि षष्ठीसमासः स्यात् को बाधः स्यादित्याशंक्याह सतिसमा
सइत्यादि। यदि षष्ठीसमासः स्यात् तदा द्वयोरपि षष्ठ्यंतयोः प्रथमानिर्दिष्टत्वात् पूर्वनिपातो नियमेन स्यात्। कर्मधारयेतु विशेषणस्यैव प्रथमानि
र्दिष्टत्वात्। पूर्वनिपातो नियम्यतेइतिकर्मधारयः स्यादेवेत्यर्थः॥ ॥क्तेन॥ ॥पूजायामित्यनेन मतिबुद्धिपूजार्थेभ्यश्चेत्यनेन सूत्रेण यः क्तो मत्यादौ
विहितः स सर्वो लक्षितइत्याह॥ राज्ञामिति॥ क्तस्य च वर्तमानइति षष्ठी पूजायां किं॥ छात्रहसितं नपुंसके भावे क्तः शेषे षष्ठी॥ ॥अधि॥ ॥क्तोधिकर
णे च ध्रौव्यगतिप्रत्यवसानार्थेभ्यइति अधिकरणे विहितस्य क्तस्य इदं ग्रहणं। इदमेषामासितमित्यादि। आस्यते स्मिन्नासितं। गम्यते स्मिन् गतं। भु
ज्यते स्मिन् भुक्तं। एषामिति क्तस्य चेति सति अधिकरणवाचिनश्चेति षष्ठी॥ अधिकरणवाचिनेति किं॥ छात्रहसितं॥ ॥कर्मणि॥ ॥यदियाकाच्च नर्क
र्मणि षष्ठी सा सर्वापि गृह्यते तर्हि कर्तरि चेति निषेधं न कुर्यादनेनैव सिद्धत्वात् यत्र धि हि कर्तरि तृजकौ नियोगतस्तत्र कर्मणि षष्ठी स्यात् तस्मात्क
र्तरि चेति पुनर्निषेधस्वनाद् उभयप्राप्तौ कर्मणीति या षष्ठी तस्या इदं ग्रहणं ज्ञायेत इत्यभिप्रेत्याह। उभयप्राप्तौ कर्मणि षष्ठीसमासो नेति॥ ॥ ५

प्र.म.सू.
॥१०६॥

॥ ॥तृजका॥ ॥ आवततः शायिके ति। पत्युर्याद्हेतोस्तत्रिषु ण्वुल् तृच् कर्तृकर्मणोः रिति कर्तरि षष्ठी। ननु तृचः किमित्युदाहरणं न प्रदर्शितमित्याशंक्याह॥ कर्त्तर्येवेति।
तद्योगे कर्तृषष्ठी नेति तृचैव कर्तुरभिहितत्वात्। तर्हि तृचो ग्रहणं स्यप दर्शितमित्याशंक्याह। कर्त्तर्येवेति। तद्योगे कर्त्त(रि) किमर्थमित्यत आह। तृजु
त्तरार्थ इति। इक्षुभक्षिकेति एवं वत ण्वुचा च वेक्षु शब्दात् तद्योगे कर्मणि षष्ठी॥ कर्त्तरि॥ ॥कर्त्तरीत्येतदकस्य विशेषणं तस्य कर्मणि भावे च विधाना
द्यपि चार संभवात्। नत्वत्र स्तस्य कर्त्तर्येव विधानाद्यभिचारा भावात्। अपोस्तृचेति। ण्वुल् तृचाविति तृच्। स्तुडिद्वशोरित्याम्। ननु च भर्तृ शब्दो याज
कादिषु पठ्यते तत्कथं बज्रस्य भर्त्तेत्युदाहृतमित्याशंक्याह। पत्यर्थे भर्तृ शब्दस्येति॥ संबंधि शब्देन होतृ शब्देन साहचर्यात् भर्तृशब्दो पि संबंधिशब्द
एव याजकादौ गृह्यते न क्रियाशब्दः वज्रस्य भर्त्तेत्यत्र तु क्रियाशब्द इति भावः। अकमुदाहरति। सतामाञ्जुकइति कर्त्तरि ण्वुल् कर्मणि षष्ठी। ननु च तृ
चः सानुबंधस्य ग्रहणं किं। न च तृणो निर्दिष्टार्थमिति वाच्यं। तद्योगे न लोके ति षष्ठी निषेधात् एवं तर्हि तन् ज्ञापयति न तद्योगे पि क्वचित् षष्ठी स्यादिति त
स्या नीपः कुरूणां अयशोकहेत्यादि सिद्धं॥ अर्विवायं निषेधो नित्य इति जनिकर्तुः प्रकृतिः तत्प्रयोजको हेतुश्चेत्यादि निर्देशात् ज्ञापयति। तत्स्य ॥प्र.॥ ॥१०६॥
नि जनितेनावतरत्त्वबोधिकामित्यादि उपपन्नं॥ ॥नित्यं॥ ॥उद्दालकपुष्पभंजिकेति। क्रीडाविशेषः। संज्ञायामिति ण्वुल् उद्दालकपुष्पेषु कर्मणि षष्ठी
दंतलेखक इति ण्वुल् तृचाविति ण्वुल्। क्रीडायां विकल्पेन षष्ठीसमासे प्राप्ते जीविकायां कर्त्तरि चेति षष्ठीसमासनिषेधे प्राप्ते वचनं। तत्र नित्य ग्रहणं जीवि
कार्थमुत्तरार्थं च। तृजकेति॥ क्रीडाजीविकयोः स्त्र जनाऽस्तीति नोदाहृत इति भावः। वामलमसेत्तु तच्चूर्जीविकायामस्ति। रमणीयकर्त्तेति॥ ॥पूर्वापराधरोत्तर॥ ॥
एकदेशो स्यास्तीत्येकदेशस्ववयवी तद्वाचिना पूर्वादयः समस्यमाना सामर्थ्याद् वयव वाचिन एव स्युरित्यभिप्रेत्याह॥ पूर्वादयो वयवा इति। ऐ देवकत्त्वाणि अ
वंतीति व्यत्ययेन तृतीयार्थे एकाधिकरण इति सप्तमी तत्रैक देशिन एतद्विशेषणं अधिकरणशब्दश्चात्र द्रव्यवाचीत्येतल्लभ्यते सिकुत्वाह॥ एकत्वेद्रव्यमि
ति॥ एकत्वसंख्याविशिष्टं चेद्द्रव्यमवयवीत्यादित्यर्थः पूर्वकायस्येति। अवयवावयविसंबंधे षष्ठी काय एकदेशी एकं च द्रव्यं। पूर्वं नाभेः कायस्येति॥॥
नाभेरिति दिग्योगलक्षणा पंचमी॥ नाभेर्यत्पूर्वं तत्कायस्येत्येषोत्रार्थो विवक्षितः। तेन नाभिना चावयवीति किंत्ववयव भूतात् तद्वाचीनात् त्रुटितत्राणं पूर्वं

न्निशद्ः पंचमंतोनसमस्यते। पूर्वं छात्राणामिति। अत्र बहुत्वसंख्यायुक्ता अवयविनः छात्रा इति न समासः। ननु चात्र छात्राणां पूर्वमामंत्रस्वेत्ययं को
ध्वनक्रियामध्यादन्यनिर्द्धारणे परिकल्प्यते तत्र ध्वननिर्द्धारण इत्येव परत्वात्षष्ठीसमासनिषेधः स्यात् किमेकाधिकरणग्रहणेन। उच्यते। एवं सति पूर्व
कायस्येत्यत्रापि निर्द्धारणं स्यात्॥ अस्त्यत्राप्यवयवस्यापकृष्टक्रियानिर्द्धारणहेतुः। तथा च तस्यैव योगस्य विषय आरभ्यमाणो योगस्तदपवादः स्या
त्। पूर्वं सर्वेणेति। यद्यपि संख्याविसाय पूर्वस्येत्याह ततो ज्ञायते सर्वेणावयवेनाह्नः समास इति। अन्यथा हि सायपूर्वत्वं अह्नस्य न घटत इत्ययुक्तं तद्द्वच
नं स्यात्। केचित्तु सर्वेणैकदेशवाचिनैकदेशिवाचिनः समासः षष्ठीविभागः स्यात्। न त्वहःशब्दस्यैवेति ज्ञापनमात्रं तेन मध्यरात्र इत्यपि सिध्यति॥ ॥
अर्द्धं॥ ॥समांशेत्यादि। समोंशः समः प्रविभागः तं वदति योऽर्द्धशब्दः स नपुंसके वर्त्तते स चावयववाची अवयविना समस्यते। एकं चेद्द्रव्यमवयवी-
स्यादित्यर्थः। अर्द्धं पिप्पलीनि परवल्लिंगमिति स्त्री। लिंगता विभाषानुवृत्तेरर्द्धपिप्पलीत्यादौ नोपसर्ज्जनत्वं इति गोस्त्रियोरुपसर्ज्जन इति ह्रस्वो न। एक
देशिना किं। अर्द्धं पशोर्देवदत्तस्य देवदत्तशब्देन समासो न॥ ॥द्वितीय॥ ॥एतानि वा तद्ददिति॥ एतान्यवयववाचीन्यवयविवाचिना समस्यंते एकं चेद्द्र पी८
व्यं॥ यद्यत्र पूरणगुणेति षष्ठीसमासनिषेधः स्यात्। अन्यतरस्यां ग्रहणमनर्थकं स्यात्। वाक्यमहाविभाषयैव सिद्धत्वादित्यभिप्रेत्याह। पूरणगुणे
त्यादि। द्वितीयं भिक्षेति। भिक्षाया द्वितीयो भाग इत्यर्थः एकदेशिनैव द्वितीयं भिक्षायाः भिक्षुकस्य। एकाधिकरण इत्येव द्वितीयं भिक्षाणां॥ ॥प्राप्त॥ ॥
पक्षे द्वितीया समास इति द्वितीयाश्रितेत्यादिना द्वितीयासमासविधिसामर्थ्यादिति भावः प्राप्तजीविक इति उपसर्ज्जनत्वाद्गोस्त्रियोरुपसर्ज्जनस्येति ह्र
स्वः। अत्र परवल्लिंगमिति न भवति। द्विगुप्राप्तापन्नालं पूर्व गतिसमासेषु नेति निषेधान्न यदा तु प्राप्ता जीविकामिति विग्रहे समासः क्रियते तदा प्राप्त
जीविकेति स्यात् स्त्रियाः पुंवदिति योगविभागेन पुंवद्भावात्॥ अथवा आपन्ने चेत्यत्र चावेति विच्छिद्य प्राप्तयोः समासेऽत्वं च विधीयते॥ ॥कालाः॥ ॥
सामर्थ्यात्कालाः परिमाणवाचिनो गृह्यंते मासादयो हि ज्ञानादेः संबंधिनीमादित्यगतीर्गमयंती तिरूपवंती तिपरिच्छेदहेतुत्वात् परिमाणं गौणं॥ ॥
सप्तमी॥ ॥शौंडैरिति बहुवचननिर्देशादाद्यर्थो गम्यत इत्याह। शौंडादिभिरिति। अक्षेषु शौंड इति वृत्तौ प्रसक्तिक्रियाया अन्तर्भावादक्षादिष्वधि

पन्त२

करणसप्तमी।। अंतःशब्दोत्राधिकरणप्रधान एव पठ्यते अतस्तस्य योगे तत्सामानाधिकरण्यमेव सप्तम्याः कारणं। वनेंतर्वेनोंतर्वसतीति। सर्वपदार्थ
प्रधान्येतु विवक्षायां अव्ययीभावः।। अंतर्वणमिति।। अधिशब्दोत्र पठ्यते तस्याप्यधिकरणप्राधान्ये अव्ययीभावः। अधिस्त्रीति। आधेयप्राधान्ये तु त
त्पुरुषः। ब्राह्मणे अधि ब्राह्मणाधीन इति ब्राह्मणाधिशब्दः केवलो न प्रयुज्यते। अषडक्षाशितंग्वित्यादिना अध्युत्तरपदात् खस्य स्वार्थिकस्य वि
धानात्।। सिद्धशुष्कपक्वबंधैश्चेत्येवमादीनि तत्पुरुषविधायीनि सूत्राणि कर्तृकरणे कृता बहुलं बहुलग्रहणस्य सर्वविधिव्यभिचारार्थस्यैवो
दाहरणप्रपंचभूतानीत्यभिप्रेत्याह। कर्तृकरणे इत्यादि। अत एव व्याख्यानप्रायत्वात्त्यक्तानि अष्टौ सूत्राणि वैषद्यार्थं व्याख्यायंते।। ।।
सिद्धशुष्कपक्वबंधैश्च।। ।।एभिः।। ।।सह सप्तम्यंतं समस्यते वा स तत्पुरुषः।। कांपिल्ये सिद्धः कांपिल्यसिद्धः। आतपशुष्कः स्थालीपक्वः। चक्रबंधः।।
।। ।।ध्वांक्षेण क्षेपे।। ।।ध्वांक्षवाचिना सुबंतेन सह सप्तम्यंतं समस्यते निंदायां गम्यमानायां।। तीर्थे ध्वांक्ष इव तीर्थध्वांक्षः अनवस्थित इत्यर्थः।। तीर्थ
काकः। तीर्थवायसः। क्षेपे किं।। तीर्थे ध्वांक्षस्तिष्ठति।। ।।कृत्यैर्ऋणे।। ।।ऋणे गम्ये सप्तम्यंतं कृत्यांतैः समस्यते। यत्प्रत्ययेनैवेष्यते। मासेदेयमृणं मा
सदेयं।। ऋणग्रहणं नियोगोपलक्षणार्थं इहापि स्यात्। पूर्वाह्णे गेयं साम पूर्वाह्णगेयं। ऋणे किं। मासे देया भिक्षा।। ।।संज्ञायां।। ।। संज्ञायां विषये स
प्तम्यंतं समस्यते संज्ञा समुदायोपाधिः तेन नित्यसमासोयं। नहि वाक्येन संज्ञा गम्यते अरण्येतिलक। हल्दंतादिति सप्तम्या अलुक्।। ।।क्तेना
होरात्रावयवाः।। ।।अहरवयवा रात्र्यवयवाश्च सप्तम्यंताः क्तेन सह समस्यंते।। पूर्वाह्णकृतं पूर्वरात्रकृतं। अवयवाः किं। दिवा वृत्तं। रात्रौ वृत्तं।। ।।तत्र
।।तत्रेत्येतत्क्तांतेन सह समस्यते। तत्र कृतं। तत्रपीतं। ऐकपद्यमैकस्वर्यं च समासत्वात् स्यात्।। ।।क्षेपे।। ।।निंदायां गम्यायां सप्तम्यंतं क्तांतेन समस्यते
अवतप्तेनकुलस्थितं। चापलमेतदनवस्थितत्वं तच्चैतदित्यर्थः।। उदके विशीर्णं। प्रवाहे मूत्रितं।। भस्मनि हुतं। निष्फलं यत्क्रियते तदेवमुच्यते। तत्पु
रुषे कृति बहुलमिति सप्तम्या अलुक्।। ।।पात्रेसमितादयश्च।। ।।समुदाया एव तत्पुरुषसंज्ञा निपात्यंते निंदायां गम्यमानायां। सप्तम्यंतं क्तांतेन
समस्यते। येत्वत्र क्तांतास्तेषां पूर्वेणैव सिद्धे पुनः पाठो युक्तारोह्यादित्वेन पूर्वपदाद्युदात्तत्वं यथा स्यादिति। तत्र हि पात्रेसमितादयश्चेति पठ्यते।

पात्रेसमिताः। पात्रेबहुलाः। अवधारणेनात्र क्षेपो गम्यते॥ पात्रेसमिताः। न पुनः क्वचित्कार्ये। उदुंबरमशकादिषूपमया क्षेपः। मातरिपुरुषइति
निषिद्धसेवया। पिंडीशूरादिषु निरीहतया॥ हस्तकरणं वादाद्याकृतिगणोयं पात्रेसमिताः। पात्रेबहुलाः। उदुंबरमशकः। उदुंबरकृमिः। कूप
कच्छपः। अवटकच्छपः। कूपमंडूकः। उदपानमंडूकः। नगरकाकः। नगरवायसः। मातरिपुरुषः। पिंडीशूरः। गेहेशूरः। गेहेनर्दी। गेहेक्ष्वेडी। गेहेवि
जिती। गेहेव्याडः। गेहेदृप्तः। आखनिकबकः। गोष्ठेशूरः। गोष्ठेविजिती। गोष्ठेक्ष्वेडी। गोष्ठेमेही। गोष्ठेपटुः। गोष्ठेपंडितः। गोष्ठेप्रगल्भः। कर्णे
टिरिटिरा। कर्णेचुरुचुरा। चकारोवधारणार्थस्तेन समासांतरं न भवति। परमपात्रेसमिता इति॥ कुगति॥ ॥कुशब्दोव्ययं पापाद्यर्थं गृह्यते
गत्यादिसाहचर्यात्। पृथिव्यादिद्रव्यवाची। गतिग्रहणेनैव प्रादिग्रहणे सिद्धे पि क्रियायोगाभावे पि समासो यथा स्यादित्येवमर्थं प्रादिग्रहणं। कु
पुरुषइति। कुत्सितः पापः पुरुषः। ऊरीकृत्येति। ऊर्यादिच्विडाचश्चेति ऊरीशब्दो गतिसंज्ञः॥ समानकर्तृकयोः पूर्वकाल इति क्त्वा। समासत्वादिति। स
मासेनञ्पूर्वे क्त्वो ल्यबिति॥ ॥अचसुप्सुपेत्यनुवर्तते इति॥ अयं भावः। उपपदमतिङिति सूत्रस्थमतिङ्ग्रहणमुभयोर्योगयोः शेषः। गतिः
समस्यते अतिङंतश्च समासः स्यात्। ततः प्रपचतीत्यत्र न समासः॥ उपपदं समस्यते। अतिङंतश्च समासः स्यात् इति। ततो मा डिंलुङ्। मा
कार्षीदिति न समासस्ततश्चातिङ्ग्रहणं सुप्सुपेति नानुवर्तेत इति ज्ञायते। ततस्तिङापि समास इति अत्र सुपोऽसुपा समासात्केन चित्ति
ङा गतिमता उदात्तवतापि समास इत्यर्थः॥ तथोक्तं भाष्ये। उदात्तवता तिङा गतिमता चाव्ययस्य समासो वक्तव्यः। अनुव्यचलत्। अनुप्राविशत्।
व्याकरोति। पर्यारयंतीति उरीकरोतीति अत्र यदितिशेषः। तत्र निपातैर्यद्यदीति तिङंतनिघातनिषेधादुदात्तवता तिङा समासः। एवं प्रकरोती
त्यादावपि यदित्यध्याहारः। अन्येन तिङा गतीनां च समासः। विभक्तिस्तु सत्यपि समासत्वेन प्रातिपदिकत्वेन भवति ङिति ङेश्चैकत्वादेकत्वा
त्॥ गतिसंज्ञकात् दर्शयितुमाह॥ ऊर्यादयइत्यादि॥ एषामव्ययानामिति। ऊर्यादिकानां निरसंतानां अव्ययानां प्रादीनां विंशतेश्च गतिश्चेत्या
दिभिः सूत्रैरर्थविशेषेषु क्रियायोगे गतिसंज्ञा विधीयत इति ज्ञेयं। स्पष्टत्वात्तु क्वा निरकादशसूत्राणि क्रमेण व्यामः॥ ॥गतिश्च॥ ॥प्रादयोगति

प्र॰प॰सु॰ संज्ञास्युः क्रियायोगे। चकारो गत्युपसर्गसंज्ञयोः समावेशार्थः। तेनप्रलीलअभिषिक्तं। अत्र गतिरनंतर इति स्वर उपसर्गादिति णत्वषत्वे च
स्तः॥ ॥ऊर्यादिच्विडाचश्च॥ ॥ऊर्यादयः शब्दाः च्व्यंताः डाजंताश्च क्रियायोगे गतिसंज्ञास्युः। च्विडाचोः स्वस्तियोगे विधिस्तत्वाहचर्यादू
॥१०८॥ र्यादीनाम विनेरेव योगे गतिसंज्ञा ज्ञेया। ऊरीकृत्य। शुक्लीकृत्य। पटपटाकृत्य। ऊरी। उररी। उररी॥ एते अंगीकारे। पांपीताली॥ आताली। वेताली॥
धूसी॥ एते विस्तृते। सकला संकला। ध्वंसकला॥ भ्रंसकला। येसत्वादयो हिंसायां। सकलाकृत्य। संकलाकृत्येत्यादि। हिंसित्वेत्यर्थः। गुलुगुलु
धापीडार्थे। गुलुगुलुधाकृत्य। सजूः सहार्थे। सजूःकृत्य। फलूकृत्य। विक्लीकृत्य। आक्लीकृत्य। एते वैकृते। आलोष्टी। केवासी। सेवाली। वर्षाली।
मश्मसा। मषमसा। एते हिंसायां। श्रौषट्। वौषट्। वषट्। स्वाहा। स्वधा। एते दाने। प्रादुस्। आविस् प्रकाशने॥ ॥अनुकरणं चानितिपरं॥ ॥इतिः प-
रो यस्मादिति बहुव्रीहिः अनुकरणमनितिपरं क्रियायोगे गतिसंज्ञं स्यात्। खाटत्कृत्य। अनितिपरं किं। खाडिति कृत्वा दरगोर्थथासेस्थ्येसदस
द्रुक्षौ गतिसंज्ञौ स्तः। सत्कृत्य। असत्कृत्य। आदरानादरयोः किं। सत्कृत्वा कांडं गतः। असत्कृत्वा कांडं गतः। कारिकाशब्दस्योपसंख्यानं। कारि- श्री॥
काकृत्य। भूषणेऽलं॥ ॥अलंशब्दो भूषणे गतिसंज्ञः। अलंकृत्य। भूषणे किं। अलंकृत्वौदनं गतः॥ ॥अंतरपरिग्रहे॥ ॥अपरिग्रहे अंतरशब्दो ॥१०८॥
गतिसंज्ञः। अंतर्हत्य। मध्ये हत्वेत्यर्थः। अपरिग्रहे किं। अंतर्हत्वा मूषिकां श्येनो गतः। परिगृह्य गतः॥ ॥कणेमनसी श्रद्धाप्रतिघाते॥ ॥कणेम-
नः शब्दौ श्रद्धाविशेषोऽलौतिशयार्थश्रद्धाप्रतिघाते गतिसंज्ञौ स्तः। कणेहत्य पयः पिबति। मनोहत्य पयः पिबति। तावत्पिबति यावदस्याभिलाषो नि-
वृत्तः। श्रद्धाप्रतिहते त्यर्थः। श्रद्धाप्रतिघाते किं। कणेहत्वा गतः। मनो हत्वा गतः। अत्र कणेशब्दोऽधिकरणप्रतिरूपको तंडुलावयवे वर्त्तते। मनःशब्दश्च
नसि॥ ॥पुरोऽव्ययं॥ ॥असि प्रत्ययांतः पुरः शब्दोऽव्ययं सगतिसंज्ञः स्यात्। समासस्वरोपचाराः प्रयोजनं। पुरस्कृत्य नमस्पुरसोर्गत्योरिति विस-
र्गस्य सः। अव्ययं किं। पुरः कृत्वा गतः। नगरीं कृत्वा गतः इत्यर्थः॥ ॥अस्तं च॥ ॥अव्ययमिति वर्त्तते॥ अनुपलब्धौ वर्त्तमानो मांतोऽस्तंशब्दोऽव्ययं
सगतिसंज्ञः। अस्तंगत्य सविता पुनरुदेति। अव्ययं किं। अस्तं कांडं क्षिप्तमित्यर्थः॥ ॥अदोऽनुपदेशे॥ ॥उपदेशः परस्यार्थकथनं स्वयमेव यदा बु-

ह्यापरामृशति नास्त्युपदेशः तस्मिन्विषये अदःशब्दो गतिसंज्ञः। अदःकृत्य। अनुपदेशे किं। अदः कृत्वा कोऽयं गत इति परस्य कथयति॥ ॥तिरो
ऽन्तर्द्धौ॥ ॥व्यवधाने तिरःशब्दो गतिसंज्ञः। तिरोभूय। अंतर्द्धौ किं। तिरोभूत्वा स्थितः। अत्र तु भूत्वा पार्श्वतो भूत्वेत्यर्थः॥ ॥अच्छ॥ ॥अव्यय
मितिवर्त्तते। अच्छशब्दार्थो वृशब्दोऽव्ययस गत्यर्थेषु धातुषु वदतौ च गतिसंज्ञः। तिरस्सद्य इत्यादि। एते तिरस्पदन्तयः करोतौ धातौ परे विभाषाद्
मीत्यादिभिः सूत्रैर्या गतिसंज्ञा विधीयते तदुत्यर्थः। तानि पंच सूत्राणि व्याख्यायते॥ ॥विभाषा कृञि॥ ॥अन्तर्द्धावितिवर्त्तते। ग्रासविभाषेयं तिरश
ब्दः करोतौ परे वा गतिसंज्ञः। तिरःकृत्य। तिरःकृत्वा। अन्तर्द्धौ किं। तिरः कृत्वा काष्ठं गतः॥ ॥उपाजे न्वाजे॥ ॥एतौ विभक्तिप्रतिरूपकौ निपातौ॥
दुर्बलस्य सामर्थ्याधाने वर्त्तते। तौ कृञि वा गतिसंज्ञौ स्तः। उपाजेकृत्य। उपाजेकृत्वा। अन्वाजेकृत्वा। अन्वाजेकृत्य॥ ॥साक्षात्प्रभृतीनि च॥ ॥सा
क्षात्प्रभृतीनि कृञि परे वा गतिसंज्ञानि स्युः। साक्षीत्वादिषु च्व्यर्थवचने। साक्षात्कृत्य। साक्षात्कृत्वा। साक्षात्। मिथ्या। चिंता। भद्रा। लोचना। अ
मा। आस्था। श्रद्धा। प्रा — — । प्राजरुहा। विजर्ध्या। वीजरुहा। संजर्या। अर्थे लवणं। उष्णं। शीतं। ले उदके। आर्द्रे। गतिसंज्ञासंनियोगेन लवणादीनां मांतत्वं
निपात्यते। अग्नौ। वशे। विकमने। प्रतपने। विकंपने विसहने। प्रादुस्। नमस्। आविस्॥ ॥अनत्याधान उरसिमनसी॥ ॥अत्याधानमुपश्लेषणं। तदभा
वे उरसिमनसी शब्दौ विभक्तिप्रतिरूपकौ निपातौ वा गतिसंज्ञौ स्तः। उरसिकृत्य। उरसिकृत्वा अभ्युपगम्येत्यर्थः। मनसिकृत्य मनसिकृत्वा निश्चित्ये
त्यर्थः। अनत्याधाने किं। उरसिकृत्वा पाणिं शेते॥ ॥मध्येपदे निवचने च॥ ॥मध्येपदे इति सप्तम्यंतप्रतिरूपकौ निपातौ। निवचने। अर्थाभावे च व्ययीभा
वः। एते शब्दाः अनत्याधाने कृञि परे वा गतिसंज्ञाः। मध्येकृत्य। मध्येकृत्वा। पदेकृत्य। पदेकृत्वा। निवचनेकृत्य। निवचनेकृत्वा। वाच्यं नियमेत्यर्थः। अन
त्याधान इत्येव। हस्तिनः पदे कृत्वा शिरः शेते॥ ॥तिरस्तोन्यत॥ ॥कृत्वाक्त्वो चेति प्राप्ते इदं वचनं। गतिग्रहणं चेह स्पष्टार्थं न इत्यपि प्रेत्याह॥ गतिसंज्ञास्यु
ति। हस्ते इत्यादि। हस्ते इत्यादयो नित्यं हस्ते पाणावुपयमने इत्यादिभिः सूत्रैर्नित्यं गतिसंज्ञाः स्युः। तानि च सूत्राणि व्याख्यायते॥ ॥नित्यं हस्ते पाणावु
पयमने॥ ॥हस्ते पाणौ इत्येतौ शब्दौ कृञि नित्यं गतिसंज्ञौ स्तः। उपयमने विवाहकर्मणि। हस्तेकृत्य। पाणौकृत्य। दारकर्म कृत्वेत्यर्थः। उपय

प्र०प्र०सु मनेकिं। हस्ते कृत्वा काषीपणं गतः।। ।।प्राध्वं बंधने।। ।।प्राध्वमिति सोऽन गत्यर्थत्वात् आनुकूल्ये वर्त्तते तदानुकूल्यं बंधननिमित्तं यदा स्यात्तदा प्राध्वंशब्दः कृञि नित्यं
।।२०५।। गतिसंज्ञः स्यात्। प्राध्वं कृत्वा। बंधनेन निमित्तेनानुकूल्यं कृत्वेत्यर्थः।। प्रगतमध्वानं।। प्राध्वं कृत्वा शकटं गतः।। ।।जीविकोपनिषदावौपम्ये।। ।।जीविकाश
ब्दो जीवनोपायवाची उपनिषच्छब्दो रहस्यवाची तौ कृञि परे औपम्यविषये नित्यं गतिसंज्ञौ स्तः। जीविकां कृत्य। जीविकामिव कृत्वेत्यर्थः।। उपनिषत्कृत्य। उप
निषदमिव कृत्वेत्यर्थः।। औपम्ये किं। जीविकां कृत्वा गतः। प्रासंगिकीं गतिसंज्ञां परिसमाप्य प्रकृतं तु गतिप्रादय इत्यस्मिन् सूत्रे उपाधिवचने वक्तव्यैर्विधी
यमाने समासमाह।। ।।प्रादय इत्यादि।। ।।कुःपापार्थे तत्र उर्न्निंदायां। स्वती पूजायां।। आङीषदर्थे इत्यादीन्युपाधिवचनेन वक्तव्यानि प्रायिकत्वा
क्तानि। तथा चोक्तं काशिकायां प्रायिकं चैतदुपाधिवचनमन्यत्रापि हि समासो दृश्यते। कोष्णं। दुःकृतं। सुकृतं। अतिस्तुतं।। आबद्धमिति।। प्रादय इति
।प्रादयो गतादर्थे वर्त्तमानाः प्रथमया प्रथमाविभक्त्यंतैः समस्यंत इति वक्तव्यं। नित्यसमासत्वादस्वपदेन विग्रहं करोति।। प्रगत आचार्य इति।। प्रा
तेवासीति प्रगतोंतेवासी। आदिशब्दो वृद्धप्रयोगानुसारेण ज्ञेयाः। यथा प्रगतः पितामहः प्रपितामहः प्रमातामहः। दुष्टः पुरुषो दुःपुरुषः। शोभनो श्वः स्व प्री।। ।।२०५।।
श्व इत्यादयः। अत्यादय इति। क्रांताद्यर्थे वृत्तयोऽत्यादयो द्वितीयाविभक्त्यंतैः समस्यंत इति वक्तव्यः। आदिशब्दादेतेऽपि। उद्गतो वेलां उद्वेलः इत्यादयः प्रयोगानु
सारात् ज्ञेयाः। अतिक्रांतो मालामिति विग्रह इति। अतिमाल इति समासस्यार्थप्रतिपादकं वाक्यं इत्यर्थः।। ।।एकं।। ।।प्रथमानिर्दिष्टं समास इत्युक्तः समास
इत्यनुवर्त्तते। तत्र समासार्थे यद्वाक्यं तदेकदेशत्वेनाभिप्रेत्याह। विग्रह इति।। एकविभक्ति शब्दार्थमाह। नियतविभक्तिकमिति। नियता विभक्तिर्यस्य तन्नियतवि
भक्तिकं। विभक्तिशब्दः सुब्वचनः। कारकशक्तिवचनो वा विभज्यते प्रातिपदिकार्थो नयेति। द्वितीयसंबंधिनि षष्ठी निर्दिष्टविभक्तिभिः युज्यमाने पि यदेकैव
विभक्त्या युज्यते तदुपसर्ज्जनसंज्ञं स्यादित्यर्थः। न तु तस्य पूर्वनिपात इति अनेन यस्योपसर्ज्जनत्वं कृतं तस्य पूर्वनिपातो नेत्यर्थः। एतच्चाग्रे अतिमाल इत्यु
दाहरणस्पष्टीकरिष्यामः।। ।।गोस्त्रियोः।।।। गो इति स्वरूपग्रहणं स्त्रीति प्रत्ययग्रहणं स्वरितत्वादुपसर्ज्जनग्रहणं तयोर्विशेषणमिति स्वरितप्रायेणाह
गोतस्त्रीप्रत्ययांतयोरुपसर्ज्जनयोर्ह्रस्वः स्यादिति। गोशब्दांतो गोतः। स्त्रीप्रत्ययो तोऽपस्य तत्स्त्रीप्रत्ययांतं तयोः गोंतस्त्रीप्रत्ययांतयोरुपसर्ज्जनयोरित्यर्थः।

अत्र च प्रातिपदिकस्येति वर्त्तते तस्योपसर्ज्जनगोशब्देन उपसर्ज्जनेस्त्रीप्रत्ययांतस्य च तदंतविधिर्ज्ञेयः ततश्चायमर्थः स्यात् उपसर्ज्जनगोशब्दांतस्य प्रा
तिपदिकस्य उपसर्ज्जनस्त्रीप्रत्ययांतस्य च प्रातिपदिकस्य ह्रस्वः स्यादिति तेन गोः ॥ राजकुमारीपुत्र इत्यत्र ह्रस्वो न । अतिमाल इति । मालामतिक्रांतो अति
मालः मालाशब्दो तिक्रमणक्रियापेक्षया कर्मशक्तियोगात् । द्वितीयांत एव न तस्य क्रियांतरमपेक्ष्य शक्त्यंतरावेशः संभवतीति । अतिशब्दस्तु अतिक्रांत प्रधाने
नानाशक्तिभिर्युज्यते इति तस्मिन्ननेकाभिर्विभक्तिभिर्युज्यमानेपि मालाशब्दो द्वितीयांत एवेत्युपसर्ज्जनसंज्ञा तस्य च गोस्त्रियोरिति ह्रस्वः । अतिशब्द
स्य तु प्रधानस्याप्यत्यादयः इति प्रथमानिर्दिष्टसामर्थ्यादुपसर्ज्जनत्वे अथवा एकविभक्तिचेति चकारस्यानुक्तसमुच्चयार्थत्वात् । ननु एकविभक्तिचे
त्यस्यावकाशो अतिमालः प्रथमानिर्दिष्टमित्यस्यावकाशो नीलोत्पलादिः कष्टश्रित इत्यादौ उभयप्रसंगे परत्वादेकविभक्तीति उपसर्ज्जनतास्यात् तेन श्वार
वें निपातन इति सर्वनिपातननिषेधप्रसंगः ॥ मैवं ॥ नायं प्रसज्यप्रतिषेधः एवं निपातो नेति । किंतु ॥ पर्युदासोयं । सर्वं निपातनेन विधिर्न निषेधः । अथवा प्रसज्य
प्रतिषेधोपि भवतु तथाप्यदोषः । यतोनंतरस्य विधिर्वा भवति प्रतिषेधो वेति । अनंतरा प्राप्तिर्निषिद्धा एवं च त्वनिषिद्धेत्वेति तथा स्यात् । न चानंतरा प्राप्तिः
सर्वां प्राप्तिं बाधत इति वाच्यं । तस्या निषिद्धत्वाद्बाधकत्वाभावात् । अतिगंग इति । गंगामतिक्रांतो तिगंगः । विभाषानुवृत्तेरिति । अत्र विभाषाग्रहणं सीत्यतो
मंडूकप्लुतिन्यायेन विभाषाग्रहणमनुवर्त्तते । व्यवस्थितविभाषा चेयं तेन अर्द्धपिप्पल्या अर्द्धपिप्पली इत्यादौ पिप्पल्यादीनामेकविभक्तियुक्तानामप्युप

हि

सर्ज्जनत्वं न स्यात् । यदि तु स्यात्तु ह्रस्वत्वं स्यादित्यर्थः । स्त्रीप्रत्ययांतत्वाभावादिति । स्त्रियामित्यधिकारेण विहिता हि प्रत्ययाः स्त्रीप्रत्ययाः अतितंत्रीर
ति लक्ष्मीरति श्रीरित्यादौ तु अवितृस्तृतंत्रिभ्य ईः । लक्षेर्मुट् च । क्विब्वचिप्रच्छ्यायतस्तुकटप्रुजुश्रीणां दीर्घोसंप्रसारणं चेति विहिताः प्रत्यया न स्त्र्य
धिकारविहिता इति कृत्वात्र ह्रस्वो नेत्यर्थः । ईयसश्च इति । ईयसंताद्यः स्त्रीप्रत्ययो विहितस्तदंतस्य बहुव्रीहेर्ह्रस्वो न स्यादिति वक्तव्यमित्यर्थः । बहु
श्रेयसीति ॥ प्रशस्यस्य श्र इति प्रशस्यशब्दस्येयसुनि श्रादेशः । उगितश्चेति ङीप् । बह्व्यः श्रेयस्यो यस्येति बहुव्रीहिः । नद्युतश्चेति प्राप्तस्य कप इयसश्चे
ति निषेधः पुंस्यपि सो हल्ङ्यादिलोपः बहुव्रीहेः किं । अतिश्रेयसिः । अवादय इति । क्रुष्टाद्यर्थे वर्त्तमाना अवादयस्तृतीयांतेन समस्यंत इत्यर्थः । अव

अ·प्र·सु· कोकिलइति। अतिमालवदुपसर्जनह्रस्वत्वे। आदिशब्दादन्येपिदृष्टप्रयोगास्ते। परिणद्धोवीरुधाः परिवीरुत्। सेनद्धोवर्मणा संवर्मेत्यादयोज्ञेयाः
॥११० ।पर्यादयइति। ग्लानाद्यर्थेवर्त्तमानाः पर्यादयश्चतुर्थ्यातेनसमस्यंतइतिवक्तव्यमित्यर्थः। निःकौशांबिरिति। कौशांबेननिर्गता अवलेलुमाशिरिति। अवलं
कुमर्थ्यै॥ आदिशब्दात्तद्दृष्टप्रयोगास्तेअन्येपि। उद्युक्तः संग्रामाय उत्संग्रामइत्यादयोज्ञेयाः। निरादयइति। क्रांताद्यर्थेवर्त्तमानानिरादयः पंचम्यातेनस
मस्यंतइतिवक्तव्यमित्यर्थः कौशांबीनगरी॥ उपसर्जनत्वह्रस्वत्वेपूर्ववत्। आदिशब्देनापगतः शाखाया अपशाखः इत्यादयोन्येपिदृष्टप्रयोगास्ते
ज्ञेयाः। इवेनेति। इवेनसमासः स्यात् विभक्त्यलोपश्चेतिवक्तव्यमित्यर्थः॥ कर्मप्रवचनीयानामिति। कर्मप्रवचनीयसंज्ञानां प्रादीनांसमासोनस्यादितिवक्त
व्यमित्यर्थः। समानाधिकरणपदंतत्पुरुषमाह॥ ॥पूर्वकाल॥ ॥पूर्वकालइत्यर्थग्रहणं अर्थपरत्वान्निर्देशस्यतेनच पूर्वकालार्थः सं संबंधिशब्दत्वात् अपर
कालार्थमपेक्षेवस्यादिति तेनैवसमस्यतइति चेतसिकृत्वाह। पूर्वकालार्थस्य परकालार्थेनेति। एकादीनां स्वरूपग्रहणं शब्दप्रधानत्वादिनिर्देशस्य।
भिन्नप्रवृत्तिनिमित्तप्रयुक्तानां शब्दानामेकस्मिन्नर्थेवृत्तिः सामानाधिकरण्यं। भिन्नप्रवृत्तिनिमित्तप्रयुक्तानामिति पर्यायनिवृत्त्यर्थं एकस्मिन्निति गो
रश्वमित्यादिनिवृत्त्यर्थं॥ ॥स्नातानुलिप्तइति॥ पूर्वंस्नातः पश्चादनुलिप्तः स्नातानुलिप्तः। अत्रस्नातशब्दः स्नानेननिमित्तेनप्रयुक्तः। अनुलिप्तस्त्व श्री॥
नुलेपनेननिमित्तेनप्रयुक्तस्तयोरेकार्थेदेवदत्तेवृत्तिरस्तीति॥ अस्तिसामानाधिकरण्यं॥ पूर्वनिर्यत्तिनिमाद्यर्थआरंभः॥ ॥तत्पुरुषः॥ ॥अत्रसमाना त ॥११०॥
धिकरणइत्यनेनसमा॥नाधिकरणपदस्तत्पुरुषउपचारात्समानाधिकरणइत्युच्यते। यद्युपचारेणव्याख्यायते। मुख्यएवतत्पुरुषः समानाधिकरणइ
त्युच्यते तद्यथा राजपुरुषः शोभनइत्यादौ कर्मधारयसंज्ञास्यात्। बाह्येनशोभनपदेन कर्मधारयस्यसामानाधिकरण्यात्। परमराज्यमित्यत्रनस्यात्क
र्तृतरस्याप्रयोगात्। तत्पुरुषः किं। पचिकान्वार्थः समानाधिकरणइतिकिं। ब्राह्मणराज्यं॥ कर्मधारयप्रदेशाः कर्मधारयेनिष्ठेत्येवमादयः॥ ॥
पुंवत्॥ ॥कर्मधारयइत्यादि। कर्मधारयेजातीयदेशीययोः प्रत्यययोः परतोभाषितपुंस्कं भाषितः पुमानन्यस्मिन्नर्थे याभिः तत्पुंस्कं तद्वाचकं शब्द
रूपंपुंवत्स्यादित्यर्थः। अत्रस्त्रीशब्दस्यपुंशब्दोनिति मध्युपचारात् भाषितपुंस्कं अनूङ् नऊङो भावो अनूङ् सोऽनेयस्य तदनूङ् तं पूर्वं स्त्रीवाचकंरु

द्रूपं पुंवत् स्यादित्यर्थः। अत्र स्त्रीशब्दस्य पुंशब्दो ऽतिदिश्यते। नन्वस्त्र्यर्थस्य पुमर्थः न चास्त्रीप्रत्ययस्य पुंवदित्ये न निर्दिष्टत्रिः। उभयोरपि पक्ष-
योः दोषवत्वात् पूर्ववैवद्दोषाभावादेतस्य महाभाष्ये वृत्तिन्यासयोश्च प्रतिपादितत्वात् स्त्रियाः पुंवद्भाषितपुंस्कादित्यत्र सूत्रे विशदं वक्ष्यामः॥ ॥
पुंवत्त्वात् स्त्रीप्रत्ययस्य लोप इति। पुंवाचकशब्दातिदेशात् स्त्रीवाचकः प्रत्ययो यस्मात् स स्त्रीप्रत्ययः स्त्रीवाचकः शब्दस्तस्य निवृत्तिरित्यर्थः। अथवा
स्त्री प्रतीयते यस्माज्ज्ञायते स्त्रीप्रत्ययः स्त्रीवाचकः शब्दस्तस्य निवृत्तिरित्यर्थः। एकशाटीति॥ पूर्वकालैकेति समासः। पुंवद्भावः। ननु च कर्मधारयसमा-
से स्त्रियाः पुंवदित्यादिनैव पुंवत्त्वे सिद्धे जातीयदेशीययोः परतोपि तसिलादिष्वित्यादिना तद्व्यर्थमिदं सूत्रमित्याशंक्याह॥ कोपधादेरित्यादि। न
कोपधाया इत्यादिना सूत्रेण सन्दर्शितकोपधादेः पुंवद्भावो निषिद्धः स कर्मधारयादौ ऽनेन सूत्रेण पुनः प्रसूयते। न कोपधाया इत्यादि॥ प्रतिषे-
धविषयेपि कर्मधारयसमासे जातीयदेशीययोः परतश्च पुंवद्भावो यथा स्यादित्येवमर्थमिदं सूत्रमित्यर्थः। क्रमेण प्रतिषेधविषयमुदाहरति। पा-
चकस्त्रीत्यादि। पाचिका चासौ स्त्री च पाचकस्त्री। न कोपधाया इति निषेधः प्राप्तः स बाधितः। पंचमभार्येति। पंचमी चासौ भार्या च पंचमभार्या।
दत्तभार्या। दत्ता चासौ भार्या चेति अत्रोक्तयत्र संज्ञापूरण्योश्चेति निषेधः प्राप्तः। स्रौघ्नभार्येति। स्रुघ्ने भवा स्रौघ्नी। सा चासौ भार्या च स्रौघ्नभा-
र्या। स्वांगाच्चेतो मानिनीति। ब्राह्मणभार्येति। ब्राह्मणी चासौ वृद्धिनिमित्तस्य च तद्धितस्यारक्तविकारे इति। सुकेशभार्येति। सुकेशी चासौ भा-
र्या चेति सुकेशभार्या॥ स्वांगाच्चेतो मानिनीति। ब्राह्मणभार्येति। ब्राह्मणी चासौ भार्या चेति जातेश्चेति। एवं पाचकजातीया॥ पाचकदे-
शीयेति। पाचिका प्रकारा पाचकजातीया। प्रकारवचने जातीयर्। ईषदूना पाचिका पाचकदेशीया। ईषदसमाप्तौ कल्पदेश्यदेशीयर्
इति देशीयर्। इत्यादीत्यादिना। पंचमजातीया। पंचमदेशीया। दत्तजातीया। दत्तदेशीया। स्रौघ्नजातीया। सुकेशदेशीया॥ ब्राह्मणजातीया॥
ब्राह्मणदेशीयेति। सर्वे देवा इत्यादि। पूर्वकालैकेत्यस्योदाहरणशेषः॥ इत्यादीत्यादिना॥ पुराणान्नं नवान्नमिति। समानाधिकरणेनेति किं।
एकस्याः शाटी॥ स्पष्टत्वात्तत्सूत्रत्रये॥ ॥ दिक्संख्ये संज्ञायां॥ ॥ दिग्वाचिनः शब्दाः संख्या च समानाधिकरणेन सुबंतेन समस्यंते स तत्पुरुषः

ग्रा २

प्र॰ प्रसु संज्ञायां विषये। पूर्वेषुकामशमी। पञ्चाम्राः। सप्तर्षयः। संज्ञायां किं। उत्तरा वृक्षाः। पञ्च ब्राह्मणाः॥ ॥कुत्सितानि कुत्सनैः॥ ॥कुत्सितवाची
॥१९१॥ निसुबंतानि कुत्सनवाचिभिः सुबंतैः सह समस्यंते स तत्पुरुषः। शब्दप्रवृत्तिनिमित्तकुत्साया मयमिष्यते। विशेषणं विशेष्येति विशेष्यस्य परनिपा
ते प्राप्ते विशेष्य पूर्वनिपातार्थ आरंभः। वैयाकरणखसूचिः निःप्रतिभ इत्यर्थः। याज्ञिककितवः अयाज्ययाजनात्तृष्णापर इत्यर्थः। मीमांसकदु
र्दुरूटः। नास्तिक इत्यर्थः॥ कुत्सितानीति किं। वैयाकरणश्चौरः। नह्यत्र वैयाकरणत्वं कुत्स्यते। कुत्सनैरिति किं। कुत्सितो ब्राह्मणः॥ ॥पाप
णके कुत्सितैः॥ ॥पापाणकशब्दे कुत्सिताभिधायिनौ तयोः पूर्वेण समासे परनिपातः स्यात्। पूर्वनिपातार्थोयमारंभः॥ पापनापितः। अणक
नापितः॥ ॥उपमानानि॥ ॥इह वस्तुन उपमानस्य प्रसिद्धत्वात्तस्य चोपमेयापेक्षत्वादुपमानोपमेययोरेव यः साधारणो धर्मः स सामान्यशब्दे
नोच्यत इत्याह॥ उपमानोपमेयैकधर्मवचनैरिति। उपमीयतेनेनेत्युपमानं॥ उपमीयते यत्तदुपमेयं। तयोरेकः साधारणो यो धर्मः स्तमुक्तवंतो
ये उपमेयवाचिनः शब्दाः तैः सह उपमानवाचिनः शब्दाः समस्यंते इत्यर्थः॥ घन इव श्यामो घनश्याम इति। उपमाने घनः प्रसिद्धत्वादुपमे
यं कृष्णोऽप्रसिद्धत्वात्। तयोः सामान्यमेको धर्मः श्यामत्वं तत्र श्यामत्वमुक्त्वा श्यामशब्दः श्रीकृष्णे मलुलोपादने दोपचारादवृत्तेन इति सामा
न्यवचनः। सामान्यवचनैरिति किं॥ पर्वता इव बलाहकाः॥ ॥उपमितं॥ ॥उपमितमुपमेयं तत्सामर्थ्यादुपमानवचनैः शब्दैः सह
समस्यते न चेत्सामान्यवाची शब्दः प्रयुज्यत इतीमं सूत्रार्थमभिप्रेत्याह॥ उपमेयमित्यादि। व्याघ्र। सिंह। ऋक्ष। ऋषभ। वृषभ। वृक। वृष॥
वराह। हस्तिन्। कुंजर। रुरु। पृषत। पुंडरीक। पलाशकितव इति गणश्चायं। तेनेत्थमपि स्यात्॥ मुखपद्मं। मुखकमलं। करकिसलयं॥ पा
र्थिवचंद्र इत्यादि॥ ॥विशेषणं॥ ॥विशेषणस्य लक्षणमाह॥ ॥भेदकमितीयत्सामान्याकारेण प्रवृत्तमनेकप्रकारवद्वस्तु प्रकारांतरेभ्यो व्या
वर्त्यैकत्र व्यवस्थापयति तद्भेदकं॥ भेद्यमिति। विशेष्यस्य लक्षणमाह॥ यत्सामान्याकारेण प्रवृत्तमनेकप्रकारवद्वस्तु प्रकारांतरेभ्यो व्या
वर्त्यैकप्रकारे व्यवस्थाप्यते तद्भेद्यं। रक्तोत्पलमिति॥ रक्तत्वात्सोत्पलं चाशुक्लोत्पलादिभ्यो उत्पलार्थं व्यावर्त्यते। इति रक्तशब्दो विशेषणं। उत्प

श्री॥ ॥१९१॥

र्थस्तु व्यावर्त्यत्वाद्विशेष्ये। बहुलग्रहणस्यार्थमाह। बहुलोक्तेरित्यादि। अत्र विशेष्येणेत्यनावश्यकं संबंधिशब्दत्वाद्विशेषणमिति चेन्न पुनर्वि
शेषणोपादानमुत्तरपदस्य विशेषणप्रतिपत्त्यर्थं। ननन्यायमर्थः। तद्धि द्विशेष्यं विशेषणमर्थाद्विशेषणमपि विशेष्यमिति। अत्र तक्षकः सर्पः इ
त्युचन। सर्पस्याविशेषणत्वात्। लोहितस्तक्षक इत्यत्रापि न। तक्षकस्य विशेष्यत्वात्। शाकपार्थिवादीनामिति। शाकपार्थिवादीनां समासत उ
त्तरपदलोपश्च स्यादिति वक्तव्यमित्यर्थः। शाकप्रिय इत्यादि। अत्र प्रियशब्दस्योत्तरपदस्य लोपः। विशेषणं विशेष्येण बहुलमित्यस्य प्रपंचत्वा
त्तस्य षत्वा स्वक्तानि पंचदशसूत्राणि व्याख्यायंते।। ।।पूर्वापरप्रथमचरमजघन्यसमानमध्यमध्यमवीराश्च।। ।।एते समानाधिकरणेन
समस्यंते स तत्पुरुषः। पूर्वपुरुषः। अपरपुरुषः इत्यादि।। ।।श्रेण्यादयः कृतादिभिः।। ।।श्रेण्यादयः कृतादिभिः समानाधिकरणैः समस्यंते स
तत्पुरुषः।। श्रेण्यादिषु च्व्यर्थवचनं। अश्रेणयः श्रेणयः कृताः श्रेणिकृताः च्व्यंतानां तु कुगतिप्रादय इति नित्यसमासः। श्रेणीकृताः। श्रेणि। ए
क। पूग। कुसुम। राशि। विशिख। निधन। देव। मुंड। भूत। श्रवण। वदान्य। अध्यापक। अभिरूपक। क्षत्रिय। पटु। पंडित। कुशल। चपल। निपुण।
कृपण। श्रेण्यादिः। कृत। मत। मित। भूत। उक्त। समाम्नात। समाख्यात। संभावित। अवधारित। निराकृत। अवकल्पित। उपकृत। उपाकृ
त। कृतादिराकृतिगणः।। ।।क्तेन नञ्विशिष्टेनानञ्।। ।।नञेव विशेषो यस्य सर्वमन्यत् प्रकृत्यादिकं तुल्यं तेन नञ्विशिष्टेन नञ्विशि
ष्टेन क्तांतेन समानाधिकरणेन सहानञ् क्तांतं समस्यते स तत्पुरुषः। कृतं च तदकृतं च कृताकृतं।। मुक्तामुक्तं। तुडिदोनडुक्तेलान्नैष नेदको।
अशितानशितेन जीवति। क्लिष्टाक्लिशितेन जीवति।। कृतापकृतादीनामुपसंख्यानं। कृतापकृतं भुक्तविभुक्तं। पीतविपीतं। गतप्रत्यागतं।
यातानुयातं। क्रयाक्रयिका। फलाफलिका। मानोन्मानिका।। ।।सन्महत्परमोत्तमोत्कृष्टाः पूज्यमानैः।। ।।सदादयः पूजावचनैः पूज्यमा
नैः (कि उत्कृष्टं) समानाधिकरणैः समस्यंते स तत्पुरुषः। सत्पुरुषः। महापुरुषः। परमपुरुषः। उत्तमपुरुषः। उत्कृष्टपुरुषः। पूज्यमानैः किं
उत्कृष्टो गौः कर्दमात्।। ।।वृंदारकनागकुंजरैः पूज्यमानं।। ।।एतैः [illegible]वचनैः पूज्यमानं समस्यते। गोवृंदारकः। गोनागः। गोकुंजरः।

प्र·प्र·सु·
॥१९२॥

पृच्छ्यमाने किं। स्तुतिरियं नागः॥ ॥कतरकतमौ जातिपरिप्रश्ने॥ [illegible] धिकरणेन सुपा प्राग्वत्समासो वा चैते जातिपरिप्रश्ने वर्त्तमानौ कत-
तरकतमौ सुपा समस्येते। कतरकठः। कतमकठः॥ [illegible] ॥किंक्षेपे॥ क्षेपे वर्त्तमानं किं सुपा समस्यते। किंराजा यो न रक्षति। किमः क्षेपे इति सम-
सांतनिषेधः। क्षेपे किं। को राजा पाटलिपुत्रे॥ ॥पोटायुवतिस्तोककतिपयगृष्टिधेनुवशावेहद्बष्कयणीप्रवक्तृश्रोत्रियाध्यापकधूर्तैर्जातिः॥ ॥
॥एतैर्जातिः समस्यते॥ स्त्रीपुंसलक्षणा पोटा। गृष्टिः सकृत्प्रसूता। धेनुर्नवप्रसवा॥ वशा वंध्या॥ वेहद्गर्भघातिनी॥ वष्कयणी तरुणवत्सा। इभ्य-
पोटा। इभ्ययुवतिः। अग्निस्तोकः। उदश्वित्कतिपयं। गोगृष्टिः। गोधेनुः। गोवशा। गोवेहत्। गोवष्कयणी॥ कठप्रवक्ता। कठश्रोत्रियः। कठाध्या-
पकः। कठधूर्त्तः। जातिः किं। देवदत्तः प्रवक्ता॥ धूर्तग्रहणमकुत्सार्थं॥ ॥प्रशंसावचनैश्च॥ ॥जातिवाचि सुबंतं प्रशंसावचनैः समस्यते। गोमतल्लि-
कादयः प्रशंसावाचिनो गृह्यंते। गोप्रकांडं। गोमतल्लिका॥ ॥युवा खलतिपलितवलिनजरतीभिः॥ ॥खलत्यादिभिः समानाधिकरणैः युवश-
ब्दः समस्यते। जरतीभिरिति स्त्रीलिंगनिर्देशः। प्रातिपदिकग्रहणे लिंगविशिष्टस्यापि ग्रहणमिति ज्ञापनार्थः। युवखलतिः। युवखलतिः। युव-
तिः खलती युवखलती॥ इत्यादि॥ ॥कृत्यतुल्याख्या अजात्या॥ ॥कृत्यप्रत्ययांतास्तुल्यपर्यायाश्च अजातिवाचिना समस्यंते। भोज्योष्णं। भोज्य- जी॥
लवणं। तुल्यश्वेतः। सदृशश्वेतः। अजात्या किं। भोज्य ओदनः॥ ॥वर्णो वर्णेन॥ ॥वर्णविशेषवाचि सुबंतं वर्णविशेषवाचिना सुबंतेन सह समानाधि- ॥१९२॥
करणेन समस्यते। कृष्णसारंगः। अवयवद्वारेण कृष्णशब्दः समुदाये वर्त्तमानः समानाधिकरणो भवति॥ ॥कुमारः श्रमणादिभिः॥ ॥श्रमणा-
दिषु ये स्त्रीलिंगाः पठ्यंते तैः स्त्रीलिंग एव कुमारशब्दः समस्यते। अन्ये तु पुल्लिंगाः स्त्रीलिंगाश्च। कुमारीश्रमणा। कुमारश्रमणा। कुमाराध्यापकः।
कुमाराध्यापकः। कुमारी अध्यापिका। कुमाराध्यापिका। श्रमणा प्रव्रजिता। कुलटा॥ कुमारश्रमणा गर्भिणी। तापसी। दासी। बंधकी। अध्याप-
क। अभिरूपक। पंडित। पटु। मृदु। कुशल। चपल। निपुण॥ ॥चतुष्पादो गर्भिण्या॥ ॥चतुष्पाज्जातिवाचिनो गर्भिणीशब्देन समस्यंते। गोग-
र्भिणी। अजगर्भिणी। जातिः किं। कालाक्षी गर्भिणी। चतुःपादः किं। ब्राह्मणी गर्भिणी॥ ॥मयूरव्यंसकादयश्च॥ ॥समुदाया एव निपात्यंते

चकारोवधारणार्थस्तेन परममयूरव्यंसक इति समासांतरं न। मयूरव्यंसकः। छात्रव्यंसकः। कांबोजमुंडः। यवनमुंडः। छंदसि। हस्तेगृह्य। पाद
गृह्य। लांगूलगृह्य। पुनर्दाय। भाषायां तु हस्ते गृहीत्वेत्यादि॥ एहीडादयोन्यपदार्थे। एहीडमिति यत्र कर्मणि तदेहीडं वर्त्तते। एहियवं। एहिवाणिजा।
अपेहिवाणिजा। प्रेहिवाणिजा। एहिस्वागता। प्रेहिस्वागता। एहिद्वितीया। अपेहिद्वितीया। प्रेहिद्वितीया। एहिकटा। प्रेहिकटा। अपेहिकटा। एहि
कर्दमा। अपेहिकर्दमा। प्रेहिकर्दमा। उद्धमचूडा। आहरवेला। आहरवसना। आहरविहिता। कृंधिविचक्षणा। उद्धरोत्सृजा। उद्धमविधमा। उत्प
चनिपचा। उत्पतनिपता। उच्चावचं॥ आचोपचं। उच्चनीचं। आचपराचं। निश्चप्रचं। अकिंचनं। साकिंचनं। स्नात्वाकालकः। पीत्वास्थिरकः। भु
क्त्वासुहितकः। प्रोष्यपापीयान्। उत्पत्यपाकला। निपत्यरोहिणी। निषण्णश्यामा। अपेहिविघसा। इहपंचमी। इहद्वितीया। जहिकर्मणा॥ बहुलमाभी
क्ष्ण्ये समस्यते समासेन कर्त्तारं चाभिधीयते चेत्। जहिजोडः। उज्जहिजोडः। जहिस्तंबः। उज्जहिस्तंबः। आख्यातमाख्यातेन क्रियासातत्ये॥ अश्नी
तपिबता। पचतभृज्जता। खादतमोदता। खादताचमता। आहरनिवपा। आवपनिष्किरा। उत्पचनिपचा। छिंधिलवणा। पचलवणा। पचप्रकूटा। अवि
हितलक्षणस्तत्पुरुषो मयूरव्यंसकादिषु द्रष्टव्यः॥ नञ्॥ ञकारेण नलोपेन ञितिविशेषणार्थः॥ ॥नलोपः॥ ॥नञः सानुबंधस्य ग्रहणं पामनपुत्रो
नेकधेत्यत्र माभूदिति। ननु क्रियमाणेपि सानुबंधग्रहणे स्त्रैणार्थ इत्यत्र स्त्रीपुंसाभ्यां नञ्स्नञौ भवनादिति ज्ञातस्य नञः कस्मान्न लोपो न उच्यते।
विभाषानुवर्त्तते। तस्याश्च व्यवस्थितविभाषात्वविज्ञानादत्र न स्यात्। यद्येवं पामनपुत्रो नैकधेत्यत्राप्यत एव न स्यात्। एवं तर्हि विरूपस्त्रार्थं सानुबं
धग्रहणं स्त्रैणार्थ इत्यत्र स्त्रीपुंसाभ्यां नञ्स्नञौ भवनादिति ज्ञातस्य नञः कस्मान्न[illegible] तस्मात्॥ ॥सप्तमीपंचम्योर्निर्देशयोः परत्वात् पंचमीनिर्देश
एव बलीयानित्यभिप्रायात्। लुप्सनकारादित्यादि। तस्मादिति किं। नरौ न्नै वृद्धिः स्यात्॥ पूर्वं तर्हि क्रियमाणे ङमो ह्रस्वादचीति ङमुट् स्यात्॥
अतः किं न कृतस्य स्वस्मादित्येवोक्तं। अविधिकौ [illegible] ब्राह्मणः॥ ननु चायं नञ्समासः किंप्रधानः॥ उत्तरपदार्थप्रधानः तत्पुरुषत्वात्। यदि एवं
पदार्थप्रधानस्यात्तर्हि अव्ययीभावः स्यात्। [illegible] मक्षिकमिति। अन्यपदार्थप्राधान्ये पुनर्बहुव्रीहिः स्याद् ब्राह्मणको देश इति। अत उत्तरपदार्थप्रधा
नस्तत्पुरुषोयं। ननु च नञ् [illegible] निषेधवाचीसदिसतो निषेधः [illegible] मतः [illegible] तस्याशक्यसाधनत्वात्। यदि सतो विनिषेधेन ञः साम

र्थः स्यात्तर्हि राज्ञो हस्त्यश्वादीन्नतिहि पुमान्सतिशान्तवंसेवकस्तु नाप्यसतः तस्य स्वतन्त्र एव निषिद्धत्वात्। नञ्प्रकारान्तरं संभवति। उच्य
ते सर्वो हि शब्दः प्रयुज्यमानस्वार्थज्ञानमपेक्षते। स्वयं हि ज्ञातमर्थं परं प्रतिपादयितुकामेन शब्दः प्रयुज्यते।। तच्चार्थज्ञानं द्विविधं।। सत्यं मिथ्या
चेति द्वयमप्येतत् ब्राह्मणशब्दं प्रवर्त्तयति। तत्र सम्यक्ज्ञानपक्षे के ब्राह्मणशब्दप्रयोगे नास्ति नञो व्यापारः नहि तेन तत्र किंचित्क्रियते ब्रा
ह्मणशब्दस्य। सत्यत्वेन तदर्थस्य निषेद्धुमशक्यत्वात्। मिथ्याज्ञानपक्षे तु तस्मिन्नस्ति व्यापारः। तत्र हि तेन ब्राह्मणशब्दस्य मिथ्याज्ञानप्रभवत्व
माख्यायते। स च निषेधो द्विविधः। पर्युदासः प्रसज्यप्रतिषेधश्च। तत्राद्ये पक्षे ब्राह्मणसदृश एव क्षत्रियादिर्ब्राह्मण इत्युक्ते प्रतीयते। मिथ्या
ज्ञानमिंद्रियहेतुकं सादृश्यं अंतरेण न भवतीति सादृश्यस्य नञ्विशिष्टेनोत्तरपदेन लक्षणात्। तथोक्तं। नञिवयुक्तमन्यसदृशाधिकरणे
तथा ह्यर्थगतिरिति। द्वितीये तु मिथ्याज्ञाननिवृत्तिः क्रियते अब्राह्मणो नभवत्ययं न ब्राह्मण इत्यादि। तत्र मिथ्याज्ञाननिवृत्त्या नञ्विशिष्टेन परपदेना
न्यत्वविरुद्धत्वाभावविशेषा लक्ष्यंते। तत्र सादृश्योदाहरणमब्राह्मण इत्येतत् प्रसिद्धत्वान्नोक्तं। तदन्यतद्विरुद्धतदभावविशेषाणामुदा
हरणान्याह। अश्वादन्यो नाश्व इत्यादि। तदत्र नञ्विशिष्टेनाश्वपदेनान्यत्वं लक्ष्यते। नञ्विशिष्टेन तु धर्मशब्देन विरुद्धत्वं। नञ्विशि
ष्टेन च पापशब्देन। भावविशेष इत्येते त्रयोपि तत्पुरुषा उत्तरपदार्थप्राधान्यात्। तथोक्तं विचारचिंतामणौ। नञ्नलोपोद्दे अविद्यायशो नञ्ग्रि
रभावणं। सदृक् विरुद्धान्याभावा नञर्थाः षट्तु कुमारात्। समासेत्तरपदप्राधान्यं मासजातवत्। न अर्थ भिन्निनं तद्धि सदृशादीनि लक्ष्यते दि
ति ननु चापापमित्यव्ययीभावो युक्तः। सर्वपदार्थस्यैवाभावस्य प्राधान्यात्। सत्यं। यदाभावमात्रमुच्यते तदा अपापमित्यव्ययीभाव एवा
र्थाभावे। यदा तु अभावविशेषउच्यते। न तदा अव्ययीभावः। अभावविशेषस्य नञर्थत्वाभावे न सर्वपदार्थप्राधान्यात्। तथोक्तं नरेंद्रा
चार्यैः। अग्रहणमिति ग्रहणाभावमात्रविवक्षायामव्ययीभावोदाहरणम्। भावविशेषविवक्षायां तत्पुरुषस्योदाहरणं ग्रहणस्याभाव
विशेषो ग्रहणाभाव इति। तस्मिन्नेवार्थे वैकल्पिकः प्रयोगः। विशेषस्य मुख्यत्वस्यान अर्थत्वाभावादिति। नञो नलोपः स्यादिति। तिङंते परे नञो
नकारस्य लोपो भवतीति वाच्यं निंदायां गम्यायामित्यर्थः। ननु च नेकधेत्यादौ नलोपो तुट् च कस्मान्न स्यादित्याशंक्याह। निषेधार्थेत्यादि।

अमानोनाः प्रतिषेध इति निषेधार्थो योऽस्ति नकारस्तेन सह समासोऽयं न तु नञ् इति नञ्त्वान्न लोपाद्यावो नैकधेत्यादौ वेदितव्य इत्यर्थः॥ ॥आन्महतः
महादेव इति। महांश्चासौ देवश्च महादेवः। सन्महदिति समासः। समानाधिकरणजातीययोरिति किं। महतः पुत्रो महत्पुत्र इत्यत्र मा भूत्। ननु
लक्षणप्रतिपदोक्तयोः प्रतिपदोक्तस्यैव ग्रहणं न्याय्यमिति परिभाषया सन्महदित्यादिना प्रतिपदोक्ते समासे यः पूर्वपदो महच्छब्दः स एव ग्र-
हीष्यते न महत्सुत इत्यत्र लाक्षणिकं। एवं च समानाधिकरणपदं व्यर्थं न व्यर्थं बहुव्रीहावपि स यथा स्यादित्येवमर्थं। तेन महाबाहुरिति सिध्यति।
अत्र हि समानाधिकरणग्रहणसामर्थ्यात् लक्षणप्रतिपदोक्तपरिभाषा नाश्रीयते तेन बहुव्रीहावपि स्यात् अन्यथा लाक्षणिकत्वात्तत्र न स्या-
त्। अमहान् महान् संपन्नो महद्भूतश्चंद्रमा इत्यत्र गौणत्वं महदर्थस्येति न भवत्यात्वं। घासेति। घासकरविशिष्ट इत्येतेष्वपि परपदेषु महत
आत्वं स्यादिति वाच्यमित्यर्थः। जातीयद्वासादावपीति। तीशब्दस्याख्यात्वमित्यस्यायं भावः। जातीयद्वासादे महतीशब्दस्य पुंवद्भावश्चात्वं च
वक्तव्यमिति तथा वाच्यो लाघवार्थमेव युक्तं। तथा चोक्तं कास्यौ त्यायनेन। महदात्वे घासकरविशिष्टेषूपसंख्यानं। पुंवद्भावश्चासमानाधिक-
रणार्थ इति। स्पष्टत्वात्त्यक्तं स्त्वं॥ ॥ईषदकृता॥ ॥ईषदित्ययं शब्दो गुणवाचिना अकृदंतेन समस्यते। ईषत्पिंगलः। अकृता किं। ईषत्कारकः।
अत्रैकपद्यमैकस्वर्यमेकविभक्तिकत्वं च न। गुणवाचिना किं। ईषद्गार्ग्यः॥ ॥तद्धित॥ ॥यदि तद्धितार्थो वाच्य इति स्यात्। तर्हि पांचनापितिरि-
त्यादौ तद्धितो न स्यात्। तेन तदर्थस्य समासेनैवोक्तत्वात्। अन एकापि सप्तमी विषयभेदेन भिद्यमाना तद्धितार्थापेक्षया विषयसप्तमी। उत्तरप-
दापेक्षया परसप्तमी। समाहारापेक्षया अभिधेयपरत्वे तद्भिन्नसिद्धत्वाह। तद्धितार्थे विषय इत्यादि। तद्धिता अणादयस्तेषामर्थोऽपत्यादिस्तस्मि-
न्विषये अनन्यत्र भावो विषयार्थः। एकार्थेनेति समानाधिकरणेनेत्यर्थः। ननु समाहारः समूहः स तद्धितार्थ एवेति समाहारग्रहणं पृथक् न का-
पिन्तु कुर्यात् समाहारस्य पृथग्ग्रहणं तु तद्धितार्थ उत्पत्तिनेतात्र विषये व्याख्यायते। इति तन्न स्यादेष दोषः। तथाह। समाहारे वाच्ये इति॥ स-
माहरणं समाहारः। विप्रकीर्णानामेकत्र राशीकरणं छिन्नदेशानां पितृद्धाराशीकरणं स्यात्। पूर्वस्यामित्यादि। पूर्वशाला इत्यस्यार्थबोध

र्थके वाक्ये सति तद्धितार्थे विषयभूते समासेऽस्तु किं स्वसतीत्यर्थः॥ ॥दिक्पूर्वं॥ ॥असंज्ञायामिति प्रकृतिविशेषणं। ततश्च असंज्ञाविषयत्वात्
न दिक्पूर्वपदात् प्रातिपदिकात् ञः स्यादित्यर्थः। असंज्ञायां किं। पूर्वेषुकामशमी दिक्संख्ये संज्ञायामिति समासः। प्राच्यो ग्रामनगराणामि
त्युत्तरपदवृद्धिः। पदग्रहणं स्वरूपविधिनिरासार्थं। अन्यथा दिग्वाहु इत्यादि प्रकृतिः स्यात् पदग्रहे तु दिग्विशेषो गृह्यते। कथं पदग्रहणसामर्थ्यात्।
दिशः पूर्वपदं यस्येति त्रिपदो व्यधिकरणो बहुव्रीहिः। दिश इति वाचकापेक्षया षष्ठी। तेनेह तदभिधायी दिक्शब्दो गृह्यते। कर्मधारये इत्यादि समा
नाधिकरणपदस्तत्पुरुषो यमिति कर्मधारयसंज्ञा तस्यां च सत्यां पुंवदित्यादिना पूर्वपदस्य पुंवद्भावः तस्मिंश्च कृते ञिणीत्यनुवर्त्यैव विधीयमानात्तद्धि
तेष्वचामित्यनेनादेस्वोत्तरवृद्धिः स्यादित्यर्थः। उत्तरपदे इति। उत्तरपदे परतः समासः कथ्यत इत्यर्थः। पूर्वशालाप्रिय इति। पूर्वशाला प्रिया यस्येति विग्रहे
प्रियशब्दे उत्तरपदे परतो आदिविनिविष्टेन पूर्वशालाशब्दयोस्तत्पुरुषः। पुंवद्भावः समासोक्तो दान्तत्वेन शालोत्तरोदात्ता। ततः प्रियशब्देन बहुव्रीहिः
दिक्षु समाहारो नास्तीति। समाहारस्समूहः। स च भिन्नानामेककालीनो स्यात्। न तु भिन्नस्य वस्तुनः संख्येव हि भेदमावहेन दिक्शब्दाः। तेषां
प्रतिनियतार्थविषयत्वात् विभक्तिरपि समासेनास्तितस्मात्तस्मात्समाहारे दिक्शब्दा न संभवंति न तत्र समस्यंते। ननु यथा काकसमूह इत्यत्र वि
भक्त्यभावे विवेदानगम्यमस्त्यथात्रापि स्यात्। एवं न हि दिक्षु समाहारा वा नैव प्रयोगात्मा वपवहेतुर्वाच्यः। इति न हि दिक्शब्दानां समाहारो दा
हरणमिति भावः। इदानीं संख्यापूर्वपदं तत्पुरुषमाह॥ ॥संख्या॥ ॥पंचसु इत्यादि। पंचकपाल इत्यस्यार्थबोधके वाक्ये एवंविधे सतीत्यर्थः॥ ॥
संस्कृतं॥ ॥संस्कृतमिति सामान्यशब्दत्वात्संस्कृतशब्दस्य क्लीवैकवचनं। भक्षा इति विशेषवाचित्वात् भक्षशब्दस्य पुंस्त्वे बहुवचने। भक्षा
श्चेद्यान्यास्स्विति। यत्संस्कृतं वाच्यं तदुक्तं सांख्य स्वर्थः इत्यर्थः। द्व्यण द्विगोर्विभक्तिलोपश्च कृते इति। प्रथमं द्विगुस्ततो विभक्तिलोपः ततः प्राग्दी
व्यतो णित्यधिकारादणिति भावः स्वरविशदमस्य वह्नाय्यं मस्तं। सत ऊर्ध्वधानं संस्कारः। भक्षाः किं। पुष्पपुटे संस्कृतो माला गुणः॥ ॥द्विगोः॥ ॥
द्विगोरिति षष्ठी संबंधे तच्च संबंधित्वं निमित्तत्वेनेत्याह। द्विगोर्निमित्तमिति। प्राग्दीव्यतीयस्येति॥ ॥प्राग्दीव्यतो णित्यधिकारे यो विहितस्तस्य

त्यर्थः। ननु पंचकपालस्येदं पंचकपालम् अत्र कथं लुक् न। उच्यते। प्रथमं तद्धितो यः संस्कृतेऽर्थे स एव हि द्विगोर्निमित्तमित्येष द्वितीयो नात्र लु
प्यते। द्वैमातुर इति। अत्र तु पं चभिर्गोभिः क्रीत इत्यत्र द्विगौ कृत इति तद्धितार्थविषये पं चभिर्गोभिरित्यत्र द्विगौ समासे कृत इत्यर्थः॥ ॥तेन॥
प्राग्वहतेष्ठगित्यारंभ्य ठञादयः सप्तदश प्रत्ययाः एवमुक्तास्तेषामनेन समर्थविभक्तिः प्रत्ययार्थश्च निर्दिश्यते। तेनेति मूल्यात्करणे यात् तृतीया
विभक्तिः सामर्थ्यविभक्तिस्ततो नान्यत्र न भवति देवदत्तेन क्रीतं। पाणिनी क्रीतमिति द्विवचनबहुवचनांतात्तु न भवति प्रत्ययोऽनभिधानात्। प्रस्था
भ्यां क्रीतं प्रस्थैः क्रीतमिति। यत्र तु प्रकृत्यर्थस्य तु भेदावगतौ प्रमाणमस्ति तत्र द्विवचनबहुवचनांतादपि प्रत्ययस्यात्। द्वाभ्यां क्रीतं। द्विकं त्रिकं
पंचकं। तथा मुद्गैः क्रीतं मौद्गिकं। न ह्येकेन द्वाभ्यां वा मुद्गाभ्यां क्रयः संभवति। इति ठगिति। आर्हादगोपुच्छसंख्यापरिमाणाट्ठगिति पंचगोशब्दाट्ठ
गित्यर्थः॥ ॥अध्यर्द्धपूर्व॥ ॥अध्यर्द्धपूर्वादित्यादि। अध्यर्द्धशब्दः पूर्वो यस्य सोऽध्यर्द्धपूर्वस्तस्मात्। आर्हीयप्रत्ययस्येति। आर्हादगोपुच्छेत्यधिकारे
विहितस्य। अध्यर्द्धेन कंसेन क्रीतं कंसादिठन् तस्य लुक्। अध्यर्द्धकंसं। ननु चाध्यर्द्धशब्दः संख्यैवेति द्विगोरित्येव सिद्धे भेदेनोपादानं क्वचिदस्य
संख्याकार्यं नेति ज्ञापनार्थं। तेन संख्यायाः क्रियाभ्यावृत्तिगणने कृत्वसुजिति कृत्वसुज् न। पंचगुरिति तद्धितलुकि जातत्वान्न टच्। गोस्त्रियो
रुपसर्जनस्येति ह्रस्वत्वं। एवं ईगिति टिड्ढक्। एवं तद्धितार्थविषये संख्यासमासोदाहरणमुक्त्वोत्तरपदे परतो वक्तुमाह॥ उत्तरपद इत्यादि। पंचगावो
धनं यस्येत्यादि। अत्र त्रिपदे बहुव्रीहौ धनशब्दे उत्तरपदे पूर्वपदयोः तद्धितार्थेति समासे कृते तस्य च संख्यापूर्वो द्विगुरिति द्विगुसंज्ञायामेकस्मि
धिकारेऽपि द्विगुश्चेत्यत्र चकारेण तत्पुरुषसंज्ञासमावेशादत्र तत्पुरुषकार्यमुच्यत इत्यर्थः॥ ॥गोरतद्धित॥ ॥ननु तद्धितलुकीति तद्धितलु
ग्विषये। न। भवतीत्यर्थः। अतद्धितलुकि किं। पंचभिर्गोभिः क्रीतः पंचगुः। तद्धितग्रहणं किं। सुब्लुकि निषेधो मा भूत्। राज्ञो गोः राजगवः। लुग्ग्रहणं
किं। तद्धित एव निषेधो मा भूत्। पंचभ्यो गोभ्य आगतं पंचगवरूप्यं। अवादेश इति। एचोऽयवायाव इति। ततो बहुव्रीहिरिति। पंचगवधन इति। ततो द्वि
गुगर्भः पंचगवधनं इत्येव बहुव्रीहिः। ननु त्रिपदाधिकारात् पंचगोधन इत्यपि स्यादिति वाच्यमिति भावः। तथा चोक्तं। द्वंद्वतत्पुरुषयोरुत्तरपदे

प्र॰ प्र॰ सु॰ ।।१२५।। नित्यसमासवचनं। समाहारो द्वाहरणं चक्रमात्। समाहार इत्यादि। पंचानां गवां समाहृता इति। पंचानां गवां समाहार इति यावत्। समुदायात्क्षुद्रा
यिनामभेदविवक्षयैवं विरुद्धौ तौ। तत्र समाहारेर्थे द्विगोर्विशिष्टलोपेरोरर्त्तद्धितलुकीति समासांते टचि कृते इत्यर्थः।। ।।द्विगुरेकं।। ।।उवीती
तिवचनं एकस्यार्थस्य वचनमेकवचनमित्यर्थमेकवचनं न त्वेकत्वेनेति पारिभाषिकं। तद्वक्तृक्तप्रयोगेवचनेनस्यात्। पंचपूलीयेरूढेति। तस्या
द्विगुत्वादतो द्विगोरर्थस्यैकवद्भावो विधीयत इत्यभिप्रेत्याह। द्विगोरर्थ इत्यादि। ननु च द्विगोः पुल्लिंगत्वात् विशेषणस्यैकवचनसाहचर्यस्यापि पुल्लिं
गतास्यात्। नैष दोषः।। यतो लिंगसामान्यविवक्षयोपक्रमात् क्लीबत्वेपश्चाद्द्विगुरित्यस्य पुल्लिंगसंबंधः। यदि द्विगुमाचस्यार्थ एकवत्स्यात्तर्हि त
द्धितार्थद्विगोरपि एकत्वे स्यात्। तत्तस्त्र पंचकपालो पंचकपाला इति न स्यात्।। अतः समाहार द्विगोरिति वक्तव्यमित्यभिप्रेत्याह। समाहार इति।।
ननु च समाहारद्विगोश्चेत्युच्यते एवं तर्हि व्यर्थं वचनं। समाहारस्यैकत्वादेवैकत्वस्य सिद्धत्वात्।। नैष दोषः।। समुदायिभ्यो नान्यः समुदाय इत्यभि
माते अनेकद्रव्यात्मकत्वात् समुदायस्यैकत्वं न स्यादित्यस्यारंभः। अन्यः समुदायिभ्यः समुदाय इति मते प्रत्याख्यातमेव सूत्रं भाष्यकृता। एतःपं
चमूल्य इत्यत्र सर्वद्विग्वर्थस्य पंचसंख्यायुक्तस्यैकवद्भावः कृतः। ततो बहूनां द्विगूनां द्विग्वर्थत्वाभावादनेकवद्भावः।। ।।स नपुंसकं।। ।।परवल्लिं
गतापवादो योगः। नपुंसकमित्येतावत्युच्यमाने नेतरस्य विधिर्वाच्यस्वतिप्रतिषेधो वेत्यनेतरस्य द्वंद्वस्येव स्यात्। न द्विगोस्तत्समात्तसग्रहणं कृतं। य श्री।। ।।१२५।।
स्यैकवद्भावो विहितो द्विगोर्द्वंद्वस्य वा तस्यैकत्वं यथा स्यादित्यभिप्रेत्याह। यस्यैकवद्भाव इति। द्विगोरन्यचेति। द्विगुव्यतिरिक्ते तु समानाधिकरणपदे
तत्पुरुषे एवं स्यादित्यर्थः।। परमनव इत्यादि। परमस्त्वासौ गोश्च सन्महत्परमेति समासः। देवगवः। देवानां गौः षष्ठीति समासः।। देवगवीति। त्रिहु
ला त्रितिडी पा। अकारांत इति। अकारांतमुत्तरपदं यस्य द्विगोः स स्त्रीलिंगे वर्त्तत इतीष्यते। त्रिलोकीति। त्रयाणां लोकानां समाहारः।। आवंतो वेति।
आवंतोत्तरपदं यस्य द्विगुः स स्त्रीलिंगे वर्त्तत इतीष्यते स्त्रियां वेत्यर्थः। त्रिखट्वमित्यादि एवं वत्। अनो लोप इति। अन्नंतोत्तरपदस्य द्विगो
र्नलोपः स्यात् स च अन्नंतो द्विगुर्वा स्त्रियां वर्त्तते। पंचकर्ममित्यादि। पंचानां कर्मणां समाहारः। पात्रादेर्नेति। पात्राद्युत्तरपदे द्विगो अकारांते

नो

पिस्त्रीत्वं नेत्यर्थः। पात्रादिराकृतिगणः॥ ॥तत्पुरुषस्य॥ ॥द्वे अंगुली इत्यादि। तद्धितार्थ इति समासः। प्रमाणे द्वयसज् इत्यादिना विहितस्य मात्रचः प्र
माणे लो द्विगोर्नित्यमिति लुक्। निरंगुलमिति। निरादयः क्रान्ताद्यर्थे पंचम्येति समासः॥ ॥अह्नः॥ ॥ननु चाच तत्पुरुषस्येत्यनुवर्त्तते। तत्कथमहश्च रात्रि
श्चाहोरात्रमिति द्वंद्वे टज् विधीयत इत्याशंक्येष्टिमाह। इहैव द्वंद्व इति। इह अहोरात्रमित्यत्रैव द्वंद्वो दाहृतिः अपीष्यते ज्ञापकादित्यर्थः॥ तत्र ज्ञापकं हे
मंतशिशिरावहोरात्रे च छंदसीति समासान्तांतस्य अह्नः शब्दात्परस्य रात्रिशब्दस्य निपातनं। ननु चाह्नः शब्दादेः रात्रिशब्दस्य तत्पुरुषो न संभवती
ति द्वंद्व उदाह्रियते न त्वियं द्वंद्वस्यापीष्टिः। मैवं वोचः॥ तत्पुरुषस्यापि संभवात्। तथा हि। यदा तु अहर्ग्रहणेन रात्रिरहः शब्देनोच्यते रात्रिगुणं वा अ
होरात्रिशब्देनोच्यते तदा अहश्च तत् रात्रिश्चेत्यहोरात्र इति समानाधिकरणस्तत्पुरुषः संभवति। अथवा अन्हा सहिता रात्रिः अहोरात्रमिति मध्य
मपदलोपी तत्पुरुषः संभवति। ततो द्वंद्वेपि अह्नः शब्दात्परात् रात्रिशब्दाद् डिष्यते। तथा चोक्तं न्यासकारेण। अहर्ग्रहणं द्वंद्वार्थमिति स्थितिरियं। ननु
तत्पुरुषस्यासंभवात् द्वंद्वार्थमित्येषोर्थः प्रतिपत्तव्य इति अथवा इहैव द्वंद्व इत्यस्यायमर्थः। इहाहोरात्रमित्यत्र द्वंद्व एव न तत्पुरुषस्यासंभवात्। यस्तु
तत्पुरुषसंभवो दर्शितः स तु मुख्यया वृत्त्या न संभवतीति असंभव एव। तथोक्तं महाभाष्ये। अहर्ग्रहणं द्वंद्वार्थं द्रष्टव्यं। किमुच्यते। द्वंद्वार्थमिति। न पु
नस्तत्पुरुषार्थमपि स्यात्। तत्पुरुषाभावात्। नहि रात्र्यंतो हरादिस्तत्पुरुषोस्तीति। ननु चाहोरात्रमितिचेत्। द्वंद्वस्तर्हि अहोरात्रयोर्द्वित्वात् अहो
रात्राविति द्विवचनेन रात्राह्नाहाः पुंसीति पुंस्त्वेन च भाव्यमित्याशंक्याह। एकवद्भावात् क्लीबतेति। सर्वो द्वंद्वो विभाषयैकवद्भवतीत्येकवद्भावप
क्षे सनपुंसकमिति नपुंसकत्वमित्यर्थः॥ यदा त्वेकवद्भावो नास्ति न तदा नपुंसकत्वं अहोरात्रौ पुण्याविति। ननु चाहर्ग्रहणं चेत् द्वंद्वार्थं तर्हि तत्राहश्च
यीत् सर्वादयोपि द्वंद्वार्थाः स्युरित्यत आह। इतरे च तत्पुरुष इति। तत्रासंभवात्। तत्पुरुषस्य द्वंद्वाधिकारे सर्वैकादेशसु रात्र्यं तस्य तत्पुरुषस्य संभ
वात् न द्वंद्वार्थता। किं तु तत्पुरुषार्थ ते वेति। तत्पुरुष इति भावः॥ ॥रात्राह्नाहाः॥ ॥परवल्लिंगतापवादः। कृतसमासांतानां निर्देशो रात्रः अन्हः अह
इति। एते पुंस्येवेति। एतदंताः पुंस्येवेत्यर्थः। न तत्र समाहारेपि पुंस्त्वमेव। अन्यथैषामेव पुंस्त्वे परवल्लिंगतया चतदंतानामपि पुंस्त्वे सिद्धेपि समाहा

पु॰ अ॰ ३ ॥११६॥

रिसनपुंसकमित्येवस्यात्। परवल्लिंगापवादस्त्वा...क्तोनाश्चेतिवाच्यः। अनुवाकः॥ शंयुवाकः। सूक्तवाकः। अत्रकेचिदाहुः। अनुवाकादिर्ऽर्द्धर्चा
दिः। अनुक्तोनोवाकोनयानेनेति। तेनपक्षेक्लीबेस्त्रीलिंगेचप्राप्तेवचनमिति। अन्येत्वाहुः। अनूच्यतेऽनुवाकः। अकर्त्तरिचकारकइतिघञ्॥
प्रादिसमासः। यस्तुभावेघञ्सप्तसामर्थ्यात्पुल्लिंगएवनपुंसकेनत्यक्तोपवादः। स्त्रियांक्तिन्निति। यस्तुअकर्तरिकारकेसपुंसिक्लीबेचापवादा
भावादितिपक्षेक्लीबेप्राप्तउक्तिः। सर्वारात्रिः सर्वरात्रइति। पूर्वकालैकसर्वेतितत्पुरुषः। पूर्वरात्रइत्यादि। पूर्वापराधरोत्तरमितिसमासः।
संख्यातरात्रइत्यादि। संख्याताराात्रिः। पुण्यारात्रिः। विशेषणंविशेष्येणबहुलमितिसमासः। द्विरात्रमिति। द्वेरात्रीसमाहृतेतेनद्विगार्थेतिद्वि
गुः। अच्प्रत्ययः। अतिरात्रइति। रात्रिमतिक्रांतः। अत्यादयःक्रांताद्यर्थेद्वितीययेतिसमासः॥ ॥राजाहः॥ ॥महाराजइति॥ सन्महदितिसमासः।
टच्ब्धित्करणमव्ययपूर्वपदप्रकृतिस्वरंबाधित्वाचित्स्वरएवयथास्यादित्येवमर्थमितिदर्शयितुंद्वितीयोदाहरणं। अतिराजइति। राजानम
तिक्रांतः। अत्यादय इतिसमासः। टच्विधित्करणंङीवर्थमितिदर्शयितुंतृतीयोदाहरणमतिराजीति। कृष्णसखइति। षष्ठीसमासः। कर्मधारये
पितत्पुरुषसंज्ञाश्रयेकार्यस्यात् संज्ञानांसमावेशात्। तस्याःकर्मधारयसंज्ञयाअबाधितत्वात्इतिदर्शयितुमाह। महासखइति। एकसंज्ञाधिका
रेपिद्विगुश्चेतिचकारेणतत्पुरुषसंज्ञायाअपिसमावेशस्योक्तत्वात् द्विगावपिटच्स्यादितिदर्शयितुंत्रिसखमित्युदाहृतं। त्रयाणांसखी
नांसमाहारस्त्रिसखं॥ ॥अन्हः॥ ॥नस्तद्धितइत्येवसिद्धेसिद्धेसत्यारंभोनियमार्थः। एवकारकरणं। विस्पष्टार्थं। अन्हएवटखयोरित्येवंविप
रीतोनियमोनभविष्यति। आत्माध्वानौखइतिप्रकृतिभावविधानसामर्थ्यात्। उत्तमाहइति। सन्महदितिसमासः। त्र्यहइति। त्रयाणामन्हांसमा
हारः॥ रात्राह्नाहाःपुंसीत्युक्षयत्रपुंस्त्वं। द्वेअहनीइत्यादि। तद्धितार्थेतिद्विगुसमासेकृतेनमध्येऽन्हतोभावीत्यधिकारेसञ्ज्ञायाःखइत्य
तःखइत्यनुवर्त्तमानेद्विगोर्वेत्युक्तेद्विगोरितिचाद्व्यह्नःसंवत्सरश्चेतिखः। अह्नीनइत्यत्रतुकेनखइत्याशंक्यवक्तव्यमाह॥ अन्हइत्यादि
॥क्रतुश्चसमूहश्चक्रतुसमूहंद्वंद्वैकवद्भावः। एकापिसप्तमीविषयैकदेशेनव्यवस्थाप्यते। समूहेवाच्येक्रतौविषयेअहन्शब्दात्खः स्यादित्यर्थः।

स॰॥ ॥११६॥

अहीनः। एकाधिकः क्रतुरिति। अन्हां समूहोऽहीनः। अह्नां समूहेन साध्य इति क्रतुरहीनः। अह्नष्टखोरेवेति नियमः किमर्थमिति। टचेति नियमः किमि
ति। उत्तरमाह॥ आह्निकमिति। अह्नानि हितं। अहीन गोपुच्छसंख्यापरिमाणः ठगिति ठक्। नियमादत्र टिलोपाभावः। ननु च मेमंराज्ञी मद्रराज्ञीत्यत्र
प्रातिपदिकग्रहणे लिंगविशिष्टस्यापि ग्रहणमिति परिभाषया टचः स्यादित्याशंक्याह॥ पुंवि निर्देशान्नेहेति। इह लघुसूत्रे सर्वे निपातीतिसंख्युरह्नो वा
सर्वे निपाते प्राप्ते योयमहः शब्दे परे राजशब्दस्यादौ प्रयोगः सवर्णदीर्घार्थः। तं कुर्वन्नेव ज्ञापयति यस्याकारादौ परे सवर्णदीर्घः स्यात्। तस्येदं ग्रह
णमिति। अकारादौ च राजशब्दस्य सवर्णदीर्घः पुल्लिंगस्यैव प्रथमं तस्य स्यात्। इति राजाह्वरित्ययं पुन्निर्देशस्तस्मादिह मद्राणां राज्ञी मद्रराज्ञीति टच् न प्र
वर्ततीत्यर्थः॥ ॥अन्होऽन्हः॥ ॥एतेभ्यः इत्यनेन सर्वनाम्ना प्रकृताः अहःसर्वैकदेशेति सूत्रे प्रकृतित्वेन निर्दिष्टाः सर्वैकदेशसंख्यातपुण्य एते सा सा डुक्ताः
चेनात्कृष्टाः संख्या अव्यय एते शब्दाः परामृश्यन्त इत्यभिप्रेत्याह। एतेभ्यः सर्वादिभ्य इति। अहःशब्दान्तस्य अह्नःशब्दादन्तविपरेन संभवतीति अहः शब्देन गृ
ह्यते। अहः शब्दो तात्तत्पुरुषाद्नेन्वविहितो नाच्प्रत्यय इति सामर्थ्यात् टच्यविदिशः स्यात्। अथाञितियोगविभागेनाच् विधीयते तत्र यापि वचनवैयर्थ्यं
। अल्लोपेनैवतद्रूपसिद्धेः नच वाच्यं टिलोपः स्यादिति। अन्हष्टखोरेवेति नियमात्। अतो पि रच्यवान्हादेश इत्येतज्ज्ञेत सिद्ध्याहटचिपर इति॥ ॥अन्हो
अन्ह इति प्रश्नस्थानेच्यत्ययेन प्रथमा। सर्वाह्न इति सर्वमहः सर्वकालेति समासः टच्। अन्हादेशः। पूर्वाह्न इति। अन्हः पूर्वः। एकदेशिसमासः। संख्याता
न्हः संख्यातमहः। विशेषणसमासः। संख्यापूर्वस्योदाहरणं वक्ष्यन्नाह। द्वयोरित्यादि। तद्धितार्थेति द्विगुः। अणो लुगिति। तत्र भव इति अण् तस्याणो ध्यर्थ
स्योद्विगोरिति लुगित्यर्थः। द्व्यन्हप्रिय इति। द्वे अहनी प्रिये यस्य उत्तरपदे द्विगुः। शेषं पूर्ववत्। अत्यन्ह इति अहरतिक्रान्तः। निरन्ह इति निर्गतमन्हः। अ
न्ह इत्यदंतग्रहणान्नेति। अदंतग्रहणव्याख्यानात्प्रत्यते। दीर्घान्ह्वीति। दीर्घाणि अह्नानि यस्यामिति बहुव्रीहिः। अनउपधालोपिनोन्यतरस्यामिति ङीप्
अह्नो लोपेन इत्यल्लोपः। अचादेत्वाजावाणत्वं न। अदंतादिति तत्परकरणात् पराजितमहः परान्हमित्यत्र न। अतत्र ग्रहणं विस्पष्टार्थं॥ ॥न संख्या॥ ॥
द्व्यहेत्यादि समाहारे वर्तमानस्य संख्यादेरन्होऽन्हादेशोनेत्यर्थः। द्व्यह इति। अन्हष्टखोरेवेति टिलोपः समाहारे किं। द्वयोरन्होर्भवो द्व्यन्हः॥ ॥उत्तम॥ ॥

प्र.प्र.सु. उत्तमशब्द इत्यादि। अंत्यपर्य्याय उत्तमशब्दः। अह्नः सर्वैकदेशसंख्यातपुण्याच्चेत्यत्रोत्तरवर्तमाने पुण्यशब्दे ब्रूत इत्यर्थः। पुण्यग्रहणमेव कस्मान्न
॥१६१ कृतं। वैचित्र्यार्थं। केचित्तूत्तमस्यापि प्रतिपत्त्यर्थं वर्णयंति। तेन संख्यातशब्दात्परस्यापि न। अत एवानंतरमेवाह। संख्याताह इत्यपीष्यते
इति। पुण्याहं। सुदिनाहमिति कर्मधारयः। एकाह इति। एवं कालेके तिसमासः। रात्राह्नाहाः पुंसीति पुंस्त्वं॥ ॥अग्र॥ ॥अग्रं प्रधानं तस्याख्या
२४ आग्राख्या। अश्वोरसमिति। अश्वानामुरः। यथा शरीरावयवानामुरः प्रधानमेवमश्वोपि प्रधानं तत्र उरःशब्देनोच्यते। अग्राख्यायां किं। देवद
त्तस्योरो देवदत्तोरः॥ ॥अनः॥ ॥तत्र जातावुदाहरति। उपानसमित्यादि उपगतमनः इति प्रादिसमासः। अमृताश्मः। कालायसमिति क
र्मधारयौ। मंडूकसरसमिति षष्ठीतत्पुरुषः। संज्ञायामुदाहरति। महानसमित्यादि। सर्वत्रयोपि कर्मधारयाः। एवं जलसरसमिति षष्ठीतत्पुरुषः।
जातिसंज्ञयोः किं। सदनः सदश्मा॥ ॥ग्राम॥ ॥ग्रामतक्ष इति। ग्रामस्य तक्षा। बहूनां साधारणमित्यर्थः। कौटतक्ष इति। कुट्यां भवः कौटः स
चासौ तक्षा च। स्वतंत्रः कर्मजीवी न कस्यचिदधीन इत्यर्थः। ग्रामकौटाभ्यां किं। राज्ञस्तक्षा राजतक्षा॥ ॥अतेः॥ ॥अतिश्व इति। श्वान
मतिक्रांतः प्रादिसमासः। अतिश्वी सेवेति। शुनोपि सेवामतिक्रांता निकृष्टसेवेति यावत्। टिड्ढाणञिति ङीप्॥ ॥उपमानात्॥ ॥आकर्षश्व श्री॥ ॥१६१
इति। अत्र श्वशब्द उपमानमप्राणिन्याकर्षे वर्त्तते। वानरश्व इति। अत्र प्राणिनि वानरे वर्त्तते। उपमानात् किं। नश्वा अश्वा लोष्टः॥ ॥उत्तर॥ ॥उत्तर
सक्थमिति। उत्तरं सक्थ्नः पूर्वापरेति समासः। अथवोत्तरं सक्थीति विशेषणसमासः। मृगसक्थमिति षष्ठीतत्पुरुषः। पूर्वसक्थमिति। उत्तरसक्थं तु
लं। फलकसक्थमिति। फलकमिव सक्थि॥ ॥नावः॥ ॥द्विनावमित्यादौ सर्वत्र तद्धितार्थोत्तरपदेति समासः। द्विगोर्लुगित्यादि। अत्र समर्थानां प्र
थमाद्वेत्यतो वेत्यनुवर्त्तते सा च व्यवस्थितविभाषेति। अजादेरेव प्रत्ययस्य लुक् हलादेर्नेति। अत्र न लुगिति भावः। पंचनौरिति अर्हीयस्य ठको
ऽध्यर्द्धसर्वेति लुक्॥ ॥अर्द्धाच्च॥ ॥अर्द्धनावमिति॥ अर्द्धं नपुंसकमिति समासः। ननु च परवल्लिंगमिति परवल्लिंगता कस्मान्नेत्याशंक्याह। क्लीबत्वे
लोकादिति। लोकाश्रयत्वाल्लिंगस्येति भावः॥ ॥खार्याः॥ ॥द्विखारमिति। द्वयोः खार्योः समाहारे। अर्द्धखारमिति। खार्या अर्द्धं॥ ॥द्वित्रिभ्यां॥ ॥

द्वौ दण्डमिति। द्वौ चेद्दण्डौ समाहृतौ। द्विगो किं। द्वयोरञ्जल्योः द्व्यञ्जलिः। द्वाभ्यामञ्जलिभ्यां क्रीतो द्व्यञ्जलिः। अर्ध्यर्द्धत्याद्दीर्यस्य ष्ठकोलुक्॥ ॥ब्राह्मणः॥ ॥
जनपदे त्वयो जानपदः स्त्स्याख्यास्यो जाव प्रधानो यज्जानपदशब्दः। जानपदत्वाख्यायामित्यर्थः। तदिदमुक्तं। जनपदसंबंधद्योतके च्वे ह्युपपदमिति।
ब्राह्मणो जनपदसंबंधस्य द्योतकमित्यर्थः। ननु च्वे कमेव ब्राह्मग्रहणं। तेनन तत्पुरुषो विशेषितो ब्राह्मोतादिति। तत्कथं जानपदत्वे ब्राह्मणा विशेष्यते।
नैष दोषः। तं त्रेण ह्यत्र हो ब्रह्मशब्दो वुच्चारितो त्वेवे कन समासो विशेष्यते। अपरेण जानपदत्वे। सप्तमीति योगविभागादिति। सप्तमी शौण्डैरित्यत्र यो
गे सप्तमीति विभागा समासइत्यर्थः। जानपदाख्यायां किं। देव ब्रह्मा नारदः॥ ॥कुमहद्भ्यां॥ ॥अप्राप्तविभाषेयं। न ह्यत्र जानपदत्वं प्रतीयते। कुब्रह्म
इति। कुगतीति समासः। कु ब्रह्म इति। कुगतीति समासः। ब्राह्मणपर्यायो ब्रह्मशब्दः॥ ॥तत्र॥ ॥नवेति॥ इतो यो धात्वधिकार उत्सृज्यते इत्यन्विते स्या
ह। अस्मिंधात्वधिकार इति। सप्तमी स्थमिति स्थग्रहणं स्वेष्वसप्तमीनिर्देशप्रतिपत्त्यर्थमन्यथा यत्र सप्तमीश्रुतिस्तत्रैव स्यात्। स्तवे रमइत्यादौ यत्र सप्त
मीश्रुतिर्नास्ति सप्तम्यां जनेर्डः स्मरे डमित्यादौ तत्र न स्यात्। महत्याः संज्ञायाः करणमन्वर्थता विज्ञानार्थं। उपोच्चारि पदमुपपदमिति। एवं च विज्ञायमाने
८३ समर्थपरिभाषा व्याप्रियते। तत्रश्चात्र न भवति। पश्य कुंभं करोतीति कटमिति न ह्यत्र कुंभस्य करोतिना सामर्थ्यं किं तु पश्यत्यनेन ततो न। ५०॥ ॥उपपदं॥ ॥
नित्यं क्रीडाजीविकयोरित्यतो नुवर्त्तत इत्यभिप्रेत्याह। नित्यमिति। कुंभकारकइति। कर्मण्यण्। प्रधानाहारको व्याघ्री इति तु मुनयः कुलो। क्रियायां क्रियार्थ
यामिति ण्वुल्। ननु च सुप् सुपेत्यनुवर्त्तते एवेति। तस्यो पा दस्यापि समासो न स्यात्। तत्किमर्थं तिङ्वर्जनमित्याशंक्य ज्ञापनार्थं तदित्याह। तिङ्
वचनमिति। ज्ञापनस्य फलमाह। तेनेत्यादि। तेन कारणेन गतिकारकोपपदानामित्यादि पूर्वाचार्यकृता परिभाषा सिद्धेत्यर्थः॥ ततश्च अश्वक्रीतीत्य
त्र प्राक् सुबुत्पत्तेः समास इति लिंगयोगानपेक्षणात् समासात् प्राक् टाबपि न क्रियते इति प्रथमं कर्त्तृकरणे कृता बहुलमिति समास एव स्यात्। तत इत्यधि
कारेण क्रीतात्करणपूर्वादिति ङीष्। यमानं ङीषस्यात्। यदि हि सुबुत्पत्त्यां समासस्यात्तदा अंतरंगत्वात् ततष्टाप् प्राक् सुप् स्यात् ततः समासः ततो अ
दंतत्वाभावात् ङीषु न स्यात्। ननु च अश्वस्य [illegible] सप्तमीनिर्देशा [illegible] नोपपदत्वं। कथमत्र सुबुत्पत्तेः प्राक् समास इति चेत्॥ नैष दोषः॥ ॥न

प्र.कौ. १२८॥ हिंयात्वधिकारेयदुपपदंतदेवोपपदं। अपितुयोऽव्ययोपपद्युपपदमित्युच्यते। विदाप्रीयते। यथाऽन्तरेणतरान्योन्योपपदाद्भेति। तस्माद्व्योप्युपेऽव्या
रिपदत्वादुपपदंपदंद्यतेनेनार्थइतिपदंनस्तुवेनत्वात्। ननुयोऽव्योपरिपदसप्युपपदंचेनर्हंतिप्रसंगः। राज्ञाविनइत्यत्रापि प्राक्सुबुत्पत्तेः समासः स्या
त्ततनश्रुदेपेत्वाजावान्नलोपोनस्यात्। असर्वविषयत्वादस्यज्ञापकस्येत्यदोषः। अथवा गतिकारकोपपदानामित्यस्याप्यर्थः। गतीनांकारका
णामुपपदानांचेति। गतीनांव्याघ्री। व्याडिघ्रतीति। आतश्चोपसर्गइतिकः। व्याङ्गतिशब्देनसमासेयदिसुबन्तस्योत्तरपदस्यस्यात्। तन्तस्सुबुत्पत्त
ते। संख्याकर्मादियोगापेक्ष्यत्वात्ः प्राक्लिंगयोगः। ततश्चाघ्राशब्दस्याजातित्वात्स्त्रीनिमित्तस्याप्यस्यात्। ततोघ्राशब्देनसमासेअनकारान्तत्वात्ङी
षुनस्यात्। प्राक्सुबुत्पत्तेः समासोऽन्यच्चलिंगयोगेनापक्षेतइतिसप्तस्यात्। पश्चाज्जातित्वात्स्त्रीप्रत्ययान्तत्वेनङीषचस्यात्। कारकाणां। अश्वक्रीती॥
उपपदानां। माषवापिनी। ङीपः प्राक्समासेसमासप्रातिपदिकस्यान्तोनकारइतिणत्वंस्यात्॥ ॥अमा॥ ॥एवकारसिद्धेनियमार्थवचने। ननुचसिद्धेसत्यारं
भोनियमार्थइत्येवकारमन्तरेणापिनियमार्थतासिद्धायामेवकारग्रहणंकिमर्थं। उच्यते। उपपदविशेषणार्थं। अमैवयत्तुल्यविधानमुपपदंतस्यसमासोयं श्री॥ ॥१२८॥
थास्यात्। येनचवाक्येनअमैवविधीयतेनत्वन्यथानरमापत्तेनयदुपपदंनिर्दिश्यतेतदेवतुल्यविधानं। यथास्वादुंकारमिति। स्वादुमिणमुलितिस्वादुं
शब्दः। यत्तुअमानाऽनच्च तुल्यविधानं यथा अग्रेभोजं अग्रेभुक्त्वा अत्राग्रेशब्दउपपदेविभाषाग्रेप्रथमपूर्वेष्वित्यमाक्त्वाप्रत्ययेनच तुल्यविधानमिति न
समस्यते। अयंनियमः किमर्थमित्याक्षिपति। अमा किमिति। उत्तरमाह। कालोभोक्तुमिति। कालसमयवेलासुतुमुन्॥ ॥तृतीया॥ ॥उपपदविशेष
णे। यदमैवतुल्यविधानंतस्यप्रासे यथापदेशास्तृतीयार्थो। मूलकोपदंशं। मूलकेनोपदंशमिति। यत्तुनरमात्वान्यनचतस्याप्रासे। यथाव्ययेयथाभिप्रेतारव्या
नेकृत्वः कृत्वामुक्तौ। उच्चैःकारमवष्टा। उच्चैःकारंपठतीति। अमेत्येवपर्याप्तिवचनेष्वलमर्थेषु। पर्याप्तोभोक्तुं। प्रभुर्भोक्तुं॥ ॥क्त्वा च॥ ॥तृतीयाप्रभृतीनि
किं। उच्चैःखल्वोःप्रतिषेधयोःप्राचांक्त्वा। अलंकृत्वा। खलुकृत्वा। अयंचतृतीयाप्रभृतिनाःसर्वः॥ ॥उपदंश॥ उपदंशायतउत्युपदंशः। उपदंशः परिछेदइति
यावत्। आतश्चोपसर्गइतिकर्मण्यड्। उपकृत्यतइत्युपकर्मः कर्तव्यः। अकर्तरिचकारकेइतिकर्मणिघञ्। तयोर्द्वयकर्तृव्ययोरादेःप्राथम्यस्यकथनेका

यो तदेत उपज्ञोपक्रमौ तत्पुरुषो नपुंसके स्यादित्यर्थः। उपज्ञोपक्रमे किं। वाल्मीकिश्लोकः। अस्य वचनादेः शरव्यानेकायवाल्मीकिः प्रथमतः श्लोकसं
वंधं दर्शीतिप्रसिद्धेः। तदाद्याचिख्यासायां किं। देवदत्तोपज्ञरथः। यज्ञदत्तोपक्रमोरथः। देवदत्तेनोपज्ञायते यज्ञदत्तेनोपक्रम्यत इति क्रियासंबंध
मात्रमत्र विवक्षितं॥ ॥छाया॥ ॥विभाषासेनासुराछायेति वक्ष्यति। नित्यार्थमिदं वचनं। शलभच्छायमित्यादौ शलभच्छादीनां बहुत्वं गम्यते। नहि तेन
विनाच्छाया संभवति। अतः सर्वपदार्थस्य शलभच्छादेर्बाहुल्यं धर्म इत्यभिप्रेत्याह। पूर्वपदार्थबाहुल्य इति। बाहुल्ये किं। कुड्यस्य छाया कुड्यछाया॥
॥ ॥सभा॥ ॥इनसभमित्यादि। षष्ठीतत्पुरुषः। ननु च स्वं रूपं शब्दस्याशब्दसंज्ञेति राजशब्दस्योदाहार्याणां पर्यायस्तत्र कथं पर्यायाणां विनेश्वरशब्दा
नुदाहृतानित्याशंक्याह। पर्यायस्यैवेष्यत इति। राजादिपर्यायस्यैवेष्यते। तथा च महाभाष्यवार्त्तिकं। जित्पर्यायवचनस्यैव राजाद्यर्थमिति लिंगदृशः
कर्त्तव्यस्तत्र वक्तव्ये। पर्यायवचनस्यैव ग्रहणं भविष्यतीति किं प्रयोजनं राजाद्यर्थमिति। अमनुष्यशब्दोयं अस्य व्युत्पत्तो रूढो रक्षःपिशाचादे
अस्ति व्युत्पत्तौ नञ्समासः। अत्र च रूढस्यैव ग्रहणं इत्याह। अमनुष्येति चंद्रगुप्तसभेति। चंद्रगुप्तशब्दो न राजपर्यायो नाप्यमनुष्यवचनः॥ ॥
॥ ॥अशाला॥ ॥सभाशब्दोयमस्ति कुटीवचनः दीर्घसभेति। अस्ति च संघातवाची स्त्रीसभमिति। गृहत्वशालेति कुटीवाचि निषेधात्संघात
वाची गृह्यत इत्याह। संघातार्थेति॥ ॥विभाषा॥ ॥द्विजसेनेत्यादि। द्विजानां सेना। यवानां सुरा। गवां शाला। श्वनां निशेति विग्रहः। श्वस्यां निशा
यां श्वानो मत्ताश्चरंति। सा निशा श्वनिशमित्युच्यते। तत्पुरुष इत्यादि। तत्पुरुषोनञ्कर्मधारय इति अधिकारत्वात्। अस्यार्थः। यदित ऊर्ध्वमनुक्र
मिष्यामस्तत्र नञ्समासं कर्मधारयं च वर्ज्जयित्वान्यस्तत्पुरुषो नपुंसकलिंगः स्यादित्यधिकृतं वेदितव्यमिति। दृढसेन इति। बहुव्रीहिः। असेनेति
नञ्समासः। परमसेनेति। कर्मधारयः॥ ॥परवत्॥ ॥समाहारद्वंद्वस्य क्लीबत्वस्योक्तत्वादितरेतरयोगद्वंद्वो अत्र गृह्यते। अन्यश्च द्वंद्वतत्पुरुष
योरिति षष्ठ्ययं समासार्थस्य लिंगातिदेशात्। षष्ठी न सप्तमी। सा तत्र वैदेनसिद्धत्वात् इतरेतरयोगद्वंद्वस्य तत्पुरुषस्य चेति। यदि हि सप्तमी स्यात्तर्हि
द्वंद्वे तत्पुरुषे च यत्परपदं तल्लिंगं पूर्वपदस्यापद्येत। द्वंद्वस्य सर्वपदप्राधान्यात्क्रमेण सर्वपदलिंगप्राप्ते नियमार्थं वचनं। तत्पुरुषे तूत्तरपदार्थ
प्रधानत्वात्सर्वपदार्थप्राधान्ये वचनं। कुक्कुटमयूर्याविमे। अत्र द्वंद्वस्य सर्वपदार्थप्रधानत्वादुपसर्जनसंज्ञाया अभावाच्च ह्रस्वत्वं न॥

श्रे·प्र·सु ।अर्द्धपिप्पलीत्यत्र तु विभाषानुवृत्तेः। द्विगुरित्यादि। द्विगुसमासे प्राप्तशब्दपूर्वे समासे आपन्नशब्दपूर्वे समासे अलंशब्दपूर्वे समासे गतिसमासे च
॥११९७॥ परपदवल्लिंगता न भवतीति वक्तव्यमित्यर्थः॥पंचकपालइति। पंचसु कपालेषु संस्कृतः तद्धितार्थे द्विगुः प्राप्तजीविकः आपन्नजीविकइति॥
प्राप्तापन्ने च द्वितीययेति समासः। अलंजीविकइति। पर्यादयो ग्लानाद्यर्थे चतुर्थ्येति। निष्कौशांबिरिति। निरादयः क्रांताद्यर्थे पंचम्येति॥ ॥
पूर्ववत्॥ ॥विभाषा वृक्षमृगेत्यत्र वडवयोर्विभाषैवैकवद्भावविधेरन्यत्र पक्षे परवल्लिंगतायां प्राप्तायामारंभः। अर्थातिदेशव्याख्याने तु निपातनं नि
पातनेहि एवं वदिति वचनमनर्थकमित्यश्ववडवाविति व ब्रूयात् इत्यभिप्रेत्याह। एतयोरित्यादि। द्वित्वमतंत्रमित्यादिना अर्थातिदेशपक्षे दर्शि
यति निपातनेनानुवचनानंतरे पूर्ववल्लिंगं न स्यात्। क्रियाव्ययेति क्रियाविशेषणानामव्ययविशेषणानां च क्लीबत्वमेकवचनांतत्वं च वक्तव्यमित्यर्थः।
तत्क्लीबत्वमव्ययीभावश्चेति चकारेणानुक्तसमुच्चयार्थेन लभ्यते। एकवचनं तु स्वर्गसिद्धं। क्रियाया अव्ययस्य वा संख्यत्वात्। तथा क्रियावि
शेषणस्य कर्मत्वमपि भवति क्रियाहि सर्वधातूनामांतरं कर्मेति। पथइत्यादि। संख्यादेरव्ययादेश्च पथिशब्दस्य क्लीबता वाच्येत्यर्थः। त्रिपथमि
ति। त्रयाणां पंथाः षष्ठीसमासः। समाहारद्विगोस्तु द्विगुरेकवचनं इत्येव नपुंसकमिति सिद्धं। ऋक्पूरब्धूरित्यकारः। विपथमिति। प्रादिसमासः पूर्वव
दकारः॥ ॥अपथं॥ ॥अपथशब्दः क्लीबं स्यात्। अपथानीति। न पंथानः। नञिति समासः। अपथमिदमितिवत् अपथमिति समासांतनिर्देशात्प
थो विभाषेति यदा समासांतो नास्ति तदा पुल्लिंगतैव स्यात्। अपंथा इति। तत्पुरुष एवेत्यादि। तत्पुरुषो नञ्कर्मधारय इति अनस्तत्पुरुष इत्यनुवर्त
य तएवेति। न विद्यते पंथा अस्याः सा अपथा नगरी। अत्र च बहुव्रीहौ क्लीबता न। स्पष्टत्वादस्य क्तं स्वत्वद्वयं॥ ॥संज्ञायां कंथोशीनरेषु॥ ॥संज्ञायां
विषये कंथांतत्पुरुषः क्लीबं स्यात् सा चेत्कंथा उशीनरेषु स्यात्। सौशमिकंथं॥ आह्वरकंथं। संज्ञायां किं। वीरणकंथा। उशीनरेषु किं। दा
क्षिकंथा। परवल्लिंगतापवादो योगः॥ ॥अर्द्धर्चाः पुंसि च॥ ॥अर्द्धर्चादयः शब्दाः पुंसि नपुंसके च स्युः। शब्दाश्रयाचेयं हि लिंगता। क्वचि
दर्थभेदे[illegible]नापि। यथा पद्मः शंखो निधौ पुल्लिंगो। जलजे तु उभयलिंगो। भूतः पिशाचे तु उभयलिंगः। क्रियावाची तु त्रिषेयलिंगः। सैंधवोश्
वे तु उभयलिंगः। यौगिको वाच्यलिंगः। सार उत्कर्षे पुल्लिंगः। न्यायादनपेते क्लीबे। धर्मइत्यत्र पूर्वं पुंसि। तत्साधने क्लीबे। अर्द्धर्चः। गोमयः। कषायः।

श्री॥ ॥११९७॥

कार्षापण। कुतप। कवाट। शंख। यूथ। गूथ। ध्वज। कबंध। पद्म। गृह। सरक। कंस। दिवस। यूष। अंधकार। दंड। कमंडलु। मंड। भूत। द्वीप। द्यूत। च
क्र। धर्म। कर्म। वासस्। मोदक। शतमान। यान। नख। चरण। पुच्छ। दाडिम। हिम। रजत। सक्तु। पिधान। सार। पात्र। घृत। सैंधव। औषध। आढक। च
षक। द्रोण। खलीन। पवित्र। वीरवाण। प्रोथ। कपित्थ। शुल्क। शील। सीधु। कवच। कपट। शीकर। सुवर्ण। सर्व। वयस। चमस। पर्ण। क्षीर। वक्ष॥
आकाश। अष्टापद। मंगल। निधान। निर्यास। जृंभ। वृत्त। पुस्त। बुस्त। क्ष्वेडित। शृंग। निगड। खल। मधु। मूल। स्थूल। काशन। वप्र। विमान। मुख। ग्रीव
शूल। प्रग्रीव। मूल। वज्र। कर्कट। शिखर। कल्क। नाव। मस्तक। वलय। कुसुम। तृण। पंक। कुंडल। किरीट। अर्बुद। अंकुश। तिमिर। आश्रम॥
भूषण। इल्वस। कुसूल। मुसल। वसंत। तडाग। पिटक। पिंडक। पिटाक। माष। कोश। पालव। देव। दैवत। पिनाक। समर। स्थाणु। अनीक। उपवास।
शाल। कार्पास। चषाल। खंड। दर। विटप। पण। बल। मृणाल। हस्त। सूत्र। आर्द्र। तांडव। गांडीव। मंडप। पटह। यौध। पार्श्व। शरीर। फल। पुर। राष्ट्र।
अंबर। विश्व। कुट्टिम। मंडल। कुंडल। ककुद। तोमर। तोरण। मंचक। मध्यम। बाल। वल्मीक। वर्ष। वर्ण। वसु। देह। उद्यान। उद्योग। स्तन। संगम। नि
ष्क। क्षेपक। छत्र। पवित्र। पोतक। फलक। सटक। मूषिक। वल्कल। कुंज। विहार। लोहित। विषाण। भवन। अरण्य। पुलिन। दृढ। आसन। ऐरावत। शूर्प॥
तीर्थ। लोमश। तमाल। लोह। दंडक। शपथ। प्रतीकार। दारु। कूर्च। धनुस्। पान। तंत्र। विटंक। मठ। महत्। मर्ष। सहस्र। ओदन। प्रवाल। शकट। अपरा
ह्ण। नीड। सकल। एकाधिका दश। एकादशेति। शाकपार्थिवादीनामुत्तरपदलोपश्चेत्युत्तरपदलोपी तत्पुरुषः। द्वे द्वौ वा एकश्च दश चेति। एवं
द्वादश द्वाविंशतिरित्यादावपि ज्ञेयं॥ ॥द्व्यष्टनः॥ ॥द्व्यष्टन इति किं। पंचदश। संख्यायामिति किं। द्वैमातुरः। द्वित्रा इति। द्वौ त्रयो वा मानं येषां द्वौ
वा त्रयो वा इति विग्रहः। संख्ययाव्ययासन्नेति बहुव्रीहिः। बहुव्रीहौ संख्येये डजबहुगणादिति डच्। द्व्यशीतिरिति। द्व्यधिकाशीतिः। द्व्यशी
तिः। अष्टनः कपाल इति। अष्टनः कपाले परे हविषि वाच्ये आत्वं वक्तव्यमित्यर्थः। अष्टाकपालं इति॥ अष्टसु कपालेषु संस्कृतः। गवि च यु
क्त इति। गोशब्दे चोत्तरपदे युक्तार्थगम्यमाने अष्टन आत्वं स्यादिति वाच्यं। अष्टागवेनेति। अष्टानां गवां समाहारः अष्टगवं। अष्टगवेन युक्त

प्र·प्रसु· मध्यागतो। नचैवं युक्तं प्रश्नस्याश्रवणं स्यादिति वाच्यं। पदैकदेशस्य प्रयोगात्। यथा। सत्यभामा भामा। सत्या। भीमसेनो भीम इति। अथवा अक्षेगा
॥१२०॥ वियुक्ता अस्मिन्निति विग्रहे बहुव्रीहिः। [illegible] मानार्थ। [illegible] प्रयुज्यते। अनु प्रत्ययान्त सर्वादिस्त्वादित्यादि नियमेन विसा
गामस्य॥ ॥त्रेस्त्रयः॥ ॥सकारान्तो यमादेशः संधिवेलादिषु त्रयोदशी। निपात्यते। त्रयोदशेति। [illegible] सुषो रुरिति रुत्वे। हशि चेत्युत्वे।
आद्गुणः। त्रिदशा इति। त्रिर्दश इति विग्रहे सुजर्थे बहुव्रीहिः॥ ॥विभाषा॥ ॥प्रागुक्तमिति। द्व्यष्टनो रात्वं त्रेस्त्रयः इत्यादेशः। एकादिश्चा।
एकेन न विंशतिरिति। एवं नञा विंशतिशब्देन समासस्तत स्तृतीयेति योगविभागात् समासः। पदान्तलक्षणोनुनासिकविकल्पो यथा
स्यादिति सर्वान्तो यमादुकुक्रियते इति चेतसि कृत्वाह। अनुनासिकेत्यादि। षषउत्वमित्यादि। षषुशब्दस्योत्वं स्यात् दन्तदश इत्येतयो
रुत्तरपदयोः उत्तरपदादेष्टुत्वं च स्यात्। धासुवान्नवतीति। उत्वस्यायं विकल्पः। धास्विति बहुवचनेन निर्देशो नाधिकरणवाचिनः
संख्याया विधार्थे धा अधिकरणविचाले चेति विहितस्य धाप्रत्ययस्य प्रतिपत्त्यर्थः॥ इह मा भूत्। षड् दधाति षड्यति वा षड्धा॥ ॥श्री॥ श्री॥ ॥१२०॥
॥ ॥इति श्रीरामाचार्यस्तनुज हरिहरनन्दनेन कामधेनोः श्रीनृसिंहाचार्यीयमाणिक्यवाक्यजनयत्तले विठ्ठलाचार्येणार्ये। तस्य श्रीपाणिनी
याद्यनुगुणस्य गुरोः प्रक्रियाकौमुदीयव्याख्याने स्मिन्नयं तत्पुरुष इति गतो ऽव्ययसादे समासः॥ ॥अथ बहुव्रीहिः॥ ॥स च सप्त
धा॥ ॥द्विपदो बहुपदः संख्योत्तरपदः संख्योभयपदो दिगन्तराललक्षणो व्यतिहारलक्षणः सहपूर्वपदश्चेति। तत्र तावद्द्विपदं
दर्शयितुमाह॥ ॥अनेकं॥ ॥अत्र सुप्सुपेति वर्त्तते। तत्रानेकग्रहणेन सुपि विशेषितदेव संबध्यते। प्रथमान्तत्वात् सुपेत्येतदविशेष्या
ह। अनेकं सुबंतमिति। स बहुव्रीहिरिति। एतच्च शेषो बहुव्रीहिरित्यधिकारस्सर्वत्रानुवर्त्यते। तस्य चायमर्थः यत्रान्यः समासो नोक्तः
स शेषस्तत्र बहुव्रीहिसंज्ञकः समासः स्यादिति। शेष इति किं। उन्मत्तगंगं॥ ॥सप्तमी॥ ॥सप्तम्युदाहरणं कंठेकालः। यदा कंठे किं
चिदस्तीति ज्ञाते कालो विशेषणं प्रयुज्यते तदा सप्तम्यं तस्य सर्वे निपातार्थः सप्तमीग्रहः अन्यदा तु विशेषणत्वादेव सिध्यति। अथ

थमाविभक्त्यर्थेषु यमिति । अयं बहुव्रीहिः समासः प्रथमाव्यतिरिक्तविभक्त्यर्थेषु भवतीति वाच्यं । प्राप्तमुदकं यं ग्राममिति । प्राप्तोदकउ
ति । द्वितीयाविभक्त्यर्थे वर्त्तमानस्य बहुव्रीहेर्विग्रहः । ऊढरथ इत्यादीनि वृत्तौ यादिविभक्त्यर्थेषु यथाक्रमं बहुव्रीहिरुदाहरणानि
ते षां विग्रहास्त्वेवं । ऊढो रथो येन अनडुहा सः । उपहृतः पशुर्यस्मै रुद्राय । उद्धृत ओदनो यस्याः स्थाल्याः । पीतमम्बरं यस्य हरेः ।
वीराः पुरुषा यस्मिन् ग्रामे । प्रथमार्थे तु नेति । अनभिधानात् । नहि वृष्टे देवे गत इति वाक्याद्योर्थः प्रतीयते स वृष्टदेवशब्दात्प्रतीयते । अ
नेकपदं बहुव्रीहिं दर्शयितुमाह । अनेकोक्तेरिति । अयं भावः यथा सुप्सुपेत्यधिकारात्समर्थपरिभाषया पर्यालोचनाच्च तत्पुरुष एकस्य
न भवति । तथा च बहुव्रीहिरप्येकस्य नस्यादित्येकस्य माभूदित्येवमर्थमनेकग्रहणं नेति । अनेकोक्तेर्बहूनामपि पदानां समासस्यादिति ॥
समानाधिकरणानामिति । किं प्रयोजनं । व्यधिकरणानां माभूदिति । ततश्च पंचभिर्भुक्तमस्येत्यत्र वैयधिकरण्यात् नेत्याह । नेहेति । इ
ष्यमाणोपि कथं लभ्यते । उच्यते । अभिधानलक्षणाः कृत्तद्धितसमासा भवंति । नहि व्यधिकरणानां बहुव्रीहौ कृते विवक्षितार्थोभि
धानमस्ति तथा हि पंचभिर्भुक्तमस्येति वाक्याद्योर्थः प्रतीयते स भुक्तपंचशब्दान्न प्रतीयते । तस्मादनभिधानाद्व्यधिकरणानां नैव बहुव्री
हिर्न्न । यत्र त्वभिधानमस्ति तत्र वैयधिकरण्येपि बहुव्रीहिः स्यात् । यथा कंठेकाल इति । कथं पुनस्तुल्ये वैयधिकरण्ये क्वचिद्भ— कंठेके
भिन्नेति । मास्तु शक्तिस्वाभाव्यादिति ब्रूमः ॥ अव्ययानामिति । असमानाधिकरणार्थमिदं । उच्चैर्मुख इति । उच्चैःशब्दस्यासत्त्ववाचित्वात्
सत्त्ववाचिना मुखेन नास्ति सामानाधिकरण्यं तथापि गमकत्वात् समासः । सप्तम्युपमानेति । सप्तम्यंतमुपमानं च पूर्वपदं यस्य तस्य सप्त
म्यंतपूर्वपदस्य उपमानपूर्वपदस्य च पदांतरेण समासः उत्तरपदलोपश्च भवति । कंठेस्थितं धनं यस्य स्यादि सप्तमीपूर्वपदस्योदाहरणं ।
कंठेस्थितमिति विगृह्य सप्तमीति योगविभागात् तैः समासः । सप्तम्यालुक् । ततः कंठेस्थितं धनं यस्येति विग्रहः । तत्र स्थितशब्दस्योत्तरपदस्य लोपः । स्यो
अत्र सामानाधिकरण्यात् सिद्ध एव समासः । उत्तरपदलोपस्तु विधीयते । एवं सर्वत्र ॥ खरस्येत्यादि । उपमाजपूर्वस्योदाहरणं । खरस्यमु

खरमुखमिवमुखमस्येति विग्रहः। अत्र खर उपमानं सर्वपदं। ननु च खरस्य मुखमुपमानं देवदत्तस्य मुखस्य न
खमिति विग्रहे समासः। ततः खरमुखमिवमुखमस्येति विग्रहे खरोप्युपमानमित्युच्यत इत्यदोषः। तत्र मुखशब्दस्योत्तरपदस्य लोपः। अत्र च द्वितीयस्य मुखस्याप्रवृत्तेर्व्याप्ते
तु खरः। उपमानावयवत्वात् खरोप्युपमानमित्युच्यत इत्यदोषः। तत्र मुखशब्दस्योत्तरपदस्य लोपः। अत्र च इष्टेर्मुखसाम्यप्रतीतेर्हेतो
तु खरः। उपमानावयवत्वात् खरोप्युपमानमित्युच्यते। इत्यदोषः। संघाते विकारे च या षष्ठी तदंतत् पूर्वपदात् परं यदुत्तरपदं तदंतं पदं। तत्रैतस्य समस्यते। तस्य च संघातविका
विवशब्दाप्रयोगः। संघातेनेति। संघाते विकारे च या षष्ठी तदंतं पूर्वपदात् परं यदुत्तरपदं तदंतं पदं। ततो बहुव्रीहिः। संघातः शब्दस्योत्तरपदस्य लो
रश्च षष्ठी तत्पूर्वपदस्य लोपः स्यात्। केशानामित्यादि। समुदायसंबंधे षष्ठी समासः। ततो बहुव्रीहिः। संघातः शब्दस्योत्तरपदस्य लो
पः। सुवर्णस्य विकार इत्यत्र विकारविकारिसंबंधे षष्ठी। शेषं पूर्ववत्। प्रादिभ्य इति। धातोर्ज्ञातं निष्पन्नं धातुजं प्रादिभ्यः पूर्वपदेभ्यः
पः। सुवर्णस्य विकार इत्यत्र विकारविकारिसंबंधे षष्ठी। शेषं पूर्ववत्। प्रादिभ्य इति। धातोर्ज्ञातं निष्पन्नं धातुजं प्रादिभ्यः पूर्वपदेभ्यः
परं यद्धातुजमुत्तरपदं पतितशब्दादि तदंतस्य बहुव्रीहिः स्याद्वा तस्य चोत्तरपदस्य वा लोपो वाच्यः। प्रपतितपर्ण इत्यादि। प्रपतितानि प
र्णानि यस्य विगतमत्त्वं यस्मादिति विग्रहे। नञ इति। नञः परेषामस्त्यर्थानां पदानां तेन समासो वाच्यः। उत्तरपदलोपश्च वा वाच्यः। अ
र्णो नियस्य विगतमत्त्वं यस्मादिति विग्रहे। नञ इति। नञ परेषामस्त्यर्थानां पदानां तेन समासो वाच्यः उत्तरपदलोपश्च वा वाच्यः। अ
अस्तिक्षीरादयश्चेति। सुबधिकारात् तिङ्न्तेन समासो नास्तीत्यारंभः॥ ॥स्त्रियाः॥ ॥ अत्र स्त्रियाः इति स्त्रीशब्देन स्त्रीप्रत्ययो वा ग्रह्य
ते। स्त्र्यर्थो वा स्त्रीवाचकशब्दो वा न च तावदाद्यपक्षे एवं सूत्रार्थः स्यात्। उक्तपुंस्कात् परस्त्रीप्रत्ययोन्तु ऊङ्समानाधिकरणे स्त्रीलिंगे उत्त
रपदे पुंवत् स्यात्। इतियथा पुंसः स्त्रीप्रयोगेन तथा अस्यापि नेत्यर्थ इति अत्र पक्षे पट्वी भार्या यस्य सः। पटुभार्य्य इत्यत्रोत्तरपदनिमित्ता
यास्त्रीप्रत्ययनिवृत्तेः सर्वस्मिन् यणादेशे विधेयेऽचः परस्मिन्निति स्थानिवद्भावे सति यणादेशः स्यात्। इह गार्ग्यो वृंदारिकाः। गार्गवृंदा
रिका इतियञो श्चेति बहुषु स्त्रियामुच्यमानो यञो लुक् न स्यात्। पुंवद्भावे न हि स्त्रीप्रत्ययस्य निवृत्तिः कृता न त्वर्थस्य स्त्रीत्वस्य त
त श्चार्थस्यानिवृत्तत्वात् केन यञो निवृत्तिः स्यात्। इत्येवमादयः प्रत्ययस पक्षे बहवो दोषा विस्तरेणान्यत्र प्रतिपादिताः। अतः प्रथ
मपक्षोनुपपन्नः। द्वितीयेतु पक्षे उत्तरपदे उक्तपुंस्कस्यानूङः स्त्रीप्रत्ययस्य योर्थस्तस्य च पुंवत् स्यात्। पुमर्थः स्यादिति सूत्रार्थः। अत्र
पक्षे कालिमन्यास्त्री यत्र सिद्धे स्यन्यस्येति ह्रस्वत्वस्य अस्य च पुंवत्त्वस्य विप्रतिषेधो न स्यात् भिन्नविषयत्वात् अवोहि ह्रस्वो वि

धीयतेऽर्थस्यपुंवत्त्वं। ततश्चविप्रतिषेधाभावात् विप्रतिषेधे परं कार्यमिति ङस्योनस्यात्। इष्यतेचसइत्येवमाद्योषाद्वितीयपक्षे तूङ्डा
विना भाष्ये। तृतीयएवपक्षः साधीयस्तथा स्थापितः। दोषाभावात्॥ अतः स्त्रियाः पुंवदिति सूत्रावयवस्यायमर्थः। स्त्रीवाचकस्यशब्द
स्यपुंवाचकः शब्दः स्यादिति। भाषितपुंस्कादनूङ् इत्यस्यत्वयमर्थः भाषितः पुमान्यस्मिन्नर्थे शब्दप्रवृत्तिनिमित्ते तद्भाषितपुंस्कं त
स्यप्रतिपादको यः शब्दः स भाषितपुंस्कः। एवं व्याख्याने समानायामाकृतौ यो भाषितपुंस्क इत्युक्तं स्यात्। ततश्च द्रोणी भार्या इत्यत्र पुं
वद्भावो न। अत्र द्रोणीशब्दो वुक्षाहिन्यां स्त्रीलिंगः। परिमाणविशेषे पुल्लिंगः। इत्येकस्मिन्नेव प्रवृत्तिनिमित्ते भाषितपुंस्कत्वाभावात्।
यदातु भाषितः पुमान्येनेति व्याख्यायेत तदा द्रोणीभार्यी इत्यत्र पुंवत्त्वं स्यात्। यत्र क्वचिदर्थे भाषितपुंस्कत्वात्। अतः एवं व्याख्या
ज्यायसी। कथं तर्हि गर्भिणीभार्यः। प्रसूतभार्यः। प्रजातभार्य इति पुंवद्भावः। यलोगन्त्यादीनां भिन्ने प्रवृत्तिनिमित्ते भाषितपुंस्कत्वं तथा
हि अनवयवभूतानां वर्त्तिर्वस्तुविशेषसंबंधे हि स्त्री गर्भिण्युच्यते। व्रीहिस्त्ववयवविभूतानां वर्त्तिर्वस्तुविशेषसंबंधेन गर्भिण्युच्यते इति
निवृत्तिनिमित्तभेदः स्त्रीपुंसयोः। तथा प्रसूतप्रजातशब्दौ गर्भनिर्मोक्षे प्रवृत्तिनिमित्तमुपादाय स्त्रियां वर्त्तेते पुंसि तु गर्भाधाने। कर्तव्य
स्तत्रयत्नः। तत्र केचिदुपसंख्यानं कार्यमित्याहुः। केचित्तु पुंवदिति योगविभागः कार्य इति। अनूङिति। यद्यप्यूङोऽन्योऽनूङिति पर्युदा
सः स्यात् ततो नञिवयुक्तन्यायेन तत्सदृशस्याबादीनां ग्रहणे सति तदन्तस्यैव पुंवत्त्वं स्यात्। ततश्चैडविडं दारिका दारदं दारिके
त्यत्र न स्यात्। कथं इडविडोऽपत्यं स्त्री जनपदशब्दात्क्षत्रियादञ् दरदोऽपत्यं स्त्री द्व्यञ्मगधेत्यण्। ततो तस्य तिल्लुक्। तत ऐडविडा चासौ दरद
रिका चेति समासः। तत्र पुंवत्कर्मधारये इति पुंवत्त्वं न स्यात्। ऊङ्सदृशप्रत्ययान्तत्वाभावात्। ततश्च इडविडशब्दस्य ऐडविडशब्दाद
रणाद्ध्रस्य दारदशब्दो न स्यात्। ऊङोऽभावोऽनूङिति प्रसज्यप्रतिषेधे तु सति भवति। अत्राप्यूङभावस्याभावात्। भाषितपुंस्कादनूङ् इ
तियद्ययं तदसमस्तं स्यात्। तदायमर्थः स्यात्। उक्तपुंस्कात्परस्यानूङ् ऊङर्थे वर्त्तिनः शब्दस्योत्तरपदे पुंवत्स्यादिति। ततश्चातिप्रसंगः॥ हे

धीयतेऽर्थस्य पुंवत्वे। ततश्च विप्रतिषेधाभावात् विप्रतिषेधे परं कार्यमिति ङस्योन स्यात्। इष्यते च स इत्येवमादयो षाद्वितीयपक्षे तूङ्
विनाभाव्ये। तृतीय एव पक्षः साधीयस्तथा स्थापितः। दोषाभावात्॥ अतः स्त्रियाः पुंवदिति सूत्रावयवस्यायमर्थः। स्त्रीवाचकस्य शब्द
स्य पुंवाचकः शब्दः स्यादिति। भाषितपुंस्कादनूङ् इत्यस्य त्वयमर्थः भाषितः पुमान् यस्मिन्नर्थे शब्दे प्रवृत्तिनिमित्ते तद्भाषितपुंस्कं तन्
स्य प्रतिपादको यः शब्दः स भाषितपुंस्कः। एवं व्याख्याने समानायामाकृतौ यो भाषितपुंस्क इत्युक्तं स्यात्। ततश्च द्रोणीभार्या इत्यत्र पुं
वद्भावो न। अत्र द्रोणीशब्दो वुवाहिन्यां स्त्रीलिंगः। परिमाणविशेषे पुल्लिंगः। इत्येकस्मिन्नेव प्रवृत्तिनिमित्ते भाषितपुंस्कत्वाभावात्।
यदा तु भाषितः पुमान् येनेति व्याख्यायेत तदा द्रोणीभार्या इत्यत्र पुंवत्त्वं स्यात्। यत्र क्वचिदर्थे भाषितपुंस्कत्वात्। अतः एवं व्याख्या
ज्यायसी। कथं तर्हि गर्भिभार्यः। प्रसूतभार्यः। प्रजातभार्य इति पुंवद्भावः। यतो गर्भ्यादीनां प्रवृत्तिनिमित्ते भाषितपुंस्कत्वं तथा
हि अनवयवभूतां तद्वर्त्तिं वस्तुविशेषसंबंधे हि स्त्री गर्भिणीत्युच्यते। व्रीहिस्त्ववयवीभूतां तद्वर्त्तिं वस्तुविशेषसंबंधेन गर्भित इत्युच्यते इति
निवृत्तिनिमित्तभेदः स्त्रीपुंसयोः। तथा प्रसूतप्रजातशब्दयोर्गर्भनिर्मोक्षं प्रवृत्तिनिमित्तमुपादाय स्त्रियां वर्त्तते पुंसि तु गर्भाधानं। कर्तव्य
स्तत्र यत्नः। तत्र केचिदुपसंख्यानं कार्यमित्याहुः। केचित्तु पुंवदिति योगविभागः कार्य इति। अनूङिति। यद्यप्यूङोन्योनूङिति पर्युदा
सः स्यात् तत्तो नञिवयुक्तन्यायेन तत्सदृशादावादीनां ग्रहणे सति तदं तस्यैव पुंवत्त्वं स्यात्। ततश्चेडविडद्दारिका दारदद्दारिके
त्यत्र न स्यात्। कथं इडविडोऽपत्यं स्त्री जनपदशब्दात्क्षत्रियादञ् दरदोऽपत्यं स्त्री द्व्यञ्मगधेत्यण्। ततोऽतश्चेति लुक्। तत इडविडा चासौ दा
रिका चेति समासः। तत्र पुंवत्कर्मधारयेति पुंवत्त्वं न स्यात्। ऊङः सदृशप्रत्ययान्तत्वाभावात्। ततश्च इडविडशब्दस्य ऐडविडशब्दो द
रदशब्दस्य दारदशब्दो न स्यात्। ऊङो भावेनूङिति प्रसज्यप्रतिषेधे तु सति भवति। अत्राप्यूङ्भावस्याभावात्। भाषितपुंस्कादनूङ् इ
ति यद्येतदसमस्तं स्यात्। तदायमर्थः स्यात्। उक्तपुंस्कात्परस्यानूङ् स्त्र्यर्थे शब्दस्योत्तरपदे पुंवद्भावः स्यादिति। ततश्चातिप्रसंगः॥ है

प्र॰प्र॰सु॰
॥१२२॥

सानामपक्षिणास्तेषांवरदाः स्त्रियः तर्हि एतावरदाश्चताहं दारिकाश्चेति समभिव्याहृते एतत्शब्द उक्तपुंस्क इति तस्मात्परस्य वरदाशब्दस्या
र्थवत्त्वान्तरतमो ह्रस्वशब्दः आदेशः स्यात् अन्यस्यासरतमस्याभावात्। ततश्च एता ह्रस्व ह्रस्वा दारिका इति स्यात्। वरदा ह्रस्वा दारिका इति चेष्यते। भाषि
तपुंस्कादनूङ् इत्यस्मिन्समस्ते तु बहुव्रीहिः स्यात्। ततश्चानिष्टप्रसंगो न। तथा हि भाषितपुंस्कादनूङ् यस्मिन् स्त्रीवाचके शब्दे स भाषि
तपुंस्कादनूङ् निपातनात्संघं च स्यात् अलुक् च। एवं बहुव्रीहौ कृते उक्तपुंस्कस्य पुंवत्त्वेन भाव्यं न च वरदाशब्द उक्तपुंस्क इत्यय तद्दोषवत्त्वं न भ
वति। एवं सूत्रार्थे निश्चिते एतमेव सूत्रार्थं व्याख्यातं प्रवृत्तिनिमित्तैक्यप्रवृत्तिः प्रत्ययपक्षे अ समस्तत्वात् पर्युदासे चांगी। कृत्य प्रवृत्तेनिमंदमतीनां व्यामो
भवति तन्निरासार्थमुच्यते। उक्तपुंस्कादित्यादि। उक्तः पुमान् यस्मिन् शब्दे प्रवृत्तिनिमित्ते तत्प्रतिपादकः शब्द उक्तपुंस्कस्तस्मात्परस्य अनूङः
ऊङो भावो नूङ् तस्य न तु व्याभावस्यैवापर्यायभावादुक्तपुंस्कात्परत्वं नोपपद्यत इति चेन्न। नैष दोषः। प्रतियोगिनो ह्यूङः परत्वेन भावस्य परत्वे
नाभावस्य परत्वमुपचर्यते तस्योङ्भावस्य यत्र अयत्नेन संबंधी स्त्रीप्रत्ययः स्त्रीप्रतीपत्ते इत्यादि तिस्त्रीप्रत्ययः स्त्रीवाचकः शब्दस्तस्य पुंव
स्यात्। पुंवाचकः शब्दस्यादिसर्थः। पुंवत् भावात् स्त्रीप्रत्ययलोप इति पुंवाचकशब्दातिदेशात् स्त्रीप्रत्ययस्य लोपो निवृत्तिरित्यर्थः। स्त्रीशब्दस्य पुं
शब्दोऽतिदिश्यत इत्येष एवार्थ आचार्येण सन्निवेशित इति तस्योपधायाः इत्यादिसूत्रवृत्तिषु प्रकटं दृश्यते। अयमेव सूत्रार्थः काशिकायां वृत्ता
वुक्तः भाषितः पुमान् येन समानायामाकृतौ एकस्मिन् प्रवृत्तिनिमित्ते स भाषितपुंस्कः शब्दस्तस्य कथं भवति भाषितः पुमान् यस्मिन्नर्थे प्रवृ
त्तिनिमित्ते स भाषितपुंस्कशब्देनोच्यते तस्य प्रतिपादको यः शब्दः स भाषितपुंस्कः। ऊङो भावोऽनूङ् भाषितपुंस्कादनूङ् यस्मिन् शब्दे स भाषि
तपुंस्कादनूङ्। बहुव्रीहिरयं। अलुक् निपातनात् संघं च स्यात्। तस्य भाषितपुंस्कादनूङः स्त्रीशब्दस्य पुंशब्दस्येव रूपं भवतीति चित्रगुः रूपव
द्भार्य इति। चित्रा गावो यस्य रूपवती भार्या यस्य अत्र चित्रत्वं नाम गुणश्चित्रशब्दस्य प्रवृत्तिनिमित्तं तमेकमुपादाय सोऽपि पुंसि स्त्रियां च वर्तते। तथा
रूपवतीशब्दस्य रूपवत्त्वं नाम सामान्यविशेषः प्रवृत्तिनिमित्तं तमेकमुपादायासौ पुंसि स्त्रियां च वर्तते। अतस्सो भाषितपुंस्को वामोरुभार्य इति।

जी॥
॥१२२॥

संहितस्य फलं लक्षणा वामादेश्चेत्स्थ्। ॥ अप्पूरणी समासांतोऽयं॥ पूरणीप्रत्ययांतादित्यादि। तस्य पूरणेडट् इत्यादिना प्रकरणेन पूरणार्थे
ये विहिताः प्रत्ययास्ते स्त्रीविषयाः पूरणीप्रत्यययोः इत्युच्यते। प्रमाणीति स्वरूपग्रहणं। पंचमीति। अत्र नांतादसंख्यादेर्मडिति। पंचमशब्दात्
परस्य टिटोमट् ङीप्। स्त्रीप्रमाणा इति। स्त्रीप्रमाणी यस्य कुटुंबिनः स स्त्रीप्रमाणः। पुंवद्भाव इत्यादि। यत्रान्यपदार्थ पूरण्यनुप्रविशति न
केवलं वृत्तिपदार्थ एव तत्र पूरण्याः प्राधान्यं एतदेव कथितोदाहरणे योजयति। रात्रिरिति। अत्रोदाहरणे रात्रिरेवावयवरूपतादूर
रेण तत्सहिता रात्रय एव मुदिताः अन्यपदार्थः। ननु तासां रात्रीणां अन्यपदार्थांतरं मिति तत्पूरण्यां प्रधानत्वं। अन्यत्रेति। पूरण्या अप्रधान्ये।
॥ ॥ नद्यृतश्च॥ ॥ ऋतइति तपरकरणं मुखसुखार्थं न त्वदृकारांत निवृत्त्यर्थं। ऋकारांतस्य प्रातिपदिकस्याभावात्। अयमपि समासांतः स्या
। कल्याणपंचमीकः पक्षः इति। अत्र हि नावयवः पंचमी रात्रिः समासार्थः। किं तर्हि तदारब्धः पक्षस्त्वयः पूरणी तु समासावयववृत्तेर्वेत्य
प्राधान्यमस्याः। बहुकर्तृकः इति। ऋदंतत्वात्कप्। अप्रियादिष्विति किमिति। स्त्रियाः पुंवदिति सूत्रावयवस्याक्षेपः। प्रियादिकं गणं पठ
ति प्रियेत्यादिना। अथ दृढभक्तिरित्यादौ कथं पुंवत्त्वं। यतो भक्तिशब्दः प्रियादिष्विति निषेधो भाष्य इत्याशंक्याह। दृढभक्तिरित्यादि दृढ
शब्दो ह्यत्रादार्ढ्य निवृत्तिमात्रपरः प्रयुक्तः तत्रादार्ढ्य निवृत्तिपरत्वाचोदनायो लिंगविशेषोपादानमनुपयोग्येवेति। स्त्रीत्वमिह न
विवक्षितं तस्माद्स्त्रीलिंगस्य दृढशब्दस्यायं प्रयोगः इत्यपि प्रायः॥ ॥ तसिल्॥ ॥ अनुत्तरपदार्थो योगः तसिलादिषु कृत्वासुजंतेष्वि
ति। पंचम्यास्तसिरित्यारभ्य संख्यायाः क्रियाभ्यावृत्तिगणने कृत्वसुजिति सूत्रात्प्राग्ये विहितास्तेषु। तलइति तस्या इति विग्रहः॥
पंचम्यास्तसिल् विभक्तिलोपः। प्राग्दिशो विभक्तिरिति विभक्तित्वात् सदाद्यं च टाप्। तत्रेति तत्रस्थ्यां। सप्तम्यास्त्रल्। शेषं सर्ववत्। तसिला
दिषु कृत्वसुजंतेष्वंतर्भूतेष्वपि केषुचिल्लेष्यते। अनंतर्भूतेष्वपि केषुचिदिष्यते इति परिगणनं कर्तव्यमिति भाष्यकारमतेन सिद्धं त्वापरि
गणयन् त्वल्तलसिलादुदाहरति। पटुतरा। पटुतमेति। इयमनयोरतिशयेन पट्वी द्विवचने विभज्योपपदे इति तरप्। इय
तं२

मासातिशायनेन पट्वी। अतिशायने तमबिष्ठनाविति तमप्। एवमितिकल्पेनेन प्रकारेण चरडादावुदाहार्यं नान्यथेत्यर्थः। अत एव चर
ट्। प्रकारवचने जातीयर्। ईषदसमाप्तौ कल्पप् देश्य देशीयरः। प्रशंसायां रूपप्। याप्ये पाशप्। पाशादावित्यादिशब्देन थान्यत
याल्दाहिल्तसिल्तातिलो गृह्यन्ते। त्वतलोरिति। त्वतलोः प्रत्यययोः परयोर्गुणवचनस्य पुंवद्भावः स्यादिति वाच्यमित्यर्थः। नेहे
ति। कठीत्वमित्यत्र जातिवाचित्वेन अगुणवाचित्वात्पुंवत्त्वं नेत्यर्थः। यद्यपि भाष्यकारादिमतं परिगणनं न क्रियते। तथापि कथ्यज्ञा
नि नोष्ठेत्युत्तरसूत्रे वर्त्तमानादनुवृत्तेः समुच्चयार्थाच्चकारात्तसिलादिषु च स्तुडने तेष्वपि प्रत्ययेषु परेषु पुंवत्त्वं स्यादित्याह। उत्तरसूत्रे
ति। ननु चात्र तेषु परिकेषु विन्यस्यते इति परिगणनं कार्यमेवेति चेन्न। न कार्यं। न कोपधाया इत्यत्र नेति योगविभागेन निषेधस्य सि
द्धत्वात्। अल्पश इति बह्वल्पार्थादिति शस्। (सस्यादेः इति जसंज्ञकस्य ढ्व्यति रिक्ते तद्धिते परे पुंवद्भावो वक्तव्यः। हास्तिकमिति।
अचित्तहस्तिधेनोष्ठगिति ठक्। ननु चात्र ठकुः ठसोऽश्वेत्येव पुंवत्त्वं सिद्धं। न सिध्यति तत्र हि ठसा साहचर्यात्तस्येव तष्ठकठसा विनिर्दे
शेण विहितस्यैव ठकोग्रहणं न सर्वस्य। रोहिणेय इति। रोहितवर्णाया अपत्यं रोहितशब्दाद्वर्णादनुदात्तोपधात्तो न इति ङीष् नकार
श्चांतादेशः। ततः स्त्रीभ्यो ढगिति ढक्। तस्येयादेशः। यस्येति चेति ईकारलोपः। ननु च अग्नेः स्त्री ह्रषाकपीति ङीपि ऐकारश्चांतादेश
कृते आग्नायी तिस्या स्तस्यदेवतास्येति विवक्षायामाग्नेयस्थालीपाकइतीष्यते। अढ इति तु निषेधे आग्नाधेय इति स्यात्। इति चेन्न
निषदोषः। अढ इति अयस्यार्थ विहितं ढप्रत्ययं वर्जयित्वेति विशेषणस्य विवक्षितत्वात्। ठकच्छसोश्चेति अजसंज्ञार्थ आरंभः। न
नु ठकुग्रहणं व्यर्थे। यतस्तस्यैकादेशे कृते भत्वादेव अस्यासिद्धः पुंवद्भाव इति। न व्यर्थं। ठावस्थायामेव पुंवत्त्वं स्यादित्येवमर्थं। तत
स्त्वइत्स्तुक्तांतात्क इति कः सिध्येत्। अन्यथा यथा मघितंप एयमस्यमाघिति क इत्यत्र वस्यैकादेशे यस्येति चेत्यकारलोपे कृते
पित्तांतादिति कादेशो न भवति। तथा भावत्का इत्यत्रापि इकादेशे कृते जाते पुंवत्त्वे कादेशो न स्यात्। भावत्का भवदीया इति भवतष्ठ

कल्लसाविति कल्लसौ सितिच्चेति पदत्वाज्जश्त्वं। प्रसंगेन पुंवद्भावविधिनिषेधप्रकरणं प्रस्तौति। तत्र कुक्कुटाण्डमित्यादौ उत्तरपदस्थो
डादेः स्त्रीत्वादसामानाधिकरण्याच्च पुंवत्त्वं न प्राप्नोतीत्यारभ्यते वक्तव्यं कुक्कुट्यादिष्विति। अण्डादौ परपदे कुक्कुट्यादिषु पूर्वपदेषु पुंवत्त्वं
वाच्यमित्यर्थः। कुक्कुटाण्डमित्यादि। कुक्कुट्या अण्डं मृग्याः पदं। मृग्याः क्षीरं काक्याः शाव इति विग्रहाः॥ ॥क्यङ्॥ ॥ एनीवाचरति। एतायत
इत्यादि। एतश्येतशब्दौ स्यां वर्णादनुदात्तादिति ङीप्। तकारस्य नकारः। कर्तुः क्यङ् सलोपश्चेति क्यङ्। पुंवत्त्वं। ततोऽकृत्सार्वधातु
कयोरिति दीर्घः। मानिन्ग्रहणमस्त्र्यर्थमसमानाधिकरणार्थं च। इह तु दर्शनीयामात्मानं मन्यते स्त्री दर्शनीयमानिनीति स्त्रियाः पुंव
दित्येव सिद्धं। अत एवासमानाधिकरणोदाहरणमेतदिति ज्ञापयितुं दर्शनीयां मन्यत इति विग्रहे आत्मशब्देन प्रयुक्त आचार्यवर्यैः। त
तश्च दर्शनीयमानिनीऽस्य स्यायमर्थः। कोऽत्र नस्त्वव्यतिरिक्ता दर्शनीयां मन्यते इति दर्शनीयां देवदत्तां यज्ञदत्तो मन्यते। दर्शनीयमान्ययम
स्या इति अस्त्रीसमानाधिकरणोदाहरणं॥ ॥न कोपधायाः॥ ॥ पूर्वेण प्रकारेण प्राप्तस्य पुंवद्भावस्यायं निषेधः। पाचिकेति। पचेर्ण्वुल्तृचा
विति ण्वुल्। टाप्। प्रत्ययस्थादितीत्वं। स्त्रियाः पुंवदिति पुंवत्त्वस्य प्राप्तिः। पाचिकात्वेत्यादि। तस्य भावस्त्वतलौ त्वतलोरिति प्राप्तिः। रसि
केति। रसोऽस्त्यस्या अत इनिठनाविति ठन्। अत्रापि स्त्रिया इति प्राप्तिः। मद्रिकायत इत्यादि। मद्रेषु जाता मद्रवृज्योः कन्। क्यङ्मानिनोश्चे
ति प्राप्तिः। अकृतद्धिता अस्यामिति। अकस्य तद्धितस्य अकारद्धितौ नौ ताभ्यां हेतुभ्यां पाको प्रधास्त्रीको पधस्त्रीवाची शब्दस्तस्य पुंवद्भा
वोऽत्र सूत्रे निषिध्यत इत्यर्थः। एतच्चोत्तरत्रिसूत्रप्रतिपादितं फलमाह। इह मा भूदिति। पाकेति। पाकशब्दो यमुणादिषु अर्जनकप
थुकपाकावयसीति कप्रत्ययान्तो निपातो नोनाकेन तद्धितेन वा कोपध इति पुंवत्त्वनिषेधो न॥ ॥संज्ञा॥ ॥ अनयोरिति। संज्ञायाः पूर
ण्याश्च स्त्रियाः प्राप्तः पुंवद्भावो नेत्यर्थः। ननु च संज्ञाशब्दस्यैकद्रव्यविनिवेशित्वादुक्तपुंस्कत्वाभावात्कथं पुंवत्त्वप्राप्तिः। नैतत्। न
ह्ययं नियमोऽस्ति एकद्रव्यविनिवेशिनः संज्ञाशब्दा इति। तथाहि। देवदत्तादिशब्दः संज्ञाभूतोऽनेकत्र प्रयुज्यमानो लोके दृश्यते। आ

स्त्रीवद्भस्वादिशब्दाः। येत्वेकद्रव्यविनिवेशिनस्तान्प्रति निषेधः। नन्वनेकार्थवृत्तित्वेपि संज्ञाशब्दानां कथमुक्तपुंस्कत्वमेकत्र
प्रवृत्तिनिमित्ते। नहितेषां किंचित्प्रवृत्तिनिमित्तमस्ति यदृच्छाशब्दत्वात्। एषोप्यदोषः। यतस्तेषामपि किंचिन्निमित्तमस्त्येव सम्प
पर्णादिवत्। यत्राप्यन्यनिमित्तं नास्ति तत्रापि स्वरूपमेव निमित्तमादाय वाच्ये प्रवर्त्तते तत्रैकस्मिन्निमित्ते येरुक्तपुमान्तेदृक्तपुंस्का
इति किमत्रानुपपन्नं। दत्ताभार्य इति। अत्र यासौ दानक्रियाकृतिस्तस्यां दत्तशब्दोभाषितपुंस्कः। अथवा स्वरूपे प्रवृत्तिनिमित्ते। दत्ता
यत इति। ननु चात्र कृतेपि पुंवत्त्वे अकृत्सार्वधातुकयोरिति दीर्घे दीत्वापि रतत्सिद्धं न कथमेतन्निषेधस्योदाहरणं। एवं मन्यते
इत्यत्र यदि पुंवत्त्वनिषेधो न स्यात्तदा संज्ञापूर्वको विधिरनित्य इति यदा दीर्घो न स्यात्तदा दत्तयत इत्यनिष्टं स्यादिति॥ ॥वृद्धि॥
वृद्धेर्हेतुर्वृद्धिर्हेतुस्तस्य वृद्धिहेतोः। स्त्रौघ्नीभार्य इति॥ स्रुघ्ने भवा तत्र भव इत्यण्। टिड्ढाणञिति ङीप्। माथुरीयत इत्यादि। मथुरा
यां भवा माथुरी पूर्ववत्। माथुरीवाचरति क्यङ्। माथुरीं मन्यते। अरक्तेति किमिति। काषायीति। कषायेन रक्ता तेन रक्तमित्यण्
हैममुद्रिक इति। हेम्नो विकारः। अनुदात्तादेश्चेत्यञ्। वैय्याकरणभार्य इति। व्याकरणमधीते तद्वेद वेत्ति वा इत्यण्। न य्वाभ्यामिति वृद्धि
निषेधः। ऐ आगमश्च। अयमणनिषिद्धत्वात् वृद्धेर्निमित्तं न भवतीति पुंवद्भावनिषेधो नास्ति। सौवश्वभार्य इति। स्वश्वस्यापत्यं सौवश्व्यः॥
अण्। पूर्ववद्वृद्धिनिषेधः ऐजागमश्च। नन्वत्र तावती भार्या यस्य स तावद्भार्य इहापि निषेधः स्यात्। आ सर्वनाम्न इत्यात्वं लुङसूणां
वृद्धिं प्रति वतोस्तद्धितस्य निमित्तत्वात्। नैष दोषः। वृद्धिनिमित्तत्वं नाम षष्ठ्या वृद्धिसंशब्दनेन विहितायां वृद्धेर्निमित्तत्वं तद्विवक्षितमिति
हेतोः तद्विवक्षा च वृद्धिशब्दस्यादैच इति। आचार्याणामभिप्रायः काशिकाकारस्य तु मते वृद्धिनिमित्तस्येति वृद्धेर्निमित्तं ब्राह्मणका
यस्मिंस्तस्येति बहुव्रीहिः। तथा च ब्राह्मणकानामभावात्प्राप्तिः। स्वश्च बहुव्रीहिपक्षः अत्रापि योजयितुं शक्यः। किं तु तन्मते वैय्याकर
णभार्य इत्यादौ वृद्धिनिषेधात् वृद्धिनिमित्तत्वानास्तीति पुंवत्त्वनिषेधो न भवतीति ज्ञेयं॥ ॥स्वांगात्॥ ॥सुकेशीभार्य इति॥ स्वांगाच्चो

पसर्जनादसंयोगोपधादिति ङीषु। पटुभार्य इति। पट्वी भार्या यस्येति विग्रहः। ईत इति किं। अकेशा भार्या यस्य अकेशभार्यः॥ जातेः
अयं च निषेध औपसंख्यानिकस्य नेष्यते हस्तिनीनां समूहो हास्तिकं। तथोक्तं महाभाष्ये। एवं तर्हि न कोपधाया इत्येव योगः पुंवद्भा
वमात्रस्य विषये उत्तरमेवमादावनुक्रमणमादस्य योगस्य विषय इति। संख्योत्तरपदे संख्याऽन्यपदे च बहुव्रीहिमाह॥ ॥संख्यया॥ ॥
अनेकमन्यपदार्थ इति सूत्रं मत्वर्थे बहुव्रीहिविधायकमिति भाष्यकारेण स्थापितं अतो मत्वर्थं विनापि बहुव्रीहिर्यथा स्यात् तदर्थः यो
गआरभ्यते। तथा प्रथमार्थवर्ज्जयित्वान्यत्र विहितो बहुव्रीहिरुक्तः प्रथमार्थमिदं वचनं। तथा हि उपदशा इति। दशानां समीपे य ते उच्यं
ते ते च नव एकादश चेति अन्यपदार्थोऽस्त्येव न तु मत्वर्थः। प्रथमा विभक्त्यर्थोप्यत्रास्ति। तथा हि द्वित्रा इत्यत्र द्वौ त्रयो वेति विग्रहे वार्थे
यं समासः। वार्थश्चान्यपदार्थः। न तु मत्वर्थोऽस्ति तथा प्रथमार्थोप्यत्रास्ति तथा हि द्विर्दशा त्रिर्दशा इति द्विर्दश त्रिर्दशेति विग्रहे सुजर्थे
यं समासः। दशसंबंधिनी वावृत्तिर्दशशब्देन लभ्यमाना द्विशब्देन त्रिशब्देन वा संख्यायते सुजर्थश्चायमन्यपदार्थो न तु मत्वर्थः। प्रथमार्थोप्य
त्रास्ति सुच्प्रत्ययश्च वृत्तावेव गतार्थत्वान्न प्रयुज्यते प्रतिपदविधानार्थोपि बहुव्रीहौ संख्येये डज्बहुगणादित्यत्रास्य ग्रहणं यथा स्यात्॥
॥ ॥बहु॥ ॥संख्येयेति। संख्ययाव्ययासन्नेति यो बहुव्रीहिस्तस्येदं ग्रहणं। बहुव्रीहाविति सुज्व्यत्ययेन पंचम्यर्थे सप्तमी स्यपि चेत्याह
तस्मादिति उपगता दश येषां ते उपदशा इति। न तु च अत्र त्वन्व दशानां समीपे ये ते उपदशा इति विग्रहः कार्यः। तथोक्तं महाभाष्ये। कोस्य विग्र
हो दशानां समीपे ये ते उपदशा इति सत्यं विग्रहस्तु तथैव। किंतु अस्य समासस्य समीपिप्राधान्यं अव्ययीभावस्य तु सामीप्यप्राधान्यमिति
विषयविभागप्रदर्शनार्थं समीपिप्राधान्यं स्फुटीकर्तुमुपगता दश येषामित्युक्तं। समीपगता दश येषां ते च समीपिनः समासार्था इति भावः।
ये हि दशानां समीपे तेषामुपगता दश संख्येयस्येति विग्रहेण तुल्यार्थत्वमस्य वाक्यस्येति न विरुद्धं किंचित् तथोक्तं त्रिलोचनदासेन पंजिका
यां। ये हि दशानां समीपे तेषामुपगताः समीपगता दश इत्यर्थो विन विरुध्यते इति तथापि समीपिप्राधान्यमस्येति जिनेन्द्रबुद्धिना न्यासे उक्तं॥ य

प्र॰ प्र॰ सु॰ ॥२२५॥

दा समीपिप्राधान्ये तदा बहुव्रीहिः। यदा तु सामीप्यप्राधान्यं तदाऽव्ययीभाव इत्येष विषयविभाग इति॥ ॥तिविं॥ ॥तिग्रहणमंतस्य लो
पो मा भूदिति। आसन्नविंशा इत्यादि॥ आसन्नाविंशतेः। अदूरे त्रिंशतः। अधिका चत्वारिंशत इति विग्रहाः। सर्वत्र संख्ययाऽऽसन्नादेः
समासे जाते डच्। द्वौ त्रयो वा मानं येषामिति। यद्यप्यादशभ्यः संख्या संख्येये वर्त्तते ततः परा संख्याने संख्येये च। तथाप्यत्र मानशब्दसं
भिधानात् द्वित्रिशब्दौ संख्याने द्वित्वे त्रित्वे च वर्त्तते यथा पंचैव परिमाणमेषां ते पंचकाः शाकुना इत्यत्र पंचशब्दः पंचत्वे ततश्च
वा द्वित्वं त्रित्वं वा मानं संख्यानमेषां द्वित्वेन त्रित्वेन वा संख्याता इति यावत्। ततश्च अनेन वाक्येन द्वौ वा त्रयो वेति महाभाष्योक्तस्य विग्र
हस्यार्थ उक्तः। तथा च प्रदीपे। पंच षड् वा मानमेषामित्यस्यार्थ उक्तः पंच वा षड् वेत्यर्थ इति। अयं च समासो वार्थे वार्थश्चात्र संशयः। सं
शये हि बहुवचनं स्यात्॥ संशयस्योभयपक्षपरामर्शित्वेन बहूर्थविषयत्वात्। तद्यथा कति वाऽच्छवतः पुत्रा इति। तथोक्तं भाष्ये। अवि
ज्ञातार्थे बहुवचनं प्रयोक्तव्यमिति। उपबहव इति। बहूनां समीपे ये ते उपबहवः। उपगणा इति। गणानां समीपे ये। अत्रेत्यादि। उपगण
इत्यच डचि सत्यसति वा विरूपभेदो नास्ति तथापि स्वरे विशेषोऽस्ति। तथा हि डचि सत्यंतोदात्तत्वं स्याच्चित्स्वरेण। तस्मिन्नसति एवं वद
प्रकृतिभावेनाद्युदात्तं स्यात्। संख्येये किमिति। संख्याव्ययेति सूत्रे संख्येये वर्त्तमानया संख्यया इति किमर्थमुक्तमित्यर्थः। अधिकाविंश
तिर्गवामिति। अत्र विंशतिशब्दः संख्यायामेव वर्त्तते न संख्येये। संख्याया इति। तत्पुरुषस्य संख्यावाचि यदुत्तरपदं तेनाऽत्र वाच्य इ
त्यर्थः। निस्त्रिंशानीति। निरादयः क्रांताद्यर्थे पंचम्येति समासः। दिगंतरालक्षणं बहुव्रीहिमाह॥ ॥दिङ्नामानि॥ ॥प्रथमार्थेऽन्य
मत्वर्थेऽपि समासार्थमस्यारंभः। प्रतिपदविधानार्थं च विभाषादिकसमासे बहुव्रीहावित्यत्रास्य वग्रहणं यथा स्यादिति तेन याम्यपूर्वासो
त्तराऽस्या अमुष्यस्यास्मै सर्वौ तत्रापदेहीस्य च सर्वनामत्वेन। कव च्छी वार्थे च॥ शेषाद्विभाषेत्यत्र शेषाधिकारोक्तस्यैव बहुव्रीहेर्य
हः शेषाधिकारव्याख्याने कमन्यपदार्थ इत्यत्रैव। तेनात्र न कप्। वे यदि अधिकरणेऽपि पुंवद्भावादित्यस्यारंभः। सर्वनाम्नो वृत्तिमात्रे पूर्व

श्री॥ ॥२२५॥

पदस्य पुंवद्भाव इत्युपसंख्यानमर्थतः पठति। सर्वनाम्नः समासे इति। सर्वनाम्नः॥ सर्वनाम्नो वृत्तिमात्रे पूर्वपदस्य प्रसंबंधिनि समासे पूर्व
यत् सर्वनामपदं तत्पुंवत्स्यादितिवाच्यमित्यर्थः। दक्षिणपूर्वेति। दक्षिणस्याः पूर्वस्याश्चांतरालं नाम्नो ऽक्तेरिति। नामग्रहणं लोकरूढि
परिग्रहार्थं। तेन ऐंद्र्याश्च कौबेर्याश्च यदंतरालमित्यादौ न समासः। नेमौ रूढिशब्दौ। किं तु इंद्रस्येयं कुबेरस्येयमिति यौगिकौ। व्यति
हारलक्षणं बहुव्रीहिमाह॥ ॥तत्र॥ ॥अमर्त्यर्थाय मारंभः। प्रतिपदविधानार्थं पिः। इकर्मव्यतिहार इत्यत्रास्यैव ग्रहणं समप्यंते इत्यादि
गृह्यते तस्मिन्निति ग्रहणं केशादि तद्विषयो वाच्यो ययोस्ते ग्रहणविषये सरूपे समानरूपे पदे इदं युद्धमित्यस्मिन्नर्थे मिथः समस्ये
ते। तथा तृतीयांते सरूपे पदे प्रहरत्यनेनेति प्रहरणं मुसलादि तद्विषयो वाच्यो ययोः ते तद्विषये इदं युद्धमित्यर्थे मिथः समस्येते। कर्मव्य
तिहारो द्योत्य इति। कर्मव्यतिहारः परस्परग्रहणं परस्परग्रहणं चाइति शब्दादेतावदिति। ग्रहणं प्रहरणं कर्मव्यतिहारो युद्धं चेति॥ ॥
॥ ॥अन्येषां॥ ॥इजिति ग्रहणादिति। प्रयोगानुसरणार्थादिति भावः। आद्यं चेति। अर्वाचीनमतेनोक्तं। तथा च पंजिकायां त्रिलोचनदा
सेनोक्तं। तथा मुष्टामुष्टीति इच् विनाप्यंत पूर्वपदस्यात्वं दृश्यत इति॥ ॥इच्॥ ॥यि कारणेति तिष्ठद्गुप्रभृतिषु इकर्मव्यतिहार इत्यस्य वि
शेषणार्थं। तिष्ठद्गुप्रभृतीनि च। तीदमव्ययीभावे व्याख्यातं। स्पष्टत्वात्यक्तं सूत्रं व्याख्यायते॥ ॥द्विदंड्यादिभ्यश्च॥ ॥एषां तादर्थ्ये
चतुर्थी न पंचमी॥ द्विदंड्यादिसिध्यर्थं चेत्कार्यं समुदायनिपातनादर्थविशेषे च रुध्यंते। द्वौ दंडौ प्रहरणमस्यां क्रीडायां द्विदंडि प्रहरति। तथा
द्विमुशलि प्रहरतीत्युहनं। द्विदंडा शालेति। बहुव्रीह्यधिकारेऽपि तत्पुरुषात् इच् विधिः। निकुच्य कर्णौ धावति। निकुच्यकर्णि धावति॥
प्रोद्य पादौ हस्तिनं वाहयति प्रोद्यपादि हस्तिनं वाहयति। मयूरव्यंसकादित्वात्समासः। उभाभ्यामंजलिभ्यां पिबति उभांजलि उभयां
जलि। उभयादंति। उभादंति। उभाकर्णि उभयाकर्णि। उभे कर्णौ यस्मिन् श्रवणे। उभाहस्ति। उभयाहस्ति। उभापाणि उभयापाणि।

पू.प्र.कु. उत्त्राबाहुः। उद्यताबाहुः। निपातनादीर्घो लोपः। प्रत्ययलक्षणे नाव्ययीभावत्वं। एकपदि। आढ्यपदि। संहितानि पुच्छानि यस्मिन् यथावेन
॥१२६॥ संहितपुच्छिधावति॥ ॥श्रीः॥ ॥अत्र नस्तद्धिते इत्यतः तद्धिते इत्यनुवर्त्तते। तेन शंभ्वोभि स्यादेन आदिनि वक्तव्य इति। लोपवार्थं आ
दो दिनि सूत्रे कार्यं गुणोक्तिः संज्ञा पूर्वस्य विधेरनित्यत्वज्ञापनार्थं तेन स्वार्थं पूर्वमित्यत्र गुणाभावः सिद्ध इत्यर्थः। अस्यसीति असिनि
श्वासिनिभ्य प्रत्ययेदं युद्धे प्रवर्तते। सहपूर्वपदं बहुव्रीहिमाह॥ ॥तेन॥ ॥अधिकरणयोः प्रथमार्थे वियधास्यादिस्य यमारेनः कवभाव
र्थश्च। उक्तः कव ताव। तुल्ययोगः समाने संबंधः तं यदा सहशब्दो द्योतयति तदेत्यर्थः॥ ॥वोप॥ ॥उपसर्जनस्य सहस्येति व्यधिक
रणे षष्ठ्यौ। उपसर्जनं सर्वावयवो बहुव्रीहिसमासः उपसर्जनमिह विवक्षितं तत्तदवयवस्य सहशब्दस्य स इत्ययमादेशो वा स्यादित्यर्थः।
सपुत्र इति॥ सहपुत्रेण वर्त्तमान इति विग्रहः। अत्र देवदत्तस्य पुत्रस्य चागमनेन तुल्यः संबंधः सहशब्देन द्योत्यते। उपसर्जनस्येत्यनेन
बहुव्रीहिस्याश्रयणं किं। सहयुध्वेति सहेचेति क्विप् निप्। उपपदमतिङ् इति तत्पुरुषः। अथ इह कस्मान्न सह कृत्वा प्रियो यस्य सह कृत्वप्रि
यः प्रियसहकृत्वा इति वा प्रियस्य पूर्वत्वं भवति तत्र अपि सहशब्दो बहुव्रीहेरवयवः। उच्यते। उत्तरपदाधिकारादिह बहुव्रीह्याश्र श्री॥
यणात् बहुव्रीहौ यदुत्तरपदं तत्परं यस्यात् सहशब्दात् तत्स्यैव सत्वेन कार्यं। न चेह बहुव्रीहावुत्तरपदे तत्सहशब्दात्परं शब्दांतरे ॥१२६॥
णाव्यवधानादिति न भवति सत्वं। तुल्ययोगवचनं प्रायिकमिति। असर्वविषय इत्यर्थः। सकर्मकः। सलोमक इति। सह कर्मणा सह लो
म्ना न ह्यत्र तुल्ययोगो गम्यते किंतु विद्यमानता॥ ॥बहुव्रीहौ॥ ॥उ हस्त्यागमहुवमिस्यादिपरिभाषो क्तेः स्तत्र स्थितो सक्थ्य स्तोः अरि
ति। पंचम्यर्थे षष्ठी वैचित्र्य प्रदर्शनार्थमनुवदन्नाह। स्वांगार्थयोरनयोरिति। टच्चिप्रकृतेषु च ग्रहणं स्वरार्थं। दीर्घसक्थी। सी स्वर
सक्थं। स्वा क्रोतादिति विभाषो त्तरपदस्यांतोदात्तत्वे विधीयते। तत्र यस्मिन्पक्षे नास्युदात्तत्वं तत्र ङीषि सत्युदात्तनिवृत्तिस्वरस्याभा—

वात्। अनुदात्तश्रूयेनाडीवि तु सति सर्वेत्रोदात्तः सिद्धः स्यात्। बहुव्रीहौ किं। परमसक्थि। कल्याणसक्थिः सक्थ्यस्तोगः किं। सुबाहुः
॥ ॥अंगुलेः॥ ॥दारुणि समासार्थमुख्याभिरंगुलीभिः संबंधो न घटते तस्मात्सामर्थ्यादंगुलिसदृशेषु दीर्घावयवेष्वंगुलीशब्दो वर्त्त
मान इहाश्रीयत इत्यभिप्रेत्याह। अंगुलिसदृशावयवमिति। ननु चेह अंगुलीप्रमाणमस्य दारुण इत्यत्र मुख्याभिरेवांगुलीभिः सं
बंधस्तत्र मुख्ये अंगुलिशब्दे संभवति। गौणग्रहणमयुक्तमिति चेत्। न। बहुव्रीहावित्यनुवृत्तेः अयं च तद्धितार्थे तत्पुरुषे इति तत्पुरुष
स्यांगुलेरित्यच् स्यात्॥ ॥द्वित्रिभ्यां॥ ॥एषु त्रिषु कृतेषु विधिर्विकल्पेनोदात्तत्वं यथा स्यादिति। तथा हि द्वित्रिभ्यां पाद्दन्मूर्द्धसु ब
हुव्रीहावित्यत्र विभाषानुवृत्तेरसमासान्तमूर्द्धशब्दनिर्देशाद्यस्य असमासान्तो मूर्द्धशब्दो द्वित्रिभ्यां परस्तस्य बहुव्रीहेरन्तोदा
त्तत्वं पाक्षिकं विधत्ते। अन्यथा कृतसमासान्तमेव मूर्द्धशब्दं निर्दिशेत्। तत्र यदि षच् स्यात्तर्हि तस्य पाक्षिकमन्तोदात्तत्वं बाधित्वा चित्त्वसाम
र्थ्यान्नित्यमन्तोदात्तत्वं स्यात्। विभाषान्तोदात्तवचनस्य यत्र समासान्तो नास्ति सोऽवकाशः। षे तु सति चान्तोदात्तत्वं स्यात्। न च समासान्तानिर्देशा
दसमासान्त एव मूर्द्धशब्द उत्तरपदे चान्तोदात्तत्वेन भाव्यं। तत्कथं समासान्ते कृते न स्यात्। नैष दोषः। यतो हि काशिकायामुक्तं। यदापि च समा
सान्तः क्रियते तदापि बहुव्रीहेः कार्य्यित्वात्तदेकदेशित्वाच्च समासान्तस्यान्तोदात्तत्वं पक्षे भवत्येवेति। एवं न्यासे व्याख्यातं। इह बहुव्रीहिः का
र्य्यी तदेकदेशित्वं च समासान्तस्य एकदेशोऽस्यास्तीति एकदेशी स बहुव्रीहिरेकदेशी यस्य समासान्तस्य स तदेकदेशी तस्य भावस्तदेकदे
शित्वं। एतेन समासान्तस्य बहुव्रीह्यवयवत्वं दर्शयन् कृतसमासान्तस्य शब्दान्तरत्वं निरस्यति। तदेवं यस्मादिह बहुव्रीहिः कार्य्यी तदेकदे
शित्वं च समासान्तस्य तस्माद्यदापि समासान्तः क्रियते तदापि पक्षे अन्तोदात्तत्वं भवत्येवेति समासान्तस्य च वैकल्पिकत्वं असमासान्तनिर्दे
श एव ज्ञापयति। नेतुरिति नक्षत्रे इत्यनेन नेतृशब्दोपवर्णने तदन्ताद्बहुव्रीहेरप् कल्प्य इत्यर्थः। मासात् भृतिप्रत्ययपूर्वपदात् ठञ् विधेयः। पंचको
मासोऽस्य पंचकमासिकः कर्मकरः। दशकमासिकः। सोऽस्यांशवस्नभृतय इत्यर्थः। भृत्यर्थे संख्याया इति कन्॥ ॥अन्तः॥ ॥अन्तर्लोम

इति॥ अंतर्गतानि लोमान्यस्य॥ ॥अच्॥ ॥संज्ञायामिति॥ समुदायोपाधिः। तेन यदि प्रकृतिप्रत्ययसमुदायः कस्यचित्संज्ञा स्यात्। एवं प्रत्य
यः स्यात्। अत्र चशब्देन करणे बहुव्रीहिः स्वरबाधनार्थः॥ ॥पूर्वपदात्॥ ॥रषाभ्यामिति वर्तते। तच्च तयोः पूर्वपदत्वे संभवतीति रषांतात् पू
र्वपदादिति। त्वर्थो व्याख्यानान्नेति। समासपर्यात् पूर्वपदस्थात् निमित्तादित्ययमर्थः स्यादित्याह। पूर्वपदस्थान्निमित्तात् परस्येति केचिदेतं नि
यमार्थमाहुः। पूर्वपदात् संज्ञायामेव णत्वं नान्यत्रेति। समासे हि समुदायादुत्पन्नायां विभक्तौ समुदायस्य पदत्वात् समानपदे निमित्त नि
मित्तिनोः णत्वादस्ति रषाभ्यामिति प्राप्तिः। समानपदत्वं हि तत्राश्रितं। न भिन्नपदत्वं प्रतिषिद्धं। स च नियमः पूर्वपदसंबंधादुत्तरपद
स्थस्यैव णत्वं निवर्त्यत इति। चर्मनासिक इति। न तर्हि तत्स्थस्य पूर्वपदस्थस्य च मा भूत् गोगीणः करणप्रिय इति। अग इति योगविभा
गेन नत्वनिषेधो न नियमनिषेध इति। अन्ये तु पूर्वसूत्रे समानमेव यन्निमित्तं पदेन समानपदमिति समानग्रहणादाश्रयंति तेषामपात्र समे
व णत्वमनेन विधीयते समासे पूर्वपदमुत्तरपद इति विभागादसमानपदत्वमप्यस्ति॥ कुरि वेति। सप्तम्युपमानपूर्वस्योत्तरपदलोपश्चेति स
मासः। खरणस इति। खर इव नासिकास्य। अगः किमिति। पूर्वपदात् संज्ञायामगः इत्यस्यावयव आक्षिप्यते॥ ऋगयनमिति। ऋचोऽयनं॥
अस्थूलात् किमिति। अनासिकायाः संज्ञायामित्यादिस्तत्रावयवाक्षेपः। खुरेत्यादि। खुरखराभ्यां परस्य नासिकाशब्दस्य नशादेशो वक्त
व्य इत्यर्थः। पक्षे ङिति। खुरखराभ्यां नासिकाशब्दस्य नसेऽप्यङपीष्यत इत्यर्थः। खुरणा इति। खुर इव नासिकास्य॥ ॥उपसर्गात्॥ ॥उपसर्ग
ग्रहणमिह प्रादिउपलक्षणं। नासिकाशब्दे परतः क्रियायोगाभावात् उपसत्वाभावात्। असंज्ञार्थं वचनं॥ ॥उपसर्गात्॥ ॥प्रणस इति। प्रग
ता नासिकास्य। उन्नता नासिकास्य। वर्ग इति विशब्दात् परस्य नासिकाशब्दस्य णादेशः स्यादिति वक्तव्यं। प्रत्ययस्तु डेव। स्पष्टत्वास्यत्कं।
सुप्रातसुश्वसुदिवसारिकुक्षचतुरश्रैणीपदाजपदप्रोष्ठपदाः॥ ॥एते बहुव्रीहयो डजंतानि पात्यंते। शोभनं प्रातरस्य सुप्रातः। शो
भनं श्वोऽस्य सुश्वः। शोभनं दिवास्य सुदिवः। शारेरिव कुक्षिरस्य शारिकुक्षः। चतस्रोऽश्रयो यस्य चतुरश्रः। एण्या इव पादावस्य

एणीपदः॥ अजस्येव पादावस्य अजपदः। प्रोष्ठो गौस्तस्येव पादावस्य प्रोष्ठपदः॥ ॥नञ्दुस॥ ॥ननु चादिं तेनापि हलशब्देन स्तिड्दं तेनापि
तेन यदा इदं तेन समासः तदा अहल इति स्यात्। यदा त्विदं तेन न तदा अहलिरिति। न तो व्यर्थं हलिग्रहणं। न व्यर्थं। भिन्नार्थत्वादनयोः महद्धलं
हलिः। अत्र विषये अहल इति न स्यात्। अन्यथा यदा हलं इदं तेन न समासस्तर्हि सर्वपदप्रकृतिभावेन। युदात्तत्वे स्यात्। अतोदात्तत्वं च
ष्यते। शेषादिति विभाषा कप् च प्रसज्यते। तस्मादुक्तं हलिग्रहणं। शक्तेरिति पाठ इति। उज्ज्वलदत्ताचार्ये लशिष्याः प्रतिपादितः। इ
सुजयमपि प्रमाणं॥ ॥नित्यं॥ ॥ननु च सर्वसूत्रादिह अन्यतरस्यां ग्रहणं नस्वर्यते इति व्यर्थं नित्यग्रहणमित्याशंक्य ग्रंथाधिक्यादर्था
धिक्यं दर्थाधिक्यं भवतीति कृत्वा नित्यग्रहणादन्यपि सिध्यतीत्याह। नित्यग्रहणादित्यादि॥ ॥धर्मात्॥ ॥केवलादिति धर्मशब्दस्य पू
र्वपदस्य च विशेषणमित्यभिप्रेत्याह॥ केवलादित्यादि। तथोक्तं पाणिनीयमतदर्पणे। केवलादिति केवलं यो धर्मं प्राक्पदयोर्मतमिति
स्त्वित्वं सर्वपदप्रकृतिस्वरं बाधित्वा तोदात्तो यथा स्यादिति। स्पष्टत्वासक्तं॥ ॥जंभासुहरिततृणसोमेभ्यः॥ ॥बहुव्रीहौ स्वादिभ्यः
परे जंभेति कृतसमासांतमुत्तरपदे निपात्यते। जंभशब्दोभ्यवहार्यवाची दंतवाची च। शोभनो जंभोस्य सुजंभा देवदत्तः। शोभनाहारः
शोभनदंतो वेत्यर्थः। एवं हरितजंभा॥ तृणजंभा। सोमजंभा। दंतवचने तृणमिव जंभोस्य सोमइव जंभोस्येति विग्रहीतव्यः। एभ्यः किं। पति
तजंभः॥ ॥दक्षिणेर्मा॥ ॥लुब्धयोगे॥ इर्मशब्दो व्रणवाची॥ ॥प्रसंभ्यां॥ ॥जानुनो ज्ञुरिति॥ षष्ठी द्विवचननिर्देशः स्थाने षष्ठीत्वं निश्चे
तुं। अन्यथा जानुन इत्येकवचनेन निर्देशो प्रत्ययाधिकारात्पंचमी यमिति भ्रमः स्यात्। अतो ज्ञुरादेशः स्यादित्यभिप्रेत्याह। ज्ञुरादेशः स्या
दिति॥ ॥ऊर्ध्वात्॥ ॥उधसः॥ एतद्व्यस्त्रीप्रत्ययेषु स्याद्भव्याते॥ ॥धनुषः॥ ॥शार्ङ्गधन्वेति। अनङि कृते यणादेशः॥ ॥वा संज्ञा॥ ॥
सर्वत्र नित्यः प्राप्तो विकल्प्यते॥ ॥ज्यायायाः॥ ॥डित्वादादेशो यं॥ ॥लोपः॥ ॥लिरिति धातोरित्यतो यत् धातोरिति प्रकृतं तत्
ह्यात्वादेशः सइति पुनर्धातुग्रहणमित्येतन्नमिव्यभिप्रेत्याह। धातोः धातोश्चेति। सर्वलोपनिर्देशाद्वेरप्युक्तो वसर्वविलिलोपएवयथा

प्र॰प्रा॰सु॰ ॥१२८॥ स्यादिति किं द्रूयते ऽक्षिम्। वं॰ ॥ व्रश्चादीनामुपदेशसामर्थ्याद्धलि लोपो न। पुंवद्भावश्च इति। स्त्रियाः पुंवदिति॥ ॥गंधस्य॥ ॥बहुव्रीह्यानिर्देशा
दिकार आदेशः। उद्गंधिरित्यादि॥ उत्पू॰सु॰। गंधोस्य। पूतिर्गंधोस्य शोभनो गंधोस्य सुरभिर्गंधोस्येति विग्रहः॥ गंधस्येत्त्वे तदेकांतग्रहणं
कर्त्तव्यं। गंधस्येत्त्वविधेये तदेकांतग्रहणं तस्य बहुव्रीह्यार्थस्यैकांतः एकदेशो ऽवयवः स गृह्यते येन तदेकांतग्रहणं वाक्यं कार्यमिति त्वर्थः
अयं भावः। गंधो द्विविधः। गुणो द्रव्यं च। तत्र यो गुणः सो ऽन्यपदार्थस्यैकांतः तस्याद्यथा सुगंधि श्चंदनमित्यत्र चंदनद्रव्यस्य गुणात्मकत्वाद्गंधा
गुणो ऽयं अवयवः। यस्तु द्रव्यं गंधः कुष्ठादिः सो ऽन्यपदार्थस्यैकांतो न। यथा शोभना गंधाः कुष्ठादयो यस्य स सुगंध आपणिकः। तत्र गुणो गं
धः इत्त्वं यथा स्यात्। द्रव्ये मा भूदिति। गंधस्येत्त्व इत्यादि वार्त्तिकमारब्धं। तच्च गंधस्येत्येकवचनांतनिर्देशादेव सिद्धं। द्रव्यवचनस्य बहुव
चनांतनियमादित्याचार्यैरुपेक्षितं। अथ स्नातानुलिप्तः कथं भवितव्यमित्यादिना काष्ठ ग्रंथेन योर्थ उक्तस्तेनाप्ययं तो निष्पन्नमाह॥ श्री॥ ॥१२८॥
आगंतुकस्येति। आगंतुकस्वाभाविकस्यैकवचनांतस्य गुणवाचिन इत्त्वं वेत्यर्थः। यथा कपिं दुमत्या। आगंतोरेकवचनादेति॥
॥अल्पेति। वेति गंधोस्य इति। तथैव उमत्या विकल्प उदाहृतः। सूपो ऽल्पो ऽस्मिन् सूपगंधि भोजनं॥ सूपगंधं वेति॥ ॥उप॥ ॥मतौ तरे विक
ल्प इति॥ ॥तयोः केसुघबोधे। वोपमानादिति॥ ॥पादस्य॥ ॥अयं च लोपः। समासांतः। स्थानिद्वारेणाच लोपस्य समासांतता॥ ननु
लोपस्य समासांतत्वे किं प्रयोजनं। उच्यते। यदि समासांतो न स्यात् तदादेः परस्येति परस्यादेः स्यात्। समासांतत्वे तु अंतशब्दो नियत
शावयववाचीत्यंतस्यैव स्यात्। हस्ति। कटोलः। कडोलः। कडोलकः। गंडोलः। गंडोलकः। महिका। दासी। गणिका। जालं। कुसूलं॥ ॥कुं
भपद्य॥ ॥कुंभपदीप्रभृतयः॥ कुंभपादरूपो ऽयं समुदायाः पद्यंते। तत्रैव सूत्रे योज्यं। पादस्य लोपः स्यात्। कुंभपद्यादिविषये। प
था। कुंभपद्यादयः सिद्ध्यंतीति। समुदायपाठस्य च प्रयोजनं। विषयनियमः। स्त्रियामेव ङीष्यं चेति एतच्चेतसि कृत्वाह। कुंभपद्यादिषि
ति। कुंभपदी। एकपदी। शतपदी। मुनिपदी। शितिपदी। स्थलिपदी। गोधापदी। द्विपदी। दासीपदी। सुपदी। निष्पदी। आपदी। कु

णिपदी। कृष्णपदी। द्रोणपदी। द्रुपदी। सूकरपदी। अष्टापदी। स्तनपदी। यत्राहोपमानं एवं संख्या एवं च पद्यते तस्य लोपे सिद्धे ङीषर्थं वच
नं। पादोऽन्यतरस्यामिति विकल्पो न॥ ॥संख्या॥ ॥अत्रुपमानार्थं वचनं॥ ॥वयसि॥ ॥सुदन्निति॥ उगिदचामिति नुम्। ऋकारस्योगित्कार्यत्वात् थे
षोडन्न इति षट् दंता अस्य सुदतीति। उगित्वान् ङीप्। अस्य छत्वा स्यक्तं स्त्रदयं॥ ॥स्त्रियां संज्ञायां॥ ॥दंतस्य दतृ स्यात् स्त्रियां संज्ञायां विषये॥
अयोदती। फालदती। संज्ञायां किं। समदंती॥ विभाषा श्यावारोकाभ्यां॥ ॥आभ्यां दंतस्य। दतृ वा। बहुव्रीहौ। श्यावदन्। श्यावदंतः। अरोकदन्। अरो
कदंतः। रोचनं रोको दीप्तिर्नास्ति रोको अस्य अरोकः। संज्ञायामित्येव। श्यावदंतः। अरोकदंतः। अग्रांत कुड्मलाग्रदन्निति। कुड्मलाग्रमिव दं
३ तोयस्य। चकारादिति। अनुक्तसमुच्चयार्थमिति भावः। आदिना शिखरदन्। गर्दभदन्। ककुदस्य॥ कालहादि कृतावयः पशूनयो वस्तु धर्मो
अवस्थेत्युच्यते। अजातककुदिति। बाल एवमुच्यते। पूर्णककुदिति। मध्यमवयाः। अवस्थायां किं। श्वेतककुदः। स्यष्टत्वा स्यक्तं स्त्रसंख्या स्थाय
ते॥ ॥त्रिककुत्पर्वते॥ ॥निपातोऽयं गिरौ। त्रीणि ककुदाकाराणि शिखराणि यस्य स पर्वत विशेष उच्यते। त्रिककुदिति॥ ॥उद्विभ्यां॥ ॥सम
सांतत्वादादेः परस्येति न सर्वस्य। स्यष्टत्वा स्यक्तं॥ ॥पूर्णाद्विभाषा॥ ॥पूर्णककुत्। पूर्णककुदः॥ ॥सुहृत्॥ ॥सुहृदित्यादि। शोभनं हृद
यमस्य सुहृत्। दुष्टं हृदयमस्य दुर्हृत्। हृल्लेखे नैवेतत्सिद्धं तथापि सुहृदयो दुर्हृदय इति मित्रामित्रयोर्मा भूदिति वचनं॥ ॥उरः॥ ॥व्यूढो
रस्क इति॥ व्यूढमुरो यस्य। प्रियसर्पिष्क इति। इणः षइति षः। उरस्। सर्पिस्। उपानह्। पुमान्। अनड्वान्। पयः। नौः। लक्ष्मी॥ पुमानत्र ऋन्नामके
वचनांतानां रूपाणि द्विवचनबहुवचनांतेभ्यो मा भूदिति। न च शेषाद्विभाषेति वा कप्। दधि। मधु। शालि। अर्थान्नञः। नास्त्यर्थोऽस्य अनर्थकः
॥ ॥इनः॥ ॥स्त्रियां किं। बहुदंडी राजा॥ अत्र शेषाद्विभाषेति कप् न भवति॥ ॥शेषात्॥ ॥ अत्र यदि कप्रत्ययविधेः शेषः स्यात्। अनृचो व्याघ्रपात्॥ सु
गंधिरित्यत्रापि स्यात् न स्यात्तः कप्विहितः इति कपपेक्षया शेषो वेदोषं ह स्यात् समासांतापेक्षया शेष इति चेत्तर्हि सिद्धत्वान्नाह॥ प्रागनुक्तसमासां
तादिति। समासांतापेक्षया शेषग्रहणे कसामान्यमृक्पूः सक्तमिति। कथमिति चेत्। उच्यते। अपेक्षेतर्थे वा कप्रत्ययस्य विधानात्तत्सिध्यति। तथाहि
अनृच बहुवा बहुत्वं तर्थे वेति। शेषादिति किं। येतो यत्प्रतिपदं समासांता बहुव्रीहौ विधीयंते ते बाधकाः स्युः। एवं तर्हि शेषाधिकार विहितेन बहु

स॰प्र॰सु॰ ॥१२७॥

व्रीहौ कप्स्यादिति शेषग्रहणं। तेनोत्तरपूर्वे स्यादौ नास्य ष्टत्वाद्युक्तं॥ ॥नसंज्ञायां॥ ॥शेषेति प्राप्तः कप् संज्ञायां निषिध्यते। विश्वेदेवा अस्य विश्वदे
वः॥ ॥आपः॥ ॥अनावेतस्याबीति। तथा च ऋगुथ्धे बोध्युक्तं। केचित्तु कृस्यौ हृत्वेति॥ ॥ईयसः॥ ॥कचत्रानुवर्त्तते। न शेषादिति तेन सर्वो
कपः प्राप्तिरनेन निषिध्यते। बहुश्रेयानिति। शेषाद्विभाषेति कप् प्राप्तः। बहुश्रेयसी पुरुष इति। न घृतश्चेति कप् प्राप्तः ईयसो बहुव्रीहे
र्नेति ह्रस्वत्वनिषेधः॥ ॥वंदि॥ ॥इह वंदिलः। स्तुतः। इडिल इत्युच्यते इत्यभिप्रेत्याह। स्वजायामिति। न घृतश्चेति प्राप्तः कप् निषिध्यते॥
स्पष्टत्वात्त्यक्तं सूत्रद्वयं॥ ॥नाडीतंत्र्योः स्वांगे॥ ॥स्वांगे यौ नाडीतंत्रीशब्दौ तदंताद्बहुव्रीहेः कप् न। बह्व्यो नाड्यो यस्मिन् स बहुनाडि
हः बहुतंत्रीर्ग्रीवा। धमनीवचनस्तंत्रीशब्दः। स्वांगे किं। बहुनाडीकस्तंभः। बहुतंत्रीका वीणा॥ ॥निष्प्रवाणिश्च॥ ॥नदीऋतश्चेत्यस्य क
पो निषेधः। प्रकर्षेण ऊयते अस्यामिति प्रवाणी तंतुवायशलाका। निर्गता प्रवाणी अस्य निष्प्रवाणिः पटः। तुर्योदिस्त्यो अचिरापहृत इत्यर्थः।
एवं बहुव्रीह्यधिकारेण विहितान् समासांतान् परिसमाप्य बहुव्रीहाविति विधीयमाने प्राङ्निपातमाह। सर्वनामसंख्ययोरित्यादि। यत्र
गुणवचनेन समासः सोस्य विषयः। यत्र तु द्वयमपि विना तत्र सर्वनामसंख्ययोर्विशेषणत्वादेव प्राक् निपातः सिद्धः। मिथोनयोरिति। स
र्वनामसंख्ययोः परस्परं समास इत्यर्थः। अल्पीयसी पूर्वमिति संख्ययोः संख्ययोः समासे अल्पीयसी पूर्वं निपतेदित्यर्थः। द्वित्रा इ
ति द्वौ वा त्रयो वा॥ ॥वा प्रियस्येति। प्रियशब्दस्येत्यर्थः। प्रायिकमिति। गड्वादेः परा सप्तमीष्टेति प्रायिकं॥ ॥निष्ठा॥ ॥ननु च निष्ठांतस्य वि
शेषणत्वादेव सप्तमी विशेषणे इति पूर्वनिपाते सिद्धे व्यर्थमेतद्वचनमित्याशंक्याह। विशेषणत्वस्येति। कृतकट इति कृतः कटो येन अत्र
जातिकालेति क्तांतस्य परत्वं न। यत उक्तं। कथं कृतकट इति प्राप्तस्य बाधा आख्येयेति। सारंगजग्धी। जग्धः सारंगो यया। सारंगशब्दो जा
तिवाची। अस्वांगपूर्वपदाद्वेति ङीष्। सुखादिस्तु हितेनैव स्यते। प्रहरणार्थेभ्य इति। प्रहरणमर्थो येषां ते तथोक्ताः। अस्युद्यत इति उद्यतो
सिर्येन उद्यतासिरित्यादीति। प्राप्तस्य बाधायां व्याख्यानात्॥ ॥वाहिता॥ ॥निष्ठेति पूर्वं निपाते विकल्प इत्युच्यते। जातदंतः जातश्म
श्रुः। तैलपीतः घृतपीतः मद्यपीतः। ऊढभार्यः गतार्थः। आकृतिगणोयमिति। आकृत्या गणः आकृतिगणः। तेन गडुकंठप्रभृतयः इत्ये

श्री ॥१२७॥

वद्भव्याः।मत्वर्थे बहुव्रीहिः।सच द्वेधा।मत्वर्थस्य संबंधस्यानेकविधत्वात्।तथाहि कश्चित्संयोगसमवायनिमित्तः कश्चित्स्वस्वामिसंबंधा
दिनिमित्तः।तत्र सर्वो बहुव्रीहिस्तद्गुणसंविज्ञान उच्यते।उत्तरस्त्वतद्गुणसंविज्ञानः।तस्यान्यपदार्थस्य गुणो वर्तिपदार्थः।सोपि कार्ये संवि
ज्ञायते यस्मिन्बहुव्रीहौ स तद्गुणसंविज्ञानमित्यभिप्रेत्याह।समस्यमानेति।समस्यमानानि यानि पदानि तेषामर्थो यत्र बहुव्रीहौ अन्यप
दार्थस्यैकदेशोवयवः सन् कार्ये स्यात्स तद्गुणसंविज्ञानसंज्ञको बहुव्रीहिः स्यादित्यर्थः।लंबकर्ण इति लंबौ कर्णौ यस्येति।यत्र तु समस्य
मानपदार्थो अन्यपदार्थानवयवभूतः कार्ये निस्सोतद्गुणसंविज्ञानो बहुव्रीहिः यथा चित्रा गावो यस्य स चित्रगुः इत्यादि॥ ॥श्रीरामाख्या
र्यस्तनुर्हरिहरसूनुनैकाग्रधीः श्रीनृसिंहाचार्योयं मौलिकां वाप्य इनयदतुलं विठ्ठलाचार्यमार्यं।तस्य श्रीपाणिनीयानुगुणसमुग
प्रक्रियाकौमुदीयव्याख्याने गात्त्वप्रसादे विशदे इह बहुव्रीहिसंज्ञः समासः॥ ॥अथ द्वंद्वसमास उच्यते॥ ॥सच द्वेधा॥ ॥इतरेतर
योगार्थः समाहारार्थश्चेति।तमुभयं वक्तुमाह॥ ॥चार्थे॥ ॥तत्रेति॥तत्र तेषु चार्थेषु मध्ये ईश्वरं गुरुं च भजस्वेति प्रकाराणां प्रकृती
नामनेकेषां साधनानामनियतक्रमयोगपद्यानां तुल्यबलानां प्रत्येकमेकया भजस्वेत्यादिकया क्रियया संबंधोयः समुच्चयः।आत्मरू
पभेदेन चीयमानता हि समुच्चयः।सच संबंधेनैव कचवसीति संबंधः समुच्चय इत्युक्तं।अनेकेषामनियतक्रमयोगपद्यानां तुल्यबलानां प
दार्थानामेकं क्रियां द्रव्यं गुणं वा प्रति अनेकत्वे समुच्चय इति यावत्।यदा त्वेकस्य प्राधान्यात्तदनुरोधेनेतरदन्वाचीयते तदान्वाचय इ
त्यभिप्रेत्याह।बटो इत्यादि।अत्र भिक्षाटनं मुख्यं गवानयनं तु तदनुरोधेन पश्चादन्वाचीयते।अत एवोक्तं क्रमेणेति।इतरेतरयोगमाह॥
अन्योन्येत्यादि।परस्परापेक्षाणां साधनानामवयवभेदानुगत एकक्रियासंबंध इतरेतरयोग इति यावत्।यथा हरिहरौ भजस्व इत्यत्र का
र्ये भजावपि परस्परसापेक्षौ तथाहि तदेकस्याप्यभावे न क्रियेति अवयवप्रधानश्चायमिति द्वित्वात् द्विवचनं।इतरेतरयोग एव ति
रोहितावयवभेदः।संहतिप्रधानः समाहार इत्यभिप्रेत्याह॥संहतिरिति।यथा छत्रोपानहमिति॥ अत्रापि कस्यांचित्क्रियायां छत्रा

प॰ क्र॰ हु॰
॥१३०॥

देः परस्परसापेक्षत्वं सेत्स्यतीति संहतिप्रधानत्वाच्चैकवचनं। यदि समुच्चयान्वाचययोरपि चार्थौ तयोरपि समासः स्यादत आह। तत्रेत्यादि।
तत्र हेतुरसामर्थ्यादिति। समुच्चये तावत्परस्परनिरपेक्षस्यैवाश्री एवेश्वरादयोन्तर्दानादिभिः संबध्यमानाः समुच्चीयंते। इत्यसामर्थ्यं अतो न
समासः। अन्वाचयेप्येकैकसापेक्षत्वेनेतरत्। यथा पूर्वोक्तउदाहरणे। तत्र हि गवानयनस्य भिक्षाटनेपेक्षा न भिक्षाटनस्य गवानयने वि
ना विनैव तदनुष्ठानात् स हि यदि गां पश्यति तामानयति नेत्तर्हि भिक्षामेवाटतीति एकव्यपेक्षारहितमिति असामर्थ्यान्न स्यात् समा
सः॥ ॥द्वंद्वे॥ ॥उपसर्जनमित्यन्वर्थत्वादप्रधानस्य संज्ञेत्युक्तं द्वंद्वे च सर्वपदानां प्राधान्यादुपसर्जनाभावादनियते प्राङ्निपाते प्राप्ते
स्यारंभः। हरिश्च हरश्चेत्यादिर्विग्रहः। हरिहराविति समासः। यावतां पदानां द्वंद्वस्तावतां यदि युगपदन्योन्यार्थाभिधानं स्यात्तर्हि द्वंद्वः स्यात्
।अत्र द्विवचनबहुवचनान्यथानुपपत्तिः प्रमाणमित्यादिमहाभाष्यादेर्ज्ञेयं। इतरेतरयोगस्य चार्थस्य समासेनैवोक्तत्वान्न चो वृत्तौ न प्र
युज्यते। यत्र द्वयोर्बहूनां वा योगो न तत्र स्यात्तदा कथं स्यादित्याशंक्याह॥ अनेकप्राप्ताविति। एकस्यार्थो जातिपदार्थाश्रयणात् लब्धः। जा
तौ हि पदार्थे एकं लक्षणं सकृत्प्रवर्तते तेनैकस्य प्राङ्निपातेन जातिः संस्कृतेति विशेषाणामनियमः तयोदाहृते। एवमुत्तरत्राप्येक
स्य नियमः शेषाणामनियमो ज्ञेयः। द्वंद्वे किं। देववदत्तगुरुः॥ ॥अजाद्यं॥ ॥घ्यंताजाद्यंतयोरिति। घ्यंतस्याजाद्यंतस्य च परस्परं समा
से विप्रतिषेधात्। अजाद्यंतं पूर्वं स्यात् घ्यंतं तु परं स्यादित्यर्थः। द्वंद्वे घीत्यस्यावकाशः। हरिहरौ। अजाद्यंतमित्यस्यावकाशः। ईशकृ
ष्णौ। इंद्राग्नी इत्यत्रोभयं प्राप्नोति। अजाद्यंतमित्येतत्स्यात् विप्रतिषेधेन॥ ॥अल्पाच्॥ ॥अत एव निपातनात् क्वार्थे तरप्। उभौ भा
वश्चुत्वाभावश्च। यदि प्रकर्षे तरप् स्यात्तदा द्वयोरेवाल्पाच्कस्य स्यात्। प्लक्षन्यग्रोधाविति। बहुषु न स्यात्। धवखदिरपलाशा इति
एतच्चेतसि कृत्वाह। अल्पाच्कमिति। ऋतुभानामिति। ऋतवो वसंतादयः। भानि अश्विन्यादीनि। ऋतूनामानुपूर्व्यं प्रागेव कृतं। न
क्षत्राणामुदयकृतं। लघ्वक्षरमिति। लघून्यक्षराण्यस्मिन्पदे तत्पूर्वं स्यादित्यर्थः॥ वर्णानामिति। एषामानुपूर्व्येण जन्मकृतं श्रुतोप

श्री॥
॥१३०॥

र्वीस्विदं। अत एव ज्ञापकात्सर्वद्वंद्वेकवद्भावो वा॥ ॥आनङ्॥ ॥होतापोतारौ विति। विद्यासंबंधवाचिनामृतंद्वंद्वस्योदाहृतिः मातापितरावि
ति। योनिसंबंधिवाचिनां। पुत्रइत्यनुवृत्तेरिति पुत्रेऽन्यतरस्यामित्यतो मंडूकप्लुतिन्यायेन पुत्रइत्यनुवृत्तेरित्यर्थः। तथा ऋतो विद्येत्यत्र ऋतइ
त्यस्याप्यनुवृत्तेरित्यपि ज्ञेयं। ततश्चायमर्थः पुत्रशब्दे परे ऋत आनङ् स्यात्। ततः पितापुत्राविति सिध्यतीति। आनङो नकारोच्चारणे उरण्रप
र इति प्राप्तरपत्वनिवृत्त्यर्थः। ऋतो द्वंद्व इति किं। पितृपितामहौ॥ ॥देवता॥ ॥अविद्यायोनिसंबंधार्थोऽन्यकारं॰तार्थमारंभः उः उद्यच्चेति। वा
योः पूर्वपदत्वे उत्तरपदत्वे सति आनङादेशस्य प्रतिषेधो वाच्य इत्यर्थः। एकहविर्भागित्व इति। ब्रह्मप्रजापती इत्यादावानङ् न। तत्र हेतुः एकहवि
र्भागित्वे द्वंद्वस्याप्रसिद्धेरिति। एकं हूयमानं हविः प्रतिसंप्रदानत्वेन संबंधित्वे वेदेऽप्रसिद्धेः प्रसिद्ध्यभावाल्लोके च द्वंद्वस्याप्रसिद्धेः सहचरितत्वया
प्रसिद्ध्यभावादित्यर्थः। अयं भावः। आनङ् ऋतो द्वंद्व इत्यतः समासविशेषप्रतिपत्त्यर्थं द्वंद्व इत्यनुवर्त्तमाने पुनर्द्वंद्वग्रहणं प्रसिद्धसाहचर्यपरिग्रहा
र्थं द्वंद्वशब्दस्यात्यंतसहचरिते लोकविख्याते युग्मे निपातनात्। द्वंद्वं रहस्यमर्यादावचनव्युत्क्रमणयज्ञपात्रप्रयोगाभिव्यक्तिष्विति सूत्रे कृतं। ततश्च ये
लोके प्रसिद्धसाहचर्याः वेदे च एकहविः प्रतिसंप्रदानत्वेन संबंधितया निर्दिष्टाः एकत्र मंत्रे इंद्रावरुणाभ्यां छागे। व निर्वपेदित्यादौ तेषामिह ग्र
हणं भवति। ननु ब्रह्मप्रजापती शिववैश्रवणावित्यादीनां तेषां लोके साहचर्यप्रसिद्ध्यभावात्। वेदे चैकहविर्भागित्वेनानिर्देशादिति॥ ॥ईदग्नेः॥
आनङोऽपवाद ईकारः। तकार उच्चारणार्थः। देवताद्वंद्व इत्येव। अग्निसोमौ माणवकौ॥ ॥अग्नेः स्तुत्॥ ॥सात्पदाद्योरिति। षत्वनिषेधप्राप्तेव
चनं। अग्निष्टुदित्यादि। अग्निः स्तूयते यत्र सोऽग्निष्टुत् क्रतुविशेषः। अग्नीनां स्तोमोऽग्निष्टोम इति सोमयागे आद्या संस्था। अग्निषोमाविति
। देवताद्वंद्वः। अग्निसोमौ माणवकाविति। अदेवताद्वंद्वत्वान्नेत्वं॥ ॥इत्॥ ॥देवताद्वंद्व इत्यनुवर्त्तते। सोमवरुणयोरिति निवृत्तं। वृद्धिशब्देना
त्र साहचर्यात् कृतवृद्धिरुत्तरपदमुच्यते। अत्रापि तकार उच्चारणार्थः। अग्निमारुतमित्यादि। सास्य देवतेत्यण्। देवताद्वंद्वे चेत्युभयपदवृद्धिः। आ
ग्निवारुणीमिति। पूर्ववदणा ङीप्। विष्णौ नेति। अकृतवृद्धौ विष्णुशब्दे परपदे ईकारादेशो नेति वक्तव्यमित्यर्थः॥ ॥दिवः॥ ॥दिव इत्यस्य द्यावित्यय

प्र॰प्र॰सु॰ ॥१२३॥ मात्देशः। देवताद्वंद्वे उत्तरपदे। स्पष्टत्वाद्व्याख्येन्द्वे॥ ॥दिवसश्च पृथिव्यां॥ ॥पृथिव्यामुत्तरपदे देवताद्वंद्वे दिवो दिवसादेशः स्यात्। द्यावा चात् दिवस्
पृथिव्यौ। द्यौ द्यावा पृथिव्यौ। अकारोच्चारणं सकारस्याविकारप्रतिपत्त्यर्थं। तेन रुत्वादीनि न। कथं द्यावा विदस्मै पृथिव्यौ नमे ते इति कार्ये
च यत्नः॥ ॥उषासोषसः॥ ॥उषस उषासादेशः स्यात् देवताद्वंद्वे उत्तरपदे परे। उषश्च नक्तं च। उषासानक्तं॥ ॥मातर॥ ॥उदीचामेतेन मातृ
शब्दस्यारङादेशो निपात्यते॥ ॥द्वंद्वात्॥ ॥स्त्रीस्रजमित्यादौ स्त्री च स्रक् च तयोः समाहार इत्यादयो विग्रहा ज्ञेयाः॥ ॥वृद्धो॥ ॥अत्र वृद्धिश
ब्देन अपत्यमंतर्हितं वृद्धमिति। पूर्वाचार्यैः परिभाषितं पौत्राद्यपत्यमित्युच्यते। तथा पुत्रशब्देन जीवति तु वंश्ये युवेति। परिभाषितं चतुर्था
द्यपत्यमित्युच्यते। सहयेः गोत्रतीयाय यूनेति। तदिति हि वृद्धो यूनेति निर्देशः। लक्षणशब्दो निमित्तवाची। चेदिति यद्यर्थे एवकारोवधारणे वि
शेषाच्चैरूप्यं। इत्येतत्सर्वं चेतसि कृत्वाह यूना सह वचन इत्यादि। गार्ग्यश्चेत्यादि। गर्गशब्दात्। गर्गादिभ्यो यञिति गोत्रे यञ्। युवापत्ये य
ञिञोश्चेति फक्। प्रकरणादिनात्र युवार्थो गम्यते। एवकारः किं। भागवित्तश्च। भागवित्तिकश्च। भागवित्ति भागवित्तिकौ। अत्र कुत्सा सौवी
रत्वं च भागवित्तिकेस्यान्यो विशेषः। गोत्रापत्ये भागवित्तिशब्दात् अत इञ्। यूनि तु वृद्धाट्ठक् सौवीरेषु बहुलमिति कुत्सायां ठक्॥ ॥स्त्रीपुंव श्री॥ ॥१२३॥
त्॥ ॥वृद्धो यूनेति सर्वमनुवर्तते इत्यभिप्रेत्याह॥ ॥यूने त्यादि॥ ॥साच्चेति स्त्री परामृश्यते स्त्र्यर्थः॥ पुमर्थवत्स्यादित्यर्थः॥ ॥पुमान्॥ ॥
अत्र वृद्धो यूनेति निवृत्तं। तल्लक्षणश्चेदेव विशेष इत्यनुवर्तते इत्यभिप्रेत्याह। स्त्रिये त्यादि। पुमानिति किं॥ प्राक् च प्राची च प्राकुप्राच्यौ॥ प्रागित्य
यमलिंगोव्ययत्वात्। नपुंसकं। अनपुंसकेनेति किं॥ शुक्लं च शुक्लं च शुक्लं च शुक्लानि॥ ननु चात्र सरूपाणामित्येकशेषः स्यादेवा तत्कोत्र
विशेषो नेनेकशेषेणावा। उच्यते। पद्य नेनैकशेषः स्यात्॥ एकवत्वं च स्यात्। तेन त्वेकशेषे एकवत्वं न स्यादिति विशेषः। अस्येति वचनं। अस्ये
वैकशेषस्यैकत्वं यथा स्यादुत्तरत्र मा भूदिति। अन्यथोत्तरत्राप्येकवदिति स्यादनुवृत्तिः स्यात्। ननु चास्वरितत्वात् देवस्का न स्यात्। सत्यं।
तदेवानेन विस्पष्टी क्रियते। एवकारो नानुवर्तते। तेन हिमं च हिमा नी च हिमहिमान्यो इत्यत्र न। महत्त्वस्याविशेषस्य सत्वात्॥ ॥पिता॥ ॥

मातापितराविति स्त्र्यो माता गौरीयसीति। पितुर्द्दशगुणं माता गौरवेणातिरिच्यत इति च मातुरभ्यर्हितत्वात्पूर्वनिपातः॥ आनङ्। श्वश्रूश्वशुरः। श्व
श्रूश्च श्वशुरश्च श्वशुरौ चेति। श्वश्रूर्देवजपत्नी च मातृतुल्याः प्रकीर्तिताः। इति श्वश्र्वा अभ्यर्हितत्वात्पूर्वनिपातः॥ ॥त्यदा॥ ॥सर्वग्रहणं साकल्या
र्थं। अन्यथा नपुंसकेनेति। अस्यानुवृत्तिराशंक्येत। अथ च तल्लक्षणश्चैव विशेषणमित्यस्य नित्यग्रहणं विकल्पनिवृत्त्यर्थं। त्यदादीनामिति परत्वं
गणपाठापेक्षं ज्ञेयं॥ ॥ग्राम्य॥ ग्रामे भवा ग्राम्याः॥ अतरुणग्रहणं सामर्थ्यात्पशुविशेषणं। इमा इत्यनुप्रयोगः स्त्रीत्वाभिव्यक्तये॥ अनेकश
फा इति। अनेकशफेष्विति यावत्॥ ॥श्री॥ ॥श्रीरामाचार्यसूनुर्हरिहरतनुजन्तैकाग्रधीः॥ श्रीनृसिंहाचार्यायत्पाणिकां प्राप्य जनयदतुलं वि
ठ्ठलाचार्य आर्यः॥ तस्य श्रीपाणिनीयाद्यनुगुणसुगुणप्रक्रियाकौमुदीयव्याख्यानेस्मिन्प्रसादे कृतविशदमले द्वंद्वसंज्ञः समासः॥ ॥श्री॥
॥ ॥अथ सर्वसमाससाधारणान्समासांतान्वक्तुं सर्वसमाससाधारणीं प्रक्रियां चाह॥ ॥ऋक्पू॥ ॥धुर् पदवाक्येन संबंधोस्तीति नेत्येषामतः
सामर्थ्याद्भनस्य इत्येतस्या एव विशेषणं न ऋगादीनामित्यभिप्रेत्याह। धुरस्त्वनक्ष इति अक्ष इति षष्ठ्यर्थे सप्तमी। सुव्यत्ययेन तत्सम्बन्धायम
र्थः। अक्षसंबंधिनी या धूस्तदंतस्य नेति। एवं च यदग्रे उदाहरिष्यति। अक्षस्तु अक्षधूः दृढधूः इत्येतद्द्वयमप्युपपन्नं स्यात्। अक्षस्य वाच्य
त्वे पूर्वपदस्यैवेष्यते धुरस्तत्संबंधित्वात्। अर्द्धर्च्च इति। ऋचोर्द्धं। अर्द्धं नपुंसकमिति समासः। अर्द्धर्चाः पुंसि चेति पुंस्त्वं। अर्द्धर्च्चे स्यादि। अविद्यमाना
ऋचो यस्येति विग्रहः। तयोः कं। अनृचो माणवो ब्रह्मचारी च बह्वृचः स्वरणाख्ययोरिति॥ ॥विष्णुपुर इति॥ ॥षष्ठीतत्पुरुषः॥ विमलापमिति बहुव्री
हिः॥ ॥दृष्टांतः॥ ॥अंतरीपमित्यादि। अंतर्गता आपो यस्मिन्। प्रतिकूलं गता आपोस्मिन् संगता आपोस्मिन्निति विग्रहाः। समीप इति। समासे
गता वा आपोस्मिन्नपुंस्त्वं क्लीबत्वं कालः॥ अवर्णादिति। तयोः कं महाभाष्ये। अपर आह॥ ईत्वमनवर्णादिति वक्तव्यमिति। प्रापमित्यादि। प्रगता
आपोस्मिन्। परागता आपोस्मिन्निति विग्रहे अत्रोपसर्गग्रहणं प्रादुपलक्षणार्थं। अपशब्दं प्रतिक्रियायोगाभावात्॥ ॥ऊदनो॥ ॥अनू
प इति। अनुगता आपो यस्मिन्निति अनूपः। ऊदिति दीर्घोच्चारणमवग्रहेपि दीर्घश्रवणार्थं। अनुरूपः। अनुरूप इति अनुरूपमिति च वक्तव्यं॥

प्र॰ प्र॰ तु ॥१२४॥ न्रूपः। स्रूपः। सूपः। सखिपदी थावि-निर्द्वंद्वः। रम्यपथ इति बहुव्रीहिः। महापथ इति कर्मधारयः। दक्षिणा पथ इति। दक्षिणास्यां पंथाः॥ आका

रान्तोपदक्षिणा शब्दोस्ति आपं तस्य लुक् सर्वनाम्नो वृत्तिमात्रे पुंवद्भाव इति पुंवत्त्वेन आत्वं तथा ज्ञेः प्रदर्शि। आकारान्तेन दक्षिणा शब्देन समासो यथेति। चतुष्प

थमिति। चतुष्पथं। समाहारः। पात्रादित्वात् स्त्रीत्वनिषेधः। उपपथमित्यव्ययीभावः। अनुप्रति साममित्यादि। प्रतिगतं साम। प्रतिगतं सामा चेति वा विग्र

हः। एवमनुसाम। दिषु प्रादिसमासस्तत्पुरुषो बहुव्रीहिर्वा ज्ञेयः। कृष्णभूम इत्यादि तथोक्तं। कृष्णोदक्पांडुसंख्यापूर्वाया भूमेरच्। प्रत्ययः स्मृतः। गोदावर्याश्च न

द्याश्च संख्याया उत्तरे यदीति। संख्योत्तरत्वे भूमेरपीष्यते तथा द्विभूम इति कृता। द्विभूम इत्यादि। कृष्णभूम इत्यादयो बहुव्रीहयः। पंचनदमित्यादि

॥ समाहारे नदी त्रिस्रोत्यव्ययीभावः। अन्यत्रापीष्यत इति। अच इति योगविभागादिति भावः। पद्मनाभ इत्यादि। पद्मं नाभौ यस्य ऊर्णनाभो यदीर्घो

रात्रिः। वर्षासु रात्रिरिति विग्रहः। पात्र्या ज्ञाहाः पुंसीति पुंस्त्वे। अक्ष्णो। चक्षुः पर्यायो दर्शनशब्दः प्राण्यंगवाची हाश्रो। यत इत्यभिप्रेत्याह। अचक्षुः प

र्यायादिति। गवामक्षीवेति। अक्षिशब्दो रंध्रवाची। अचतुरेत्यादि। ग्रंथविस्तरभयात् सूत्रमपठित्वैव तदर्थमुक्तोदाहरति। नन्तु सूत्रे। अचतुरविच

तुरसुचतुरस्त्रीपुंसधेन्वनडुहर्क्सामवाङ्मनसाक्षिभ्रुवदारगवोर्वष्ठीवपदष्ठीवनक्तंदिवरात्रिंदिवाहर्दिवसरजसनिःश्रेयसपुरुषायुषद्व्या ॥ऋ॥ ॥१२४॥

युषत्र्यायुषर्ग्यजुषजातोक्षमहोक्षवृद्धोक्षउपशुनगोष्ठश्वाः। अत्रसूत्रे निपातितानां बहुव्रीहिरेव कचित् द्वंद्व एवेत्यादि समासनियमस्तिलोपादिकं

च निपातनादेव ज्ञेयमित्यभिप्रेत्याह। आद्यास्त्रय इत्यादि। तानेवोदाहरति अचतुर इत्यादि। विगतानि चत्वार्यस्य विचतुरः। शोभनानि चत्वार्य

स्य सुचतुरः। सर्वस्य चास्य सावधारणत्वात्। बहुव्रीहय एवेति बहुव्रीहिनियमात्तत्पुरुषादौ न स्यात्। न चत्वारोऽचत्वार इत्यादौ। त्रिचतुरा इत्यादि।

त्रयो वा चत्वारो वा त्रिचतुराः। चतुर्णां समीप उपचतुराः। संख्ययाव्ययेति च बहुव्रीहिः। बहुव्रीहौ संख्येये यदिति। उपविंशत्यादेरचो विधिः। नन्वितिनेऽप्यस्त्रि

यः। परस्परं का दश द्वंद्वा एवानियमादिह तत्पुरुषे न। स्त्रियाः पुमान्। स्त्रीपुमान्। निपातनाद् द्विलोप इति। अष्ठीवत् शब्दस्येति शेषः। ननु वाह्ने दिवमित्य

चन पर्याययोर्द्वंद्व इत्याशंक्य। वीप्सायां द्वंद्वो निपात्यते इत्यभिप्रेत्याह॥ अहन्यहनीत्यर्थ इति। रजंसेत्यादि॥ तेन बहुव्रीहिणा सह रजसा। सरजः पंक

उरुमिति। निश्चितमित्यादि। कर्मधारयनियमात् निश्चितं श्रेयो यस्येति निश्श्रेयसा चतुरा नित्य चबहुव्रीहौ न। पुरुषस्य आयुरित्यादि। तत्पुरुषनियमात्पु
रुषश्चायुश्च पुरुषायुषी इति द्वंद्वेन। तत इति। ततः परौ द्वौ द्विगुरेवेत्यर्थः॥ द्व्यायुषमित्यादि। द्वे आयुषी समाहृते इह न। द्वयोरायुषोरायुः द्व्यायुरिति॥
ऋग्यजुषमिति। ऋक् च यजुश्च। द्वंद्वनियमात् इह न। ऋगेव यजुरस्य इत्ययं यजुरुत्तरार्धां तत्र इत्यादि। कर्मधारयनियमाद्बहुव्रीहौ न। जातोक्षा ब्र
ह्मणः शुनः समीपमिति। विग्रहेणाव्ययीभावमेव निदर्शयति इह न। गोष्ठस्य श्वा गोष्ठश्वा॥ ॥ ब्रह्म॥ ॥ अन्वत्यपराद्धे चः शब्दादच्॥ ब्रह्मवर्चसं। हस्तिव
र्चसमिति षष्टितत्पुरुषे। पल्येति। अव्ययपरादपि वर्चः शब्दादच्स्यादिति वाच्यमित्यर्थः। अववर्चसं। अवतमसमित्यादि। अवहीनं तमसा। अवहीनंत
म इति प्रादिसमासः। एवं संगतं वा नमः। अंधं करोतीत्यंधं तमः। अंधतमसं। श्वसः। श्वसः पराश्वामाश्वामसं। श्वावसीयसमित्यादि श्वोवसीयः श्रेयः
इति विग्रहे मयूरव्यंसकादित्वात्समासः। श्रुत्वार्थाविति। तौ समासांतौ तौ शब्दौ श्रुत्वार्थौ श्रुत्वा च कौ शब्दशक्तिस्वाभाव्यान्न इति भावः। तथोक्तं पाणि
नीयमतदर्पणे। अर्थपरं परस्या चश्वःशब्दः कालवाच्यपि। अभिधत्ते स्वभावेन तेनमौ मंगलार्थकाविति। अन्वच्चारह्यः परादह्नसोचि। अनुरहसमि
त्यादि। अनुगतं रहः अवगतं रहः इति तत्पुरुषः। अनुगतं रहो अवतगतं रहो अवेति बहुव्रीहिर्वा। तमरहसमिति तमं च तद्रहश्च। तथोक्तं पाणिनीयम
तदर्पणे। परेणानधिगम्यं हि यद्गुह्यं वाङ्कितं सवत्। तमं च तद्रहश्चेति तत्तमरहसं विदुरिति। प्रतेः। उरसः सप्तमीस्थात्। प्रतिगतमुरः प्रत्युरः। अनुगवं। अनुगव
मिति। गामन्वायतो दैर्घ्येणान्वितं शकटमेव मुच्यते। अन्यत्र गवां पश्चादनामीप्यं वा। अनुगुरुत्येव। स्यष्टवा स्यत्। द्विस्तावा त्रिस्तावा वेदिः। वेद्याः
वा व्यामे तो निपात्येते। यावती प्रकृतौ वेदिस्ततो द्विगुणा स्त्री त्रिगुणा वा क्रत्वां विकृतौ यावेदिस्तस्यामेतन्निपातानं॥ अष्टपिष्टे उपसमासांनिपा
त्येते। द्विःतावती द्विस्तावा। त्रिःतावती त्रिस्तावा। वेदिः किं। द्विस्तावती त्रिस्तावती रज्जुः। उपसर्गात्। अस्माद्ध्वनो च। प्रगत इत्यादि। प्रादिसमासः।
उपसर्गग्रहणं प्रादयुपसर्गलक्षणं पर्यं क्रियायोगाभावात् उपसर्गात्वं किं। परमाध्वा। नवा स्वति भ्याममेविति। एतावर्थाभ्यां स्वति भ्यामेव परस्य समासां
तो निषिध्यते इति वाच्यमित्यर्थः। बहुव्रीहिविति। एतच्च प्राक् बहुव्रीहिग्रहणं कर्तव्यमिति वृत्तिकाराल्लभ्यते। किमः। किंराजेति। निंदितो राजेति विग्र
हे किंक्षेपइति समासः। क्षेपे किं। कस्य गौः किंगवः। नत्र लक्षणप्रतिपदोक्तपरिभाषया किं क्षेपइति प्रतिपदोक्तः किं समासो गृह्यते इति क्षेपग्र

प्र·प्र·सु
॥१२५॥

हणेऽनर्थमितिचेन्नैवदोषः। अत्रैवपरिगणनादन्यानोपतिष्ठत इतिज्ञापनार्थत्वात्तत्रेपग्रहणस्य। तेनबहुव्रीहावपिनिषेधःस्यात्। कुत्सिताऽश्वस्यकिंच
प्राकर्दमेति। नञ्। अराजेत्यादौतत्पुरुषे। अनेनचइत्यादौबहुव्रीहौ। पथः। अपथमिति। अपथंनपुंसकमिति। समासः। अपथवर्त्तिनेडस्यर्णान्त्वा
वेश्यपी। आवः। लुंपेदित्यादि। अस्त्यमितिशेषः। तेनावश्यंशब्दस्य कृते कृत्यप्रत्ययांतेपरेमलोपः। कामसमनसोः परयोस्तुमन्प्रत्ययस्यार्थत्वंलुंप सो
त। हितततशब्दयोःपरयोःसंशब्दस्यौत्त्वंवा। लुंपेत्। मांसस्य ह्रस्वो वा ल्यंथ्युवेत्। तादृशुपचघ्रपाकेइत्यस्मिन्धातौपरेकिंविशिष्टे। ल्युट्घञोःपरतोयः॥
पचतस्मिन्नित्यर्थः। अवश्यसेव्यइति। अवश्यंसेव्यः। गंतुंकामोऽस्य। गंतुंमनोऽस्य॥ सम्यक्हितः। सम्यक्कृतः। मांसस्यपचनं। मांसस्यपाकइतिवि
ग्रहः। स्त्रियाः। उदकस्योदः। उदकस्योदः। उदमेघोनामयस्यौदमेघिःपुत्रः। उदवाहोनामयस्यौदवाहिःपुत्रः। उमेघइतिउदकस्यमेघः। अथ
वा। उदकेऽस्वर्णोमेघ उदमेघः। शाकपार्थिवादित्वा उत्तरपदलोपीतत्पुरुषः। उदवाहइतिउदकंवहतीतिकर्मण्यण्। उत्तरपदस्यापीति। उत्त
रपदत्वेतस्यापि उदकशब्दस्योदादेशःस्यादितिवक्ष्यमित्यर्थः। लोहितोदः। क्षीरोदती इतिबहुव्रीहौ॥ ॥पेष्यं॥ ॥असंज्ञार्थंवचनं। उदये
षेपिनष्टीति। उदकेनपिष्ट्वा। एणमुल्तेतइति। उदपेषंपिनष्टीत्ययंस्नेहनेपिषइतिकर्मण्युपधिकरणेचेतिविहितोनकिंप्रत्ययांतइत्यर्थः॥ ॥एकः॥ ॥अत्रे श्री॥
कशब्दे। सहायवाचीएकोऽसहायतुल्यजातीयेनानेतरेणहलादिनाऽयुतोऽसंयुक्तइतियावदितिप्रत्यभिज्ञेत्याह। असंयुक्तेहलादाविति॥उ ॥१२५॥
दकादिनाद्रव्येणानर्थ्यापरःपूरयितव्यउच्यते॥ मंथौ॥ द्रवद्रव्यसंस्कृतःसक्तवोमंथः। तत्रमंथशब्देयदासुसन्नःतदोदकेनमंथइतितृतीय
तियोगविभागात्समासः। अथवासुसन्नामथ्यतेमंथइतिनदाकर्त्तृकरणेइति। आदिना। उदौदनः। उदकौदनः। उदकवज्रः। षष्ठीतत्पुरुषो। उद
भारः। उदकभारः। उदहारः। उदकहारः। कर्मण्यण्। उपपदसमासः। उदवीवधः। उदकविवधः। षष्ठीसमासः। इकः। ग्रामंनयतीतिग्रामणीस्तस्य
पुत्रोग्रामणिपुत्रः। गालवग्रहणंपूजार्थं। अन्यतरस्यामितिहिवर्त्तते। गार्गीपुत्रइति। यञश्चेतिगार्ग्यशब्दात्ङीप्। हलस्तद्धितस्येतियलोपः।
यरु। वरुंभावादिनामध्यपानोत्तरकस्य। श्रीकुलं। भ्रूकुलं। कोटीकृतं। वाराह्यादौ। ह्रपल्लीकृतं। अभ्रुकुंसादीनां। भ्रुकुंसादीनांतुस्यादेव। भ्रु
कुंसः। भ्रुकुंसः। भ्रुकुंसः। भ्रुकुटिः। भ्रूकुटिः। अपरेआहुः। अभ्रुकुंसादीनामित्यस्यायमर्थः। भ्रुकुंसादीनामकारःस्यादिति। भ्रुकुंसः। भ्रुकुं

टिः।ष्यङः।ष्यङंतेयद्यपिबहवोयणः।स[illegible]।तथापिनिर्दिश्यमानस्यादेशाभवंतीतिष्यङःएवसंप्रसारणं।ष्यङः।किं।यस्यापुत्रः।पुत्रपत्योःकेवलेय
रिंदंसंप्रसारणं।तदादौतदंतेचमा।कौमुदगंधीपुत्रइति।कुमुदस्येवगंधोयस्येतिबहुव्रीहिः।तत्रोपमानाच्चेतितिगंधशब्दस्येदंतादेशः।कारीषगंधेरपत्यंस्त्रीमस्यण्
तदंतस्यवस्त्रियामणिरिञोरितिष्यङ्।ततःष्यङ्।चापू।ततःषष्ठीसमासः।ततःसंप्रसारणेएवंरूपत्वेदीर्घः।ननुचाचेकोह्रस्वइतिविकल्पेनह्रस्वोऽप्रा
प्यइत्याशंक्याहव्यवस्थितविभाषयेति।नचान्यतरस्यामित्यनुवर्ततेसाचव्यवस्थितमितिभाषेति।अत्रह्रस्वोनेत्यर्थः।ष्यङःसंप्रसारणमित्यस्यव्याख्यानेनैव
व्याख्यातप्रायत्वात्स्यनेव्याख्यायते।बंधुनिबहुव्रीहौ।ष्यंतस्यसंप्रसारणंस्यात्बंधुशब्देउत्तरपदेबहुव्रीहौ।।कौमुदगंध्याबंधुरस्यकौमुदगंधीबंधुःबहु
व्रीहौकिं।कौमुदगंध्यायाःबंधुःकौमुदगंध्याबंधुः।अत्रापिपूर्ववदेवअतिकौमुदगंध्याबंधुरितिअत्रनस्यात्परमकौमुदगंधीबंधुरत्रस्यात्।तथाकौमुद
गंध्याबंधुः।कौमुदगंध्याबंधुकुलमित्यत्रनस्यात्।बंधुनीतिनपुंसकनिर्देशःशब्दरूपापेक्षया।पुंल्लिंगाभिधेयस्तुयंबंधुशब्दः।मातच्मातृकमातृषुवा।ष्य
प्रसार्योविभाषया।बहुव्रीहौवेच।कौमुदगंध्यामातास्येतिबहुव्रीहिःकृते।समादेवोपसंख्यानात्स्यकोमातच्शब्दस्यमातजादेशः।तत्रचित्त्वसामर्थ्याद्बहुव्री
हिस्वरमंतोदात्तोबाधते।मातृकमातृकशब्दयोश्चच्छेदेनग्रहणान्नच्यतश्चेतिकपिविकल्प्यते।कौमुदगंधीमातः।कौमुदगंध्यामातः।कौमुदगंधीमातृकः।कौमुद
गंध्यामातृकः।कौमुदगंधीमाता।कौमुदगंध्यामाता।एकः।अत्रानिर्दिष्टस्यानिकह्रस्वविधेरत्रप्यतिपरिभाषोपतिष्ठते।तत्रविशेषणविशेष्यभावेकामचा
रादत्राचागृह्यमाणएकशब्दोविशेष्यते।अजंतस्यैकशब्दस्यह्रस्वस्यादितिनपुंसकेह्रस्वेमाणेनचशब्देनाचएकशब्दस्याचइतिअनिष्टप्रसंगात्।तत्राजंतस्यैकशब्द
स्यह्रस्वोविधीयमानोव्यर्थःतस्यह्रस्वांतत्वात्एवेतिकृत्वाप्रातिपदिकग्रहणेलिंगविशिष्टस्यापिग्रहणमितिपरिभाषात्रोपतिष्ठते।।नत्रा।।आवंतस्यैकशब्द
स्यह्रस्वोत्रविधीयतइत्यस्योत्तरत्रैनसिकृत्वाविग्रहइति।एकस्याआवइति।यदैकशब्देनसंख्यावाचीतदेदमुदाहरणं।संख्यावाचित्वेतुत्वन्नकौर्णभावचनस्येति
पुंवत्वेनैवसिद्धं।।इष्टा।।इष्टकचितमिति।इष्टकाभिश्चितं।कर्तृकरणेकृतेतिसमासः।ईषीकतूलमितिषष्ठीसमासः।मालांभर्तुंशीलमस्यमालभा
री।।तालीलोल्लिनिः।उपपदसमासः।। ।।ज्योतिः।। ।।आदिना।।सजनपदः।।सरात्रिःसनाभिःसनामासमानाद्दः।सरूपः।सवर्णः।सवयाः।सवचनः।सबंधुः।
सपिंडेत्यादि।तयोःकमणुष्ठबाधेज्योतिर्जनपदरात्रिनाभिबंधुगंधर्पिंडलोहितकुक्षिवर्णी।ब्रह्मचारि।चरणे।सब्रह्मचारीति।समानोब्रह्मचारीसब्र

र॰प्रसु ॥२२६॥

ह्मचारी ब्रह्मवेदः। तदध्ययनाय यद्व्रतं तदपि ब्रह्म तच्चरतीति ब्रह्मचारी व्रतइति णिनिः। समानस्य स्यैव ब्रह्मणः समानत्वादित्यय यमप्यस्यार्थो भ
वति। समाने ब्रह्मणि व्रतचारि स ब्रह्मचारी।। तीर्थे।। ॥अनुवर्तिसमानस्य सः। यइति वर्णः सप्तम्या निर्दिष्टस्तेन यत्यतो ह्रस्वोरपि ग्रहणं। सतीर्
थ्यइति।। समाने तीर्थे गुरौ वासी समानतीर्थवासी। निपातत्वात् यः।। विभाषा।। सोदर्य इत्यादि। सोदराद्यतइति यः। समानो दरे शयितः। समानोदरे
शयित। ओ चोदात्तइति यत्। रूपमिति। तथा च मुग्धबोधेऽपि नामगोत्राकृतिवर्णवयोवचनबन्धुषु जातीयो दर्श्ये वेति। दृक्दृशोः। सदृगित्यादिः। समा
नमात्मना पश्यति। समानइव दृश्यतेइति वा विग्रहः। रूढिशब्दोऽयं तत्र। आवयवार्थो गृह्यते। समानान्ययोश्चेति वक्तव्यमिति कश्चवर्त्तिनो। ननु च
ग्रहणे व्यर्थेयतः समानशब्दात्परा वत्तु एतत्संस्थ दृश्ये स्यात् शंक्याह चतुरस्त्रार्थइति। इदंकिमोः ईशः सर्वादेशोऽर्थः। ईदृगित्यादि। अव्यभिदृश्यतेइदमिवप
श्यतीति वा उदाहरणे वक्ष्यतइत्यतिह्रितइतिदृश्यं। आसर्वदीर्घविधिरत्रोगुणइति पररूपबाधनार्थः। दीर्घइत्यादि। अदसइदकइति स्थितेदीर्घत्वम्
कारोनादेशः। अदसोसेर्मिति। दस्य मत्वं दीर्घस्याकारस्य दीर्घउकारः। असाविव दृश्यते अमुमिव पश्यतीति वा अमूदृक्। विष्वग्विष्वद्र्यङ्
ति। विष्वगंचतीति इत्यादि सूत्रे लक्षितः। उदित्वान्मितिनुमा संयोगान्तलोपः। क्विन्प्रत्ययस्य कुः। एवं देवानंचतीति देवद्र्यङ्। तमंचतीति तद्र्यङ्।
यमंचतीति यद्र्यङ्। अद्रिसध्र्योरन्तोदात्तत्वनिपातनं कृत्स्वरनिवृत्त्यर्थं। तत्र यणादेशे कृते उदात्तस्वरितयोर्यणः स्वरितोनुदात्तस्येति स्वरितो
स्तीति। अदसइत्यादि। तथा च वार्त्तिककारेण। अदसोद्रेः पृथङ्नुत्वं केचिदिच्छंति लत्ववत् केचिदन्त्यसदेशस्य नेत्येके सेहिदृश्यतेइति। येनेति
निषेधः क्रियते। अन्त्यधिकारेन्त्यसदेशस्येति च परिभाषा नाश्रीयते तेषां मुकयोरपि मुत्वं स्यात्। अमुमुयङिति।। यथा च लीकेरावेदनित्वं।।
येतु परिभाषामाश्रयंति तेषामन्त्यसदेशस्यैव मुत्वं। अदमुयङिति। येषां तु सदाद्यत्तविषय एव मुत्वं। तन्मते उभयत्रापि न मुत्वं। अदद्र्यङिति। ए
तदान्तार्थैः स्वमते त्वेनाद्रायुक्तो विष्वग्देवयोश्चेति। पचाद्यच्। कर्तरि। अत्रैवद्यत्र वा विघादेवयोः किं। अश्वाङ्। अश्वंचतीति। किं प्रत्युक्तं। ननु च प्रत्ययग्रहणे
व्यर्थे यतो व नाविंत्युक्ते केवलएवांचतो उत्तरपदे कार्यं लभ्यते ब्य च प्रत्यय परं हि केवलोंचतिरुत्तरपदे स्यात् लभ्यते। तद्व प्रत्ययग्रहणमत्यन्तं लाक्षणिकग्र
हणं तदादिविधिप्रतिपत्त्यर्थं। तेनातः कृकमीत्यत्र कुरलिङ्मयासमुदायग्रहेतेन तत्र्छायस्कृत अयस्कृते अयस्कारइत्यादि सिध्यति।। ॥छ॥

श्री॥ ॥२२६॥

114/6

इति

प्रक्रियाकौमुदी

111/6

रामचन्द्राचार्यप्रणीता

प्राकृतटीका

प्रसादव्याख्यासहिता ॥

व्याख्याता: रामाचार्य: अथ माधव श्री भा